वामनमहापुराणविषयानुक्रमकोशः

कुलपतेः डॉ. मण्डनमिश्रस्य प्रस्तावनया समलङ्कृतः

योजनाप्रवर्तकः सम्पादकश्च
डॉ. भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

सह-सम्पादकाः
डॉ. जानकीप्रसादद्विवेदी
डॉ. प्यारेलालपाण्डेयः
श्रीदिवाकरदीक्षितः
श्रीमनोजकुमारमिश्रः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

वामनमहापुराणविषयानुक्रमकोशः

सम्पूर्णानन्द
संस्कृत-
विश्वविद्यालयः

SARASVATĪ-BHAVANA-STUDIES
[Vol. 46]

VĀMANAMAHĀPURĀṆAVIṢAYĀNUKRAMAKOŚAḤ

[The Subject Index of Vāmana Mahāpurāṇa]

Foreword by
DR. MANDAN MISHRA
Vice-Chancellor

Prepared and Edited
by

DR. BHĀGĪRATHA PRASĀDA TRIPĀṬHĪ 'Vāgīśa Śāstrī'
Director, Research Institute
Sampurnanand Sanskrit University
Varanasi

Sub - Aditors
Dr. Janaki Prasad Dwivedi, Shri Diwakar Dixit,
Dr. Pyare Lal Pandey, Shri Manoj Kumar Mishra

VARANASI
1996

Research Publication Supervisor –
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

❑

Published by –
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002

❑

Available at –
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002

❑

First Edition –500 Copies
Price : Rs. 500.00

❑

Printed by –
Tara Printing Works
Kamachha, Varanasi - 221010

सरस्वतीभवन-अध्ययनमाला

[४६]

वामनमहापुराणविषयानुक्रमकोशः

कुलपतेः डॉ० मण्डनमिश्रस्य प्रस्तावनया समलङ्कृतः

योजनाप्रवर्तकः सम्पादकश्च

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

सह-सम्पादकाः

डॉ० जानकीप्रसादद्विवेदी, श्रीदिवाकरदीक्षितः,
डॉ० प्यारेलालपाण्डेयः, श्रीमनोजकुमारमिश्रः

२०५३ तमे वैक्रमाब्दे १९१८ तमे शकाब्दे १९९६ तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षक :—
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी।

◆

प्रकाशक :—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी - २२१ ००२

◆

प्राप्तिस्थानम् —
विक्रय-विभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी - २२१ ००२

◆

प्रथमं संस्करणम्, ५०० प्रतिरूपाणि
मूल्यम्–५०० रूप्यकाणि

◆

मुद्रक :—
तारा प्रिंटिंग वर्क्स
कमच्छा, वाराणसी–२२१ ०१०

प्रस्तावना

गगनवदनन्तं रत्नाकरवच्चातलस्पर्शि वाङ्मयं विराजते देवगवीसंस्कृतस्य। रत्नाकरगर्भनिहितानि रत्नानि ततो बहिरानाय्य भूमिष्ठानि च विधाय तद्दिव्यरुचा तत्रेयांसः प्रकामं प्रकाशं समासादयेयुरिति समभिलक्ष्य भूयांसो विपश्चिदपश्चिमाः प्रयतन्ते बहोःकालादस्यामाशायामाशान्विताः। संस्कृतवाङ्मयवारिधिं निर्मथ्य विन्नाः सुधारत्नादिसम्भृतास्तत्तदाकरग्रन्थविषयानुक्रमकोशाः संस्कृतवाङ्मयविश्वकोशाश्च सर्वजनानां महते लाभाय सम्पद्यन्ते।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य स्थापनासमनन्तरमेव तत्र स्थापितेऽनुसन्धानसंस्थाने चिन्ताप्रवृत्तेरस्या उपक्रमो विलोक्यते। अस्य विश्वविद्यालयस्य प्रथमोपकुलपतीनां **डॉ॰ आदित्यनाथझा**महोदयानां प्रेरणया सत्परामर्शेन च सम्मानितप्राध्यापकेन **म.म. मथुरानाथदीक्षितेन** संस्कृतवाङ्मयविश्वकोशयोजना प्रास्तावि तत्समक्षमितो वर्षाणां सप्तत्रिंशतः प्रागेव १९५९ तमवत्सरस्य सितम्बरमासे। तदानीं विश्वविद्यालयस्यार्थवैधुर्यं विभाव्य झामहोदयैः स्वपितृचरणानां स्वनामधन्यानां **म॰म॰ डॉ॰ गङ्गानाथझा**महोदयानामेतज्जातीयकं प्रक्रान्तपूर्णं कोशकार्यं संस्मृत्य तत्स्मृतौ स्वपक्षतो मुद्राणामष्टसाहस्री समर्पयितुं संकल्पिता संस्कृतवाङ्मयविश्वकोशसंकलनकार्यसंचालनाय। तदर्थं तैरेका विद्वत्समितिरपि संघटिता तदानीन्तनानामनुसन्धानसंस्थानसंचालकानां पण्डितप्रवराणां **श्रीमत्क्षेत्रेशचन्द्रचट्टोपाध्यायानां** निदेशकत्वे। श्रीमद्दीक्षितनिर्देशने संचाल्यमानोऽसावनुसन्धानसंस्थानगतः संस्कृतवाङ्मयविश्वकोशविभागो वर्षचतुष्टयं यावत् प्रावर्तिष्ट स्वाभीष्टं च समपीपदत्। वर्षद्वयाभ्यन्तर एव श्रीमद्दीक्षितसम्पादिता तत्कार्यनिदर्शनस्वरूपैका **'अत्रिनिर्वचनम्'** इत्याख्या पुस्तिका प्राकाश्यमानीताऽनुसन्धानसंस्थानेन। तदनु वित्तवैकल्याद् विभागोऽसावुपरतः।

सप्तत्यधिकैकोनविंशतिशततमात् ख्रीस्ताब्दादारभ्य तावदितोऽपि परिष्कृततरस्यानुसन्धानकार्यजातस्य प्रवृत्तयो गतिमवाप्नुवंस्तदानीन्तनानामनुसन्धानसंस्थाननिदेशकपदमलङ्कुर्वाणानां 'वागीश शास्त्री' इत्युपनामधेयभाजां **डॉ॰ भागीरथप्रसादत्रिपाठि**महोदयानां सत्संकल्पेन सन्तताध्यवसायेन चेति विज्ञाय मोमुदीति मानसमास्माकीनम्। सर्वेषामाकरग्रन्थानां विषयानुक्रमकोशाः प्रस्तूयेरन्निति तदीयमासीच्चिकीर्षितम्। परञ्चादौ भारतीयसंस्कृतिविश्वकोशभूतानि महापुराणानि सर्वजनचित्ताकर्षकतया विषयीकृत्य प्रवृत्तिस्तदीया विभाव्यते।

विशिष्टवैदिकविषयविवरणसूची काचन मैकडानल-कीथयोः सतताध्यवसायेन १९१२ तमे ख्रीस्ताब्दे Vedic Index इति नाम्ना सुधीजनसमक्षमुपेता पाश्चात्त्यविपश्चिज्जनानुसन्धानविभाविता। तादृश्यो विषयविवरणसूच्यो विहितपूर्वगवेषणामेव विषयीकुर्वन्ति, न तु समग्राऽऽकरग्रन्थान्। पारम्परिक-शिक्षाप्राप्ताः शास्त्रनदीष्णा दोषज्ञा गवेषकजिज्ञासुजनोपकारकाणां वेदशास्त्राद्यखिलाऽऽकर-

ग्रन्थानां विषयानुक्रमकोशान् साधीयो यथा सम्पादयितुमर्हन्ति, नाधुनिकास्तथेति प्रस्तुतमिदं **वामनमहापुराणविषयानुक्रमकोशकार्यं** प्रमाणयतितराम्।

श्रीवागीशशास्त्रिमहोदया अनुसन्धानसंस्थानसञ्चालकत्वेनास्य विश्वविद्यालयस्य "**सास्वती सुषमा**" अनुसन्धानपत्रिकायाः सम्पादनम्, अन्येषां शोधच्छात्राणां शोधयोजनानां च मार्गदर्शनं विधाय विश्वविद्यालयमिममुपकृतवन्तः, तेषां प्रशंसनीयेषु कार्येष्विदं प्रकाशनं विशिष्टं माहात्म्यं बिभर्त्ति। अस्य सम्पादने **डॉ॰ जानकीप्रसादद्विवेदि-श्रीदिवाकरदीक्षित-डॉ॰ प्यारेलालपाण्डेय-श्रीमनोजकुमारमिश्रैश्च** श्रीवागीशशास्त्रिणां साहाय्यमाचरितम्। अतः प्रकाशनस्यास्य पूर्तिप्रसङ्गे डॉ॰ जानकीप्रसादद्विवेदि-श्रीदिवाकरदीक्षित-डॉ॰ प्यारेलालपाण्डेय-श्रीमनोजकुमारमिश्र- सहितेभ्यः श्रीवागीशशास्त्रिभ्यः स्वकीयं कृतज्ञताञ्जलिम्, प्रकाशनाधिकारिणे **डॉ॰ हरिश्चन्द्रमणित्रिपाठिने,** ग्रन्थस्यास्य मुद्रकाय तारायन्त्रालयसञ्चालकाय **श्रीरविप्रकाशपण्ड्या**महोदयाय च साधुवादान् समर्पयन् ग्रन्थमिमं भवानीजानिं काशीविश्वेश्वरं समर्पयामि।

वाराणसी
गुरुपूर्णिमा,
वि॰ सं॰ २०५३
(३०.७.१९९६ ख्रैस्ताब्दः)

मण्डनमिश्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

सम्पादकीयम्

अनुसन्धानसंस्थाननिदेशकपदभारप्रतिश्रुतिसमनन्तरमेवाचिचिन्तं किमप्यनुरूपमनुसन्धानकार्यजातं संहत्य प्रवर्त्यतामिति। सप्तत्युत्तरैकोनविंशतिशततमात् ख्रीस्ताब्दादारभ्य संभूय तत्कार्यप्रक्रान्तौ निदर्शनार्थमादावाद्यमाधवाचार्यो मयकेह दिशि सम्प्रेरितः। प्रकाशनाधिकारिकार्यभारधूर्वहोऽपि पुराणरुचिरसौ रुचिरं समग्रहीद् गरुडपुराणविषयानुक्रमणिकाम्। सा प्रथितायां 'सारस्वती सुषमा' इत्याख्यायां विश्वविद्यालयीयगवेषणापत्रिकायां क्रमशः प्रकाशयितुमुपक्रान्ताऽपि। यद्यप्यनूनकानामाकरग्रन्थानां विषयानुक्रमणिकाप्रकल्पनेन भारतीयसंस्कृतितत्त्वबुभुत्सूनां गवेषकाणां महानुपकारः सम्भाव्यत इत्यखिलवाङ्मयरत्नविचयाय मन्मानसपद्यामारूढा तत्प्रक्लृप्तिस्तथापि स्थूणानिखननन्यायेन सामान्यजननिवहशुभंयूनां पुराणानां महिमा गरीयानृजीयाननुच्चावचश्च तत्सुरगवीवचोविन्यास· इति विभावं विभावमिदम्प्रथमतया पुराणान्येव विषयानुक्रमणिकाकोशविषयीकृतानि मयका।

पौराणिकं वाङ्मयं खलु विद्योतते भारतीयविद्यासस्कृतीनां महदावपनं नाम विश्वकोशः। इह तावद् विष्टपसृष्टिस्थितिलयप्रतिपादनेन सममेव तीर्थभूगोलभुवनकोशविवरणम्, विविधविद्या-(वेदवेदाङ्गोपवेदशास्त्रदर्शन)- कलासम्प्रदायनिरूपणम्, आचारोपासनाकर्मकाण्डप्रभृतीनामुपबृंहणम्, युगमन्वन्तरकल्पादिविश्लेषणम्, स्तुतिसंवादनीतिगीतोपदेशादिसंकीर्तनम्, वंशानुचरितनिर्वचनलक्षणगणनादिनानाविधविषयवर्णनस्य च सरलोपन्यासप्राज्यता कस्य स्वान्तनिशान्तं स्वज्ञानालोकमयूखनिकरेण नोद्भासयेत्? यद्यपि राष्ट्रान्तरीयनीलनद्या उद्गमस्थलीपरीष्टिरपारि विधातुं शरणीकृत्य पौराणिकं वाङ्मयमेवेति विदन्त्येव विदितवेदितव्याः कोविदा विश्वजनीनभूगोलेतिहासादिविषयतां पुराणानाम्, तथापि महापुराणोपपुराणनिकररत्नाकरोदरनिगूहितानूनकविषयरत्नान्यद्यापि तावत् समग्रतयाऽनाविर्भावितानीत्यनावारमनावारं तज्जिज्ञासूनां पुरस्तात् तत्परिवेषणार्थमयमायास आस्माकीनो विलसति प्रवर्तमानो महापुराणविषयानुक्रमकोशयोजनाविभावितः।

प्राक्तनीषु महापुराणविषयानुक्रमणिकासु ये प्रयासा विहितपूर्वास्तेषु केचिदेकाङ्गिनः, अपरे त्वनुपेतसाकल्याः, इतरे सूक्ष्मेतरविषयविचयनमात्रपराः, अन्ये च भूरिविभ्रमसंभृता आहोस्विदविस्पष्टविवरणा एव निभाल्यन्ते। ग्रन्थप्रचिकाशयिषास्पर्धयामुताहो लघुयोजनापुपूरयिषायां मन्ये तावदुद्गाढं सत्वरं सावेशं वा संवृत्ता प्राक्तनानां विषयानुक्रमणिकाग्रन्थानां रचना। (१) प्रथमं तावत् प्रकाशितानां महापुराणानामादाव-

ध्यायक्रमोपरोधिन्यो विषयसूच्य उपनद्धा विलोक्यन्ते। काश्चन रामनगरस्थ-काशिराजन्यासप्रकाशितायां 'पुराणम्' इत्याख्यपत्रिकायां मुद्रिताः, (२) एकास्तु स्वतन्त्रग्रन्थरूपतया सन्ति प्रकाशिताः, तासां विवरणं यथाक्रमं प्रस्तूयमानमवधार्यताम्—

१. पुराणानामादावध्यायक्रमानुसारिण्यो विषयानुक्रमणिकाः। यथा—

अग्निपुराणम्— सरस्वतीप्रेस, कलकत्ता, १८८२ ई०।
लिङ्गपुराणम्— नूतन वाल्मीकि प्रेस, कलकत्ता, १८८५ ई।
लिङ्गपुराणम्— चौखम्बा, वाराणसी १९६६ ई०।
कूर्मपुराणम्— बिब्लिओथेका इण्डिका, कलकत्ता, १८८६ ई०।
पद्मपुराणम्— आनन्दाश्रमग्रन्थावली, पूना, १८९४ ई०।
ब्रह्मपुराणम्— आनन्दाश्रमग्रन्थावली, पूना, १८९५ ई०।
वायुपुराणम्— श्रीवेङ्कटेश्वरमुद्रणालय, बम्बई, १८९६ ई०।
श्रीमद्भागवतपुराणम्— श्रीवेङ्कटेश्वरमुद्रणालय, बम्बई, १९०० ई०।
ब्रह्मवैवर्तपुराणम्— श्रीवेङ्कटेश्वरमुद्रणालय, बम्बई, १९०९ ई०।

सरस्वतीप्रेस— श्रीवेङ्कटेश्वरमुद्रणालयादिप्रकाशितानां समेषां पुराणादिग्रन्थानामादावध्यायक्रमानुसारिण्यः स्थूलविषयसूच्यः सन्दृब्धाश्चकासति। हिन्दुत्वाख्ये ग्रन्थे त्वेकत्रैव तासां सर्वासां समाहाराय साधु प्रयत्तम्।

२. द्वितीये प्रकल्पे तावत् तादृग्विधा विषयानुक्रमणिकाग्रन्था विराजन्ते, येष्वक्षरानुक्रममनुरुध्य विषयाणां शब्दाः सज्जीक्रियन्ते। तासु प्रथन्ते—

(क) पुराण इण्डेक्स—वी० आर्० आर्० दीक्षितार, मद्रासविश्वविद्यालय, मद्रास, प्रथमभागः १९५१ ई०, द्वितीयभागः १९५२ ई०, तृतीयभागश्च १९९५ ई०।

अस्यां पुराणविषयसूच्यां तावत् पञ्चान्येव महापुराणानि सूचीविषयीकृतानि। मैक्डानल-कीथविभावितस्य वैदिक इण्डेक्स (Vedic Index) इति ग्रन्थस्य नामधेयसाम्यं विहाय विषयसंकलने तूभयोर्निकामं वैषम्यं निभाल्यते। अस्मदीयस्य प्रकृतमहापुराणविषयानुक्रमकोशस्य सरण्यनुसरणतौल्ये कर्मप्रवृत्त्या त्वेकैकं महापुराणं खण्डद्वयेन खण्डत्रयेण वा परिपूर्तिमुपायास्यत्।

(ख) पुराणविषयसमनुक्रमणिका—यशपाल टण्डन, विश्वेश्वरानन्दशोधसंस्थान, होशियारपुर, १९५२ ई०

हरिवंशपुराणमविरहय्य महापुराणानामियं विषयानुक्रमणिका रायलाऽऽकृतिकेषु चतुःपञ्चाशत्पृष्ठेष्वेव परिपूर्तिमुपेता। एतेनैवास्या मूल्यवत्ता शक्यते विज्ञातुम्। इयं खलु विषयसन्दर्भाणामपरिपूर्णतया दुर्बोधतया च प्रकामं सम्परिष्वक्ता विषीदति।

(ग) पुराणविषयानुक्रमणी (राजनीतिभागात्मिका)—डॉ० राजबली पाण्डेय, काशीहिन्दूविश्वविद्यालय, वाराणसी, १९५७ ई०।

इयं विषयानुक्रमणी केवलं राजनीतिविषयमवलम्ब्य प्रवर्तते। तम्मादिह विषयविशेषोपन्यास एवाभ्युपगत इत्येतदीया सिध्यत्येकाङ्गिता न तु समग्रता। द्वितीयतः, घटनासूचकविषयपरिचयावसाने तावदुल्लिख्यते तत्तदाकरग्रन्थनिर्देश इत्येतस्मात् कारणात् का घटना केन पुराणेन साकं सम्बद्धेतीदमवगन्तुं पाठकानां दुस्साध्यम्। तृतीयतः, निखिलान्येव व्यक्तिनामानि तद्विवरणानि च हिन्दीभाषायामेव विन्यस्तानीति स्वरव्यञ्जनान्तशब्दानामपास्तो भेदः। तस्माद् 'अन्धस्', 'अन्ध' इति शब्दयोस्तावद् 'अन्ध' इत्येकैव वर्तनी समवलम्ब्येत। चतुर्थतः, अनेकत्र सन्दर्भाः समुज्झिताः। पञ्चमतः, प्रामुख्यत एकादशपुराणान्येवेह पुराणविषयानुक्रमणिकायामाधारवाङ्मयतयाऽभ्युपगतानि। सम्पादकेन तत्र भूमिकायामस्याः प्रारम्भिकप्रयासफलरूपत्वमेवोररीकृतम्।

(घ) विष्णुस्तोत्राणि, विष्ण्ववतारस्तोत्राणि च (पुराणम् २।१-२, पृ. ८४-९३)।
अस्यामसर्वाङ्गीणसूच्यां मूलस्रोतस्कसंकेतवैकल्यमुपतिष्ठते।

(ङ) वामनपुराणतीर्थविषयसूची (पुराणम् ३।१-२), १९६१ ई०।
अस्यामप्येकाङ्गिताऽसमग्रता च।

(च) अग्निपुराणविषयानुक्रमणिका—डॉ० रामशंकरभट्टाचार्यः, भारतीयविद्याभवन, वाराणसी, १९९६ ई०।
इयं विषयसंक्षिप्ततामेवावलम्बते। प्रमुखव्यक्तिनामान्येवात्र समुल्लिख्यन्ते।

(छ) विष्णुपुराणविषयानुक्रमणिका— (पुराणम् ८।१, पृ० ९१)
अस्यां स्थूलविषया एव संकलिताः सन्ति।

इत्थं तावन्महापुराणीयविषयसूचीनामनुक्रमणिकानां च प्रस्तुतिप्रयासास्तु काममनुष्ठिता भूयांसः, परञ्च सकलानामष्टादशपुराणानां निर्भ्रमं विशदं परिपूर्णमथ च सूक्ष्मविषयसूचकं विषयानुक्रमकोशसंग्रहकार्यं नाद्यापि कुतश्चित् प्रकाशितमास्ते। न्यूनतामेतामपाकर्तुं महापुराणविषयानुक्रमकोशयोजना संचालिता मयकाऽस्य विश्वविद्यालयस्य गवेषणालये तावदेकसप्तत्युत्तरैकोनविंशतिशततमात् ख्रीस्ताब्दादेव। तदीयः कियांश्चिद् भागस्तदानीमनवरतं प्रकाश्यमानमप्यास्त 'सारस्वती सुषमा' इत्याख्यायां पत्रिकायाम्। परत इयं बृहद्योजना प्रास्तावि विश्वविद्यालयानुदानायोगसम्मुखेऽपि।

महापुराणविषयसामग्रीसंकलनं केषां नियमानामाधारेण कथं च विधेयमित्यनुयोगे सम्प्राप्ते, तत्समाधये सप्तदशसूत्रात्मकाः परिनिष्ठिताः सिद्धान्ता अपि निर्धारिता आसन् मया। विषयगतशब्दसंग्रहस्य निर्धारितप्रक्रियामनुरुध्य संस्थानीया अनुसन्धानसहायकाः

श्रीरामगोविन्दशुक्लः, डॉ० उमाशंकरत्रिपाठी, डॉ० जानकीप्रसादद्विवेदश्च सामग्रीसंग्रहार्थं समादिष्टा मत्सहायतया तत्कर्मणि व्यापृताश्चाभूवन्। परतस्तदानीन्तनैः कुलपतिवर्यैः पण्डितश्रीबदरीनाथशुक्लमहाभागैः सरस्वतीभवनपुस्तकालयस्था गवेषणाप्रकोष्ठिकास्तेषामावण्टिताः, तत्रापेक्षितं सौविध्यं चोपनतम्। तत्र प्रत्यहमहमुपास्थिषि सामग्रीसंग्रहणकर्मणि समुत्थितानां संशयानां निरासार्थं संगृहीतसामग्र्याः सम्पादनार्थं च।

प्रकाशितपुराणसंस्कारणेषु यादृशा मूलपाठास्तत्र समाश्रुताः, महापुराणविषयानुक्रमकोशकर्मणि तदवस्था एव संकलिता अमी। व्याकरणनियमप्रातीप्येऽपि त इह यद्यपि न लिखिता विषयानुक्रमकोशे परिष्कारपूर्वकम्, तथापि बहुत्र स्थलेषु यत्र यत्र तावदसामञ्जस्यमभ्यूहितं तत्र तत्र टिप्पण्युपन्यासेन विसंगतीनामपनुत्तये संचेष्टितम्। विषयानुक्रमकोशस्यैतस्य संग्रहविधौ रामनगरस्थितेन सर्वभारतीयकाशिराजन्यासेन समालोचनापूर्वकं प्रकाशितं वामनपुराणीयं संस्करणमाधारग्रन्थतयाऽभ्युपगतम्। यद्यप्येतस्मिंस्तदीये संस्करणे भूयस्यो न्यूनताः स्पष्टमक्षिलक्षीक्रियन्ते, तथाप्येतत् स्वगुणगणगौरवेण खेमराजादिप्रकाशितपुराणसंस्करणान्यतिशेते सुनिर्भरम्। किन्तु तत्र ये पाठा मूलपाठत्वेन विचारणीयाः संनिवेशनीयाश्चासंस्ते खलु बहुत्र प्रणिहिताष्टिप्पणीषु, ये च टिप्पणीत्वेन निर्धारणीयाः स्युस्ते हि मूलपाठतयाऽङ्गीकृता अभूवन्नित्यस्य वामनपुराणीयस्य तत्संस्करणस्य व्यत्यासदोषभूयस्त्वमस्त्येव। एतस्मिन् वामनपुराणीये विषयानुक्रमकोशे यथास्थानं समास्थितो व्यत्यासदोषनिरासः। जिज्ञासूनां हितकाम्यया तत्रैव शब्दस्य पुरस्तात् प्रकोष्ठके पाठभेदोऽपि निर्दिष्टः।

तत्र प्रतिमहापुराणमेकैकोऽनुसन्धानसहायको नियोजितो विषय-शब्दसंग्रहकर्मणि। डॉ० जानकीप्रसादद्विवेदस्तावद् व्यापारितोऽस्य प्रकृतस्य वामनमहापुराणस्य विषयगतशब्दसंग्रहव्यापारे। नूनममुना निष्ठया तन्मनस्केन च सोत्साहं साधीयो हि समनुष्ठितं विषयसंग्रहजातमहरहः। कस्याञ्चिन्निगूढार्थविप्रतिपत्तौ सत्यामसौ मदन्तिकमुपेत्य समाधानसमासादनानन्तरं पुनर्व्याप्रियते स्म स्वलक्ष्यभूतक्रियासम्पत्तये। अनुसायाह्नं च प्रस्तोतुमुद्युङ्क्ते स्म शब्दसंग्रहसामग्रीं मदग्रे संशोधनार्थं सम्पादनार्थं चानुसन्धानसहायकान्तरवदेव। परञ्च शब्दसंग्रहपरिसमाप्त्युत्तरमेवासौ सारनाथस्थ उच्चतरभोटविद्यासंस्थाने व्याख्यातृपदे नियोजित इत्येतस्माद्धेतोः पुनर्वाचनमेलन-प्रतिलिप्यादिकार्यसम्पूर्तिमन्तरैव मध्येमार्गं कार्यमिदमुज्झित्वा सारनाथं प्रस्थितः। तत्स्थाने नवीननियुक्त्यभावादपूर्णं कार्यमेतत् कतिचन हायनानि तदवस्थमेवोपेक्षितमनादृतमिव सीदति स्म सरस्वतीभवनपुस्तकालयप्रकोष्ठिकायाम्।

तदानीन्तनेन कुलपतिना डॉ० विद्यानिवासमिश्रमहोदयेन तावदनुसन्धानसंस्थानं प्रति व्यापारितमात्मनीनमन्तरीक्षणम्। रिक्तीभूतेषु पदेषु नियोजितास्त्रयोऽनुसन्धानसहायकाः श्रीदिवाकरदीक्षितः, डॉ० प्यारेलालपाण्डेयो मनोजकुमारमिश्रश्चेति। मदीयसेवानिवृत्तेर्मनागेव प्रागभीप्सितं प्रतिलिपीकरणपूर्वकं सम्पादनकार्यं विनिर्वृत्तमित्यनुभवामि कृतकृत्यतामानृण्यमिव

चात्मनः। कथङ्कारमल्पीयस्येवानेहसि मामकीन एव निरीक्षणे यथायथं निर्दोषं मुद्रितमिदं स्यादिति विचारं विचारं संगणकयन्त्रसमृद्धस्तारायन्त्रालयो न चेदभविष्यद् वृतो मुद्रणक्रियासम्पत्तये तदानीन्तनेन कुलपतिना पण्डितप्रवरेण श्री वि० वेङ्कटाचलमहाभागेन, नूनमिदमनुसन्धाननीविभूतं विभूतं सम्पादितं कार्यं चिटिकापत्र-(कार्ड)-स्वरूपतया यत्र तत्र निक्षिप्तप्रायमभविष्यदेव पर्यवसन्नम्। एतन्निकृतनिकर्तनक्षमेभ्यस्तेभ्यो बाढमावेदये सबहुमानं कार्तज्ञ्यम्। इदानीन्तनस्य नवागतकुलपतेः डॉ० मण्डनमिश्रमहाभागस्याप्युपकृतिभारं बिभर्मि यदीयेन प्रयासेनायं ग्रन्थः सत्वरं जिज्ञासूनां पुरस्तात् प्रस्तूयते।

संगृहीतसामग्र्याः प्रतिलिपिकार्येण, मत्कर्तृकपुनस्संशोधनकर्मणि बहुत्र विचिकित्सास्थलेषु मया योजितानां प्रश्नवाचकचिह्नानामपाकरणार्थं पुनःपुनराहूतैरनुसन्धानसहायकैर्मन्त्रिर्देशमनुसृत्य पुराणवाचनकर्मणा व्याधि मे साहायकम्। ईक्ष्यसंशोधनकर्मण्यपि यथामति समनुष्ठितं साहाय्यममीभिरिति त आशीराशिभिः सभाज्यन्ते। मुद्रणप्रक्रियायां साहाय्यप्रदानेन भृशमुपकृत एष जन इति प्रकाशनविभागस्तारायन्त्रालयाधिष्ठाता चेत्युभौ शुभाशंसनसंदोहेन सभाज्येते। प्रयासेनानेन लब्धवर्णा नूनं प्रीणिता अनुसन्धित्सुजनाश्चोपकृताः स्युरिति बाढं विभावयति।

गुरुपूर्णिमायां २०५३ वै.
वाग्योगचेतनापीठम्,
शिवाला, वाराणसी

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वामनमहापुराणविषयानुक्रमकोशः

(पूर्वार्द्धः)

अ

अंशः =अनेन त्रैलोक्यं सनाथं कर्तुं विष्णुर्वामनरूपेणावतीर्णः २३ (८)।१९

अंशवः =सूर्यस्यांशवो वामनस्य केशा आसन् २३ (१०)।५१

अंशाः =उत्तराफाल्गुनीनक्षत्रस्य त्रयः पादाः परिगीयन्ते ५।३६

अंशुकम् =इदं चीनदेशस्य प्रशस्तं भवति २५।५९

अंशुमान् =सूर्यः, अयं परिघादीन् पञ्च प्रमथान् कार्त्तिकेयाय प्रददौ ३१।७०

अकार्पण्यम् =धर्मस्याङ्गम् १४।१

=इदं सार्ववर्णिकधर्मतयाऽङ्गीकृतम् १४।२

अकिञ्चनः =अकिञ्चनः पुत्रादिबन्धुवर्गः स्वपोषणरतेन येन मानवेन दुर्भिक्षादौ परित्यज्यते स श्वयोनौ पतति १२।२६

अकुलीनत्वम् =तारागणे वर्तमानम् ३।३८

अक्लेद्यत्वम् =इदमन्धकेन शिवाल्लब्धम् ९।५

अक्षतानि =एषां स्पर्शः प्रातःकाले करणीयः १४।३६

अक्षप्रियः =शिवस्य नाम २३ (२६)।१२९

अक्षमा =इयं शिवरूपा प्रोक्ता २३ (२६)।११४

अक्षमाला =इमां ब्रह्मा कात्यायन्यै ददौ १९।१५

अक्षमाली =शिवस्य नाम २३ (२६)।८८

अक्षयम् =इदमिच्छता नरेण मृतपुरुषस्येष्टतमं वस्तु गुणवते देयम् १५।५१

अक्षया =अष्टमी, अस्यां तुष्टः शम्भू रोहिण्यै वरं प्रादात् १६।२५

=कालाष्टम्यां लिङ्गेषु शङ्करस्य पूजाऽक्षया भवति १७।३१

	=विष्णुपदह्रदादौ विधिनाऽविधिनाऽप्यत्र कृता क्रियाऽक्षया भवति	२३ (१०) ।८३
अक्षया तिथिः	=इयं मृगशिरोनक्षत्रे शशिसूर्य-बृहस्पतिषु वर्तमानेषु सत्सु भवति	२४ ।२
अक्षरः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२४
अक्षरम्	=अक्षरपाठयुक्ता ऋचो ब्रह्मसभायामिन्द्रादयो देवाः श्रुतवन्तः	२३ (३) ।२१
	='परमाक्षर'- शब्देन 'ब्रह्म' उच्यते	२३ (११) ।६
	=परममक्षरं सरस्वत्यां प्रतिष्ठितम्	२३ (११) ।६
	=वासुदेवः, वेदविदो वासुदेवं विष्णुम् 'अक्षरम्' इति वदन्ति	२३ (८) ।२१
अक्षरसंस्थानम्	=ॐकारस्याक्षरसंस्थानं सरस्वत्यां स्थितमस्ति	२३ (११) ।९
अक्षि	=नानाक्षिमन्तो भूता देव्या हास्यात् समुद्भूताः	२१ ।२०
अक्षिणी	=विष्णोरक्षिणी चन्द्रसूर्यौ	२३ (६) ।३४
अक्षौहिणी	=त्रिंशदक्षौहिणीभिरासुरो रक्तबीजो देवीमाक्रान्तवान्	३० ।१
अखिलः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३(९) ।२१
अखिलाधारः	=विष्णुः, अयमदित्या नमस्कृतः.	२३(६) ।२७
अगम्याः	=भारताख्यवर्षस्य नव द्वीपाः परस्परमगम्याः सन्ति	१३ ।८
अगस्त्यः	=महर्षिः, अयं विन्ध्याख्यं महापर्वतं निम्नतरं नीचश्रृङ्गं वा चकार	१९ ।२१; १९ ।३६
	=कुम्भभवः	१९ ।२३
	=कलशजः	१९ ।२५
	=कलशोद्भवः	१९ ।२६; १९ ।२८
	=कुम्भजन्मा	१९ ।२७
	=भगवान्	१९ ।३२
	=महर्षिः	१९ ।२८
	=मुनिः	१९ ।२९; १९ ।३४
	=महर्षिमुख्यः	१९ ।३०

	=मुनिसत्तमः	१९ ।३०
	=मुनीन्द्रः	१९ ।३३
	=अमितकान्तिमान्	१९ ।३४
अगुरु	= अस्य धूपः श्रावणमासे हरार्चने देयः	१७ ।६०
अग्नयः	=इमे वामनस्य सन्निधानादासुरान् यज्ञभागान् न भुञ्जते स्म	२३ (१०) ।१९
अग्निः	=दक्षयज्ञाग्निस्त्रिनेत्रेण प्रणष्टः	५ ।२५-२६
	=अयं देवासुरसंग्रामेऽन्धकासुरपरिघेण ताडितः सन् भयाद् रणाजिराद् बहिर्गतः	१० ।५३
	=अभुक्तवत्येवास्मिन् ये जना भोजनं कुर्वन्ति ते नरकान् यान्ति	१२ ।१२
	=इमं यो जन उच्छिष्ट एव कामतः स्पृशति स तप्तकुम्भनामकं नरकं याति	१२ ।१६
	=अस्याग्रे ये जना मूत्रं परित्यजन्ति तेषां गुदेभ्योऽन्त्राणि वायसा बहिष्कुर्वन्ति नरकेषु	१२ ।२५
	=अस्य शुश्रूषा ब्रह्मचारिणो धर्मः	१४ ।५
	=हुताशनः	१४ ।३७; २३(८) ।१२; २७ ।८; २७ ।५०; २८ ।५३; ३१ ।८; ३१ ।४८; ३१ ।६५;
	=अस्य मध्याद् रौद्रदर्शनः पुरुषः समुत्तस्थौ, स सर्वान् महिषान् हतवान्	१८ ।६८-७०
	=अयं महिषासुरेण स्वर्गान्निराकृतः	१९ ।३
	=एतत्कल्पो विष्णुर्महिषासुरेण भीतानां देवानां वचो निशम्य कोपं चक्रे	१९ ।५
	=पावकः	१९ ।९; २३ (१०) ६०; २८ ।३८; ४४ ३१ ।५; २६; ३८; ४१; ५९; ३२ ।१; १६
	= हुताशः	१९ ।१४; २३(३) ।१०; २७ ।५०; २८ ।४९; ३१ ।१०३
	=देववरः, अयं कात्यायनीं तुष्टाव	१९ ।१८

	=आज्येन हुतोऽग्निरिव जातकर्मादिभिः संस्कृतस्तपतीसुतो वृद्धिमवाप	२३ ।१
	=अग्निशिखोपमः कश्यप आसीत्	२३(३) ।८
	=अनलः	२३(३) ।१०
	=वह्निः	२३(८) ।२; २३ (१०) ३८; ३२ ।२३
	=अयं वामनरूपधारिणा विष्णुनैव धार्यते	२३(१०) ।७
	=वैश्वानरः	२३(१०) ।५५
	=अयं शिवस्य शरीरे वर्तते	२३ (२६) ।७०
	=शिवस्य नाम	२३(२६) ।१४५
	=हुतावहः	२७ ।३३
	=अस्य प्रदक्षिणं कर्तुं विवाहकाले ब्रह्मा गिरिजामुवाच	२७ ।४७
	=अस्य शिवेन सह संवादः	२८ ।४२
	=अयं यथा शुष्केन्धनं भस्मसात्करोति तथैव देवी कौशिकी हुङ्कारेणैव धूम्रलोचनं भस्मसाच्चक्रे	२९ ।४७
	=हव्यभुक्	३१ ।९
	=कविः	३१ ।३०
	=अयं शिवान्तिकं जगाम	३१ ।३४
	=अयं शरवणे कृत्तिकोत्सङ्गशायिनं शिशुकं ददर्श	३१ ।३९
	=अस्य समीपमभ्ययान्महासेनो बालकः स्कन्दः	३१ ।४०
	=अयं स्वस्तिकरणार्थं प्रार्थितः	३२ ।१९
अग्निकुण्डम्	=तीर्थम्, (बदरीनाथसमीपस्थम्) अत्र शिवेन स्नानं कृतम्	२५ ।५२
अग्निशरणम्	=अस्यार्थं पादत्रयपरिमिता भूमिर्वामनेन याचिता	२३(१०) ।४४
अग्निशिखा	=अग्निशिखोपमः कश्यप आसीत्	२३ (३) ।८
अग्निशुश्रूषा	=ब्रह्मचारिणो धर्मः	१४ ।५
अग्निष्टोमः	=यज्ञः, अस्य फलं वामनतीर्थे स्नानेन लभ्यते	२३(१३) ।३०
	=यज्ञः, सूर्यतीर्थे देवान् अर्चयित्वा मनुष्य इममवाप्नोति	२३ (१४) ।२७

	=यज्ञः, अस्य फलं लभ्यते दृषद्वत्यां स्नानेन देवतानां तर्पणेन च	२३(१५)।४६
	=यज्ञः, अस्य फलं भक्तियुक्तो नरः श्रीकुब्जाख्ये (कुरुक्षेत्रस्थे) तीर्थे स्नात्वा लभते	२३(१६)।७
	=यज्ञः, अस्य फलं लभ्यते कुरुक्षेत्रस्थरुद्रलिङ्गस्य दर्शनात्	२३(२५)।२९
अग्निष्वात्ताः	=दिव्याः पितरः, एषां मानसी कन्याऽऽसीद् 'मेना'-नाम्नी	२२।१६
	=इमे दिव्याः पितरः सन्ति	२२।१६
अग्निहोत्रम्	=अनेन समन्विता भूत्वा बालखिल्या महर्षयः कलेवरं शोषयन्ति	२३ (२२)।४३
अग्नीषोमात्मकः	=शङ्करस्य नाम	२३ (२३)।३६ (१२)
अग्रः	= पक्वं द्रोणाढकपरिमितमन्नं यद्यमेध्याभिप्लुतं भवेत्, तर्हि शुद्धये तस्याग्रभागः परित्याज्यः शेषभागस्य च प्रोक्षणं विधेयम्	१५।१७
	=अङ्गुलेरग्रभागः, अनेन ताडिताच्छङ्करस्याङ्गुष्ठाद् भस्म निर्गतम्	२३(१७)।१५-१६
अग्रजः	=अस्मै सनैवेद्यं रजतं स्थाणोरर्चने देयम्	१७।३७
	=शिवस्याग्रजो ब्रह्मा	२७।३३
अघम्	=पापम्, अस्य हर्त्ता भगवान् वामनः	२३ (१०)।१७
अघोरघोररूपः	=शिवस्य नाम	२३ (२६)।८९
अङ्कुशः	=दक्षयज्ञे द्वारपालस्य धर्मस्याऽऽयुधम्	४।२६
	=शिवो भगनेत्रस्याङ्कुश उच्यते	२३(२६)।१३१
अङ्गम्	=वराङ्गम्	१०।५२
अङ्गलौकिकाः	=उत्तरापथवासिनो जनाः। एते स्वेच्छया क्षुद्रनदीजलानि पिबन्ति	१३।४
अङ्गाः	=जनपदाः, अन्तर्गिरिस्था बहिर्गिरिस्थाश्च	१३।४४
अङ्गानि	=सार्ववर्णिकस्य धर्मस्य दशाङ्गानि	१४।२
	=एषां स्पर्शः कार्यः प्रेतास्थिसञ्चयनादूर्ध्वम्	१५।४३

	=एतानि त्रयोदशसंख्याकानि धर्मस्य भवन्ति	१६ ।५
	=एभिः सहितान् वेदान् पुरोहितो वसिष्ठः संवरणमध्यापयामास	२२ ।२८
अङ्गारः	=अङ्गारशालासु स्तनन्धयसुताः स्त्रियः पवित्रा भवन्ति	१५ ।१०
अङ्गारशालाः	=आसु स्तनन्धयसुताः स्त्रियः पवित्रा भवन्ति	१५ ।१०
अङ्गाराः	=ज्वलिताङ्गारैर्विस्तृता रौरवनरकाः	११ ।५१
अङ्गिराः	=अयं दक्षयज्ञे निमन्त्रितः	२ ।१०
	=मृष्टान्नपानसंस्कारे नियुक्तश्च	२ ।१३-१४
	=ऋषिः, अयं शङ्करोक्ते प्राभातिकमङ्गले स्मृतः	१४ ।२४
	=एष कौशं चीरं वामनाय ददौ	२३ (९) ।३७
	=एतस्य सप्तर्षिभिः सह संवादः	२६ ।९
	=एनमन्ये वसिष्ठादय ऋषयः कार्यनिवेदनाय प्रेरितवन्तः	२६ ।३१
	=एतस्य हिमाद्रिणा सह संवादः	२६ ।३२; ३३; ४२
	=एष स्वस्तिकरणार्थं प्रार्थितः	३२ ।१८
अङ्गुलयः	=इमा राज्ञः संवरणस्य दीर्घाः सुपर्वाश्चासन्	२२ ।५१
अङ्गुलिः	=अस्या अग्रभागेन ताडितादङ्गुष्ठाच्शङ्करस्य भस्म निर्गतम्	२३ (१७) ।१५
अङ्गुल्यः	=कात्यायन्याः पादाङ्गुल्यो दिवाकराणां तेजसा बभूवुः	१९ ।११
अङ्गुष्ठः	=सर्वदेवमयवामनस्य पादाङ्गुष्ठं चिक्षुरो नाम महादैत्यो गृहीतवान्	२३ (१०) ।६१
	=इममङ्गुल्यग्रभागेन शिवस्ताडितवान्, ततो भस्म निर्गतम्	२३ (१७) ।१५-१६
अङ्घ्रिः	=हरस्य, तस्य भक्तः सुरारिमुख्येषु प्रवरो भवति	१२ ।४५
अचरम्	=अचरात्मकं विश्वम्, इदं विष्णुना व्याप्तम्	२३ (६) ।३१
अचलः	=विन्ध्याचलः, अत्रागस्त्यो जगाम	१९ ।२८
अचिन्त्यः	=विष्णुः, इमं प्रति प्रह्लादः प्रणतोऽभूत्	२३ (८) ।२२
	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२६

	= वामनः, अयं बलियज्ञं जगाम	२३ (१०) ।३३
अच्युतः	=नारायणः, अस्य प्रह्लादकृता स्तुतिः	८ ।५१
	=वामनः, अयं ब्रह्मणा स्तुतः	२३ (९) ।१८
	=वामनः, अस्मै दानमधिकृत्य बलिशुक्रयोः संवादः	२३ (१०) ।२२
	=वामनः, अनेन कृतं स्ववधं बलिः श्लाघ्यतरं मनुते	२३ (१०) ।३१
	=विष्णोर्नाम	२९ ।४
	=प्रमथः, इमं यक्षाः कर्त्तिकेयाय ददुः	३१ ।७४
अजः	=शिवस्य नाम	२ ।३३; २३ (२३) ।३५(१०); २३ (२६) ।६३
	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।२७; २३ (६) ।३५
	=विष्णुः, एनमाक्षिपन् बलिः प्रह्[illegible] भर्त्सितः	२३ (८) ।३५
अजयः	=अयं शिवरूप उक्तः	२३ (२६) ।११४
अजरः	=नारायणप्रसादात् प्रह्लादोऽजरः संजातः	८ ।६४
अजा	=अस्या मुखमिव मुखधारिणो भूता देव्या हास्यात् समुद्भूताः	२१ ।२०
अजाः	=इमे रम्भासुरेण माल्यवटाख्ययक्षस्य समीपे दृष्टाः	१८ ।५४
अजितः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।१९
अजिनम्	=मृगचर्म, इदं जलेन शुध्यति	१५ ।५
	=मृगचर्म, आर्द्रमजिनमिव देवी कात्यायनी महिषासुरं ममर्द	२१ ।४७
	=मृगादिचर्म, अनेन संवीतं कश्यपं देवाः प्रणेमुः	२३ (३) ।९
	=मृगचर्म, कृष्णमजिनं ब्रह्मा वामनाय प्रददौ	२३ (९) ।३६
	=अनेन संवृतैर्मुनिगणैः पूज्यमाना सरस्वती तावद् उत्तरकोशलाभागमागता	२३ (१६) ।३३
अजिरम्	=शिवस्याजिरमग्निर्हंसरूपमास्थाय प्रविवेश	२८ ।४१
अजीर्णम्	=एतन्नामा व्याधिः सर्वेषु व्याधिषु प्रवर उच्यते	१२ ।५२

अजेयः	= वामनः, अयं ब्रह्मणा स्तुतः	२३ (९)।१८
अजेयत्वम्	= इदमन्धकेन शिवाल्लब्धम्	९।५
अज्ञानम्	= एतत् पिशाचानां धर्मो भवति	११।२७
	= एतदवस्थायां दूषितान्नस्य भोजने कृते सति त्रिरात्रपर्यन्तमुपवासेन शुद्धिर्भवति	१५।१८
अञ्जनः	= पर्वतः, अयं हिमाद्रिभवनमाजगाम	२६।४८
अटनम्	= भिक्षार्थमटनं ब्रह्मचारिणो धर्मः	१४।५
	= इदं गृहस्थेन वृथा न कार्यम्	१४।४१
	= वृथाऽटनेन वित्तहानिर्भवति	१४।४२
अट्टाट्टहासः	= इममतितुष्टा त्रिनेत्रा कात्यायनी चकार	१९।१८
	= एनं देवी कात्यायनी नमरे राक्षसे मृते सति मुमुचे	२१।१८
अणुः	= शिवस्य नाम	२३ (२६)।१३५
अण्डः	= इमं भगवान् बिभेद तस्माद् ओमित्यजायत	२३ (२२)।३०
अण्डकटाहः	= अनेन पृथिव्याः समन्ताल्लक्षयोजनात्मको भागः पूरितः	११।४२
अण्डजाः	= पक्षिप्रभृतयः प्राणिनः	२३ (२६)।१०६
अण्डम्	= इदं पूर्वमेकार्णवे स्थावरजङ्गमे नष्टे सति प्रादुरभूत्	२३ (२२)।१७
	= अस्मिन् स्थित्वा ब्रह्मा शयनायोपचक्रमे	२३ (२२)।१८
	= अस्माद् विनिःसृतं तेज उदकं शोषयामास	२३ (२२)।३२
	= इदं यस्मिन् स्थाने स्थितं तस्मिन् सरः संनिहितम्	२३ (२२)।३४
	= अस्य मध्ये लोकपितामहो ब्रह्मा समुत्पन्नो बभूव	२३ (२२)।३५
अतिकोपिता	= चतुर्थे संन्यासाश्रमेऽस्याभाव एव धर्मः	१५।६०
अतिघसः	= प्रमथः, इमं वायुः कार्त्तिकेयाय ददौ	३१।६९
अतिथयः	= अभुक्तवत्स्वेवैतेषु ये जना अश्नन्ति ते सूचीमुखा भूत्वा नरकयातनां सहन्ते	१२।१२

	=गृहस्थाश्रमे वसन् द्विजः स्वकर्मणा धनमर्जयित्वा तेनातिथीन् संप्रीणयेत्	१४।१२
अतिथिः	=अस्य क्रिया वानप्रस्थाश्रमे वसता कार्या	१५।५७
अतिरात्रः	=यज्ञः, अस्य फलं लभ्यते दृषद्वत्यां स्नानेन देवतानां तर्पणेन च	२३ (१५)।४६
अतिवर्चाः	=प्रमथः, इमं वरुणः कार्त्तिकेयाय प्रादात्	३१।६८
अतिशृङ्गः	=प्रमथः, इमं विन्ध्यः कार्त्तिकेयाय प्रददौ	३१।६७
अतिसूक्ष्मः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९)।२३
अत्रिः	=अरुन्धत्या सहाऽयं दक्षेण यज्ञे निमन्त्रितः	२।९
	=अयं भूमिपतितां धारां जग्राह	२।४८
	=दुर्वासा अस्य पुत्रः	२।४८
	=अयं सप्तर्षीणां मध्येऽन्यतमो ब्रह्मर्षिः	२३ (१५)।९
	=अनेन ब्रह्मर्षिभिः सह भुवि समेत्य कुरुक्षेत्रे ब्रह्मर्षिकुण्डं कल्पितम्	२३ (१५)।९
	=द्विजोत्तमः, अयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३)।२७
	=अस्य शिवेन सह संवादः	२६।९
	=अयं स्वस्तिकरणार्थं प्रार्थितः	३२।१८
अत्रिसंभवः	=शङ्करस्य नाम	२३ (२३)।३६ (२१)
अथर्ववाङ्मयम्	=ब्रह्माऽथर्वादिवाङ्मयैर्बन्धनैः कुटिलानाम्नीं गिरिकन्यकां प्रबबन्ध	२५।१५
अदनम्	=इदं विभवे सति यो न करोति स 'आखुः' इत्युच्यते	१५।३०
अदर्शनम्	=बलये वरं शक्राय च स्वर्गलोकं प्रदाय वामनोऽदर्शनं जगाम	२३ (१०)।८५
अदाह्यत्वम्	=इदमन्धकेन शिवाल्लब्धम्	९।५
अदितिः	=इयम् इन्द्रस्य माता, अस्या निलय इन्द्रो मेरुप्रस्थं जगाम	२३ (३)।१२
	=इयं माता (इन्द्रस्य)	२३ (३)।१३
	=इयम् इन्द्रस्य माता, अस्या इन्द्रेण सह संवादः	२३ (३)।१४
	=अनया सह देवाः कश्यपान्तिकं सम्प्राप्ताः	२३ (३)।१७

=अनया सह सुरर्षभाः कश्यपं प्रणेमुः	२३ (३) ।१३
=देवानां माता, अनया सह देवा ब्रह्मसदनाय प्रस्थिता	२३ (३) ।१७
=देवमाता, इयं वरयाचनार्थं ब्रह्मणोपदिष्टा	२३ (४) ।१४
=देवमाता, इयं ब्रह्मण आदेशमङ्गीचकार	२३ (४) ।१६
=अस्याः सुतो भवेति वरः कश्यपेन विष्णुसकाशात् प्रार्थितः	२३ (६) ।४
=देवमाता, अनया पुत्रार्थं वरो याचितः	२३ (६) ।५
= देवमाता, इयं कुरुक्षेत्रवनेऽयुतवर्षपर्यन्तं घोरं तपश्चचार	२३ (६) ।१३
=देवमाता, अस्या विष्णुना सह संवादः	२३ (६) ।१७
=अस्यै भगवान् विष्णुर्वरमददात्	२३ (७) ।२
=अस्या विष्णुना सह संवादः	२३ (७) ।७, २३ (७) ।१२
=देवमाता, इयं विष्णावन्तर्हिते सति गर्भमादधे	२३ (७) ।१४
=गर्भवत्या अस्या भारेण पृथिवी कम्पिता बभूव	२३ (७) ।१५
=देवमाता, अस्या उदरे स्थितं वामनाकृतिं विष्णुं प्रह्लादो ददर्श	२३ (८) ।१०
=देवमाता, अस्यां विष्णुर्वामनरूपेणावतीर्णः	२३ (८) ।१९
= देवमाता	२३ (८) ।१९, २३ (९) ।१२; २३ (१०) ।५४
=सुरेन्द्रमाता	२३ (८) ।२८
=सुरेन्द्रमाता, अस्या जठरं विष्णुः प्रविष्टोऽभूत् षोडशांशेन	२३ (८) ।२८
=अनया सर्वकामसमृद्धिदो वरः समासादितः	२३ (९) ।१२
=देवमाता, इयं वामनावतारे संजाते दुःखं मुमोच	२३ (९) ।१४
=एनां प्रति भगवता विष्णुना शक्राय त्रैलोक्य--राज्यप्रदानार्थं प्रतिज्ञातमासीत्	२३ (९) ।३४
=इयं वामनस्य ग्रीवास्थानीयाऽऽसीत्	२३ (१०) ।५४
=अनया पुत्रार्थं कुरुक्षेत्रस्थेऽदितिवने घोरं तपः कृतमासीत्	२३ (१३) ।१२
=देवमाता, एनामदितिवने दृष्ट्वा नरः शूरं पुत्रं जनयते	२३ (१३) ।१३

	=देवमाता, इयं शिवस्य मण्डनं चकार	२७।५
	=अस्यै भगवान् विष्णुर्वरमददात्	२३ (७)।२
	=अस्या विष्णुना सह संवादः	२३ (७)।७; २३ (७)।१२
	=देवमाता, पुरेयमिन्द्रस्याभिषेकार्द्रमाननं जिघ्रन्ती बभौ	३१।५८
अदितिवनम्	=अस्य स्मरणमात्रेण नरः परं स्थानं याति	२३ (७)।५
	=इदं कुरुक्षेत्रस्थं वनम्, अत्रादित्या पुत्रार्थं घोरं तपः कृतम्	२३ (१३)।१२
	=अत्र रन्तुकं समभिवाद्यैव गन्तव्यम्	२३ (१३)।१२
अद्भुतः	=जम्बूद्वीपस्य पूर्वभागे स्थितो भद्राश्वनामको वर्षः	१३।३
अद्भुततमम्	=महर्षिभिः शिवलिङ्गं पातितमिति वृत्तं तस्य प्रभावं च विष्णुमुखादाकर्ण्य तदद्भुततममेव ब्रह्माऽमन्यत	६।७२
अद्भुतदर्शनः	=भगवान् ब्रह्मा	२।२४
अद्रयः	=पर्वताः, एतान् वामनाकृतिविष्णुस्थितान् प्रह्लादो ध्यानेन ददर्श	२३ (८)।१३
	=पर्वताः, इमे विष्णोरेकांशांशकलातः प्रादुर्भवन्ति	२३ (८)।३७
अद्रिः	=अयं विन्ध्याख्यः पर्वतः, इमं नमरो नाम दानवः शरवर्षेण समाच्छादयत्	२१।६
	=अयं मन्दरः पर्वतः। एष दिव्यफलादिभिः शङ्करस्य पूजां चक्रे	२५।७५
अद्रिकुमारिका	=उमायाः काल्या वा नाम	२७।४५
अद्रिपुत्री	=काली, अनया सह शिवो विवाहकाले मधुपर्कमाश्नात्	२७।४६
	=उमा काली वा, एनामवाप्य शिवो मन्दरगिरिं शीघ्रमुपाजगाम	२७।६१
	=उमा	२८।७७
अद्रिराजः	=हिमालयस्य नाम	२७।४४

अद्रिसुता	=पार्वती, इयं वस्त्रं कार्त्तिकेयाय ददौ	३१ ।१०३
अद्वैतम्	=अस्मिन्नवस्थितं ब्रह्म सरस्वत्या व्याप्तम्	२३ (११) ।२०
अधःपातम्	=नरके पापिनो जना गिरेः शृङ्गादधःपातं पात्यन्ते	१२ ।३४
अधमः	=अस्यान्नं भोज्यं न भवति	१५ ।२५
	=शरणागतपरित्यागी पुरुषश्चाण्डालसंज्ञको भवति, स एवाधमोऽपि मन्यते	१५ ।३६
अधमाः	=ये सुहृदादिषु परस्परं भेदव्यवहारं कुर्वन्ति तेऽधमा भवन्ति	१२ ।५
	=एते यमकिङ्करैः करपत्रेण द्विधा पाट्यन्ते	१२ ।६
	=एते नरकेषु दुष्टासृक्पूयादिकं भक्षयन्ति	१२ ।१३
	=इलावृतादिवर्षवासिषूत्तमाधममध्यमा न सन्ति	१३ ।७
अधरौ	=एतौ कात्यायन्याः कामदेवेन निर्मितौ	२० ।१३
अधर्मः	=पादविग्रहः =एकपादात्मकः, अस्मिन् स्थिते दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।११
	=अस्मिन्नुपस्थितेऽरुणासंगमे स्नानेन मुक्तिर्लभ्यते	२३ (१९) ।४२
अधर्महा	=शिवस्य नाम	२३ (२६) ।१३७
अधिकारः	=अयम् अश्विसूर्येन्द्रादीनां देवानां महिषासुरेण समाक्रान्तः	१९ ।३
अधिपः	=महिषासुरः सर्वेषु लोकेष्वधिप आसीत्	२० ।२६
अधिपतिः	=मम पुत्रस्त्रैलोक्याधिपतिः स्यादिति विष्णुं वरमदितिर्ययाचे	२३ (७) ।७
अधिरोहणम्	=वृद्धत्वात् तवाधिरोहणेऽहमशक्तोऽस्मि तस्मात् त्वं नीचतरो भवेत्यगस्त्यो विन्ध्याचलमुवाच	१९ ।२९
अधीतम्	=इदं व्रतरहितं सत् (अपि) तुभ्यं फलं दास्यतीति वामनो बलिमाह	२३ (१०) ।७९
अधीशः	=वामनः, अस्य स्तुतिर्ब्रह्मणा कृता	२३ (९) ।१८
अधोक्षजः	=नारायणः, अस्य प्रसादात् प्रह्लादेन सर्वं लब्धम्	८ ।६३
अध्ययनम्	=त्रय्या (वेदत्रय्याः) अध्ययनं नित्यं कर्त्तव्यम्	१५ ।५२

अध्यापकः =उपाध्यायमधःकृत्याध्ययनं कृतवतामध्यापको नरके शिलां शिरसा वहति १२।३१

अध्यायः =द्वितीयः, नरोत्पत्तिप्रलयाख्यः २।१-५६
=अष्टमः, प्रह्लादवरप्रदाननामकः ८।७२
=नवमः, देवासुरयुद्धाख्यः ९।५२
=एकादशः, पुष्करद्वीपवर्णनात्मकः ११।५८
=द्वादशः, अस्य नाम कर्मविपाक इति १२।५७
=वामनपुराणे त्रयोदशः १३।५८
=पञ्चदशः, वामनपुराणस्य १५।६७

अध्वरः =यज्ञः, अस्मिन् यज्वानो रात्रावपि कर्माण्कुर्वन् १६।१८
=यज्ञः, बलेरध्वरमगाद् भगवान् वामनदेवः २३ (९)।३९
=बलेरध्वरं वामनो जगाम २३ (१०)।११

अनघः =विष्णुः, अयं प्रह्लादेन नमस्कृतः २३ (८)।२५

अनङ्गः =बदरिकाश्रमे नारायणेनायं दृष्टः ६।२२
=एतन्नामकारणम्, देवैरयं स्तुतः ६।१०७
=एतन्नामकारणे नारदस्य प्रश्नः, पुलस्त्यस्य च समाधानम् ६।२४-१०७
=कामदेवः, अस्य नारायणेन सह संवादः ७।१

अनध्यायः =अस्मिन् संवरणाख्यो राजाऽरण्यं जगाम २२।२९

अनन्तः =नारायणः, अनेन नाम्ना प्रह्लादो नारायणमस्तौषीत् ८।४८
=शङ्करः, अनेन नाम्ना ब्रह्मा शङ्करमस्तौत् २३ (२३)।५
=अयं नागानां मध्ये शिवरूपः २३ (२६)।११२
=प्रमथः, इमं यक्षाः कार्त्तिकेयाय दत्तवन्तः ३१।७३
=विष्णुः, अयं प्रह्लादेन नमस्कृतः २३ (८)।२७
=अयं सर्वेषां महोरगाणां मध्ये श्रेष्ठः १२।४४
=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत् २३ (९)।१८

अनन्तधामा =शङ्करस्य नाम २३ (२३)।३६ (११)

अनन्तयोनिः =शङ्करस्य नाम २३ (२३)।३६ (१)

अनरकम् =तीर्थं कुरुक्षेत्रस्थम् २३ (२०)।२४

	=तीर्थम्, इदं ब्रह्मादीनां चतुर्ण्णां देवानां मध्ये स्थितम्	२३ (२०) ।२५
अनलः	=दक्षयज्ञे शङ्करभयादयं वेगतः क्वचित् पलायितः	५ ।४
	=कश्यपो वपुष्मान् अनल आसीत्	२३ (३) ।१०,
	=शिवः, उष्णोऽनलवत्	२३ (२६) ।१४०
अनसूया	=अनया सहात्रिर्दक्षेण यज्ञे निमन्त्रितः	२ ।९
	=इयं दारुवने भ्रमन्तं शङ्करं दृष्ट्वाक्षोभं नावाप्त	६ ।६२
अनाख्यम्	=इदं सरस्वत्या रूपम्	२३ (८) ।१८
अनादिः	=विष्णुः, अस्य वामनावतारेणासुराणां तेजः परिक्षीणमिती प्रह्लादो बलिं प्रत्याह	२३ (८) ।१७
अनादिमध्यः	=विष्णुः, अयं वामनरूपेणावतीर्णः	२३ (८) ।१९
अनापद्	=अस्यां यः स्वधर्ममुत्सृज्य परधर्ममाश्रयेत् स पतितः परिकीर्त्यते	१५ ।३३
अनामयः	=महर्षिश्च्यवनो रसातले प्रह्लादस्यानामयं पृष्टवान्	७ ।३२
अनामयम्	=इदं द्विपादिकादिभ्यः प्राणिभ्यः प्रार्थितम्	३२ ।२१
अनिन्द्रियः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२३
अनिलः	=वायुः, अयं महिषासुरेण स्वर्गान्निराकृतः	१९ ।३
	=देववरो वायुः, अयं कात्यायनीं तुष्टाव	१९ ।१८
	=वायुः, शिव एवानिल उक्तः	२३ (२६) ।१२०
अनुग्राह्यता	=परशुरामेणेयं पितृसकाशात् प्रार्थिता	२३ (१४) ।६
अनुचक्रः	=प्रमथगणः, इमं त्वष्टा कार्त्तिकेयाय ददौ	३१ ।६६
अनुजः	=इन्द्रस्यानुजो भवेति वरः कश्यपेन विष्णोः सकाशात् प्रार्थितः	२३ (६) ।४
अनुज्ञा	=भर्त्तुरनुज्ञया या नारी वेनकृतं शिवस्तवं शृणुते सा देववत् पूज्या भवति	२३(२७) ।१३
	=द्वादश्यां ब्राह्मणेभ्योऽनुज्ञां संप्राप्य विष्णोः शयनं कार्यम्	१७ ।८

	=विष्णुः सैनापत्येऽभिषिक्ताय कार्त्तिकेयायानुज्ञां ददौ	३२ ।१२
अनुराधा	=नक्षत्रम् । भौमगृहम् । अस्य वृश्चिकराशिः कालरूपिणः शिवस्य मेढ्रस्थानम्	५ ।३८
अनुलेपनम्	=इदमादाय पृथूदकः शिवविवाहयात्रायां ययौ	२७ ।१४
अनुह्लादः	=दैत्यः, अनेन सर्वा दिशः परिपालिताः	२३(२) ।८
अनूपाः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५५
अनृतम्	=अदित्या विष्णुस्तवने विष्णुमधिकृत्य किञ्चिदप्यनृतं नैवोक्तम्	२३ (६) ।३४
	=एतदुक्तवान् नृपो धृतराष्ट्र ऋषिं दाल्भ्यं बकं प्रति	२३ (१८) ।२९
अनेकस्वरूपः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३(९) ।२६
अन्तः	=अन्तस्वरूपो भगवान् विष्णुः	२३ (६) ।१६
अन्तकः	=शिवस्य नाम	२३ (२६) ।१२७
	=यमः, इमं जेतुं वसिष्ठो मुरासुरं प्रैरयत्	३४ ।४७
अन्तकालः	=अस्मिन् रुषङ्गुर्नाम ब्रह्मर्षिः पृथूदकतीर्थे नयनाय पुत्रानाह	२३ (१८) ।१७
अन्तरात्मा	=अयं वारिणा न शुद्ध्यति	२३ (२२) ।२४
	=अयं मनसि शुद्धे सति स्वयमेव निराकुलो वर्तते	२३ (२२) ।८७
अन्तरिक्षम्	=लोकः, अत्र पुष्करतीर्थम्	७ ।३७
	=इदमगस्त्येनाऽऽक्रान्तम्	१९ ।३२
	=इदं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।२८
	=अस्मिन्नवस्थिता अर्थाः सरस्वत्या एव सकाशादुपलभ्यन्ते	२३ (११) ।२१
	=अत्र वायुना वेनपुत्रः पितृस्नानार्थं निषिद्धः	२३ (२६) ।४१
अन्तर्गिरिः	=अत्राङ्गादिजनपदाः सन्ति	१३ ।४४
अन्तर्जलम्	=औशनसतीर्थस्यान्तर्जले रहोदरचरणलग्नं शिरः पपात	२३ (१८) ।१२
अन्तर्धानम्	=इदं विष्णोरभूत् तदाऽदितिर्गर्भं समादधे	२३ (७) ।१४

	=इदं सोऽवाप्नोति यो ब्रह्मोदुम्बरतीर्थे स्नात्वा रुद्रमर्चयति	२३ (१५) ।१५
	=बालखिल्यमुनिभिर्लिङ्गे पातिते शंकरोऽन्तर्धानमुपगतः	२३ (२२) ।६८
अन्त्यजः	=अस्माद् दक्षिणायाः प्रतिग्राहकोऽश्मनि कीटको भवति	१२ ।३६
अन्त्राणि	=एतानि नरकपतितानां नराधमानां गुदेभ्यो बहिर्निःसार्यन्ते वायसैः	१२ ।२५
अन्धकः	=अस्मै प्रह्लादेन स्वं राज्यं समर्पितम्	८ ।४३-४४
	=हैरण्यलोचनः	८ ।४५
	=अनेन प्रह्लादो दृष्टः सभाजितश्च	८ ।७०
	=अस्य नेत्रहीनत्वाद् राज्याभिषेकविषयकः प्रश्नो नारदपुलस्त्यसंवादे	९ ।१
	=अयं हिरण्याक्षस्य जीवनावस्थायामेव चक्षुषी लब्धवान्	९ ।२
	=अनेन शुक्रः पुरोहितो वृतः	९ ।६
	=अनेन वसुधा समाक्रान्ता	९ ।७
	=अयं मेरुशिखरं जगाम	९ ।८
	=अस्य वाहनं रथः	९ ।२६
	=हिरण्यचक्षुस्तनयः, अस्येन्द्रेण सह संग्रामः	९ ।४५
	=हिरण्याक्षस्य पुत्रः, अनेन शूलपाणिस्तपसा समाराधितः	९ ।४
	=अयं त्रिलोचनाद् वरांल्लब्धवान्	९ ।६
	=अयं सर्वान् मनुजेन्द्रान् पराजयत	९ ।७
	=अस्येन्द्रेण सह युद्धम्	९ ।९-५२
	=असुरः, अस्य पुरन्दरेण सह संग्रामः	१० ।२
	=अनेनासुरेणेन्द्रप्रक्षिप्तं वज्र मुष्टिनाऽऽहत्य भूतले निपातितम्	१० ।८
	=असुरः, अयमिन्द्रस्य गजेन्द्रं प्रहारैः पातयामास, जानुना समाहत्य तस्य विषाणं च प्रबभञ्ज	१० ।१०-११
	=हिरण्याक्षसुतः, अयं देवासुरसंग्रामे यमदण्डं वेगेनाभिसृत्य जग्राह	१० ।१९-२०

=असुरः, अस्मै दैत्य-दानवयूथपैः साधुवादः कृतः १० ।२०-२२
=असुरः, अयं देवासुरसंग्रामे विरोचनप्राणरक्षार्थं दैत्यैरुच्चस्वरेण समाहूतः १० ।३६
=असुरः, अयं देवासुरसंग्रामे वरुणेन सह युद्धार्थमुपस्थितोऽभूत् १० ।४१
=अयं देवासुरसंग्रामे शम्बरासुररक्षार्थमग्निना सह युद्धमकरोत् १० ।५१-५२
=अयं देवासुरसंग्रामेऽग्निं परिघेण ताडितवान्, एतेनाग्निर्भयाद् बहिर्निर्गतः १० ।५३
=अयं शरैस्ताडयित्वा मारुतचन्द्रभास्करादीन् रणात् पराङ्मुखान् कृतवान्, एवमुग्रममरसैन्यं जितवान् १० ।५४-५५
=अनेन देवासुरसंग्रामेऽमरसैन्यं विजितम् भूमिष्ठा नरेन्द्रा वशे कृताः, पातालस्थेऽश्मकाह्वये नगरेऽवसच्च १० ।५५-५७
=असुरः, अस्योत्पत्तिकथनम् २३ (२७) ।३
=हिरण्याक्षस्यायं पुत्रः २३ (२७) ।४
=दैत्यः, अस्य समीपं महिषादयो दैत्याः कार्त्तिकियगणनिनादमाकर्ण्य गतवन्तः ३२ ।३३
=असुरः, अनेन सह दैत्येन्द्रस्य पातालकेतोः संवादः ३२ ।३६
=असुरः, अस्य पातालकेतुना सह संवादः ३२ ।४५
=असुरः, इममनाख्यायैव महिषादयो वीराः कार्त्तिकियगणैः सह युद्धाय निर्ययुः ३२ ।४७
=हिरण्याक्षस्य पुत्रः, अयं महिषतारकयोर्निहतयोः सतोः परिघं गृहीत्वा मेदिनीं विचचार ३३ ।१७
=असुरः, अयं गिरिजां दृष्ट्वा कामान्धः संजातः ३३ ।१९-२०
=अस्य गिरिजासम्प्राप्तिविषये विचारणा ३३ ।२०-२३

=असुरः, अयं प्रह्लादवचनमनादृत्य गिरिजां प्रदुद्रुवे ३३ ।३०

	=अयं परिघेण नन्दिनं पातयामास	३३ ।३३
	=अस्य भयाद् गौरी शतरूपाऽभवत्	३३ ।३४
	=अयं गिरिजां पश्यन्नपि न ददर्श	३३ ।३७
	=अयं शतावर्या देव्या शस्त्रैर्निराकृतः	३३ ।३८-३९
	=अयमद्रिनन्दिनीमपश्यन् स्वबलं निर्जितं च दृष्ट्वा पातालमाद्रवत्	३३ ।४६
	=अयं पाताले गौरीं स्मरन् रात्रौ न शेते दिवा च न भुङ्क्ते	३३ ।४७
अन्धकविजयः	=एतन्नामको वामनपुराणस्य दशमोऽध्यायः	१० ।५७
अन्धकसुरहन्ता	=शिवस्य नाम	२३ (२६) ।७२
अन्धतामिस्रकः	=नरकः, अयं षोडशहसस्रयोजनविस्तृतः	११ ।५३
अन्धतामिस्रम्	=नरकम्, ब्रह्मघ्नादयो जना दशवर्षसहस्राणि यावदस्मिंस्तिष्ठन्ति	१२ ।४१
अन्ध्राः	=अयं दाक्षिणात्यो जनपदः	१३ ।४९
अन्नदः	=शिवस्य नाम	२३ (२६) ।९६
अन्नपतिः	=शिवस्य नाम	२३ (२६) ।९६
अन्नम्	=इदमन्यैर्धृतं बुधो न धारयेत्	१४ ।५२
	=पर्युषितमप्यन्नं यदि स्नेहयुक्तं स्यात् तर्हि धर्मस्थितेन नरेण भोज्यं भवति	१५ ।२
	=केशकीटावपन्नस्यान्नस्य शुद्धये मृदम्बुभस्मक्षाराणि प्रक्षेप्तव्यानि	१५ ।१२
	=द्रोणाढकपरिमितं पक्वं चान्नं यद्यमेध्याभिप्लुतं भवेत् तर्हि शुद्धये तस्याग्रभागः परित्याज्यः शेषस्य च प्रोक्षणं विधेयम्	१५ ।१७
	=अज्ञाते सति दूषितान्नस्य भोजने कृते त्रिरात्रपर्यन्तमुपवासेन शुद्धिर्भवति	१५ ।१८
	=इदं सूतिकासंज्ञकस्य ब्राह्मणस्य ब्राह्मण्याश्च विगर्हितं भवति	१५ ।२७
	=कुक्कुटसंज्ञकस्यान्नं विगर्हितं भवति	१५ ।३२
	=इदं नग्नसंज्ञकानां पुरुषाणां विगर्हितं भवति	१५ ।३५
	=‘कुण्डाशी’ इति संज्ञकस्य पुरुषस्यान्नं भुक्त्वा शुद्धये चान्द्रायणव्रतं कर्त्तव्यम्	१५ ।३७

	=यो नित्यनैमित्तिककर्मणोर्हानिं कुर्यात् तस्यान्नं भुक्त्वा शुद्धये त्रिरात्रपर्यन्तं व्रतं कार्यम्	१५ ।३८
	=चतुर्थे संन्यासाश्रमे भैक्षमन्नं भक्षणीयम्	१५ ।६०
	=अनेन सहिताः कुम्भा ब्राह्मणाय दक्षिणायां देयाः	१७ ।५४
	=श्यामाकम्	२३ (१५) ।२
	=कीटादिभिः संसृष्टमन्नं रक्षसां भागो भवति	२३ (१९) ।३८
	=यः कीटादिभिः संसृष्टमन्नं भुङ्क्ते स राक्षसानामेव भागं भुङ्क्ते	२३ (१९) ।३९
	=अनेन संयुतैः करकैरनरकतीर्थे देवतानां प्रीणनं कार्यम्	२३ (२०) ।२८
	=इदं पूर्वं प्रजाभ्यो दत्तं पितामहेन वृत्त्यर्थम्	२३ (२८) ।२९
अन्नानि	=एतानि कीटादिभिः संसृष्टानि विद्वान् वर्जयेत्	२३ (१९) ।३९
अन्यजन्म	=तीर्थम्, एतत् सुविख्यातं सर्वपापप्रणाशनं चास्ति	२३ (१५) ।२८
	=तीर्थं कुरुक्षेत्रस्थम्	२३ (१५) ।२८
	=कुरुक्षेत्रस्थं तीर्थम्, इदं पूर्वं नारदस्याऽऽश्रम आसीत्	२३ (१५) ।३६
अन्यथामतिः	=एतादृशः पुरुषः साधुजनानां पैशुन्यमाचरति, तेन स नरके पतति	१२ ।१०
अन्या	=अन्येन प्रयुक्ता मृच्छौचार्थं न ग्राह्या	१४ ।३२
अपत्यम्	=पुत्रः, तस्य सन्ततिं दृष्ट्वा वानप्रस्थाश्रमं गच्छेत्	१५ ।५६
	=उमास्वेदादिसम्पर्काद् उत्थितं बालं स्वस्यापत्यं विदित्वा शिवः प्रीतिमानभवत्	२८ ।६६
अपत्यानि	=ऋषेर्मङ्कणस्यापत्यान्यासन्—	२३ (१७) ।६-७
	(१) वायुवेगः (२) वायुबलः (३) वायुहा (४) वायुमण्डलः (५) वायुज्वालः (६) वायुरेताः (७) वायुचक्रश्चेति	२३ (१७) ।६-७
अपरा	=पश्चिमा दिक्, इमामाश्रित्य पुरीषादेरुत्सर्गो नैव कार्यः	१४ ।३०
अपराजिता	=गौतमोऽस्याः पिता, माता चाऽहल्या	४ ।५

	=दक्षयज्ञे निमन्त्रिता	४ ।३
	=इयं तपस्तप्तुं गच्छन्त्या गिरिजया स्मृता सती तदन्तिकं जगाम	२८ ।१२
अपराधाः	=इमे सर्वे धरण्यां कृतास्तस्य पुरुषस्य नश्यन्ति यः कुरुक्षेत्रस्थे धरण्यास्तीर्थे क्षान्तियुक्तः सन् स्नाति	२३ (१३) ।२०
अपरान्ताः	=एतदाख्या जनाः स्वेच्छया क्षुद्रनदीजलानि पिबन्ति	१३ ।३७
अपरिमेयः	=शिवस्य नाम	२३ (२८) ।१६
अपवर्गः	=अस्य प्राप्तिरिज्यादिकर्मभिर्भवति	१३ ।१३
अपवर्गफलदः	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।२५
अपवाहः	=वसिष्ठस्यापवाहविषयकः प्रश्नो लोमहर्षणं प्रति महर्षीणाम्	२३ (१९) ।१
अपवाहिका	=नदी, इयमृक्षपर्वताद् विनिःसृता	१३ ।२५
अपविद्धः	=अस्यान्नं भोज्यं न भवति	१५ ।२५
	=देवादेस्त्यागी, गोब्राह्मणस्त्रीवधकारी गुरुभक्त्यरतश्च 'अपविद्ध'-संज्ञको भवति	१५ ।३४
	=पुत्रः, अयं षड्विधेषु दायादबान्धवेषु षष्ठो भवति	३५ ।४२
अपहारः	=कूलापहारेणोह्यमानो वसिष्ठः सरस्वतीं तुष्टाव	२३ (१९) ।१२
अपानः	=अयं शिवरूप उक्तः	२३ (२६) ।१२३
अपुनर्भवः	=अयं तेषां भवति ये केदारतीर्थे म्रियन्ते	३४ ।१५
अपूपाः	=एभिर्युतस्यास्य कलशस्यानरकतीर्थे दानेन सर्वपापानि नश्यन्ति	२३ (२०) ।२८
अप्रतिरूपः	=शिवस्य नाम	२३ (२६) ।७६
अप्रतिष्ठः	=नरकः, पुष्करद्वीपस्थनरकेष्वयं षष्ठः	११ ।५४
अप्रमेयः	=शिवस्य नाम	२३ (२८) ।१५
अप्रसादः	=ब्राह्मणानामप्रसादेन राक्षसानां पक्षो वर्धते	२३ (१९) ।३३
अप्सरसः	=इमा नारायणेन बदरिकाश्रमे दृष्टाः पूजिताश्चापि	७ ।३

	=एता देवासुरसंग्रामेऽभिमुखं हतान् शूरान् स्वर्गं नयन्ति स्म	९।५२
	=एताः पातालस्थितस्यान्धकासुरस्य परिचर्यां चक्रुः	१०।५७
	=एता भास्करस्य पतनं वेदयितुं ब्रह्मसदनं गतवत्यः	१६।५५
	=एताभिः सह देवादयः कात्यायनीमभितस्तस्थुः	१९।३७
	=एतासां सर्वर्तुकुसुमाख्यवनान्ते क्रीडनम्	२२।३३
	=एताः कामबाणपीडितां कन्यामुत्थाप्य पितृकुलं प्रापितवत्यः	२२।३७
	=आभिः सह तपती नृपात्मजं संवरणमरण्ये ददर्श	२२।४८
	=एताः सर्वा बलिं सेवन्ते स्म	२३ (२)।२०
	=एता वामनस्य सर्वदेवमये रूपे रेखास्थानीया आसन्	२३ (१०)।५०
	=एताः कुरुक्षेत्रं सेवन्ते	२३ (१२)।१७
	=रम्भाद्याः	२३ (१७)।३
	=एताः शोणितोन्मिश्रं तोयं वहन्तीं सरस्वतीं दृष्ट्वा दुःखिता बभूवुः	२३ (१९)।२३
	=आसां वरा रम्भा	२३ (२५)।३३
	=एताः शिवविवाहयात्रायां नृत्यन्त्यो जग्मुः	२७।१६
	=एताः कुमारेऽभिषिक्ते ननृतुः	३१।५६
अबलाः	=परस्य कस्यचिदबलायां सुरतं वर्ज्यम्	१४।४०
	=हिमालयपुरस्त्रियः, एता 'अम्बिकया दुश्चरं तपः स्थाने चीर्णम्' इत्यब्रुवन्	२७।३०
अब्दाः	=अब्दकोटिभिरपि कृतघ्नवृत्तेर्निष्कृतिर्न भवति	१२।५७
अब्धयः	=समुद्राः, एभिः सहितां पृथिवीं वामनो मृदु गच्छंश्चालयामास	२३ (९)।४१
	=समुद्राः, एभिः सहिता पृथिवी वामनस्य गत्या क्षुभिता बभूव	२३ (१०)।२
अब्धिः	=समुद्रः, अयं द्वौ प्रमथौ कार्त्तिकेयाय प्रददौ	३१।६८

अब्बिन्दवः = शुनो गात्रसंभूतैरेभिः सिक्तः कुष्ठादिरोगग्रस्तो वेनो दिव्यदेहमवाप २३ (२६) ।६१

अभग्नयोगः = शङ्करस्य नाम २३ (२३) ।३६ (२२)

अभिकोशः = पद्माभिकोशप्रतिमौ कात्यायन्याः पादौ ब्रह्मणस्तेजसा बभूवतुः १९ ।११

अभिगमनम् = कुरुक्षेत्रस्थाया यक्षिण्याः स्थानमभिगम्य नरस्तस्याः प्रसादेन महापातकनाशनं करोति २३ (१३) ।४०

अभिजनः = अयं तपसाऽभिलष्यते २५ ।५८

अभिजित् = नक्षत्रम्, अस्मिन् नक्षत्रे क्षौरकर्म नाचरणीयम् १४ ।५०

अभिमतम् = इदं विन्ध्यपर्वतस्थितां कात्यायनीं वीक्ष्य कर्त्तव्यमिति चण्डमुण्डाभ्यां महिषासुरो निवेदितः २० ।१६

अभिवाञ्छितम् = चैत्रमासस्य शुक्लपक्षे कुरुक्षेत्रे दूषणत्रिशिरःपूजितमहेश्वरस्य पूजनेन देवावभिवाञ्छितं प्रयच्छेते २३ (२५) ।२४

अभिषेकः = राज्ये तावदन्धकस्यायं कर्तव्यो वा न वेति प्रश्नः ९ ।१
= इमं कुरुक्षेत्रस्थिते भवानीवने कुर्वाणो गोसहस्रदानफलं लभते २३ (१४) ।२९
= अनेन सुतीर्थकतीर्थे कुरुक्षेत्रस्थेश्वमेधमवाप्नोति जनः २३ (१४) ।४१
= इमं कृतजप्याख्यतीर्थेस्थितगङ्गायां कुर्यात् २३ (१५) ।६२
= कुमारस्य तावदेतदर्थं कुरुक्षेत्र इन्द्रादयो देवा यत्नं चक्रुः ३१ ।५४

अभीष्टम् = मनस एतादृशं दानं कर्तुमगस्त्यः सूर्यं प्रतिज्ञातवान् १९ ।२५

अभोज्याः = सूतिकादयः, एषां लक्षणविषयकः प्रश्नः सुकेशेर्महर्षीन् प्रति १५ ।२६

अभ्यङ्गः = तैलमर्दनम्, एतत् कर्म नन्दासंज्ञकासु तिथिषु नाचरणीयम् १४ ।४८
= तैलमर्दनम्, रविवासरेऽभ्यङ्गकर्म न करणीयम् १४ ।४९
= तैलमर्दनम्, अनेन युक्तं कामं नोपस्पृशेत् १४ ।५४

अभ्यागतः	=बलेर्यज्ञमुपेतो वामनः, अस्य याचनाविषये बलिशुक्रयोः संवादः	२३ (१०) ।२१
अभ्यागताः	=एष्वभुक्तवत्स्वेव ये पुरुषा भोजनं कुर्वन्ति ते सूचीमुखा भूत्वा नरकयातनां सहन्ते	१२ ।१२
अमरः	=नारायणप्रसादात् प्रह्लादोऽयं संजातः	८ ।६४
	=विष्णुः, सर्वजगताममरो विष्णुरदित्या नमस्कृतः	२३ (६) ।२४
	=देवः, एतत्तुल्यः कामचारी संवरणो नाम राजा प्रतिष्ठानपुरं मेरुशिखरस्थं जगाम	२२ ।३८
	=देवः, अस्य गर्भतुल्यः संवरणो नाम राजाऽऽसीत्	२२ ।४८
	=वामनः, अस्मै दानविषये बलिशुक्रयोः संवादः	२३ (१०) ।२२
अमरगुरुः	=शिवस्य नाम	२८ ।३०
अमरता	=इमां पृथूदकतीर्थे जप्यपरो नरो लभते	२३ (१८) ।२०
अमरराट्	=नारायणः, अस्य प्रह्लादकृता स्तुतिः	८ ।५३
अमरसैन्यम्	=देवासुरसंग्रामेऽन्धकासुर एतत् स्वपराक्रमेण जितवान्	१० ।५५
अमराः	=देवाः, यदा दिवाकरः कर्कटराशिं प्रयाति, तदैषां रजनी भवति	१७ ।१२
	=देवाः, एते महिषासुरेण विजिताः	२० ।२५
	=देवाः, एते महिषासुरेण युद्धे विजिताः	२० ।३०
	=एषामर्थमेवाहं भूयो भविष्यामिति देवी दुर्गा देवान् सान्त्वयामास	२१ ।५२
	=एते मेनायाः समाराधनाय विष्णुनाऽऽदिष्टाः	२२ ।१७
	=एषां कन्यकाः सर्वर्तुकुसुमाख्यवनान्ते क्रीडन्ति स्म	२२ ।३३
अमरावती	=अस्या इन्द्रेण रक्षाविधानं कृतम्	९ ।९
	=अत्र देवासुरसंग्रामेऽन्धकासुरस्य प्रहारैः पतितो गजेन्द्रादवप्लुत्य शतक्रतुरिन्द्रः प्रविवेश	१० ।१२
	=देवनगरी, इन्द्रनगरी वा, इमामागत्य मुरासुरो युद्धार्थम् इन्द्रमाह्वयत	३४ ।३६

अमात्यः =महिषस्यामात्यौ चण्डमुण्डावास्ताम् २९।१७

अमानित्वा =इयं चतुर्थे संन्यासाश्रमे कर्तव्या १५।५९

=इयं परलोकप्रदायिका १६।२

अमाया =अनया सह भरद्वाजो दक्षयज्ञे निमन्त्रितः २।१०

अमितकान्तिमान् =अगस्त्यः, अयं दण्डकस्थो भूत्वा तपश्चचार १९।३४

अमितवीर्यः =विष्णुः, अयं गार्हस्थ्यनाशाभावाय प्रार्थनाप्रसङ्गे संबोधितः १७।२३

अमित्राः =एषां विनाशिकाऽऽसीद् ब्रह्मसभा २३ (३)।२०

अमुत्र =परलोके, अत्र दुराचारशीलः पुरुषो न नन्दति १४।१७

अमूर्तम् =एतादृशं समस्तं वस्तु सरस्वत्याः स्वरैर्व्यञ्जनैश्च संबद्धम् २३ (११)।२२

अमृततीर्थम् =इदं कुरुक्षेत्रे स्थितम्, अस्मिन् स्नात्वाऽमृतत्वमवाप्नुयात् २३ (१६)।४

अमृतत्वम् =इदं कुरुक्षेत्रस्थेऽमृततीर्थे स्नात्वा नरो लभते २३ (१६)।४

=आषाढमासस्य शुक्लाष्टम्यां कुरुक्षेत्रस्थं लिङ्गं सम्पूज्य नरोऽमृतत्वमवाप्नोति २३ (२५)।२१

अमृतम् =स्थानम्, इदं क्षीरसमुद्रस्योत्तरे कूल उदीच्यां दिशि वर्तते २३ (४)।७

=स्थानम्, अत्र तपश्चरणाय ब्रह्मा देवानादिदेश २३ (४)।८

=एतदाख्यं स्थानम्, इदं कश्यपेन संप्राप्तम् २३ (४)।२०

=इदं पिबतः पितामहस्योदरात् सुरभिः समुद्भूता २३ (१४)।३०

=इदं स्थानं कुरुक्षेत्रस्थम्, अत्र देवैर्हनूमान् प्रकटीकृतः २३ (१६)।३

=‘अस्य पानेन शङ्करं ज्ञास्यथ’ इत्युमा देवी देवान् प्राह २३ (२३)।२७

=इदं भवान्या दत्तं देवाः पपुः २३ (२३)।२८

अमृताशी =शिवस्य नाम २३ (२६)।१४२

अमेध्यम् =एतेन स्पृष्टस्य संसक्तस्य वा वस्तुनः शुद्धिर्मृत्तोयैर्गन्धापहरणेन च भवति १५।१४

	=अनेनाभिप्लुतं पक्वं द्रोणाढकपरिमितमन्नं तदैव शुद्धिमर्हति, यदा तस्याग्रभागः परित्याज्यः शेषभागश्च प्रोक्षणीयः स्यात्	१५ ।१७
अमोघम्	=विष्णोस्तेजः	२३ (४) ।१२
अम्बरम्	=वस्त्रम्, अरुणासंगमे स्नात्वा राक्षसा दिव्याम्बरधरा बभूवुः	२३ (१९) ।४३
	=अत्र नारायणप्रह्लादयोर्युद्धं द्रष्टुकामा देवाः संनिपातिताः	८ ।८
	=वस्त्रम्, अनेन स्नानानन्तरं गात्रं विमृज्यात्	१४ ।५४
	=अस्मिन् सुकेशिपुरं तेजस्त्वाच्चन्द्रवत् प्रतीयते	१६ ।९
	=अस्मात् सुकेशिपुरं भ्रष्टम्	१६ ।३९
	=आकाशम्, अत्र स्थित आश्रमेऽगस्त्यमुनिः पर्वकालेऽवसत्	१९ ।३४
	=इदं परित्यज्य भूमितले निषण्णः सन् दुन्दुभिर्महिषासुरोक्तं वाक्यं कथयामास	२० ।२४
	=कृष्णमृगस्य चर्मणोऽम्बरं वसानं कश्यपं देवाः प्रणेमुः	२३ (३) ।९
	=इदमाविश्य पार्वती शिवस्याऽऽदेशेन पितुर्भवनं जगाम्	२५ ।७२
अम्बिका	=अस्या पादाद् नरोत्तम एकः संभूतः	९ ।१८
	=देवी कात्यायनी, इयं वर्मबन्धनाय देवैर्निवेदिता	२० ।३९
	=देवी कात्यायनी, अस्या हास्यात् समुद्भूता नानाविधा भूता एनामस्तुवन्	२१ ।२१
	=देवी कात्यायनी, अनया चिक्षुरस्य सारथ्यादिकं निहतम्	२१ ।२६-२७
	=देवी कात्यायनी, इयं सिंहं हन्तुं समागते महिषासुरे क्रुद्धा बभूव	२१ ।४०
	=उमा, अनया दुश्चरं तपः स्थाने चीर्णमिति गृहे प्रविष्टं शिवं वीक्ष्य तावदबला अब्रुवन्	२७ ।३०
	=काली, उमा वा, इयं विवाहकाले शिवमुखं दृष्ट्वा शैत्यमुपागता	२७ ।४८

	=शिवपत्नी काली, एनां ब्रह्मा वरप्रार्थनायै प्रोवाच	२८ ।२१
	=अनया निपात्यमाना दनुपुङ्गवाः शुम्भमुपाश्रयन्त	२९ ।८८
	=देवी, इयं रिपुं स्ववक्त्रे प्राक्षिपत्	३० ।२९
	=देवी, इयं क्षुरप्रेण निशुम्भस्य गदां करौ च चिच्छेद	३० ।४५
	=देवी, इयं हसन्ती लीलया बाणद्वयं कुम्भे जघान	३० ।५१
	=गिरिजा शिवपत्नी, अस्याः शिवेन सह संवादः	३१ ।३५
	=शिवपत्नी गिरिजा, इयं शरवणे कृत्तिकोत्सङ्गशायिनं शिशुकं ददर्श	३१ ।३८
	=देवी पार्वती, इयमुन्मादादींस्त्रीन् प्रमथान् कार्त्तिकेयाय प्रददौ	३१ ।६९
	=इयमन्धकासुरं पतितं वीक्ष्याऽन्तर्धानं गता	३३ ।४०
	=अस्याश्चरणौ गणेश्वरो नन्दी ववन्दे	३३ ।४३
अम्बु	=अनेन शुद्धिर्भवति मणिरत्नप्रबालादीनाम्	१५ ।५
	=अस्य बिन्दवः सन्तप्ताः सन्तः पवित्रा भवन्ति	१५ ।१०
	=अनेन केशकीटावपन्नमन्नं शुध्यति	१५ ।१२
	=जलम्, अनेन कांस्यस्य शुद्धिर्भवति	१५ ।१३
	=अस्मिन् पातेन मृते सति सद्य एव शौचं भवति	१५ ।४४
	=जलम्, अनेनाच्युताद्या गुहमभ्यषिञ्चन्	३१ ।५५
अम्बुजः	=प्रमथः, इमं यक्षाः कार्त्तिकेयाय दत्तवन्तः	३१ ।७३
अम्बुजपत्रनेत्रा	=देवी कात्यायनी, अस्या दुन्दुभिना सह संवादः	२० ।३२
अम्बुदाः	=मेघाः, एते यथा दिव उपरि वृष्टिधारौघं पातयन्ति, तथैव नमरो विन्ध्यशैलोपरि बाणवृष्टिं चकार	२१ ।५
अम्बुधराः	=मेघाः, एषु यथा विद्युद् विभाति, तथैव देव्या धनुरपि विबभौ	२१ ।७
अम्बुवनम्	=वनम्, अत्र कामेश्वरतीर्थं वर्तते	२३ (१४) ।४२
अम्भः	=पादगतमम्भो गृहाद् बहिः क्षेप्तव्यम्	१५ ।२१
	=वैशाखमासे सुगन्धकुसुमाम्भसा स्नानं कर्तव्यम्	१७ ।५२
	=अस्य मध्ये सरस्वती नदी वसिष्ठमपोवाह	२३ (१९) ।१९

	=अस्मिन्नम्भसि स्कन्नं रेतो मुनिर्मङ्कणः कलशे जग्राह	२३ (१७) ।४
	=जलम्	२३ (१९) ।१३
अम्भांसि	=जलानि, एषां प्रवाहेण सरस्वती वसिष्ठं स्थानाच्चालयामास	२३ (१९) ।११
	=सरस्वती स्वीयैरम्भोभिः सर्वं जगद् व्याप्तवती	२३ (१९) ।१३
अम्लः	=रसः, अनेनौदुम्बराणां ताम्रमयवस्तूनां शुद्धिर्भवति	१५ ।१३
	=रसः, अयमाश्विनशुक्लैकादश्यां विष्णवे समर्पणीयः	१८ ।१४
अयःशङ्कुः	=अस्य वाहनं मृगाधिपः	९ ।३०
	=दैत्यः, अयं वासुदेवबलाधिको बलिना प्रोक्तः प्रह्लादं प्रति	२३ (८) ।३०
अयनम्	=उत्तरायणम्	१७ ।३
	=दक्षिणायनम्	१७ ।१२
	=सम्भवत उत्तरायणम्, अत्र स्थितेऽपि दिवाकरे दैत्यपथे संप्रवृत्ते सति दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।८-१२
	=दशसहस्रसंख्या, एतावद्वर्षपर्यन्तमदितिः कुरुक्षेत्रवने घोरं तपोऽतप्यत	२६ (६) ।१३
अयोगिनः	=एषामनाश्रमो वेश्म भवति	२३ (२२) ।८४
अयोगुडाः	=इमे पापिनां वदने नरकेषु क्षिप्यन्ते	१२ ।२०
अयोनिः	=विष्णुः, अस्य कलावतारेणासुराणां तेजः परिक्षीणमिति प्रह्लादो बलिं प्रति कथयामास	२३ (८) ।१७
अरणिः	=देवानामरणिः सरस्वती	२३ (११) ।६
अरण्यम्	=पुष्करारण्यम्, मागधारण्यम्, सैन्धवारण्यम्, निमिषारण्यम्, धर्मारण्यम्	३ ।९-१०
	=केसरारण्यम्	६ ।६९
	=मगधदेशीयेऽस्मिन्नेकदा सुकेशिरगच्छत्	११ ।७
	=दण्डकम्	१९ ।३४

	=अस्मिन् क्रोष्टुको मुदितः सन् मृगराजवधूमनुधावति	२१ ।२९
	=अत्र संवरणाख्यो राजाऽनध्याये जगाम	२२ ।२९
	=अस्मिन् संवरणं नाम राजानं सूर्यपुत्री तपती ददर्श	२२ ।४८
	=दण्डकारण्यम्	२३ (१८) ।५
अरयः	=द्विजदेवतारीणां विनाशाय देवैर्देवी प्रार्थिता	३० ।६१
अरातयः	=तवारातीनहं नाशयिष्यामीति विष्णुरदितिं प्रत्याह	२३ (७) ।११
अरिष्टनेमी	=अयं दक्षयज्ञे तावद् इध्माहरणकारी वर्णितः	२ ।१३
अरुणा	=नदी, इमां मुनयः सरस्वत्यां समानयन्	२३ (१९) ।३०
	=नदी, अस्याः सरस्वत्याश्च संगममृषयो रक्षसां मोक्षार्थमकल्पयन्	२३ (१९) ।४१
	=नदी, अस्याः सरस्वत्या संगमः कुरुक्षेत्रे वर्तते	२३ (१९) ।४२
अरुणाक्षः	=महासुरः, इमं [1]महालिरूपं धृत्वाऽहं विनष्टजीवितं करिष्यामीति देवी देवानाह	३० ।७१
अरुणासंगमः	=अयं कुरुक्षेत्रे वर्तते, अत्र स्नानेन मुक्तिर्लभ्यते	२३ (१९) ।४२
अरुन्धतिः	=अनया सह वसिष्ठो दक्षयज्ञ आमन्त्रितः	२ ।९
अरुन्धती	=इयं दारुवने सतीविरहे भ्रमन्तं शिवं दृष्ट्वा क्षोभं नावाप्ता	६ ।६२
	=अनया सह महर्षयो मन्दरशैलसानुनि विविशुः	२६ ।६
	=इयं पत्या सह हिमालयं जगाम	२६ ।१४
	=इयं शिवेन स्मृता मन्दरगिरिं जगाम	२६ ।१-२
	=अनया सह सप्तर्षयो येन कार्येण हिमाद्रिगृहमगच्छंस्तत् सर्वमङ्गिरा गिरिराजं श्रावयामास	२६ ।३३
	=इयं कालीमङ्कमारोप्य लज्जमानां तामाश्वासयामास	२६ ।६१
	=इमां हरो विधिना पूजयामास	२६ ।६८
	=अस्याः शिवेन सह संवादः	२७ ।१३

---

[1] 'महाकालि-' इति वक्तव्ये छन्दोभङ्गभिया 'महालि-' इति दृब्धिरिति वागीशः शास्त्री ।

अर्कः	=सूर्यः, अस्याभिमुखं ये मूत्रकर्म कुर्वन्ति तेषां गुदेभ्यो वायसा अन्त्राणि बहिष्कुर्वन्ति नरकेषु	१२ ।२५
	=सूर्यः, अयं सर्वेषां तेजस्विनां मध्ये प्रवरः	१२ ।४९
	=सूर्यः, अस्य बिम्बं प्रातःकाले दर्शनीयम्	१४ ।३७
	=रविवासरः, अस्मिन्नभ्यङ्गकर्म नाचरणीयम्	१४ ।४९
	=सूर्यः, निःस्नेहास्थिस्पर्शानन्तरं शौचार्थं स्नानं करणीयम्	१५ ।२०
	=सूर्यः, अस्यावलोकनाद् वेदादिनिन्दकस्पर्शालापजन्यो दोषो निरस्यते	१५ ।२४
	=सूर्यः, अयं रक्तबीजाख्येन दैत्येन विजितः	१८ ।७०
	=सूर्यः, अस्य पुत्री तपती	२२ ।५५
	=सूर्यः, अयं सरस्वत्या रूपम्	२३ (११) ।१६
	=शुक्रार्कचन्द्रसंयोगे ब्रह्मणा स्थाणुलिङ्गं प्रतिष्ठितम्	२३ (२५) ।५४
	=सूर्यः, अमुं स्वर्भानुः शङ्करस्य तेजसा रक्षितः सन् ग्रसति	२३ (२६) ।१५४
	=सूर्यः, चन्द्रार्कयोश्चन्द्रार्करश्मिषु च ये प्राणिनः सन्ति ते वेनेन नमस्कृताः	२३ (२६) ।१५९
	=सूर्यः, अयं शिवमुद्दिश्य शिरसाऽवनिं जगाम	२८ ।४४
अर्ककुसुमानि	=एभिर्ज्येष्ठमासे त्रिनेत्रस्य पूजा कर्त्तव्या	१७ ।५५
अर्कबिम्बम्	=इदं प्रातःकाले दर्शनीयम्	१४ ।३७
अर्कसहस्रतुल्यम्	=विष्णुशङ्करादिवदनाद् विनिःसृतं तेजो ज्वलत्प्रकाशार्कसहस्रतुल्यं संजातम्, ततश्च कात्यायनी सम्भूता	१९ ।८
अर्कसुता	=तपती, अस्या वसिष्ठेन सह संवादः	२२ ।५५
अर्काः	=सुराः, एषां हयग्रीवप्रमुखैर्दैत्यैः सह द्वन्द्वयुद्धं प्रवृत्तम्	९ ।४८
अर्घः	=अनेन भास्करो वरुणात्मजं पूजितवान्	२२ ।४४
	=इममादाय बलिर्गोविन्दं पूजयामास	२३ (१०) ।४०
अर्चनम्	=शङ्करस्यार्चनं गुह्यकानां धर्मः	११ ।२५

	=यः पुरुष उचिते काले पितृ-देवार्चनं न करोति स षण्ढः परिगीयते	१५ ।२८
	=इदं कार्त्तिके मासि करवीरस्य पुष्पैः स्थाणोर्विधेयम्	१७ ।३६
	=इदं माघमासे मृगमदेनोमापतेः कार्यम्	१७ ।४२
	=चैत्रमासे नाट्येश्वरस्यार्चनं मन्दारपुष्पैः कार्यम्	१७ ।४९
	=इदम् आषाढमासे दक्षयज्ञघ्नस्य धुत्तूरकुसुमैः कार्यम्	१७ ।५८
	=सुतीर्थकतीर्थेऽभिषेकं कृत्वा पितृदेवार्चने रतः पितॄन् प्रीणाति	२३ (१४) ।४१
अर्चा	=इयं मार्गशिरोमासि रुद्रस्य कार्या	१७ ।३८
अर्जनम्	=अनेन भूमिर्विशुध्यते	१५ ।११
अर्जुनी	=गौः, सर्वासु गोषु कपिला गौः श्रेष्ठा	१२ ।५५
अर्णवाः	=सप्तसंख्याकाः, इमे सुप्रभातकरणाय प्राभातिकमङ्गलेन प्रार्थ्यन्ते	१४ ।२७
	=सप्त समुद्राः, एते सरस्वत्या अन्तर्जले निमग्ने सति शिवे चेलुः	३४ ।२१
अर्णवालयः	=शिवस्य नाम	२३ (२६) ।६६
अर्णोदरः	=अयं धनदस्य शिष्यः, जात्या शूद्रः	६ ।९१
अर्थः	=इमं प्रभातकाले शिवोक्तमङ्गलपाठानन्तरं समुत्थाय विचिन्तयेद् मानवः	१४ ।२९
	=देशानुशिष्टधर्मेण स्वगोत्रधर्मेण चार्थसिद्धिः करणीया	१४ ।३८
	=अस्य संप्राप्तिर्निर्दिष्टाचारस्य विधानेन गृह एव भवति	१५ ।५४
	=अनेन संयुक्ता निशाचरा अभवन्	१६ ।६
	=अयं संवत्सरं यावत् कृतेन व्रतेनाक्षयो भवति	१८ ।२४
	=छन्दसामर्थज्ञैर्द्विजैरीरितं स्वरं ब्रह्मसभायां देवाः श्रुतवन्तः	२३ (३) ।२३
	=अयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।३१
	=इममविरोधयन् कुरुः सौदामन्या सह रेमे	२३ ।६

	=अनेन युक्तं (अर्थवत्) पदं सरस्वत्यां संयोगं लभते	२३ (११) ।६
	=अयं शिवरूप उक्तः	२३ (२६) ।११६
अर्थाः	=एषां पुष्करद्वीपे विनाशो भवति	११ ।४७
	=एषां वामनाय दानार्थं बलिः प्रतिज्ञातवान्	२३ (१०) ।४२
	=एते सर्वे सरस्वत्या एव सकाशादुपलभ्यन्ते	२३ (११) ।२१
अर्थिनः	=एभ्यः सुवर्ण-ग्राम-रत्नादीनां दानाय वामनेन बलिर्विज्ञापितः	२३ (१०) ।४४
	=एषामन्येषां कृते वित्तस्य स्वेच्छया दानार्थं वामनो बलिमुक्तवान्	२३ (१०) ।४६
अर्थी	=याचकः; कोऽपि याचको मम सकाशाद् विमुखो न भवतीत्यगस्त्यः सूर्यं बभाषे	१९ ।२५
अर्धमासाः	=एते ब्रह्मसभायां ब्रह्माणमुपासते	२३ (३) ।३३
अर्धयोजनम्	=इदं प्रमाणं पृथूदकसरसो वर्तते विश्वेश्वरादिकं समन्तात्	२३ (१) ।९
अर्धसहस्रम्	=चन्द्रमसो रथः	९ ।२०
अर्बुदः	=कुमारद्वीपस्थः पर्वतः	१३ ।१७
अर्बुदाः	=एते कुमारद्वीपात् पश्चिमदिशि स्थिता जानपदा जनाः	१३ ।५२
अलकाः	=एभिः कात्यायन्या तोयधरा जिताः	२० ।४
अलङ्काराः	=एषां वामनाय दानार्थं बलिः प्रतिज्ञातवान्	२३ (१०) ।४१
अलातचक्रम्	=एतद्वद् आर्तः सन् रविः कदाचिद् असिनद्यां कदाचिच्च वरणानद्यां भ्रमति स्म	१६ ।५४
अलिमद्राः	=उत्तरापथवासिनो जनाः, एते क्षुद्रनदी-जलानि पिबन्ति	१३ ।४२
अलेपकम्	=तीर्थं कुरुक्षेत्रस्थम्, अत्र चैत्रशुक्लचतुर्दश्यां स्नात्वा पापलेपमुक्तो भवति मानवः	२३ (१५) ।४४
अवकीर्णम्	=तीर्थं कुरुक्षेत्रस्थम्	२३ (१८) ।२५
	=अस्य नामादिविषय ऋषीणां लोमहर्षणं प्रति प्रश्नः	२३ (१८) ।२७

	=तीर्थम् (कुरुक्षेत्रस्थम्)	२३ (१८) ।३०
	=तीर्थं कुरुक्षेत्रस्थितम्, अत्र राजा धृतराष्ट्रो बकस्य प्रसादनार्थं ययौ	२३ (१८) ।३३
	=तीर्थं कुरुक्षेत्रस्थम्, अत्र श्रद्धया स्नानेन मनसा चिन्तितं फलं प्राप्यते	२३ (१८) ।३६
अवज्ञा	=ये पुरुषा मातृपितृगुरूणामवज्ञां कुर्वन्ति ते नरकगामिनो भवन्ति	१२ ।११
	=अस्यां कृतायां सत्यामहं त्वां शापेन योजयिष्य इत्यगस्त्यो विन्ध्यमुवाच	१९ ।३१
अवध्यत्वम्	=इदमन्धकेन शिवाल्लब्धम्	९ ।५
	=इन्द्रादवध्यत्वरूपं वरं प्राप्य नमुचिः पाताललोकं जगाम	२९ ।६
अवनिः	=पृथ्वी, महिषासुरेण सर्वे देवाः स्वर्गाद् निराकृत्यावनिस्थाः कृताः	१९ ।३
	=पृथ्वी, इयमर्करश्मिसंतप्ता सती वृष्टिं प्राप्य शैत्यमुपयाति	२७ ।४८
अवनीध्रः	=पर्वतो विन्ध्याख्यः	१९ ।२१
अवन्तयः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५५
अवन्ती	=नदी, इयं कुमारद्वीपे पारियात्रपर्वताद् विनिर्गता	१३ ।२४
अवबोधनम्	=आत्मन इदं धर्मश्चतुर्थे संन्यासाश्रमे	१५ ।६०
अवमर्शित्वम्	=परदाराणामवमर्शित्वं रक्षसां धर्मः	११ ।२६
अवयः	=इमा रम्भासुरेण माल्यवटाख्ययक्षस्य समीपे दृष्टाः	१८ ।५४
अवरोधः	=ग्रहणम्, ब्राह्मणस्यावरोधत्वमागता या ब्राह्मणी, सा च ब्राह्मणश्चेत्युभौ 'सूतिका'-संज्ञकौ भवतः, अनयोरन्नं विगर्हितं भवति	१५ ।२७
अवलेपः	=बलस्यावलेपेन बलिर्मोहमुपागतः	२३ (९) ।२
अवलोकनम्	=सूर्यस्यावलोकनाद् देवतादिनिन्दकस्पर्शालापजन्यो दोषो निरस्यते	१५ ।२४

अवसानम्	=होमावसाने सूर्यः स्वसमुद्धरणाय मुनिमगस्त्यं बभाषे	१९ ।२३
अवस्था	=युगानामियं तावद् इलावृत्ताद्यष्टसु वर्षेषु न वर्तते	१३ ।७
अवस्थाः	=तिस्रः, इमाः सरस्वत्या रूपम्	२३ (११) ।११
अवहारः	=वीरभद्रेण सह युद्धे प्रवृत्ताद्या देवाद्या इममकुर्वन्	४ ।३६
अविकः	=(मेषः) अस्य मुखमिव मुखं धारयन्तो भूता देव्या हास्यात् समुद्भूताः	२१ ।२०
अविधिः	=अविधिनापि विष्णुपदह्रदादौ कृता क्रियाऽक्षया भवति	२३ (१०) ।८३
अविनयः	=अयं बलिना प्रह्लादं प्रति दर्शितो येन स विषण्णोऽभूत्	२३ (९) ।४
अविवेकः	=अयं पिशाचानां धर्मो भवति	११ ।२७
अव्यक्तस्थितिः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।१९
अव्ययः	=धर्मराजः, दक्षयज्ञे द्वारपालः	४ ।२५
	=शिवस्य नाम। वीरभद्रस्य पराजयमाकर्ण्यायं क्रोधं चक्रे	४ ।५४
	=शिवः, अयं शिशिराद्रौ तपस्तप्तुं जगाम	६ ।१०६
	=नारायणः, अस्य प्रह्लादेन सह वार्ता	८ ।४७
	=नारायणः, अयं प्रह्लादेन स्तुतः	८ ।४९
	=नारायणः, अस्य प्रह्लादकृता स्तुतिः	८ ।५५
	=अयं विरोचनस्य हस्ती	१० ।२९
	=शङ्करः, अयं चारणानां वचः श्रुतवान्	१६ ।४२
	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।२७; ३५
	=वामनः, इमं योगिनः सदैव द्रष्टुमिच्छन्ति	२३ (१०) ।११
अव्ययम्	=इह लोके परत्र चाव्ययं श्रेयो महर्षिभिः सुकेशिं प्रति कथितम्	११ ।१२
अव्ययाः	=मानवादीनां द्वादश धर्माः	११ ।२९
अव्ययात्मा	=अग्निः, अयं देवासुरसंग्रामे शम्बरासुरं निष्पिपेष	१० ।५१
अशनम्	=वृश्चिकानामशनार्थं नरकगताः पापिनः पात्यन्ते	१२ ।२९

अशनिः	=अस्य सन्निभेन नादेन महिषासुरो देव्या भूतगणान् संतापयामास	२१।४०
अशनिगर्जितम्	=एतत् सर्वं शिवरूपं कथ्यते	२३ (२६)।११०
अशुभम्	=इदं पुंसो विधात्रा प्रागेव प्रतिपादितम्	२०।१८
	=सर्वलोकानां शुभमशुभं च कर्म चन्द्रसूर्यौ पश्यतः	२३ (६)।३४
	=देव्याः स्तुतिबलिकुसुमकराणां जनानामशुभं न भवति	३०।६३
अशून्यशयना	=द्वितीया, इयं सर्वकामदा प्रोक्ता	१६।२३
	=एतदाख्या द्वितीया तिथिः, अस्यां (कर्कटराशिगते दिवाकरे) प्रजापतिर्विश्वकर्मा स्वपिति, अस्यां हरेरर्चा कर्त्तव्या	१७।१९
अशेषः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९)।१९; २१
अशोकः	=वृक्षः, अस्य मुकुलं सर्वेषु मुकुलेषु श्रेष्ठम्	१२।५१
अशौचाः	=शौचविहीना जना महारौरवादिनरकेषु तिष्ठन्ति	१२।४०
अश्मकम्	=एतन्नामकं पुरं पातालस्थम्, अत्रान्धकासुरोऽवसत्	१०।५६
अश्मकाः	=अयं दाक्षिणात्यो जनपदः	१३।४९
अश्मकीटकः	=यश्चण्डालादेर्दक्षिणां प्रतिगृह्णाति सोऽश्मकीटको भवति	१२।३६
अश्मान्तः (स्थूलकीटकः)	=यो नरश्चण्डालादेर्दक्षिणां गृह्णाति स महारौरवाख्ये नरकेऽयं भवति	१२।३६
अश्वः	=एतादृशोऽश्वो गालवस्य समक्षम् आकाशात् पपात य एकस्मिन् दिवसे सहस्रयोजनगामी बभूव।	३३।७
अश्वतरः	=शङ्करस्य सव्येतरहस्ते कङ्कणभूतोऽयं नागः	१।२७
अश्वत्थः	=वृक्षविशेषः, अस्य स्पर्शोः दर्शनं वा प्रातःकाले विधेयम्	१४।३७
	=वृक्षः, अयं रवेर्जातिः	१८।८

	=वृक्षः, इममाश्रित्य देवर्षिर्नारदो ध्यानस्थ आसीत्	२३ (१५) ।३२
	=वृक्षः, कुरुक्षेत्रस्थेऽन्यजन्माख्यतीर्थे स्थितः । अस्य मूले नारदः सदा वसति	२३ (१५)३८
	=वृक्षः, अन्यजन्माख्यतीर्थस्थितस्यास्य वन्दनेन यमदर्शनं न भवति	२३ (१५) ।३८
अश्वमेधः	=अयं क्रतुः = यज्ञः सर्वेषु क्रतुषु श्रेष्ठः	१२ ।४७
	=यज्ञविशेषः, अस्य फलं कुरुक्षेत्रस्थदक्षेश्वर-शिवस्य दर्शनेन लभ्यते	२३ (१३) ।२१
	=यज्ञः, अस्य फलं कुरुक्षेत्रस्थे पुष्कराख्यतीर्थे पितृदेवता अभ्यर्च्य राजा विन्दति	२३ (१३) ।४२
	=यज्ञः, इमं स प्राप्नोति यः सुतीर्थकतीर्थेऽभिषेकं कृत्वा पितृदेवार्चनं करोति	२३ (१४) ।४१
	=यज्ञः, अस्य फलं लभ्यते कृतजप्यनामके तीर्थे महादेवस्यार्चनेन	२३ (१५) ।६२
	=यज्ञविशेषः, अस्य फलं यायात-तीर्थे स्नानेन लभ्यते	२३ (१८) ।३८
अश्वशाला	=अश्वशालावासिनः प्राणिनो वेनेन नमस्कृताः	२३ (२६) ।१५८
अश्वशिराः	= दैत्यः, अयं वासुदेवबलाधिको बलिना प्रोक्तः प्रह्लादं प्रति	२३ (८) ।३०
अश्वाः	=एभिः सहितो नमरनामा दानवो देव्या उपरि समापतत्	२१ ।४
	=एषां वामनाय दानार्थं बलिः प्रतिज्ञातवान्	२३ (१०) ।४१
अश्वितीर्थम्	=अत्र श्रद्धया कार्यविधानेन रूपं यशश्च लभ्येते	२३ (१३) ।३१
अश्विनी	=अत्र मेषराशिः, कालरूपिणः शिवस्य शिरः-प्रदेशोऽयम्	५ ।३१
अश्विनौ	=दक्षयज्ञे शङ्करभयादिमौ देवौ पलायितौ	५ ।४
	=देवौ, एतौ देवसेनाया मध्यभागेऽवस्थितौ बभूवतुः	९ ।१२
	=देवौ, एनयोर्वाहनं हयः	९ ।२१
	=एतौ देवौ देवासुरसंग्रामात् पराङ्मुखा बभूवुः	१० ।५४

	=अश्विनीकुमारौ, अनयोरधिकारमाक्रम्य महिषासुर एनौ स्वर्गाद् निराकृतवानिति देवा विष्णुशङ्कराभ्यां निवेदितवन्तः	१९ ।३
	=एतौ वामनाकृतिविष्णुस्थितौ प्रह्लादो ध्यानेन ददर्श	२३ (८) ।१०
	=एनौ वामनस्य श्रवणस्थानीयावास्ताम्	२३ (१०) ।५२
	=देवौ, एनयोस्तीर्थे श्रद्धया कार्यविधानेन रूपं यशश्च लभ्येते	२३ (१३) ।३१
	=अश्विनीकुमारौ, एनौ वत्सनन्दिनामानौ प्रमथौ कार्त्तिकेयाय प्रादाताम्	३१ ।६४
	=एनौ स्वस्तिविधानार्थं प्रार्थितौ	३२ ।१९
अष्टबाहुः	=गणः, इमं काशी कार्त्तिकेयाय ददौ	३१ ।७९
अष्टमं नरकम्	=लुब्धत्वादिप्रयुक्तम्	३५ ।८
अष्टमी	=चैत्रमासस्य कृष्णपक्षेऽष्टम्यां ब्रह्मतीर्थे सोपवासं वासेन नराः परं सूक्ष्मं पश्यन्ति	२३ (२१) ।२९
	=अक्षयाख्या पुण्या च, अस्यां तुष्टेन शम्भुना रोहिण्यै वरो दत्तः	१६ ।२५
	=तिथिः, अस्यां कात्यायनी स्वपिति	१७ ।१५
	=तिथिः, इयं (भाद्रपदकृष्णपक्षीया) कालाष्टमी	१७ ।३०
	=तिथिराश्विनमासस्य, अस्यामुपवासः कर्त्तव्यः	१७ ।३५
	=तिथिः, अस्यां मार्गशिरोमासि तावदुपवासः कार्यः	१७ ।३८
	=तिथिः, फाल्गुनमासस्य कृष्णपक्षीयाष्टम्यामुपवासः कार्यः	१७ ।४६
	=तिथिः, अस्यां स्थाणुप्रभृतिषु तीर्थेषु परिक्रमस्य विधानेन यज्ञफलं प्राप्यते	२३ (२५) ।४
	=तिथिः, अस्यां गोकर्णेश्वरं पूजयित्वा कौमारब्रह्मचर्यस्य पुण्यं लभ्यते	२३ (२५) ।१८
	=तिथिः, आषाढमासस्य शुक्लाष्टम्यां कुरुक्षेत्रे स्थितं लिङ्गं संपूज्य नरोऽमृतत्वमवाप्नोति	२३ (२५) ।२१
	=कृष्णपक्षस्याष्टमी, अस्यां स्थाणुतीर्थे वासं कृत्वा नरः सर्वैः पातकैर्मुच्यते	१२ (२८) ।३५

अष्टमूर्तिः	=शिवस्य नाम	२७।६२
अष्टाङ्गः	=महाधर्मः; अमुं विष्णुना पृष्टः सन् राजर्षिः कुरुराख्यातवान्	२३।२८
अष्टाङ्गानि	=तपः-सत्य-क्षमा-दया-शौच-दान-योग-ब्रह्मचारिताख्यानि	२३।२६
अष्टादश	=कात्यायन्या भुजाः; इमे विष्णोस्तेजसा संभूताः	१९।९
	=कात्यायन्या भुजाः; एते सशस्त्राः परिघोपमाश्चाऽऽसन्	२०।६
अष्टौ	=दिशः	७।२१
	=वसवः	९।१२
	=हयोत्तमाः; प्रह्लादरथस्य वाहकाः	९।२७
	=भारतवर्षं विहाय इलावृताद्यष्टसु वर्षेषु जम्बूद्वीपस्थेषु युगावस्था न प्रवर्तते	१३।६
	=सहस्राणि यक्षादीनि कुरुजाङ्गलं रक्षन्ति	२३।४२
असत्	=एतत् पदं सरस्वत्यां संयोगं लभते	२३ (११)।६
	=इदं सर्वं सरस्वत्या रूपम्	२३ (११)।१७
असत्यता	=इयं पिशाचानां धर्मः	११।२७
असमीक्ष्यकारी	=आत्मानमुद्दिश्य शङ्करेण प्रयुक्तः	३।२३
असिः	=योगशायिनो विष्णोर्वामपादाद् विनिर्गता सरिदियम्	३।२८
	=उग्रमसिं कालः कात्यायन्यै ददौ	१९।१५
	=आयुधम्, अनेन देवी महिषासुरस्य शिरश्चिच्छेद	२१।४९
	=आयुधम्, अनेन संवरणस्य पादश्छिद्दित आसीत्	२२।४९
	=आयुधम्, इममादाय काली चण्डमुण्डोपरि समधावत्	२९।५७
असिपत्रवनम्	=नरकरूपम्, इदं द्विसप्ततिसहस्रयोजनपरिमितं पुष्करद्वीपस्थम्	११।५५
	=नरकम्, ब्रह्मघ्नादयो जना दशवर्षसहस्राणि यावदस्मिंस्तिष्ठन्ति	१२।४१

असिलोमा	=दैत्यः, अनेन सहिताः सर्वे दैत्या देव्या भयेन पातालं विविशुः	२१ ।५०
असिहस्तः	=विष्णुः, अनेन नाम्नाऽदितिर्विष्णुं नमश्चकार	२३ (६) ।१९
असी	=नदी, अस्या 'वरणा'- नद्याश्चान्तरे सूर्यो निपपात	१६ ।५२
असुः	=महासुरा अनेन विहीना अभवन्	२१ ।३८
असुखी	=कश्चिदसुखी नासीद् बले राज्ये	२३(१०) ।२४
असुरः	=मयः, शम्बरः	१० ।४४-४५
	=रम्भः, करम्भः	१८ ।४२
	=महिषः	१९ ।१; १९ ।२; २१ ।१; २१ ।३९; २१ ।४२; २५ ।२८
	=महिषाख्यः	२० ।२
	=मुण्डः	२० ।१९
	=रक्तबीजः	२० ।१९
	=चिक्षुरः	२० ।१९
	=उग्रायुधः	२० ।१९
	=वाष्कलः	२० ।१९
	=पिशङ्गः	२० ।१९
	=विडालनेत्रः	२० ।१९
	=चण्डः	२० ।१९
	=नमरः	२० ।१९
	=कोऽप्यसुरो महिषासुरेण सह संग्रामं कर्त्तुं न शशाक	२० ।२७
	=चिक्षुरः, अयं देव्या निहतः	२१ ।३०
	=उग्रास्यः	२१ ।३१
	=शुम्भः	२२ ।२; २२ ।४; २२ ।६
	=निशुम्भः	२२ ।४; २२ ।६
	=हिरण्यकशिपुः	२३ (२) ।१६
	=बलिः	२३ (८) ।४; २३ (८) ।११
	=बलिः, अस्य प्रह्लादेन सह संवादः	२३ (८) ।४
	=एषामुत्तमः प्रह्लाद आसीत्	२३ (८) ।८

	=प्रह्लादः	२३ (८) ।९
	=विरोचनः	२३ (८) ।११
	=बाणः	२३ (८) ।१२
	=नरकः	२३ (८) ।१२
	=कुजम्भः	२३ (८) ।१२
	=जम्भः	२३ (८) ।१२
	=बलिः, अस्य शुक्रेण सह संवादः	२३ (१०) ।१२
	=बलिः, अस्य वामनेन सह संवादः	२३ (१०) ।७२
	=अन्धकः, अस्योत्पत्तिकथनम्	२३ (२७) ।३
	=तारकः	२५ ।२८
	=अन्धकः	३२ ।३६
असुरतापनः	=नारायणः, अयं प्रह्लादस्य हृदयं बाणेन बिभेद	८ ।२५
असुरनामानि	=जम्भः; तारः, वृत्रः, कुजम्भः बलः	१० ।४०-४१
असुरपतिः	=बलिः, अयं स्वयज्ञे वामनं वीक्ष्य प्रह्वो बभूव	२३ (१०) ।३७
असुरपुङ्गवः	=बलिः, अस्य प्रह्लादेन सह संवादः	२३(९) ।९
असुरसंघाः	=एषु हृष्टेषु मुदितेषु च लक्ष्मीर्बलिसकाशमागता	२३(२) ।१२
असुराः	=अन्धकः, प्रह्लादः, विरोचनः, जम्भः, संचरः, मयः	९ ।४५-४७
	=एषां देवैः सह महद् युद्धमभूत्	९ ।५१-५२
	=एते सरस्वतीं समभ्येत्य युयुधुः	२१ ।३६
	=एभिः सर्वैर्दैत्यराज्ये बलिरभिषिक्तः	२३ (२) ।१२
	=एषां गुरुः कश्यपः	२३ (३) ।११
	=एषां गुरुं ब्रह्माणं ब्रह्मसभायां प्रजापतय उपासते	२३ (३) ।२६
	=एतान् हत्वा सुरान् हव्यादान् करिष्य इति विष्णुः प्रतिज्ञातवान्	२३ (६) ।८
	=रात्रिजं तमोऽसुरभयमुक्तम्	२३ (६) ।३३
	=एभिर्हतं राज्यादिकं मम पुत्र इन्द्रः प्राप्नोतु इति वरं विष्णुं ययाचे देवमाताऽदितिः	२३ (७) ।८
	=एते गर्भस्थे मधुसूदने सति निस्तेजसो बभूवुः	२३ (८) ।१
	=एषां तेजोहीनत्वे हेतुं कृत्यामाशङ्कितवान् बलिः	२३ (८) ।३
	=एषां नायको बलिः	२३ (८) ।११

	=एषां तेजांसि हृतवान् विष्णुरदित्या गर्भेऽशावतीर्णः सन्	२३ (८) ।२७
	=एते वामनेनैव (वामनरूपधारिणा) विष्णुना धार्यन्ते	२३ (१०) ।७
	=एते वामनस्य सन्निधानाद् यज्ञभागार्हा न बभूवुः	२३ (१०) ।९
	=एते बलेर्यज्ञवाटं प्रविष्टं वामनमवलोक्य क्षोभं जग्मुः	२३ (१०) ।३४
	=एते सर्वदेवमयेन वामनेन प्रमथिताः	२३ (१०) ।६२
	=एते वामनेन सर्वदेवमयरूपेण जिताः	२३ (१०) ।६५
	=एतान् देवी चामुण्डा चखाद	२९ ।८७
	=एतान् मार्यादिदेव्यो जघ्नुः	३० ।२०
असुरेन्द्रः	=शम्बरः, तारकः	१८ ।७१
	=महिषासुरः, इमं चण्डमुण्डौ कात्यायन्या विषये किञ्चिदूचतुः	२० ।३
	=महिषः	२० ।१२; २२ ।१४
	=महिषः, अयं देव्या कात्यायन्या पादघातैर्निषूदितः	२० ।४३
असुरेश्वरः	=बलिः, अयमसुराणां तेजोहीनताविषये प्रह्लादं पप्रच्छ	२३ (८) ।१
असृक्	=इदं न लङ्घयेत्	१५ ।२१
असृङ्नदी	=इयं देवासुरसंग्रामे सुरासुराणां महता शरवर्षेण प्रवृत्ता	९ ।५१
अस्ति	=अनेन पदेन ज्ञायमानं सर्व सरस्वत्यामवस्थितम्	२३ (११) ।९
अस्तेयम्	=धर्मस्याङ्गम्	१४ ।१
	=इदं सार्ववर्णिकधर्मतयाऽङ्गीकृतम्	१४ ।२
	=इदं परलोकप्रदायकम्	१६ ।२
अस्त्रम्	=पैतामहम्, नारायणम्	७ ।६१
	=आग्नेयम्, माहेश्वरम्	७ ।६२
	=ब्रह्मास्त्रम्	७ ।६३
	=एतानि पाणिषु समादाय दानवा देव्याः समक्षं योद्धुमाजग्मुः	२१ ।३३

अस्थि	=इदं सस्नेहं संस्पृश्य जनः सवासाः स्नानमाचरेत् निःस्नेहं च संस्पृश्य गोः स्पर्शेन सूर्यस्य दर्शनिन च शुद्धो भवति	१५।२०
	=शितधारेण क्षुरेण च्छिन्नं वने विचरतो रहोदरस्य द्विजातिशार्दूलस्य राक्षसस्य शिरस्तज्जङ्घायां (ग्रीवायां) यदृच्छया लग्नमभूत्। तत्र च तस्यास्थि भित्त्वा विवेश	२३ (१८) ७-८
अस्थिपुरम्	=विश्वेश्वरादस्थिपुरं यावद् व्यासवचनानुसारेण पृथूदकसरो वर्तते	२३ (१) ।७
अस्थिरम्	=एतत् सर्वं सरस्वत्यामवस्थितम्	२३ (११) ।९
अस्थीनि	=एतेषां शुद्धिस्तत्क्षणाद् भवति	१५ ।७
	=एषां संचयः प्रथमे चतुर्थे सप्तमे वाऽह्नि कर्त्तव्यः	१५ ।४२
अहः	=प्रथमे चतुर्थे सप्तमे वाऽह्नि प्रेतस्यास्थिसंचयः कर्त्तव्यः	१५ ।४२
	=अशून्यशयनाख्याया द्वितीयाया द्वितीयेऽह्नि फलदानं ब्राह्मणश्रेष्ठाय कर्त्तव्यम्	१७ ।२५
	=फाल्गुनमासस्य कृष्णपक्षीयाष्टम्या द्वितीयेऽह्नि पञ्चगव्येन स्नानं कार्यम्	१७ ।४७
	=संवत्सरारम्भस्य द्वितीयेऽहनि संयतो भूत्वोपवासादिकं कुर्यात्	१८ ।१६
अहंकारः	=अस्य सृष्टिः प्रभावश्च	२ ।२६
	=एष गुह्यकानां धर्मः	११ ।२५
अहल्या	=अनया सह गौतमो दक्षयज्ञे निमन्त्रितः	२ ।१०
	=गौतमस्य पत्नी, अस्याश्चतस्रः कन्यकाः	४ ।२-५
अहिंसा	=दक्षयज्ञवाटस्य द्वारपालिका	२ ।१२
	=धर्मस्य भार्या, अस्याः पुत्राः हरि-कृष्ण-नर-नारायणाः	६ ।१-२
	=इयं मानवानां धर्मेषु स्मर्यते	११ ।२३
	=धर्मस्याङ्गम्	१४ ।१

	=इयं सार्ववर्णिकधर्मतयाऽङ्गीकृता	१४ ।२
	=अनया परलोकस्य प्राप्तिर्भवति	१६ ।२
	=इयं धर्मस्य भार्या, अस्यां पुत्रचतुष्टयमुत्पन्नमभूत्	३४ ।६९-७०
	=अस्याः पुत्रेण सनत्कुमारेण सह संवादः	३५ ।४९
	=इयं धर्मभार्या स्वपुत्रं सनत्कुमारं योगाचार्याय ब्रह्मणे समर्पितवती	३५ ।५१-५२
अहिबिलम्	=इदं तत्र वर्तते यतो निर्गत्य महानागः शेषो बलेरध्वरं प्रति गच्छतो वामनस्य साहाय्यं कल्पयामास। अस्य दर्शनादेव नागेभ्यो भयं न भवति	२३ (९) ।४४
अहोरात्रम्	=ब्राह्मणानां सद्यः शौचमहोरात्रपर्यन्तं भवति	१५ ।४६
अह्नम्	=तीर्थं कुरुक्षेत्रस्थम्, अस्मिन् स्नानेन सूर्यलोकोऽवाप्यते	२३ (१५) ।६१

आ

आकाशम्	=इदं नारायणप्रह्लादौ शरवृष्टिभिर्बबन्धतुः	८ ।११
	=एतद्रूपस्य नारायणस्य प्रह्लादकृता स्तुतिः	८ ।५४
	=अस्मात् सुकेशिपुरं सूर्येण भुवि पातितम्	११ ।२
	=अम्बरम्	१९ ।३४
	=गगनम्	२३ (८) ।१२; २३ (१४) ।६
	=नभः	२३ (९) ।१५; २३ (१०) ।७; २३ (१०) ।६३
	=अत्र गत्वा सरस्वती मेघेषु पयः सृजति	२३ (१९) ।१४
आकृतिः	=वामनाकृतिं विष्णुमदित्या उदरे स्थितं प्रह्लादो ध्याने ददर्श	२३ (८) ।१०
आक्रन्दितम्	=सुकेशिपुरवासिभिर्निशाचरैः कृतमाक्रन्दितमाकर्ण्य गगनेचराश्चारणा हाहाशब्दं कृतवन्तः	१६ ।४१
आक्षेपः	=इमं विष्णुमुद्दिश्य बलिश्चकार	२३ (८) ।३३
	=अयं विष्णुमुद्दिश्य बलिना कृतः	२३ (८) ।४८
आखुः	=अस्यान्नं भोज्यं न भवति	१५ ।२५

	=विभवे सति यो दानादिकं न करोति स एतत्संज्ञक उच्यते	१५ ।३०
	=अस्य वक्त्रमिव वक्त्रवन्तो भूता देव्या हास्यात् समुद्भूताः	२१ ।२०
आख्यानम्	=अद्रिपुत्र्या देव्या उमाया उद्भवविषयकमाख्यानं पुलस्त्यो नारदं श्रावयामास	२८ ।७७
आगमः	=आगमशास्त्रहीनं वाक्यं न वदेत्	१४ ।३९
आगमनम्	=दिवाकरो वरुणात्मजं प्रति तदीयागमने हेतुं पप्रच्छ	२२ ।४४
आगमाः	=सर्वेष्वागमेषु प्रवरा श्रुतिरुच्यते	१२ ।४७
आगारम्	=भवनम्, एतेन शून्ये महीतले सुखं वर्ज्यम्	१४ ।४०
आग्नेयम्	=महास्त्रम्, इदं प्रह्लादेन नरोपरि प्रक्षिप्तम्	१७ ।६२
आह्निकम्	=दन्तधावनानन्तरं विद्वान् शिरःस्नानम् आह्निकं वा स्नानं कुर्यात्	१४ ।३५
आचारः	=अस्य परिपालनं गृहस्थेन सदैव कार्यम्	१४ ।१५
	=अनेन विहीनस्य भद्रं क्वचिदपि नास्ति	१४ ।१५
	=अयमलक्षणं हन्ति	१४ ।१७
	=निर्दिष्टस्यास्य गृहे व्यवहारेण धर्मार्थकामसंप्राप्तिर्भवति	१५ ।५४
आचाराः	=ब्रह्मचर्यप्रभृतीनाम् आश्रमाणाम्	१५ ।६२
आचार्यः	=शुक्रः, इमं दैत्येश्वरो बलिः पृथिव्याः संक्षोभस्य कारणं पप्रच्छ	२३ (१०) ।२
	=दैत्यानामाचार्यः शुक्रः, अस्य बलिना सह संवादः	२३ (१०) ।११
आचार्याः	=एते कृतापराधा अपि वध्या न भवन्ति	३२ ।९२
आजगवम्	=आद्यं धनुः शङ्करस्य	२ ।५२
	=धनुः, नरनारायणयोः पार्श्वस्थमेतत् प्रह्लादेन दृष्टम्	७ ।४६
	=इदं धनुरादाय नरः प्रह्लादेन सह युद्धं चकार	७ ।५४
	=इदं महाधनुः प्रह्लादेन समं युद्धाय नरेण गृहीतम्	७ ।५५
आज्यम्	=अनेन युक्तो धूपो वैशाखमासे शङ्करार्चने प्रदेयः	१७ ।५३

	=घृतम्, अनेन हुतोऽग्निरिव जातकर्मादिभिः संस्कृतस्तपतीसुतो वृद्धिमवाप	२३ ।१
	=घृतम्, कश्यपं परितोऽस्य गन्धः प्रसृत आसीत्	२३ (३) ।१०
	=घृतम्, अनेन विना (अपि) कृतो होमस्तुभ्यं फलं दास्यतीति वामनो बलिमाह	२३ (१०) ।८०
	=घृतम्, अनेन परिप्लुतं श्यामाकं य आपगातटवर्तिभ्यो विप्रेभ्यः प्रयच्छन्ति तेषां पापं नश्यति	२३ (१५) ।१२
आज्ञा	=भवदाज्ञया पाताले वसतो ममोपभोगोपपादकं किं भविष्यतीति बलिर्वामनं पप्रच्छ	२३ (१०) ।७७
	=वामनस्याऽऽज्ञा बलेः सुतले निवासायाऽभूत्	२३ (१०) ।७५
	=दुर्गाया आज्ञा शिवेन प्रार्थिता	३० ।१२
आढकः	=पक्वं द्रोणाढकपरिमितमन्नं यद्यमेध्याभिप्लुतं भवेत् तर्हि शुद्धये तस्याग्रभागः परित्याज्यः शेषस्य च प्रोक्षणं विधेयम्	१५ ।१७
आतिथेयम्	=श्राद्धातिथेयस्य परस्परं भोजनेन मानवा नारकीयां यातनां प्राप्नुवन्ति	१२ ।३३
आतुरः	=बलिराज्ये कश्चिदातुरो नासीत्	२३ (१०) ।२४
आत्मजाः	=कश्यपस्यात्मजा देवाः, एते ब्रह्मसभायां द्विजादीन् दृष्टवन्तः	२३ (३) ।२५
आत्मज्ञानम्	=ब्रह्मयोनितीर्थे ब्रह्मा चातुर्वर्ण्यस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत्	२३ (१८) ।२२
आत्मज्ञानयज्ञः	=विष्णुः; अनेन नाम्नाऽदितिर्विष्णुं नमश्चकार	२३ (६) ।२०
आत्मयोनिः	=विष्णुः; अनेन नाम्नाऽदितिर्विष्णुं नमश्चकार	२३ (६) ।१८
आत्मा	=अयं यस्य कार्यस्य विधानेन जुगुप्सां नाप्नोति तत् कार्यं कर्त्तव्यम्	१५ ।५३
	=अस्य शुद्धिकारणं भवति वानप्रस्थाश्रमः	१५ ।५६
	=अस्य कर्षणं वानप्रस्थाश्रमी तपोभिः कुर्यात्	१५ ।५७
	=अस्य ज्ञानावबोधेच्छा चतुर्थस्य संन्यासाश्रमस्य धर्मः	१५ ।६०

	=अस्यावबोधनं संन्यासाश्रमस्य धर्मः	१५ ।६०
	=अस्य वंशो न हापनीयः	१५ ।६६
	=अस्य विनाशायोद्यतो रम्भासुरो वह्निना प्रतिषेधितः	१८ ।४८
	=औशनसतीर्थस्यान्तर्जले रहोदरचरणलग्ने शिरसि पतिते सति रहोदरः पूतात्मा बभूव	२३ (१८) ।१२
	=अस्मिन् ब्रह्म पश्यति यो नित्यं कुरुजाङ्गलं सेवते	२३ (१२) ।१२
	=येषां चित्तमात्मन्येवावस्थितं तेषां सकलैस्तीर्थैराश्रमैर्वा प्रयोजनं नास्ति	२३ (२२) ।२३
	=अयं नदीरूपेण संमतः	२३ (२२) ।२४
	=देहः, अस्मिन् यो विभुर्वर्तते सोऽनादिरुच्यते	२३ (२२) ।७६
	=अयं मनसा कृतस्तद्वद् भवति	२३ (२२) ।७८
	=नारीमयेण भ्रमेण क्रोधेन चाऽऽत्मा न ज्ञायते	२३ (२२) ।८५
आत्रेयाः	=उत्तरापथवासिनो जनाः। एते क्षुद्रनदीजलानि पिबन्ति	१३ ।४१
आदरः	=अस्मादौशनसाख्यतीर्थस्य माहात्म्यं श्रोतुमुक्तवन्तो महर्षयः	२३ (१८) ।४
आदिः	=आदिस्वरूपो भगवान् विष्णुः	२३ (६) ।१६
आदितेयाः	=सूर्याः, द्वादशकोटिमिता एते शिवविवाहयात्रायां जग्मुः	२७ ।१७
आदित्यः	=सूर्यः, अयं सर्वदेवमयरूपस्य वामनस्य स्तनान्तरे स्थित आसीत्	२३ (१०) ।६३
	= शतसंख्याकैरादित्यैः संकाशं विमानं सोऽधिरोहति योऽदितिवनेऽदितिं देवमातरं पश्यति	२३ (१३) ।१३
	=सूर्यः, अस्य दिने काम्यकवने स्नात्वा मनसा चिन्तितं लभते	२३ (२०) ।३४
	=यदाद्यं निःसृतं तेजस्तस्माद् आदित्य उच्यते	२३ (२२) ।३५
	=अनेन कुरुक्षेत्रे लिङ्गमेकं स्थापितम्	२३ (२५) ।३२
	=अयं शिवस्य चक्षुरुक्तः	२३ (२६) ।१४५
आदित्याः	=द्वादशसंख्याकाः	२ ।८

	=द्वादश, एषां वीरभद्रेण सह युद्धम्	४ ।३१-३७
	=द्वादश, इमे देवसेनाया अग्रिमभागेऽवस्थिता बभूवुः	९ ।१२
	=एषां वाहनानि	९ ।२०
	=एषां दानवकृतः पराजय इन्द्रेण मातुः समीपे निवेदितः	२३ (३) ।३
	=देवाः, एतान् वामनाकृतिविष्णुस्थितान् प्रह्लादो ध्यानेन ददर्श	२३ (८) ।११
	=एभिः स्थाणुप्रभृतितीर्थानि प्रयत्नतः सेवितानि	२३ (२५) ।५
	=एभिः कुरुक्षेत्रस्थानि लिङ्गानि प्रयत्नेन सेवितानि	२३ (२५) ।४५
आदिदेवः	=शङ्करस्य नाम	२३ (२३) ।३६
आदिपुराणानि	=अत्र ब्रह्मणा पुरातनी कथा प्रोक्ता	२ ।२०
आदिपुरुषः	=अयं दैत्यानां हिरण्यकशिपुः पुरा बभूव	२३ (२) ।४
आदिवेधाः	=विष्णुः, अयमदित्या स्तुतः	२३ (६) ।१७
	=विष्णुः, अनेन नाम्नाऽदितिर्विष्णुं नमश्चकार	२३ (६) ।१७
आदेशः	=इमं परिपालयन् सुतले वासं कुरु— इति वामनो बलिमाह	२३ (१०) ।७२
आद्यः	=भगवान् शिवः	२ ।१८
	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।२४
आद्यलिङ्गम्	=इदं स्थाणुलिङ्गस्योपरि ब्रह्मा स्थापितवान्	२३ (२४) ।१८
आद्या	=सरस्वती, अस्या रूपम्	२३ (११) ।९-१२
आधयः	=एभिस्ते ग्रस्ता न भवन्ति, ये बलेर्विष्णोश्च चरितं स्मरन्ति	२३ (१०) ।८९
आधिपत्यम्	=धनस्याऽऽधिपत्यं गुह्यकानां धर्मः	११ ।२५
	=सप्तलोकानामाधिपत्यं लभ्यते ब्रह्मोदुम्बरतीर्थे सप्तर्षीन् उद्दिश्य पृथक् स्नानेन	२३ (१५) ।१३
आनतिः	=देहस्याऽऽनतिं दृष्ट्वा प्राज्ञो वानप्रस्थाश्रमे प्रवेशं कुर्यात्	१५ ।५६

आननम् =कार्त्तिकेयस्याभिषेकार्द्रमाननं जिघ्रन्ती तावदुमाऽदितिवद् बभौ ३१ ।५८

आनन्दः =दिवाकरं परिभूय चन्द्र आनन्दकरो जातः १६ ।२८

आन्ध्राः =इमे कुमारद्वीपस्य दक्षिणभागे स्थिताः १३ ।१

आपः =आसां (कालिन्दीसंबन्धिनीनां) कृष्णत्वकारणम् ६ ।३०

=सुप्रभातकरणार्थमिमाः प्राभातिकमङ्गलेन प्रार्थ्यन्ते १४ ।२६

=प्राङ्मुख उदङ्मुखो वा भूत्वा विद्वान् अफेनिलाभिराभिः समाचामेत् १४ ।३३

=जलानि, एता वामनरूपधारिणा विष्णुनैव धार्यन्ते २३ (१०) ।७

=सर्वा आपः सरस्वतीरूपाः सन्ति २३ (१९) ।१४

=जलानि २३ (१९) ।१४

=इमा नारास्तनव उक्ताः २३ (२२) ।२९

=‘एता भव’ इति ब्रह्मणः कुटिलायै शापो बभूव २५ ।१३

आपगा =नदी, इयं कुरुक्षेत्रस्थितमानुषतीर्थस्य पूर्वेण क्रोशमात्रे विख्याताऽस्ति २३ (१५) ।१

=नदी, कुरुक्षेत्रस्थिता, एनां प्राप्य ये श्राद्धं कुर्वन्ति ते सर्वकामसंयुक्ता भवन्ति २३ (१५) ।३

=नदी कुरुक्षेत्रस्था, अस्यां पुत्रेण पौत्रेण वा तिलतर्पणं शंसन्ति पितरः पितामहाश्च २३ (१५) ।५

=वर्षाकालवहा नदी कुरुक्षेत्रस्थासु नवसु नदीष्वन्यतमा २३ (१३) ।७

आपगाः =इमासु स्नातका रात्रावपि दिवसभ्रान्त्या स्नानजप्यपरायणा जाताः १६ ।२

आपस्तम्बः =तपोधनः कालास्यश्च ६ ।९०

आभरणानि =एभिर्भूषितः संस्त्वं सुतले वसेति वामनो बलिमाह २३ (१०) ।७३

आभीराः =एतदाख्या जनाः स्वेच्छया क्षुद्रनदीजलानि पिबन्ति १३ ।३७

	=अयं दाक्षिणात्यो जनपदः	१३ ।४८
आमलकम्	=एभिर्ज्येष्ठमासे स्नानं कर्तव्यम्	१७ ।५५
आयतनानि	=एतान्यभिगन्तुं द्विजाती रहोदरो न शशाक	२३ (१८) ।१९
आयतिः	=पृथिव्याः, अस्याः प्रमाणम् पञ्चाशत्कोटियोजनानि	११ ।३१
आयुः	=एतत् कल्पप्रमाणं वामनेन बलये प्रदत्तम्	२३ (१०) ।६८
आयुधम्	=क्षुरप्रः, परिघः, मुद्गरः	८ ।१६-२०
	=पाशः, शक्तिः	८ ।२१-२३
	=शूलम्	२१ ।२८; २१ ।४३; २१ ।४८; २७ ।३१; ३० ।१८; ३० ।२९; ३२ ।५७
	=गदा (वरुणस्य)	१० ।२५; २१ ।४४; २२ ।४९; २३ (६) ।२५; २९ ।४६; ३० ।४४; ३२ ।७१; ३२ ।७३; ३२ ।७८
	=वरायुधम्	१० ।५२
	=खड्गः	१८ ।६२; २१ ।२७; २९ ।५८; ३० ।४२-४४; ३२ ।५५
	=कुलिशम्	२१ ।१०
	=शक्तिः	२१ ।१०; २१ ।१४; २१ ।४३; ३० ।१८; ३१ ।१०३; ३२ ।८३; ३२ ।९३
	=लाङ्गलम्	२१ ।१०
	=परश्वधः	२१ ।१०
	=दण्डः	२१ ।११; ३१ ।१०३; ३२ ।५६
	=चक्रम्	२१ ।११; २१ ।४४; २२ ।१२; २२ ।४९; ३० ।३०; ३२ ।७२; ३२ ।७३; ३२ ।११८
	=त्रिशूलम्	२१ ।१४
	=नानाऽऽयुधधरा भूता देव्या हास्यात् समुद्भूताः	२१ ।२०
	=वज्रम् (सुरेन्द्रस्य)	२१ ।४६; ३२ ।५८; ३३ ।४२
	=शूलम्	२१ ।४८
	=असिः	२१ ।४९; २२ ।४९; २९ ।५७

=प्रहरणम् २३ (१९) ।१८
=चक्रम् (सुदर्शनाख्यम्) २३ (२५) ।४३
=इषुः (बाणः) २८ ।७
=परशुः २८ ।७
=खट्वाङ्गम् २९ ।५८; २९ ।६३; ३० ।२०
=अङ्कुशः ३० ।१८
=पट्टिशः ३० ।१८
=परिघाः ३० ।१८
=प्रासः ३० ।१८; ३२ ।५४; ३२ ।७६
=बाणाः (शराः) ३० ।१८
=भुशुण्डयः ३० ।१८
=परश्वधः ३० ।१८
=क्षुरप्रम् ३० ।४५
=परिघः ३२ ।५०
=कुठारः ३२ ।५१
=मुद्गरः ३२ ।५९

आयुधानि =लोकपालानाम् ९ ।१०
=एषां मध्ये सुदर्शननामकमायुधं प्रवरम् १२ ।४४
=एभिर्युता महिषासुरनिर्जिता देवा विष्णुं द्रष्टुं जग्मुः १९ ।१
=एभिर्देवी विन्ध्ये शुम्भनिशुम्भाख्यावसुरौ जघान २२ ।४

आरण्यम् =वानप्रस्थाश्रमं गत्वाऽऽरण्योपभोगैरात्मकर्षणं कुर्यात् १५ ।५७

आरण्याः =अयं दाक्षिणात्यो जनपदः १३ ।४८

आरम्भः =चतुर्थे संन्यासाश्रमे निवसता पुरुषेण नवीनकार्यस्यारम्भो न कर्त्तव्यः १५ ।६०

आराधनम् =रुद्राराधनकामनया रोहिणी घोरं तपः कृतवती १६ ।२४

आरामाः =देवकुलस्याऽऽरामान् ये विध्वंसयन्ति ते नरकयातनां प्राप्नुवन्ति १२ ।२३-२४

आर्क्षिः =ऋक्षस्यापत्यं पुमान्। संवरणो नाम राजा, अयं तपतीनामककन्यकाया अवलोकनानन्तरमशनादिकं तत्याज २२ ।३९

आर्जवम्	=शिवस्य नाम	२३ (२६) ।१३३
आर्तः	=आशार्तानामदाता चाण्डालसंज्ञको भवति	१५ ।३६
आर्ताः	=केचिज्जना नरकान् प्राप्य क्षुधया भृशमार्ता भवन्ति	१२ ।१३
आर्त्तिः	=अस्याः कृत्याजन्याया नाशको विष्णुः	२३ (६) ।१७
आर्द्रा	=नक्षत्रम्, अस्य मिथुनराशिः। कालरूपिणः शिवस्य भुजस्थानीयमिदं नक्षत्रम्	५ ।३३
आर्याः	=एतदाख्या जनपदाः	१३ ।१९
आर्षः	=परमो धर्म एष सुकेशिं प्रति महर्षिभिरुक्तः	११ ।२२
आलापः	=अयं जनविद्विष्टादिना सह नैव कार्यः	१५ ।२३
	=देवतादेर्निन्दकेन सहाऽऽलापं कृत्वा सूर्यदर्शनिन शुध्यति जनः	१५ ।२४
आवन्त्याः	=इमे कुमारद्वीपस्य पश्चिमदिशि स्थिता जानपदा जनाः	१३ ।५२
आवासः	=एकस्मिन्नावासे चतुर्थाश्रमिणा चिरकालपर्यन्तं वसतिर्नैव कार्या	१५ ।३९
	=महेश्वरस्याऽऽवासं ब्रह्मा जगाम	१६ ।५७
आवासनम्	=एतदर्थं मकरध्वजेन कात्यायन्या ऊरू कृतौ	२० ।११
आशा	=दिक्, पश्चिमायामाशायामनेके सूर्पारकादयो जनाः सन्ति	१३ ।५२
	=अनयाऽऽर्तस्य पुरुषस्यादाता चाण्डालसंज्ञको भवति	१५ ।३६
	=दक्षिणा दिक्, इमामाक्रम्यागस्त्यस्तस्थौ तत्र रम्यतरमाश्रमं च चकार	१९ ।३२-३३
	=पश्चिमा, इमां प्रयाता सरस्वती नदी	२३ (११) ।२
आशार्तः	=एतादृशस्य पुरुषस्यादाता चाण्डालसंज्ञको भवति जनः	१५ ।३६
आश्रमः	=गार्हस्थ्यम्	१४ ।४८
	=वानप्रस्थः	१४ ।४८

=ब्रह्मचर्यम् १४।९

=गृहस्थानाम् १४।११

=गृहस्थः १५।५५

=वानप्रस्थः १५।५५; ५६; ५८

=चतुर्थः = संन्यासः १५।६१

=कात्यायनस्य, अस्मिन् विष्णुशङ्कुरादिवदनाद् विनिःसृतं तेजो गतम् १९।७

=अन्तरिक्षस्थित आश्रमे विदर्भपुत्रीं निक्षिप्यागस्त्यः स्वाश्रममुपाजगाम १९।३३

=अगस्त्येन दक्षिणस्यां दिशि तावदन्तरिक्षे रम्यतर एक आश्रमः कृतः १९।३३

=अम्बरस्थ आश्रमेऽगस्त्यमुनिः पर्वकालेष्ववसत् १९।३४

=वरुणात्मजो वसिष्ठः सूर्यपुत्रीं तपतीं संवरणस्यार्थे स्वमाश्रममानीतवान् २२।४७

=वसिष्ठस्य, अत्र संवरण ऋक्षात्मज आयाति २२।५६

=वसिष्ठस्य, अत्र संवरणो जगाम २२।५७

=वसिष्ठस्य, अत्र सूर्येण प्रदत्ता तपती वसिष्ठेन समानीता २२।५९

=कश्यपस्य, एनं प्रति देवाः प्रयाताः २३ (६)।१२

=अयं 'ज्येष्ठ'- नाम्ना प्रसिद्धः (ज्येष्ठाश्रमः) २३ (१०)।८२

=दक्षाश्रमः कुरुक्षेत्रे २३ (१३)।२१

=देवर्षेर्नारदस्य, अयं कुरुक्षेत्रस्थान्यजन्माख्यतीर्थे स्थितः २३ (१५)।३६

=ज्येष्ठाश्रमः कुरुक्षेत्रे स्थितः २३ (१५)।६७

=सरस्वतीतटस्थितः, अत्र शिवो मङ्कणकेन सह स्थितः २३ (१७)।२१

=महामुनी रहोदर औशनसतीर्थे वीतकल्मषो भूत्वा स्वाश्रमं प्रत्याजगाम २३ (१८)।१३

=अयं सरस्वत्यास्तटे स्थितः, अयमेव पश्चाद् ब्रह्मयोनिनामकं तीर्थमभूत् २३ (१८)।२४

=वसिष्ठस्याऽऽश्रमः स्थाणुतीर्थे स्थित आसीत् २३ (१९)।३

	=विश्वामित्रस्याऽऽश्रमः स्थाणुतीर्थात् पश्चिमदिग्भागे स्थित आसीत्	२३ (१९) ।३
	=विश्वामित्रस्याऽऽश्रमः कुरुक्षेत्रे स्थितः	२३ (१९) ।१७
	=रेणुकाश्रमः	२३ (२०) ।५
	=रन्तुकस्याऽऽश्रमः कुरुक्षेत्रे वर्तते	२३ (२१) ।५
	=बालखिल्यमहर्षीणाम् आश्रमे नग्नः सन् शंकरः पर्यटनं चकार	२३ (२२) ।५६
	=अयं ज्ञानिनां वेश्म भवति	२३ (२२) ।८४
	=वसिष्ठाश्रमः कुरुक्षेत्रस्थितः	२३ (२८) ।४७
	=बटुरूपमास्थाय शिवः काल्या आश्रममागतः	२५ ।४५-४६
	=गालवर्षेः, अस्य विनाशाय पातालकेतुः सूकररूपं धृत्वा यत्नमकरोत्	३२ ।३७
आश्रमाः	=ऋषीणां मगधदेशस्था इमे कदाचित् सुकेशिना दृष्टाः	११ ।७
	=चत्वारः, ब्राह्मणस्य	१४ ।२
	=त्रयः, ब्रह्मचर्यं गार्हस्थ्यं वानप्रस्थं चेति	१५ ।६२
	=अत्र निवासिषु स्वधर्मयुक्तेषु दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।११
	=एषां तारणे कुरुक्षेत्रस्थं कुलोत्तारणाख्यं तीर्थं समर्थमस्ति	२३ (१५) ।७५
	=येषां चित्तमात्मन्येव व्यवस्थितं तेषां सर्वैराश्रमैः प्रयोजनं नास्ति	२३ (२२) ।२३
	=बालखिल्यमुनीनाम्	२३ (२२) ।६७
आश्रमिणः	=सर्वेष्वाश्रमिषु गृहस्थः श्रेष्ठः	१२ ।५०
आश्लेषा	=नक्षत्रम्, शशिनो गृहम्, अस्य कर्कराशिः, कालरूपिणः शिवस्य पार्श्वस्थानीयमेतत्	५ ।३४
आश्वयुजः	=आश्विनमासः, अस्मिन्नुपवासादिकं कर्त्तव्यम्	१७ ।३४
	=मासः, अस्मिञ्जगत्पतेर्नाभ्याः पद्मं निर्याति	१८ ।१
आश्विनमासः	=आश्वयुजः	१७ ।३४
आषाढः	=मासः, अस्मिन् श्रीफलैः स्नानं कर्तव्यम्	१७ ।५८

	=मासः, अस्मिन् कृष्णपक्षस्य चतुर्दश्यां गोकर्णस्यार्चनेन सर्वविधं पापं नश्यति	२३ (२५) ।१६
	मासः, अस्य शुक्लाष्टम्यां कुरुक्षेत्रस्थं लिङ्गं संपूज्य नरोऽमृतत्वमवाप्नोति	२३ (२५) ।२१
	=मासः, अस्मिन् मृगशिरोनक्षत्रे चन्द्रक्षयतिथौ (अमावास्यायाम्) इन्द्रः पितृषु पिण्डं प्रादात्	२४ ।८
आषाढी	=आषाढमासस्य पूर्णिमा, अस्यां श्रियः पतिर्भोगिभोगे स्वपिति	१७ ।३
आसनम्	=एकस्मिन्नासने सुन्दर्या परजायया सह न स्थेयम्	१४ ।४६
	=भिन्नमासनं दूरतः परिवर्जनीयम्	१४ ।४७
	=कन्दर्पबाणासनसन्निभं कात्यायन्या भ्रूयुगलं साध्यदेवानां तेजसा बभूव	१९ ।१२
	=इदं वामनाय पुलहो ददौ	२३ (९) ।३७
	=इदं वेनपुत्रो नारदायाददात्	२३ (२६) ।२७
आसुरिः	=अयं सुप्रभातकरणार्थं प्राभातिकमङ्गलेन प्रार्थ्यते	१४ ।२५
	=अयं सांख्यवेत्ता	३४ ।७१
आस्यम्	=महिषस्याऽऽस्यमिवाऽऽस्यं येषां ते भूता देव्या हास्यात् समुद्भूताः	२१ ।१९
	=हयस्याऽऽस्यमिवऽऽस्यं येषां ते भूता देव्या हास्यात् समुद्भूताः	२१ ।१९
	=अनेन तव रूपमुदेतुं न शक्यमिति मार्कण्डेयः सरस्वतीमाह	२३ (११) ।१५
आहवः	=युद्धम्, अस्मिन् विष्णुरेव बलिं हन्तुं समर्थ इत्यदित्या समुपदिष्टः इन्द्रः	२३ (३) ।४
आहारः	=अस्य लोभेन श्वा कश्चित् कुटीरकं प्रविवेश	२३ (२६) ।५९
आह्निकम्	=नित्यकर्म, अस्य सम्पादनाय नारायणेन प्रह्लादः समादिष्टः	८ ।२८
	=शूद्राणां सद्यः शौचमपि द्वादशाह्निकं भवति	१५ ।४६
आह्निकी	=इमां क्रियां नैमिषारण्ये प्रह्लादः सम्पादितवान्	८ ।२९

इ

इक्षुरसोदः	=एतन्नामा जलनिधिः, अयं वलयाकृतिर्वर्तते	११ ।३६
इच्छा	=आत्मज्ञानावबोधस्येच्छा चतुर्थस्य संन्यासाश्रमस्य धर्मः	१५ ।६०
	=इयं शिवरूपा प्रोक्ता	२३ (२६) ।११४
इज्या	=यज्ञः, अनया कुमारद्वीपस्थमध्यभागवासिनो ब्राह्मणादयः संव्यवहारं विधाय पावना भवन्ति	१३ ।१२-१३
इडा	=देवी, इयं बलिसमीपमागता	२३ (२) ।२०
इडास्पदम्	=तीर्थं कुरुक्षेत्रस्थम्, इदं सर्वाणि भयान्यपहन्ति	२३ (१५) ।२४
इतिहासः	=अस्यार्थान् ये नाभिनन्दन्ति ते नरकान् गच्छन्ति	११ ।३
इध्माहरणम्	=दक्षयज्ञे तावदिध्माहरणकारी— अरिष्टनेमी	२ ।१३
इन्दीवरम्	=नीलकमलम्, एभिरावृतं वनान्तं संवरणो नाम राजा ददर्श	२२ ।३३
इन्दुः	=इममुच्छिष्टा ये जनाः पश्यन्ति तेषां नेत्रगतो वह्निर्यमकिङ्करैः प्रज्वाल्यते	१२ ।१७
	=चन्द्रः, अयं महिषासुरेण स्वर्गाद् निराकृतः	१९ ।३
	=देववरः = चन्द्रः, अयं कात्यायनीं तुष्टाव	१९ ।१८
	=चन्द्रः, अयं वासुदेवस्य स्वरूपं न जानातीति प्रह्लादो बलिं प्रत्याह	२३ (८) ।२०
इन्द्रः	=वामनेनास्मै त्रैलोक्यराज्यं दत्तमिति ग्रन्थकारेण वामनो नमस्कृतः	१ ।१
	=वासवः, सहस्राक्षः, देवराजः	७ ।१८-२०
	=शक्रः	८ ।४०; ९ ।९; १९ ।३; १९ ।६; २३ ।२७; २३ (३) ।२; २३ (३) ।१४; २३ (३) ।१६; २३ (९) ।३४; २३ (१०) ।६९; २३ (१०) ।८५; २३ (२०) ।१७; २३ (२२) ।११; २३ (२४) ।१०; २८ ।३४; २८ ।३७; २९ ।९; २९ ।१३; ३१ ।६४: ३४ ।३६

=सहस्राक्षः १० ।१; १० ।१३; २३ (३) ।५; २३ (९) ।३५; २८ ।२४; २८ ।२६; २९ ।१; २९ ।१२; ३२ ।१००; ३४ ।३८

=पुरन्दरः १० ।२; २३ (३) ।२; २३ (१०) ।६५; २४ ।८; ३२ ।९८; ३४ ।३६

=शतमखः १० ।४

=वासवः १० ।९; १२ ।४८; १८ ।४५; २३ (६) ।४; २३ (७) ।७; २८ ।२४; ३० ।१४

=अयं रक्तबीजाख्येन दैत्येन विजितः १८ ।७०

=अयं रक्तबीजभयात् स्वकीयं स्थानं परितत्याज १८ ।७२

=अयं कात्यायन्यै वज्रं ददौ १९ ।१५

=अयं कात्यायनीं तुष्टाव १९ ।१८

=देवः, अयं महिषासुरो बभूव २० ।२६

=दानवानाम्, महिषाख्यो दानवः २२ ।११

=हरिः २३ ।२६

=शतक्रतुः २३ (२) ।१; २३ (२०) ।१६; २३ ।२५; २३ (२०) ।१८; २७ ।२; ३० ।४७; ३२ ।९८;

=देवराजः २३ (२) ।१४; २८ ।३५

=कश्यपस्य पुत्रः, अयमदित्या सह कश्यपं प्रति जगाम २३ (३) ।६

=अयं वासुदेवस्य स्वरूपं न जानातीति बलिं प्रति प्रह्लादोक्तिः २३ (८) ।२०

=अयं वामनं ज्ञातुमीशानो नास्ति २३ (९) ।२८

=इन्द्राद्यैर्देवैर्वामनावतारात् पूर्वमपि विष्णुः स्तुत आसीत् २३ (९) ।३३

=अयं जगतः पतिर्यथा स्यात् तथाऽहं करिष्यामीति वामनेन प्रतिज्ञातम् २३ (९) ।३५

=सावर्णिके मन्वन्तरे बलिरिन्द्रो भविष्यति २३ (१०) ।६९

=अयं त्रैलोक्यं शशास २३ (१०) ।८६

=अस्य ज्ञानं स लभते यः कुरुक्षेत्रस्थोऽन्यजन्माख्यतीर्थे पितृन् संतर्पयति २३ (१५) ।३७

=अस्मै विष्णुर्वामनकतीर्थे बलिनाऽपहृतं राज्यमर्पयामास	२३ (१५) ।६५
=अयं कुरोस्तपसा प्रसन्नोऽभवत्	२३ (२०) ।१५
=पाकशासनः	२३ (२४) ।११
=शिव एवेन्द्रोऽभिमतः	२३ (२६) ।१२०
=अयमुमायास्तेजसा निर्धूतः	२५ ।२६
=अयं शिवस्य गेहमाजगाम	२६ ।६९
=सहस्रदृक्	२७ ।१०; २८ ।३७
=अस्य नाम सुरपतिः	२७ ।३३
=इमं विवाहकार्यानन्तरं शिवो विससर्ज	२७ ।६२
=अस्य गिरिजया सह संवादः	२८ ।२४; २५
=कौशिकः	२८ ।२५
=हरिः	२८ ।२८; २८ ।३४; २९ ।१०
=अनेन सह सुरा ब्रह्मणः सदनं गताः	२८ ।३२
=बलघाती	२८ ।३६
=अयं शिवमुद्दिश्य शिरसाऽवनिं जगाम	२८ ।४४
=अयं निशुम्भेन बहुशो निर्जितः	२९ ।२१
='अयं मम खड्गनिपातं धारयितुं नास्ति क्षमः' इति निशुम्भो देवीं प्राह	३० ।३९
=अयं देवैः सह कुरुक्षेत्रे कुमारस्याभिषेकार्थं यत्नं चकार	३१ ।५४
=अस्याभिषेकार्द्रमाननं जिघ्रन्ती पुराऽदितिर्बभौ	३१ ।५८
=वज्री	३२ ।२२
=मघवान्	३१ ।१०३
=अयं वज्रवृष्ट्या नगोत्तमान् निहन्ति	३२ ।५८
=अस्य कार्त्तिकेयेन सह संवादः	३२ ।९४
=अनेनोक्तं गुहं प्रति यन्मया पूर्वं प्रदक्षिणा कृता	३२ ।१०३
=अयमैरावतादवतीर्य क्रौञ्चपर्वतस्य प्रदक्षिणां चकार	३२ ।१०३
=गोत्रभित्	३२ ।१०८
=अनेन सह मुरस्य संवादः	३४ ।३८
=हरिहयः	३४ ।३९

इन्द्रजालम्	=इदं सर्वेषु विज्ञानेषु मुख्यम्	१२।५३
इन्द्रतीर्थम्	=तीर्थम्, इदं विशोकां मातरं कार्त्तिकेयाय ददौ	३१।९२
इन्द्रद्वीपः	=भारताख्यवर्षस्य नवसु द्वीपेष्वन्यतमः	१३।९
इन्द्राणी	=पौलोमी	२३।६
	=शची	२७।१०
इन्द्रियम्	=एषां संयमः परलोकप्रदायकः	१६।१२
इन्धनम्	=शुष्कमिन्धनं यथाऽग्निर्भस्मसात्करोति, तथैव देवी कौशिकी हुंकारेणैव धूम्रलोचनं भस्मसाच्चक्रे	२९।४७
इभः	=इन्द्रस्य गजः (ऐरावतः) अयमन्धकासुरेण प्रहारैः पातितः	१०।९-११
इरावती	=नदी, इयं भारतवर्षस्थकुमारद्वीपे हिमवत्पादान्निःसृता	१३।२०
इलावृतः	=वर्षः, अस्य स्थितिर्जम्बूद्वीपस्य मध्यभागे वर्तते	१३।३
इषुः	=बाणः, एकेनेषुणा दुर्गा देवी चिक्षुरस्य चापं चिच्छेद	२१।२७
	=बाणः, अनेन विद्धं वनं पुनः संरोहति	२८।७
इष्टकचितम्	=ईदृशं गृहं मारुतेन शुध्यति	१५।१६
इष्टकाः	=आभिश्चितं गृहं मारुतेन शुध्यति	१५।१६
इष्टतमम्	=(पित्रादेर्मृतस्य) इदं गुणवते दानेनाक्षयं भवति	१५।५१
इष्टम्	=अस्य प्राप्तिर्बलेर्विष्णोश्च चरितस्मरणेन भवति	२३ (१०)।९०
इष्टयः	=इमा वामनस्य पशव आसन्	२३ (१०)।५९

ई

ईडयः	=विष्णुः, अयं प्रह्लादेन नमस्कृतः	२३ (८)।२५
ईप्सितम्	=अस्य प्रदानार्थं बहिः रम्भासुराय प्रतिज्ञातवान्	१८।४९
	=अस्य वामनाय दानार्थं बलिः प्रतिज्ञातवान्	२३ (१०)।४२
ईशः	=विष्णुः, अयं प्रह्लादेन नमस्कृतः	२३ (८)।२६; २३ (८)।२७
	=वामनः, अस्मिन् धर्मपद्धतिः संस्थितेति वामनस्तवे ब्रह्मा प्राह	२३ (९)।२७

ईशानः	=शिवः, अनेन सुकेशये वरो वितीर्णः	११ ।५
	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।२७
	=शिवः, अयं वामनं ज्ञातुमीशानो नास्ति	२३ (९) ।२८
	=शंकरस्य नाम	२३ (२३) ।३६ (६); २३ (२६) ।६३
	=शिवः, एनं विवाहावसरे पर्वताः प्रणेमुः	२७ ।२१
ईशिता	=विष्णुः, अयं प्रह्लादेन नमस्कृतः	२३ (८) ।२५
ईश्वरः	=भानुः, अयं कुपितः सन् कुलनाशाय रोगवृद्धये च यतते	१५ ।६५
	=भुजगानामीश्वरः कात्यायन्यै भुजङ्गहारं ददौ	१९ ।१७
	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।२८
	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२२
	=वामनः, इमं वोढुं पृथिवी समर्था नाऽभवत्	२३ (१०) ।६
	=वामनः, अस्य याचनाविषये बलिशुक्रयोः संवादः	२३ (१०) ।२१
	=शिवः	२३ (१७) ।२१
	=शिवः, अस्य मङ्कणेन सह संवादः	२३ (१७) ।२१
	=गुणातीतो भगवानीश्वरः कथ्यते	२३ (२२) ।२२
	=शङ्करः	२३ (२२) ।६८
	=शिवस्य नाम	२६ ।३५; २८ ।४७
ईश्वरेश्वरेशानः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।३१

उ

उक्तयः	=सांख्ययोगशास्त्रयोः सर्वा उक्तयो वामनस्य समीपमागताः	२३ (९) ।३८
उक्तिः	=स्वयम्भुवः =ब्रह्मण उक्तिः सर्वसंहितासु श्रेष्ठा	१२ ।४८
उग्रः	=शिवस्य नाम	२६ ।३६; २३ (२६) ।८४
उग्रकार्मुकः	=दानवः, अयं देव्या सह युद्धार्थमाजगाम	२१ ।३२
उग्रदंष्ट्रः	=शिवस्य नाम	२३ (२६) ।४२
उग्ररूपी	=शिवस्य नाम	२३ (२६) ।७२

उग्रायुधः	=असुरः, अयं कात्यायन्याः प्राप्तिप्रयासप्रसङ्गे महिषासुरेण समादिष्टः	२० ।१९
उग्रास्यः	=असुरः, अयं देव्या सह युद्धार्थमाजगाम	२१ ।३१
उच्छिष्टम्	=इदं गृहाद् बहिः प्रक्षेप्तव्यम्	१५ ।२१
	=उच्छिष्टमन्नं रक्षसां भागो भवति	२३ (१९) ।३७-३८
उच्छिष्टाः	=उच्छिष्टा ये जना गोब्राह्मणाग्नीन् कामतः स्पृशन्ति ते तप्तकुम्भनामके नरके पतन्ति	१२ ।१६
	=ये नरा उच्छिष्टा एव सूर्येन्दुतारका अवलोकयन्ति तेषां नेत्रगतो वह्निर्यमकिङ्करैः प्रज्वाल्यते	१२ ।१७
उच्छेदः	=नैमित्तिककर्मण उच्छेदो नैव कर्तव्यः	१५ ।४०
उज्जायनः	=कुमारद्वीपस्थपर्वतः	१३ ।१७
उत्कलाः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५३
उत्केशः	=प्रमथः, इममिन्द्रः कार्त्तिकेयाय ददौ	३१ ।६४
उत्कोचजीविनः	=इमे वृकभक्षनामके नरके क्षिप्यन्ते	१२ ।३७
उत्क्राथनी	=इमां मातरं केदारतीर्थं कार्त्तिकेयाय ददौ	३१ ।९७
उत्तमः	=गृहस्थाश्रमस्य विशेषणीभूतोऽयं शब्दः, तेनात्र निर्दिष्टः सदाचारो यत्र भवति स गृहस्थाश्रम उत्तमः कीर्त्यते	१५ ।५५
उत्तमपूरुषः	=नारायणः, अनेन दानवेन्द्रः प्रह्लादः पराजितः	८ ।७२
उत्तमर्णाः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५३
उत्तमाः	=इलावृतादिवर्षेषूत्तमाधममध्यमा न सन्ति	१३ ।७
	=उत्तमैर्जनैः परस्वे परदारे च बुद्धिर्न कार्या	१४ ।४४
उत्तरः	=जम्बूद्वीपात् पूर्वोत्तरभागे हिरण्याख्यो वर्षः स्थितः	१३ ।३
	=कुमारद्वीपादुत्तरभागे तुरुष्काः स्थिताः	१३ ।११
उत्तरतः	=उत्तरतः प्रवहन्ती सरस्वती नदी सिन्धुनाम्ना प्रख्याता	२३ (२१) ।८
उत्तरमानसम्	=इदं सरः सर्वेषु सरस्सु श्रेष्ठम्	१२ ।४६

उत्तरवेदिः	=समन्तपञ्चकम्	२३ (१) ।१४
उत्तरा	=उत्तरा (फाल्गुनी) नक्षत्रस्यान्त्यास्त्रयोंऽशाः (=पादाः), अस्य कन्याराशिः, सोमपुत्रस्य सद्म, कालरूपिणः शिवस्य जठरस्थानम्	५ ।३६
	=इयम् उत्तराषाढनक्षत्रस्याऽऽद्योंऽशः (चरणः), अस्योत्तराषाढनक्षत्रस्य धनूराशिः	५ ।३९
	=उत्तराषाढनक्षत्रस्यान्तिमास्त्रयोंऽशाः (चरणाः), अस्य मकरराशिः	५ ।४०
	=उत्तराभाद्रपदनक्षत्रम्। अस्य मीनराशिः	५ ।४२
	=नक्षत्रम्, अस्मिन् नक्षत्रे योषित्समागमो वर्जनीयः	१४ ।५०
उत्तरापथः	=अत्र बह्व्यो जातयः सन्ति, तज्जातीया जनाः क्षुद्रनदीजलानि पिबन्ति	१३ ।४३
उत्तराफाल्गुनी	=नक्षत्रम्, अस्मिन् हरः काल्याः पाणिं ग्रहीष्यतीति सप्तर्षिभिर्हिमवान् उक्तः	२६ ।६४
उत्तरायणम्	=अस्मिन्नाषाढमासस्य पूर्णिमायां श्रियः पतिर्भोगिभोगे स्वपिति	१७ ।३
उत्पत्तिः	=नारदस्य	२ ।२९
	=स्कन्दस्योत्पत्तिश्रवणाय पुलस्त्येन नारदः प्रतिबोधितः	२२ ।८
	=वामनस्योत्पत्तिविषये द्विजैर्लोमहर्षणं प्रति प्रश्नः कृतः	२३ (१) ।२
	=वामनस्योत्पत्तिविषये लोमहर्षण ऋषिभिः पृष्टः	२३ (२) ।१
	=वामनस्योत्पत्तिकथनाय लोमहर्षणस्य प्रतिज्ञा	२३ (२) ।२
	=वटस्योत्पत्त्यादिविषयकः प्रश्नो मार्कण्डेयेन सनत्कुमारं प्रति कृतः	२३ (२२) ।८
	=तीर्थानामुत्पत्तिं सनत्कुमारो मार्कण्डेयमुक्तवान्	२३ (२२) ।१६
	=ब्रह्मण उत्पत्तिं सनत्कुमारो मार्कण्डेयमुक्तवान्	२३ (२२) ।२७
	=स्थाणुलिङ्गस्योत्पत्तिं श्रुत्वा पापैः प्रमुच्यते	२३ (२७) ।२३
उत्पलावती	=नदी, इयं शुक्तिमत्पर्वतात् समुद्भूता	१३ ।३२
उत्सर्गः	=मलमूत्रादेः, अस्य विधिर्मङ्गलपाठाद्यनन्तरं करणीयः	१४ ।२९

उत्सर्गविधिः =मलमूत्राद्युत्सर्गविधिः, अयं प्राभातिकमङ्गलपाठधर्मार्थचिन्तनहरिनामोच्चारणानन्तरं पुरुषेण विधेयः १४।२९

उत्सवाः =एषु ये बद्धवैरा जना यत्र वसन्ति तत्र वासो न करणीयः १४।५६

उदकधाराः =उत्तरापथवासिनो जनाः, एते स्वेच्छया क्षुद्रनदीजलानि पिबन्ति १३।३९

उदकम् =कुशोदकेन माघमासे स्नानं कार्यम् १७।४२

=जलम्, अनेन विना (अपि) कृता पूजा तुभ्यं फलं दास्यतीति वामनो बलिमाह २३ (१०)।८०

=जलम्, इदं कुरुक्षेत्रस्थानामष्टनदीनां वर्षाकालवहानां वैतरणीप्रभृतीनां प्रावृट्काले पुण्यं प्रकीर्तितम् २३ (१३)।९

=जलम्, इदमोजसतीर्थे स्नानेन पितृणामक्षय्यं भवति २३ (२०)।११

=जलम्, आत्मरूपाया नद्या उदकं सत्यमुच्यते २३ (२२)।२४

=इदमण्डविनिःसृतं तेजः शोषयामास २३ (२२)।३२

उदकुम्भः =शुभं वस्तु, अस्य प्रातःकाले स्पर्शः कार्यः १४।३६

उदक्या =रजस्वलायाः स्त्रिया दर्शनं स्पर्शनं च वर्जनीये १४।४५

=रजस्वला स्त्री, इमां स्पृष्ट्वा शुद्धये स्नानं विधेयम् १५।१९

उदग्रः =दानवः, अयं देव्या सह युद्धार्थमाजगाम २१।३२

उदङ् =कुमाराख्यद्वीपस्योदङ्भागस्था देशा बह्वीनां क्षुद्रनदीनां जलानि स्वेच्छया पिबन्ति १३।३४

=दिक्, एतन्मुखो भूत्वा विद्वान् समाचामेत् १४।३३

=उत्तरा दिक्, उदक्शिरा भूत्वा शयनं वर्जयेत् १४।५१

उदङ्मुखः =उदङ्मुखो भूत्वा विद्वान् अफेनिलाभिरद्भिः समाचामेत् १४।३३

उदधयः =एषां मध्ये क्षीरोदः शिवरूपः २३ (२६)।११३

उदपानः =तीर्थम्, इदं घनस्वनां मातरं कार्त्तिकेयाय ददौ ३१।९२

उदयः	=सूर्यस्य, अयं कमलानां विकासेन लक्ष्यते	१६ ।३०
	=सूर्यस्य, अस्मिन् ग्रहाणां गतिः पूर्ववन्न बभूव मधुसूदने गर्भस्थे सति	२३ (८) ।६
	=पर्वतः, अयं हिमाद्रिभवनमागतः	२६ ।४६
	=पर्वतः, अत्र गमनाय ब्रह्मणा कुटिला देवी निर्दिष्टा	३१ ।१५
उदरम्	=नारायणोरुसमुद्भूताया बालाया उदरं रोमावलिविभूषितमासीत्	७ ।८
	=अस्मिन्नहं त्वां वोढुं न शक्ष्यामीत्यदितिर्विष्णुं प्राह	२३ (७) ।१२
	=अदित्या उदरे विराजमानं वामनाकृतिं विष्णुं प्रह्लादो ध्याने ददर्श	२३ (८) ।१०
	=अदित्या उदरे विष्णुः क्रमेण वृद्धिं प्राप्तः	२३ (९) ।१२
	=वामनस्योदरे गन्धर्वा मरुतश्च देवाः स्थिता आसन्	२३ (१०) ।५७
उदानः	=अयं शिवरूप उक्तः	२३ (२६) ।१२३
उदीची	=दिक्, क्षीरसमुद्रादुत्तरे कूल उदीच्यां दिशि विश्वकृत् तपश्चरति	२३ (४) ।७
उदुम्बरः	=वृक्षः, अस्य फलैश्चैत्रमासे स्नानं कार्यम्	१७ ।४९
उदुम्बरकः	=वृक्षः, कृष्णवर्णोऽयं यमस्य दक्षिणोत्तरे पार्श्वे समुद्भूतः	१८ ।७
उदूखलमेखला	=इयं कपिलनामकमहायक्षस्य पत्नी कुरुक्षेत्रस्थिता महायक्षी। इयं दुन्दुभिमाहत्य कुरुक्षेत्रे नित्यं भ्रमति	२३ (१३) ।४५
उद्गारः	=अमृतं पिबतः पितामहस्योद्गारात् सुरभिः समुद्भूता	२३ (१४) ।३०
उद्दालकः	=मुनिः, अनेन ध्याता सरस्वती तावदुत्तरकोशलाभागमाजगाम	२३ (१६) ।३२
	=पर्वतः, अयं हिमाद्रिभवनमाजगाम	२६ ।४६
उद्धतः	=दानवः, अयं कात्यायन्या सह युद्धार्थमाजगाम	२१ ।३२
उद्धरणम्	=एतदर्थं सूर्योऽगस्त्यं बभाषे	१९ ।२४

उद्बन्धनम्	=अनेन मृते सति सद्य एव शौचं भवति	१५ ।४४
उद्भवः	=पृथूदकतीर्थस्योद्भवविषये देवानां प्रश्नो विष्णुं प्रति	२२ ।२३
	=विश्वस्योद्भवो विष्णोर्भवति	२३ (६) ।३०
	=पर्वताद् मृडान्या देव्या उद्भवं पुलस्त्यो नारदं प्राह	२८ ।७७
उद्भिदजाः	=वृक्षादयः	२३ (२६) ।१०६
उद्भिदाः	=अयं दाक्षिणात्यो जनपदः	१३ ।४९
उद्यानम्	=अस्मिन् विकाले प्राज्ञो न तिष्ठेत्	१५ ।२३
उद्योगः	=अयं गुरोः कर्मणि ब्रह्मचारिणा विधेयः	१४ ।६
उद्वर्तनम्	=इदं न लङ्घयेत्	१५ ।२१
	=इदं संवत्सरारम्भस्य द्वितीयेऽहनि कर्तव्यम्	१८ ।१७
उद्वाहः	=ब्रह्मचर्याश्रमाद् विनिवृत्तो द्विजो गृहस्थाश्रमकामनयाऽसमानर्षिकुलजां कन्यामुद्वहेत्	१४ ।११
उद्विग्नः	=बलिराज्ये कश्चिद् उद्विग्नो नासीत्	२३ (१०) ।२४
उद्वेगः	=वामनावतारे जातेऽयं मनुजानां देहे नाभूत्	२३ (९) ।१६
उन्माथः	=प्रमथः, इमं यमः कार्त्तिकेयाय प्रादात्	३१ ।७१
उन्मादः	=एतन्नामकेनास्त्रेण कुसुमायुधो वृषध्वजमताडयत्	६ ।२७
	=प्रमथः, इमममम्बिका कार्त्तिकेयाय ददौ	३१ ।६९
उन्मादनम्	=वनम्; अत्र मृगयाव्याजेन संवरणो नाम राजा जगाम	२२ ।३०
उन्मेषः	=अयं शिवरूप उक्तः	२३ (२६) ।१२३
उपकारः	=हरिः =वामनो दर्शनादुपकारकृदिति बलिः शुक्रमाह	२३ (१०) ।३०
	=ऋषीणामुपकारार्थं मुनिना मङ्कणेन परमेश्वरमाराध्य सरस्वती (सुवेणुः) कुरुक्षेत्रं प्रवेशिता	२३ (१६) ।३६
उपक्रमाः	=ज्ञानयोगाद्युपक्रमैर्धीमान् मनः शोधयेत्	२३ (२२) ।७९
उपतापाः	=एषां जनका नरकान् यान्ति	१२ ।७

उपधानकम्	=अनेन युते सुखशीतले शयने यक्षाः स्वपन्ति	१७।१०
उपधानम्	=अनेन (किञ्चिज्जपापुष्पादिसंनिधानेन) मणिस्तन्मयो भवति	२३ (२२)।७७
उपनयनम्	=एतदाख्यसंस्कारं विधाय ब्रह्मचारी गुरुसमीपे वसेत्	१४।४
उपनिषदः	=आभिः शिवो नित्यं पठ्यते	२३(२६)।१०९
उपपातकानि	=एभिर्मुच्यते कुरुक्षेत्रस्थेऽनरकतीर्थे स्नानेन जनः	२३ (२०)।२६
उपभोगः	=अस्माद् दानं शतगुणं भवतीति बलिः शुक्रमाह	२३ (१०)।२९
	=अस्योपपादकमुपादानं किं भविष्यति पाताले वसतो ममेति बलिर्वामनं पप्रच्छ	२३ (१०)।७७
उपभोगाः	=आरण्योपभोगैरात्मकर्षणं वानप्रस्थाश्रमी कुर्यात्	१५।५७
उपरमः	=क्रियाभ्य उपरमो ब्राह्मणस्य परमवित्तेषु परिगणितः	२३ (२२)।२६
उपरागः	=ग्रहोपरागं विना निशासु शिरःस्नानं न कार्यम्	१४।५३
उपरोधः	=देवभागस्योपरोधाद् वामनो यदि मां हन्यात् तर्हि तं वधमहं श्लाघ्यतरं मन्य इति बलिः शुक्रमाह	२३ (१०)।३१
उपलः	=यन्त्रान्मुक्त उपल इव वायुनिषेविते पथि गगनात् परिभ्रष्टः	१६।४५
उपलब्धिः	=सर्वेषामर्थानामुपलब्धिः सरस्वत्या एव सकाशाद् भवति	२३ (११)।२१
उपवासः	=अज्ञाते सति दूषितान्नस्य भोजने कृते त्रिरात्रपर्यन्तमुपवासेन शुद्धिर्भवति	१५।१८
	=अनेन दूषितान्ने भक्षिते सति शुद्धिरुक्ता	१५।३८
	=अनेन गणकादेरन्नं भुक्त्वा शुद्धिरुक्ता	१५।३९
	=अयमाश्विनमासि कर्त्तव्यः	१७।३४
	=अयमाश्विनमासस्याष्टम्यां कार्यः	१७।३५
	=मार्गशिरोमासस्याष्टम्यामुपवासः कर्तव्यः	१७।३८
	=फाल्गुनमासस्य कृष्णपक्षीयाष्टम्यां तिथावुपवासः कार्यः	१७।४६

	=कुरुक्षेत्रस्थाया यक्षिण्याः स्थाने तावदुपवासेन महापातकानि नश्यन्ति	२३ (१३) ।४०
	=अस्य परायणो भूत्वा सरस्वत्यां स्नानेन कामिकं फलं लभते	२३ (१४) ।३८
	=अस्य परायणो भूत्वा मनुष्यः सूर्यतीर्थे देवान् अर्चयित्वा सूर्यलोकं गच्छति	२३ (१४) ।२७
	=अयं समन्तपञ्चकक्षेत्रे कुरुणा कृष्टे भूभागेऽक्षयो भवति	२३ ।३४
उपवासाः	=एभिर्विविधैर्हरिर्गृह्यते	२३ (१०) ।१८
	=एतैर्बालखिल्याः कलेवरं शोषयन्ति	२३ (२२) ।४२
उपवीतम्	=अनेन सहिताः कुम्भा ब्राह्मणाय दक्षिणायां देयाः	१७ ।५४
उपसंहारः	=अस्य काले तमोगुणः प्रवर्तते	२३ (२२) ।२०
उपहाराः	=एभिर्ब्रह्मा स्थाणुतीर्थे शिवमाराधयामास	२३ (२८) ।८
उपादानम्	=पाताले वसतो मम किमुपादानं भविष्यतीति बलिर्वामनं पप्रच्छ	२३ (१०) ।७७
उपाध्यायः	=इममधःकृत्य येऽधीयते ते द्विजा अधमा भवन्ति, तान् योऽध्यापयति स नरकं व्रजति तत्र च शिलां शिरसा वहति	१२ ।३१
उपानत्	=एतद्द्वयं ज्येष्ठमासे त्रिनेत्रपूजने दक्षिणायां देयम्	१७ ।५६
उपासनम्	=उत्कृष्टमेतद् गान्धर्वधर्मरूपम्	११ ।१८
उपेन्द्रः	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।३३; २३ (६) ।३४
उमा	=हिमवतः पुत्री भवस्य पत्नी च	२२ ।३
	=पार्वती, अस्या भर्त्ता शिवः	२३ (१५) ।३४
	=पार्वती, अनया सार्धं शिवो विहारतीर्थे क्रीडामकरोत्	२३ (२१) ।१३
	=देवी, इयं बालखिल्यानां क्लेशैः सुदुःखिता बभूव	२३ (२२) ।४५
	=देवी, अस्याः शङ्करेण सह संवादः	२३ (२२) ।५०

	=पार्वती, अनया सहितं कैलासे समासीनं शङ्करं ब्रह्मादयो ददृशुः	२३ (२३) ।१३
	=इयं लिङ्गरूपेण कुरुक्षेत्रे हरपार्श्वं न मुञ्चति	२३ (२५) ।१७
	=माता मेना जघन्यायाः स्वसुताया उमा इति नाम चक्रे	२५ ।२२
	=तपस्यन्तीमिमां हिमवान् गृहमानीतवान्	२५ ।३०
	=इयं शङ्करमुवाच	२५ ।४८
	=अस्या याचनायै शिवो महर्षीन् सप्तर्षीन् प्रत्याह	२६ ।११
	=इयं शङ्करस्य वधूर्बभूव	२६ ।४१
	=अद्रिकुमारिका	२७ ।४५
	=अनया सह रात्रौ कौतुकागारे शिवो रेमे	२७ ।६०
	=इयं ब्रह्मणो वरमवाप्य मन्दरमाजगाम	२८ ।२९
	=अस्या मालिन्या सह संवादः	२८ ।६०
	=गिरिजा, सहस्रनामानं विष्णुं जप्त्वा शिव उमायाः पार्श्वमुपागतः	२८ ।६८
	=पार्वती शिवपत्नी, अस्याः शिवेन सह संवादः	२८ ।७१
	=शिवपत्नी, अनया सह शिवः शरवणं जगाम	३१ ।३७
	=शिवपत्नी, इयं विशाखनामानं पुत्रं प्राप्य मुदिताऽभवत्	३१ ।४१
	=शिवपत्नी, इमां प्रणिपत्य देवाः प्रहृष्टा अभूवन्	३१ ।४८
	=पार्वती, इयं स्वतनयं कुमारमाहूतवती	३२ ।७
	=गिरिपुत्री	३१ ।५७
उमानाथः	=शङ्करः, अयं पूर्णिमायां चर्मसंस्तरे स्वपिति	१७ ।११
उमापतिः	=अस्यार्चनं माघमासे कर्त्तव्यम्	१७ ।४३
उमाभर्त्ता	=इमं नमश्चकार देवर्षिर्नारदः	२३(१५) ।३४
उमाशरीरार्धहरः	=शङ्करस्य नाम	२३ (२३) ।३६ (२४)
उरः	=अनेन महिषासुरो भूतगणान् विद्रावयामास	२१ ।३९
उरगाः	=एतान् वामनाकृतिविष्णुस्थान् प्रह्लादो ध्यानेन ददर्श	२३(८) ।११
उरगेश्वरः	=सुरः, अस्य हयग्रीवप्रमुखैर्दैत्यैः सह द्वन्द्वयुद्धं प्रवृत्तम्	९ ।४८

उर्वशी	=इमामवलोक्य कामोऽपि कामातुरो जातः	७ ।१३
	=नारायणस्योरुभ्यां समुद्भूता सर्वाङ्गसुन्दरी बाला	७ ।१४
	=वसन्तेनेयं कामनरेन्द्रस्य राजधानीव शशिनः कान्तिरिव च कल्पिता	७ ।१४-१५
उर्वी	=पृथ्वी, इयं पर्वतैर्वनैश्च सहिता वामनस्य गत्या संक्षुभिता	२३ (१०) ।१
उलूखलमेखला	=इमां मातरं मानसो ह्रदः कार्त्तिकेयाय प्रददौ	३१ ।९५
उलूखला	=अनया युद्धे तारकासुरो वध्यते स्म	३२ ।६९
उल्बम्	=अण्डस्योल्बं मेरुरभवत्	२३ (२२) ।३६
उल्मुकाक्षी	=इमां मातरं श्वेततीर्थे कार्त्तिकेयाय ददौ	३१ ।१०१
उल्लेखनम्	=अनेन भूमिर्विशुध्यते	१५ ।११
	=पृथिवी, एतां वामनाकृतिविष्णुस्थितां प्रह्लादो ध्यानेन ददर्श	२३ (८) ।१२
उवाच	=पुलस्त्यो नारदं प्रति	२ ।१; २ ।१८; २ ।२०; ३ ।१; ३ ।२४; ३ ।४६; ३ ।५०; ४ ।१; ४ ।९; ४ ।१६; ५ ।१; ५ ।३०; ५ ।४५; ६ ।१; ६ ।२४; ६ ।२६; ६ ।५०; ६ ।८१; ७ ।१; ७ ।४०; ८ ।१; ८ ।३७; ८ ।४३; ८ ।६७; ९ ।२; ९ ।४; ९ ।१४; १० ।१; ११ ।३; ११ ।१०; १५ ।६७; १६ ।१; १६ ।५; १९ ।२३; २० ।१; २० ।३०; २० ।३३; २० ।३५; २१ ।३; २२ ।२; २२ ।८; २२ ।२२; २२ ।५५; २५ ।१;

	१२; १३; ६०; ६२; ६५; ६८; २६ ।१; ६; १२; २४; ३१; ४२; ५५; २७ ।१; ४३; २८ ।१; ४८; २९ ।१, ४०; ४६; ३० ।१; ७२; ३१ ।१; २; ३२ ।१, १४; ३२ ।२६; ३३ ।२; ५; १०; १२; १६; ३४ ।२; २७; २९; ६३; ६७; ६९; ३५ ।३०
=सती शङ्करं प्रति	१ ।१७; १ ।२९
=शङ्करः सतीं प्रति	१ ।३०
=नारदः पुलस्त्यं प्रति	२ ।१७; २ ।१९; ५ ।२९; ५ ।४४; ६ ।२३; ६ ।२५; ९ ।१; ९ ।३; ९ ।१३; ९ ।२४; ११ ।१; १७ ।१; १७ ।५; १८ ।३९; १९ ।२२; २१ ।१; २२ ।१; २२ ।५; ३१ ।१; ३२ ।१३; ३३ ।१; ३३ ।४; ३३ ।९; ३३ ।११; ३३ ।१५; ३४ ।१; ३४ ।२६; २८; ६३; ६६; ६८
=रुद्रः पितामहं प्रति	२ ।२७
=पितामहो रुद्रं प्रति	२ ।२८; ३६
=रुद्रो नारायणं प्रति	२ ।४४
=हरो विरिञ्चिं प्रति	२ ।५३
=हरश्चक्रपाणिं प्रति	३ ।१४
=हरिर्महेश्वरं प्रति	३ ।२५
=सती जयां प्रति	४ ।३
=जया सतीं प्रति	४ ।४
=पाञ्चालिकः शङ्करं प्रति	६ ।४
=ईश्वरः पाञ्चालिकं प्रति	६ ।४८
=हरः पाञ्चालिकं प्रति	६ ।५१

=हरिः शिवं प्रति	६ ।७८
=ब्रह्मा शिवं प्रति	६ ।७८
=हरो ब्रह्मविष्णू प्रति	६ ।८१; ६ ।८२; ६ ।८४
=ब्रह्मविष्णू शिवं प्रति	६ ।८३
=प्रह्लादश्च्यवनं प्रति	७ ।३६
=च्यवनः प्रह्लादं प्रति	७ ।३७
=प्रह्लादो दानवान् प्रति	७ ।३९
=प्रह्लादो नरनारायणौ प्रति	७ ।४७
=नरः प्रह्लादं प्रति	७ ।४९, ७ ।५१
=प्रह्लादो नरं प्रति	७ ।५०
=पीतवासा हरिः प्रह्लादं प्रति	८ ।३४
=प्रह्लादः पीतवाससं हरिं प्रति	८ ।३५
=प्रह्लादो विष्णुं प्रति	८ ।३८
=पीतवासाः प्रह्लादं प्रति	८ ।४१
=प्रह्लादोऽन्धकं प्रति	८ ।४४
=भगवान् प्रह्लादं प्रति	८ ।५६
=प्रह्लादो नारायणं प्रति	८ ।५८; ८ ।६१; ८ ।६३
=नारायणः प्रह्लादं प्रति	८ ।६०; ८ ।६२; ८ ।६४
=सुकेशिर्दानवेश्वरो महर्षीन् प्रति	११ ।९; ११ ।१४; ११ ।२९; ११ ।४७
=ऋषयः सुकेशिं प्रति	११ ।१२; ११ ।१५; ११ ।३०; ११ ।४८; ११ ।५०; १३ ।२
=सुकेशिर्महर्षीन् प्रति	११ ।४९; १२ ।१; १३ ।१; १४ ।३; १४ ।१३; १४ ।२१; १५ ।२६
=ऋषयः सुकेशिं प्रति	१२ ।२; १४ ।१; १४ ।२२; १५ ।१; १५ ।२७
=दुन्दुभिर्देवीं प्रति	२० ।२५
=देवी कात्यायनी दूतं दुन्दुभिं प्रति	२० ।३४
=तपती वरुणात्मजं वसिष्ठं प्रति	२२ ।४८
=देवदेवः = पुलस्त्यो नारदं प्रति	२३ ।१
=लोमहर्षणो द्विजान् प्रति	२३ (१) ।४

=ऋषयो लोमहर्षणं प्रति	२३ (२) ।१; २३ (३) ।१; २३ (११) ।१; २३ (१३) ।१; २३ (१७) ।१; २३ (१८) ।४; २३ (१८) ।२७; २३ (१९) ।१; २३ (२१) ।१; २३ (२२) ।१
=लोमहर्षण ऋषीन् प्रति	२३ (२) ।२; २३ (३) ।२; २३ (१३) ।३; २३ (१७) ।२
=श्रीर्बलिं प्रति	२३ (२) ।१३
=अदितिरिन्द्रं प्रति	२३ (३) ।४
=देवाः कश्यपं प्रति (ऊचुः)	२३ (३) ।१३
=कश्यपः शक्रं प्रति	२३ (३) ।१६
=ब्रह्मा देवान् प्रति	२३ (४) ।१
=कश्यपो विष्णुमुद्दिश्य	२३ (५) ।१
=लोमहर्षणो महर्षीन् प्रति	२३ (६) ।१; २३ (६) ।१०; २३ (७) ।१; २३ (८) ।१; ३; ८; ३३; २३ (९) ।१; १२; ३२; २३ (१०) ।१; ३३; ८५; २३ (११) ।३; २३ (१२) ।१; २३ (१४) ।१; २३ (१५) ।१; २३ (१६) ।१; २३ (१८) ।१; ५; २८; २३ (१९) ।२; २३ (२०) ।१; २३ (२१) ।२; २३ (२२) ।३; २३ (२२) ।१४
=अदितिर्विष्णुं प्रति	२३ (६) ।१७
=अदितिर्भगवन्तं विष्णुं प्रति	२३ (७) ।७
=बलिः प्रह्लादं प्रति	२३ (८) ।२; २३ (८) ।२९; २३ (९) ।२
=प्रह्लादो बलिं प्रति	२३ (८) ।५; २३ (९) ।७

=ब्रह्मा वामनं प्रति	२३ (९) ।१८
=शुक्रो बलिं प्रति	२३ (१०) ।१२
=बलिः शुक्राचार्यं प्रति	२३ (१०) ।१७
=बलिर्वामनं प्रति	२३ (१०) ।४१; २३ (१०) ।४५; २३ (१०) ।७७
=श्रीवामनो बलिं प्रति	२३ (१०) ।४६
=श्रीभगवान् बलिमाह	२३ (१०) ।७८
=मार्कण्डेयः सरस्वतीं प्रति	२३ (११) ।२४
=शिवो मङ्कणकं प्रति	२३ (१७) ।२१
=राक्षसा मुनीन् प्रति	२३ (१९) ।३१
=कुरुरिन्द्रं प्रति	२३ (२०) ।१९
=मार्कण्डेयः सनत्कुमारं प्रति	२३ (२२) ।६; २३ (२६) ।१; २३ (२८) ।१
=सनत्कुमारो मार्कण्डेयं प्रति	२३ (२२) ।१६; २३ (२३) ।१; २३ (२४) ।१; २३ (२५) ।१; २३ (२६) ।२; २३ (२७) ।१; २३ (२७) ।२४; २३ (२८) ।२
=महादेवो देवीमुमां प्रति	२३ (२२) ।४९
=नार्यः शङ्करं प्रति (ऊचुः)	२३ (२२) ।६१
=ब्रह्मा बालखिल्यमुनीन् प्रति	२३ (२३) ।२
=ब्रह्मा शङ्करं प्रति	२३ (२३) ।५; २३ (२८) ।११
=नारदो राजानं वेनपुत्रं प्रति	२३ (२६) ।३३
=वेनः स्थाणुं प्रति	२३ (२६) ।६३
=वेनः शिवं प्रति	२३ (२७) ।१७
=विष्णुर्देवान् प्रति	२४ ।१
=भिक्षुरुमां प्रति	२५ ।४९; २५ ।५१
=देवी शिवं प्रति	२५ ।५०
=सोमप्रभा शङ्करं प्रति	२५ ।६१
=भिक्षुः शिवः पार्वतीं प्रति	२५ ।६३
=शिवः सप्तर्षीन् प्रति	२६ ।९

	=गन्धमादनो हिमाद्रिं प्रति	२६ ।२३
	=हिमवान् सप्तर्षीन् प्रति	२६ ।२६
	=अङ्गिरा हिमाद्रिं प्रति	२६ ।३३
	=हिमवान् पर्वतान् प्रति	२६ ।५३
	=हिमवान् शिवं प्रति	२७ ।४२
	=शिवो हिमवन्तं प्रति	२७ ।४४
	=इन्द्रो गिरिजां प्रति	२८ ।२५
	=देवाः शिवं प्रति (ऊचुः)	२८ ।४६
	=शिवो देवान् प्रति	२८ ।४७
	=शुम्भनिशुम्भौ रक्तबीजं प्रति	२९ ।२०
	=चण्डो रक्तबीजं प्रति	२९ ।२७
	=सुग्रीवः शुम्भनिशुम्भौ प्रति	२९ ।३१
	=शुम्भो धूम्रलोचनं प्रति	२९ ।४१
	=श्रीदेवी कौशिकी धूम्रलोचनं प्रति	२९ ।४५
	=शैवी देवीं कौशिकीं प्रति	३० ।५६
	=देवा देवीं कौशिकीं प्रति (ऊचुः)	३० ।६६
	=देवी देवान् प्रति	३० ।६७
	=कुमारकार्त्तिकेयः शिवादिकं प्रति	३२ ।३
	=मुरुर्यमं प्रति	३४ ।५४
	=ब्रह्मा सनत्कुमारं प्रति	३४ ।७४; ७६; ७९; ३५ ।१; ३४
	=सनत्कुमारो ब्रह्माणं प्रति	३४ ।७५; ७८
	=सनत्कुमारो मातापितरौ प्रति	३५ ।५०
उशनाः	=शुक्रः, इमं दैत्येश्वरो बलिः पृथिवीसंक्षोभस्य कारणं पप्रच्छ	२३ (१०) ।१
	=शुक्रः, अयं कुरुक्षेत्रस्थ औसनसतीर्थे परमेश्वरमाराध्य संसिद्धो बभूव	२३ (२१) ।२५
	=शुक्रः, अयमौशनसाख्ये कुरुक्षेत्रस्थतीर्थे सिद्धिमुपलभ्य ग्रहत्वमाप्तवान्	२३ (१८) ।१
उशीरम्	=अस्य हर्तारो नरकेषु पतन्ति	१२ ।७
	=इयं तनयं स्कन्दमभिषिक्तं वीक्ष्य मुदं ययौ	३१ ।५९
	=इयं दश गणान् कार्त्तिकेयाय ददौ	३१ ।८४
	=इयं कार्त्तिकेयाय कमण्डलुं ददौ	३१ ।१०३
	=इमां सैनापत्येऽभिषिक्तः कुमारकार्त्तिकेयो भक्त्या प्रणनाम	३२ ।२
कुटीरकम्	=आहारलोभेन श्वा कश्चित् कुटीरकं प्रविवेश	२३ (२६) ।५९
कुठारः	=इमं विश्वकर्मा कात्यायन्यै ददौ	१९ ।१६
	=आयुधम्, अनेन कलशोदरगणा महासुरान् युद्धे जघ्नुः	३२ ।५१
कुणिः	=एतदाख्यो जनः, अयं क्षुद्रनदीः स्वेच्छया पिबति	१३ ।३५
कुण्डजठरः	=गणः, इमं कृत्तिकाः स्वपुत्राय कार्त्तिकेयाय ददुः	३१ ।८६
कुण्डम्	=ब्रह्मर्षिकुण्डं कुरुक्षेत्रस्थम्	२३ (१५) ।१०
कुण्डलम्	=अर्द्धचन्द्राकारं कुण्डलं विश्वकर्मा कात्यायन्यै ददौ	१९ ।१६
कुण्डलाः	=एतदाख्या जनाः, एते स्वेच्छया क्षुद्रनदीः पिबन्ति	१३ ।३५
कुण्डानि	=ब्रह्मर्षीणां कुण्डेषु कुरुक्षेत्रस्थेषु स्नानेन सप्तसोमफलं लभ्यते	२३ (१५) ।८
	=त्रिभिः कुण्डैरलङ्कृता ब्रह्मणः प्रतीची वेदिः पुष्कराख्या	२३ ।२०
कुण्डाशी	=बान्धवादिभिः परित्यक्तः पुरुषः 'कुण्डाशी' इत्युच्यते, अस्यान्नं भुक्त्वा शुद्धये चान्द्रायणव्रतं कार्यम्	१५ ।३७
कुथप्रावरणाः	=अयं कुमारद्वीपे पर्वताश्रयी देशः	१३ ।५७
कुनटी	=प्रमथः, इमं यक्षाः कार्त्तिकेयाय ददुः	३१ ।७३

कुन्दः	=प्रमथगणः, इमं धाता कार्त्तिकेयाय प्रददौ	३१ ।६५
कुन्दगुल्मः	=अयं गिरिजायाः करतलेऽजायत	१८ ।६
कुन्दम्	=अस्य कुसुमैः फाल्गुने मासि रुद्रस्य पूजा कार्या	१७ ।४७
कुन्दलाः	=अयं दाक्षिणात्यो जनपदः	१३ ।४९
कुपथाः	=अयं कुमारद्वीपस्य पर्वताश्रयी देशः	१३ ।५६
कुबेरः	=धनदः	९ ।४७; १९ ।१५
	=धनेश्वरः	२१ ।४४
कुब्जकम्	=तीर्थम्, अत्र शिवेन स्नानं कृतम्	२५ ।५३
कुब्जाभ्रम्	=तीर्थम्, अत्र मया स्नानं कृतमिति शिव उमां प्रत्युवाच	२५ ।५१
कुब्जाम्रः	=दक्षयज्ञस्य समीपवर्ती कश्चिद् वृक्षः, यत्र भगवान् विष्णुरन्तरधात्	५ ।१
कुमारः	=एतदाख्यो नवमद्वीपः, भारतवर्षीयेषु द्वीपेषु	१३ ।१०
	=अयं भारतवर्षस्य दक्षिणोत्तरभागे स्थितः	१३ ।१०
	=द्वीपः, अत्रानेके पर्वताश्रयिणो देशाः, नद्यो जनपदाश्च सन्ति	१३ ।५८
	=कार्त्तिकेयः	३१ ।२
	=कुमारनामको बालकः शङ्करसमीपमुपस्थितोऽभूत्	३१ ।४०
	=कुमारनामा पुत्रः शिववचनात् कुटिलाया अभूत्	३१ ।४३
	=षण्मुखः कार्त्तिकेयादिनामधेयः, अनेन सह देवाः कुरुक्षेत्रं जग्मुः	३१ ।५३
	=कार्त्तिकेयः, अस्मिन्नभिषिक्तेऽप्सरोगणा ननृतुः	३१ ।५६
	=कार्त्तिकेयः, अयं सैनापत्येऽभिषिक्तः सन् शिवादिकं प्रणनाम	३२ ।१-२
	=कार्त्तिकेयः, अस्य शिवादिभिः सह संवादः	३२ ।३
	=कार्त्तिकेयः, इमं सुरैर्दत्ता गणा अनुजग्मुः	३२ ।२७
	=कार्त्तिकेयः, इमं प्रति युद्धे महिषासुरो गदामादाय पराधावत्	३२ ।७१

	=कार्त्तिकेयः, अयं शक्त्या तारकासुरं हत्वा मयूरमारुह्य महिषासुरं निहन्तुं हिमाद्रिं जगाम	३२।८६
	=कार्त्तिकेयः, अयमिन्द्रं प्रत्याह यन्मया पूर्वं क्रौञ्चपर्वतस्य प्रदक्षिणा कृता	३२।१०४
कुमारपुरम्	=इदं कुरुक्षेत्रस्थे कुमाराभिषेकतीर्थे स्नानेन पुरुषो लभते	२३ (३०)।१७
कुमारादाः	=अयं दाक्षिणात्यो जनपदः	१३।४७
कुमाराभिषेकम्	=तीर्थं कुरुक्षेत्रस्थम्, अत्र स्नात्वा नरो यशसा समन्वितः सन् कुमारपुरमाप्नोति	२३ (२०)।१७
कुमारी	=कात्यायनी, अस्या ऊरू वृत्तौ रोमहीनौ चाऽऽस्ताम्	२०।११
	=देवी कात्यायनी, अनेन पदेन दुन्दुभिर्देवीं कात्यायनीं संबोधयामास	२०।२२
	=देवी, इयं शक्त्या दैत्यान् ननाश	३०।२१
	=देव्या नाम	३०।६२
कुमुदः	=प्रमथः, इमं यक्षाः कार्त्तिकेयाय ददुः	३१।७३
कुमुदम्	=श्वेतकमलम्, एभिरावृतं वनान्तं संवरणो नाम राजा ददर्श	२२।३२
कुमुदमाली	=प्रमथः, इमं शिवः कार्त्तिकेयाय प्रादात्	३१।६१
कुमुदानि	=श्वेतकमलानि, एषां विकासेन चन्द्रोदयो विज्ञायते	१६।३१
कुमुद्वती	=नदी, इयं विन्ध्यपर्वताद् विनिःसृता	१३।२८
कुम्भः	=राशिः, शनैश्चरस्य सद्म कालरूपिणः शिवस्य जङ्घास्थानम्	५।४१
	=राशिः, अस्य स्वरूपं सञ्चरस्थानानि च	५।५८
	=गणाधिपस्य कुम्भे सिन्धुवारको राजते	१८।६
	=गजस्य कुम्भौ विजित्येव कात्यायन्याः स्तनौ स्थितौ	२०।५
कुम्भकर्णः	=शिवस्य नाम	२३ (२६)।६६

कुम्भजन्मा	=अगस्त्यः, अयं सूर्यकार्यस्य विधानाय प्रतिज्ञातवान्	१९ ।२७
कुम्भभवः	=अगस्त्यः, इमं स्वसमुद्धरणाय सूर्यो बभाषे	१९ ।२३
कुम्भयोनिः	=अगस्त्यः, अयं सर्वेषां तपोधनानां मध्ये वरिष्ठः	१२ ।४७
कुम्भवक्त्रः	=इममृषयः स्कन्दाय ददुः	३१ ।८७
कुरुः	=लोकेश्वरः	२३ ।१२
	=ऋषिः, अनेन कृष्टं क्षेत्रं कुरुक्षेत्रनाम्ना प्रसिद्धम्	२३ (११) ।२४
	=राजा, अनेन कृष्टं क्षेत्रं कुरुक्षेत्रमुच्यते	२३ (१) ।१३
	=पुरुषोत्तमः	२३ ।३
	=संवरणस्य पुत्रः	२३ ।३
	=अस्यार्थं राजा संवरणः सुदाम्नः पुत्रीं सौदामनीं वृतवान्	२३ ।५
	=क्षेत्रपालः	२३ ।९
	=पशुपालः	२३ ।९
	=प्रजापालः	२३ ।९
	=सर्वपालकः	२३ ।९
	=पार्थिवर्षभः	२३ ।२२
	=अनेन कुरुक्षेत्रे सरस्वती यज्ञे विषयीकृता	२३ (१६) ।३८
	=राजा	२३ (१६) ।३८
	=अस्य नाम्ना तीर्थं कुरुक्षेत्रे स्थितम्	२३ (२०) ।१४
	=राजर्षिः	२३ (२०) ।१५
	=अस्येन्द्रेण सह संवादः	२३ (२०) ।१९
	=राजर्षिः, अनेनानुज्ञातः कुरुतीर्थे स्नात्वा नरः परमं पदं लभते	२३ (२०) ।२२
	=राजा, अयं विष्णोः सकाशाद् वरमयाचत	२३ ।३२
	=राजर्षिः, अस्य विष्णुना सह संवादः	२३ ।३३
	=सुव्रतः	२३ ।३७
कुरुक्षेत्रम्	=पुण्यक्षेत्रम्, अत्र गमनाय विष्णुना देवाः समादिष्टाः	२२ ।२०
	=अस्य विषये देवानां प्रश्नो विष्णुं प्रति	२२ ।२३

=अस्मात् पृथूदकतीर्थोद्भावादिकं विषयजातं विष्णुना देवान् प्रति समाहितम्	२२।२५
=अस्य व्युत्पत्तिः	२३ (१)।१३
=अस्य स्थितिरुक्ता	२३ (१)।१४
=क्षेत्रम्, अस्य वने दितिर्घोरं तपोऽयुतवर्षपर्यन्तं चचार	२३ (६)।१२-१३
=अत्र नदीनामुत्तमा सरस्वती नदी प्रवहति	२३ (११)।१
=ऋषिणा कुरुणा कृष्टं क्षेत्रं कुरुक्षेत्रमुच्यते	२३ (११)।२४
=अत्र सरस्वती नंदी मार्कण्डेयवचनाद् विवेश	२३ (१२)।१
=तीर्थविशेषः, क्षेत्रमिदं सरस्वती नदी समाप्लावितवती	२३ (१२)।२
=अत्र तीर्थसहस्राणि वर्तन्ते	२३ (१२)।३
=अस्य स्मरणेन कश्चिदपि शुचिर्भवति	२३ (१२)।६
=अत्र वसाम्यथवा गमिष्यामीत्युक्त्वा कश्चिदपि सर्वपापैः प्रमुच्यते	२३ (१२)।७
=अत्र वासेन मुक्तिर्भवति	२३ (१२)।८
=अत्र गच्छामि वसामि वाऽहमिति वदन् पुरुषः पापैः प्रमुच्यते	२३ (१२)।१०
=एतत् (ब्रह्मवेदिम्) सेवमाना नराः परं पदं प्राप्नुवन्ति	२३ (१२)।१५
=अत्र मृतानां पतनं नैव भवति	२३ (१२)।१६
=अत्र नव नद्यः सन्ति	२३ (१३)।१
=अत्र सप्त वनानि सन्ति	२३ (१३)।१
=अत्र स्थितानां सप्तवनानां नामानि	२३ (१३)।३-५
=अत्र काम्यकवनमस्ति	२३ (१३)।४
=अत्र फलकीवनमस्ति	२३ (१३)।४; २३ (१५)।४५; ४८; २३ (१५)।४९
=अत्र व्यासवनमस्ति	२३ (१३)।४
=अत्रादितिवनमस्ति	२३ (१३)।४; २३ (१३)।१२
=अत्र मधुवनमस्ति	२३ (१३)।५
=अत्र शीतवनमस्ति	२३ (१३)।५
=अत्र सूर्यवनमस्ति	२३ (१३)।५

=अत्र सरस्वती नदी वर्तते २३ (१३) ।६; २३ (१६) ।३९; २३ (१८) ।१९; २३ (१९) ।४१; २३ (२०) ।४; २३ (२१) ।३; ६
=अत्र वैतरणी नदी वर्तते २३ (१३) ।६
=अत्र आपगानाम्नी नदी वर्तते २३ (१३) ।७; २३ (१५) ।१
=अत्र कौशिकी नदी वर्तते २३ (१३) ।७; २३ (१५) ।५७
=अत्र वासुनाम्नी नदी वर्तते २३ (१३) ।७
=अत्र गङ्गा नदी वर्तते २३ (१३) ।७; २३ (१५) ।६२
=अत्र मधुस्रवाख्या नदी वर्तते २३ (१३) ।७
=अत्र मन्दाकिनी नदी वर्तते २३ (१३) ।७
=अत्र दृषद्वती नदी वर्तते २३ (१३) ।८; २३ (१५) ।४६; २३ (१५) ।५७
=अत्र हिरण्वती नदी वर्तते २३ (१३) ।८
=तीर्थम्, अस्य प्रभावः २३ (१३) ।९
=अत्र सवनं नाम तीर्थमस्ति २३ (१३) ।१४
=अत्र पारिप्लवनामकं त्रैलोक्यविश्रुतं तीर्थं वर्तते २३ (१३) ।१६
=अत्र कौशिकीसङ्गमनामकं तीर्थमस्ति २३ (१३) ।१८
=अत्र धरण्यास्तीर्थमस्ति २३ (१३) ।१९
=अत्र दक्षाश्रमो वर्तते २३ (१३) ।२१
=अत्र शालूकिनीतीर्थमस्ति २३ (१३) ।२२
=अत्र नागतीर्थमस्ति २३ (१३) ।२३
=अत्र 'रन्तुक'- नामा द्वारपालो वर्तते २३ (१३) ।२४
=अत्र 'पञ्चनद'- नामकं तीर्थमस्ति २३ (१३) ।२६-२७
=अत्र वामनो देवः प्रतिष्ठितः २३ (१३) ।३०
=अत्राऽश्विनोस्तीर्थमस्ति २३ (१३) ।३१
=अत्र वाराहतीर्थमस्ति २३ (१३) ।३२
=अत्र सोमतीर्थमस्ति २३ (१३) । ३३; २३ (१६) ।१५; २३ (२०) ।४; २३ (२५) ।१
=अत्र ज्वालामालेश्वरलिङ्गं वर्तते २३ (१३) ।३६
=अत्र भूतेश्वरलिङ्गं वर्तते २३ (१३) ।३६
=एकहंसाख्यं तीर्थमत्रास्ति २३ (१३) ।३७
=अत्र मुञ्जवटनामकं तीर्थमस्ति २३ (१३) ।३८

=अत्र महाग्राही यक्षिणी वर्तते	२३ (१३) ।३९
=अत्र पुष्करतीर्थमस्ति	२३ (१३) ।४१
=अस्य द्वारं यक्षिण्या वासस्थानम्	२३ (१३) ।४१
=अत्र कपिलनामा महायक्षो द्वारपालोऽस्ति	२३ (१३) ।४४
=उदूखलमेखलानाम्नी महायक्षीह वर्तते	२३ (१३) ।४५
=अत्र सन्निहती (सरस्वती) नदी स्थिताऽस्ति	२३ (१३) ।५०
=अत्र 'रामह्रद'- नामको ह्रदः	२३ (१४) ।१
=अत्र रामह्रदनामकं तीर्थम्	२३ (१४) ।१
=अत्र रामह्रदनामकाः पञ्चह्रदाः सन्ति	२३ (१४) ।२
=अत्र रामह्रदाः सन्ति	२३ (१४) ।१४
=अत्र वंशमूलनामकं तीर्थमस्ति	२३ (१४) ।१६
=अत्र कायशोधनाख्यं तीर्थमस्ति	२३ (१४) ।१७
=अत्र लोकोद्धारनामकं तीर्थमस्ति	२३ (१४) ।२१
=अत्र श्रीतीर्थं वर्तते	२३ (१४) ।२३
=अत्र कपिलाह्रदनामकं तीर्थमस्ति	२३ (१४) ।२४
=अत्र कपिलानामको ह्रदः	२३ (१४) ।२४
=अत्र सूर्यतीर्थमस्ति	२३ (१४) ।२६; २३ (१५) ।७३
=अत्र भवानीवननामकं तीर्थं वनं च स्तः	२३ (१४) ।२९
=अत्र विवरद्वारनामकं तीर्थमस्ति	२३ (१४) ।३३
=अत्र सङ्गिनीतीर्थमस्ति	२३ (१४) ।३४
=अत्र ब्रह्मावर्तनामकं तीर्थमस्ति	२३ (१४) ।३६; ३९
=अत्र सरस्वतीतीर्थमस्ति	२३ (१४) ।३७
=अत्र कामेश्वरतीर्थमस्ति	२३ (१४) ।४२
=अत्राम्बुवननामकं वनं तीर्थं च स्तः	२३ (१४) ।४२
=अत्र मातृतीर्थमस्ति	२३ (१४) ।४३
=अत्र शीतवननामकं वनमस्ति	२३ (१४) ।४४
=अत्र दण्डकतीर्थमस्ति	२३ (१४) ।४५
=अत्र स्वानुलोमायननामकं तीर्थमस्ति	२३ (१४) ।४६
=अत्र दशाश्वमेधिकं तीर्थमस्ति	२३ (१४) ।४९
=अत्र मानुषतीर्थमस्ति	२३ (१४) ।५०
=अत्र ब्रह्मोदुम्बरतीर्थमस्ति	२३ (१५) ।७
=अत्र कपिस्थलेति नामकं विख्यातं तीर्थमस्ति	२३ (१५) ।४

=अत्र कलसीतीर्थं वर्तते	२३ (१५) ।१८
=अत्र सरकं तीर्थमस्ति	२३ (१५) ।२०; २३ (१५) ।२१
=इडास्पदाख्यं तीर्थमिहास्ति	२३ (१५) ।२४
=अत्र केदाराख्यं महातीर्थमस्ति	२३ (१५) ।२६
=अत्र 'किंरूप'- नामकं महातीर्थं वर्तते	२३ (१५) ।२७
=अत्र पौण्डरीकतीर्थमस्ति	२३ (१५) ।३९
=अत्र नागह्रदनामकं तीर्थमस्ति	२३ (१५) ।३९
=अत्र त्रिविष्टपनामकं देवनिषेवितं तीर्थमस्ति	२३ (१५) ।४१
=अत्र रसावर्ताख्यं तीर्थमस्ति	२३ (१५) ।४३
=अलेपकाख्यं तीर्थमिहास्ति	२३ (१५) ।४४
=अत्र मिश्रकतीर्थमस्ति	२३ (१५) ।५२
=अत्र व्यासवनमस्ति	२३ (१५) ।५४
=अत्र मनोजवाख्यं तीर्थमस्ति	२३ (१५) ।५४
=अत्र मधुवटीनामकं देव्यास्तीर्थमस्ति	२३ (१५) ।५५
=अत्र व्यासस्थली वर्तते	२३ (१५) ।५८
=अत्र किंदत्तनामकः कूपोऽस्ति	२३ (१५) ।६०
=अत्र 'अह्न'- नामकं तीर्थमस्ति	२३ (१५) ।६१
=अत्र सुदिनाख्यं तीर्थमस्ति	२३ (१५) ।६१
=अत्र कृतजप्याख्यं तीर्थमस्ति	२३ (१५) ।६२
=अत्र कोटितीर्थाख्यं तीर्थमस्ति	२३ (१५) ।६३; ७१
=अत्र वामनकं तीर्थमस्ति	२३ (१५) ।६४
=अत्र विष्णुपदनामकं तीर्थमस्ति	२३ (१५) ।६६
=अत्र ज्येष्ठाश्रमाख्यं तीर्थमस्ति	२३ (१५) ।६७
=अत्र कुलोत्तारणाख्यं तीर्थमस्ति	२३ (१५) ।७४
=इदं सवामनं दूरस्थोऽपि स्मृत्वा मुक्तिमवाप्नोति	२३ (१५) ।७८
=अत्र नैमिषकुञ्जाख्यं तीर्थमस्ति	२३ (१६) ।७
=अत्र सीतातीर्थं स्थितम्	२३ (१६) ।१२
=अत्र ब्रह्मस्थानाख्यं तीर्थं वर्तते	२३ (१६) ।१३
=अत्र सप्तसारस्वताख्यं तीर्थं स्थितम्	२३ (१६) ।१७; ४०; २३ (१७) ।२२
=अत्र मानसह्रदा नदी वर्तते	२३ (१६) ।१८
=अत्र 'ओघ'- नाम्नी नदी (सरस्वती) वर्तते	२३ (१६) ।१८

=अत्र सुवेणुनदी (सरस्वती) वर्तते	२३ (१६) ।१८
=अत्र काञ्चनाक्षी नदी वर्तते	२३ (१६) ।१८
=अत्र सुप्रभा नदी वर्तते	२३ (१६) ।१८
=अत्र विशाला नदी वर्तते	२३ (१६) ।१८
=अत्र स्थिते पुष्करतीर्थे महात्मना मङ्कणेन सरस्वती समानीता	२३ (१६) ।२३
=अत्र मङ्कणेन स्मृता सरस्वती समागता	२३ (१६) ।२९
=अत्र मङ्कणेन समाहूता सरस्वती समागता	२३ (१६) ।३१; ३४
=अत्र मुनिना मङ्कणेनर्षीणामुपकारार्थं सरस्वती (सुवेणुः) प्रवेशिता	२३ (१६) ।३६
=अत्र कुरुणा सर्वपापक्षयार्थं सरस्वती पूजिता	२३ (१६) ।३८
=अत्रैकं सरो वर्तते, तस्य मध्ये धीमता मार्कण्डेयेन सरस्वती समानीता	२३ (१६) ।३९
=अत्रारुणायाः सरस्वत्याश्च संगमो वर्तते	२३ (१९) ।४१
=अत्रारुणासंगमो वर्तते	२३ (१९) ।४२
=अत्रौशनसं तीर्थमस्ति	२३ (१८) ।१
=अत्र विश्वामित्रतीर्थं वर्तते	२३ (१८) ।१५
=अत्र पृथूदकतीर्थं स्थितम्	२३ (१८) ।१६; ३०
=अत्र सरस्वत्यां पृथूदकतीर्थं वर्तते	२३ (१८) ।१९
=अत्र ब्रह्मयोनिसंज्ञकं तीर्थं स्थितम्	२३ (१८) ।२४
=अत्राऽवकीर्णसंज्ञकं तीर्थं विख्यातम्	२३ (१८) ।२५; ३३
=अत्र यायातं नाम तीर्थं स्थितम्	२३ (१८) ।३७
=अत्र मधुस्रवाख्यं तीर्थमस्ति	२३ (१८) ।३९
=अत्र वसिष्ठोद्वाहसंज्ञितं तीर्थमस्ति	२३ (१८) ।४०
=अत्र स्थाणुतीर्थं स्थितम्	२३ (१९) ।३; २३ (२१) ।३०; २३ (२२) ।१; २३ (२४) ।४; २३ (२६) ।३३; २३ (२८) ।७
=अत्र वसिष्ठस्याऽऽश्रम आसीत्	२३ (१९) ।३
=अत्र विश्वामित्रस्याऽऽश्रम आसीत्	२३ (१९) ।३
=अत्र महानदी सरस्वती वर्तते	२३ (१९) ।७; ८; १०

=अत्राऽरुणा नदी वर्तते	२३ (१९) ।४१
=अत्र चतुःसमुद्रात्मकं तीर्थं वर्तते	२३ (२०) ।२
=अत्र दर्विणा (ऋषिणा) चत्वारः समुद्राः समाहृताः	२३ (२०) ।२
=अत्र शतसाहस्रिकं तीर्थं वर्तते	२३ (२०) ।३
=अत्र शतिकं तीर्थं वर्तते	२३ (२०) ।३
=अत्र रेणुकाश्रमः स्थितः	२३ (२०) ।५
=ऋणमोचनाख्यं तीर्थमिह स्थितम्	२३ (२०) ।६
=ओजसाख्यं तीर्थमिह स्थितम्	२३ (२०) ।६; ३१ ।५१
=अत्र कुमाराभिषेकं तीर्थं स्थितम्	२३ (२०) ।६
=अत्र पञ्चवटं तीर्थं स्थितमस्ति	२३ (२०) ।१२
=अत्र कुरुतीर्थं वर्तते	२३ (२०) ।१४; २१; २२
=अत्र शतक्रतोर्यज्ञस्य करणेन सुकृतलोकावाप्तिर्भवति	२३ (२०) ।१६
=तीर्थम्, अत्र श्रद्धया निवसतां मानवानां ब्रह्मसदनप्राप्तिर्भवति	२३ (२०) ।१९
=अत्र शिवद्वारं तीर्थं वर्तते	२० (२०) ।२३
=अत्र स्वर्गद्वारं तीर्थं वर्तते	२३ (२०) ।२३
=अनरकाख्यं तीर्थमिह स्थितम्	२३ (२०) ।२४
=अत्र काम्यकवनं वर्तते	२३ (२०) ।३२
=अत्र कुब्जाख्यं तीर्थं स्थितम्	२३ (२१) ।१
=अत्र नैमिषेया ऋषयः समागताः	२३ (२१) ।३
=अत्र यज्ञोपवीतिकं तीर्थं वर्तते	२३ (२१) ।४
=अत्र सचक्रकतीर्थं वर्तते	२३ (२१) ।५
=अत्र सरस्वत्या दक्षिणप्रवाहे नर्मदा संश्रिता	२३ (२१) ।७
=अत्र सरस्वत्या उत्तरप्रवाहे सिन्धुनदी समाश्रिता	२३ (२१) ।८
=अत्र विहाराख्यं तीर्थं वर्तते	२३ (२१) ।१३
=अत्र दुर्गातीर्थं स्थितम्	२३ (२१) ।१५
=अत्र सरस्वतीकूपो वर्तते	२३ (२१) ।१६
=अत्र पितृतीर्थं वर्तते	२३ (२१) ।१८
=अत्र प्राची सरस्वती वर्तते	२३ (२१) ।१९
=औशनसं तीर्थमिह वर्तते	२३ (२१) ।२४
=अत्र ब्रह्मतीर्थं वर्तते	२३ (२१) ।२८

	=अत्र सान्निहत्यसरो वर्तते	२३ (२२) ।१
	=अत्र स्थाणुवटवृक्षो वर्तते	२३ (२२) ।१
	=अत्र सांनिहितं सरो वर्तते	२३ (२४) ।२
	=अत्र सान्निहितं तीर्थं स्थितम्	२३ (२४) ।२; २३ (२६) ।३३
	=अत्र वायुना समुदीरिताः पांशवो महादुष्कृतकर्माणमपि परमं पदं नयन्ति स्म	२३ (२४) ।२३
	=अत्र रुद्रहृदाख्यः कूपो वर्तते	२३ (२४) ।२९
	=अत्र रुद्रहृदाख्यं तीर्थं वर्तते	२३ (२४) ।३०
	=अत्र शुक्रतीर्थं वर्तते	२३ (२५) ।१
	=अत्र दक्षतीर्थं वर्तते	२३ (२५) ।२
	=अत्र स्कन्दतीर्थं वर्तते	२३ (२५) ।२
	=अत्र नकुलीशगणो विद्यते	२३ (२५) ।१४
	=अत्र रुद्रकरं तीर्थं विद्यते	२३ (२५) ।१४
	=अत्र हस्तिपादेश्वरः शिवः स्थितः	२३ (२५) ।२५
	=अत्र सिद्धेश्वराख्यं लिङ्गं वर्तते	२३ (२५) ।३०
	=अत्र मृकण्डेनैकं लिङ्गं स्थापितम्	२३ (२५) ।३२
	=अत्र लिङ्गमेकमादित्येन स्थापितम्	२३ (२५) ।३२
	=अत्रैकं लिङ्गमिन्द्रेण स्थापितम्	२३ (२५) ।३६
	=अत्र कार्तवीर्यस्थापितं लिङ्गं वर्तते	२३ (२५) ।४१
	=अत्र हनूमता लिङ्गमेकं स्थापितम्	२३ (२५) ।४२
	=अत्र स्वर्णलिङ्गं स्थितम्	२३ (२५) ।४६
	=अत्र स्थाणुतीर्थे शिविकावाहनेन म्लेच्छाः कुष्ठादिरोगयुतं वेनं नीतवन्तः	२३ (२६) ।४०
	=अस्य माहात्म्यं श्रुत्वा सर्वपापैः प्रमुच्यते	२३ (२७) ।२३
	=राजा वेनपुत्रो राज्ये सुतमभिषिच्य कुरुक्षेत्रं ययौ	२३ (२७) ।३३
	=अत्र पुण्यतीर्थं पृथूदकं देवा विष्णुवचनाज्जग्मुः	२४ ।४
	=अत्र कुमारकार्त्तिकेयेन सहिताः सर्वे देवा गताः	३१ ।५३
	=तीर्थम्, इदं फलास्पदं मातरं कार्त्तिकेयाय ददौ	३१ ।९३
कुरुक्षेत्रवनम्	=अस्मिन्नयुतवर्षपर्यन्तमदित्या घोरं तपश्चरितम्	२३ (६) ।१२-१३
	=इदमदितेर्घोरेण तपसा सर्वकामप्रदं बभूव	२३ (६) ।१४

कुरुजङ्गलम्	=अत्र वामनस्य निवासकथनाय लोमहर्षणेन प्रतिज्ञातम्	२३ (२) ।२
कुरुजाङ्गलम्	=अत्र शङ्करेण चक्रपाणिर्दृष्टः स्तुतश्च	३ ।१२-२३
	=इदं क्षेत्रं सर्वेषु क्षेत्रेषु प्रवरम्	१२ ।४५
	=क्षेत्रम्, सरस्वतीदृषद्वत्योर्नद्योरन्तरस्थम्	२३ (१) ।१
	=एतद् देवादयः सेवन्ते	२३ (१२) ।१२
	=वनम्, इदं चन्द्रवासुकिप्रभृतयो रक्षन्ति	२३ ।४१
कुरुतीर्थम्	=इदं कुरुक्षेत्रे स्थितम्	२३ (२०) ।१४
	=अत्र स्नानेन नरः किल्बिषैर्मुक्तो भवति	२३ (२०) ।२३
कुरुवर्षः	=जम्बूद्वीपस्य नवसु वर्षेष्वन्यतमः, अत्र कल्पवृक्षाः सन्ति, अयं जम्बूद्वीपस्योत्तरभागे स्थितः	१३ ।५
कुलपर्वताः	=महेन्द्र-मलय-सह्य-शुक्तिमद्-ऋक्ष-विन्ध्य-पारियात्राख्याः सप्त	१३ ।१४
कुलम्	=कुलधर्मो न परित्याज्यः	१४ ।३८
	=यस्य कुले वेदशास्त्रादेरभावः स नग्नसंज्ञको भवति	१५ ।३५
	=अस्य नाशं कुपितो भानुः करोति	१५ ।६४
	=अस्य धर्मः कात्यायन्या दुन्दुभिं प्रति प्रोक्तः	२० ।३१
	=स्वकुले निर्धारितं शुल्कं कात्यायनी दुन्दुभिं प्रोक्तवती	२० ।३४
	=हिरण्यकशिपोः कुले बलिर्बभूव	२३ (२) ।१६
	=शुभकुलम्, अस्मिन् स्वपुत्रस्य दारक्रियार्थं राजा संवरणो यत्नमकरोत्	२३ ।४
	=अस्मिन् मम पुत्रः पौत्रो वा कश्चिद् एतादृशो भविष्यति यो मामापगानद्यां तिलैस्तर्पयिष्यतीति पितरः पितामहाश्च शंसन्ति	२३ (१५) ।४
	=इदं त्रिपुरुषमवज्ञातो ब्राह्मणो हन्यात्	२३ (१८) ।३४
कुलाचलाः	=सप्तसंख्याकाः, इमे सुप्रभातकरणार्थं प्रार्थ्यन्ते	१४ ।२७

कुलानि	=एकविंशतिकुलानि, इमानि ब्रह्मचारी गृहस्थो वानप्रस्थो यतिश्च कुलोत्तारणाख्ये तीर्थे स्नात्वा तारयति	२३ (१५) ।७६
	=एतानि कुरुक्षेत्रस्थं कुलोत्तारणाख्यं तीर्थमासाद्य द्विजोत्तमस्तारयति	२३ (१६) ।५
कुलान्तकः	=शिवस्य नाम	२३ (२६) ।१४२
कुलिशम्	=आयुधम्, इदमिन्द्रेणान्धकासुरोपरि प्रक्षिप्तम्	१० ।४
	=आयुधम्, अनेन देव्या दानवानां वक्षांसि निर्भिन्नानि	२१ ।१०
	=इन्द्रस्य वज्रम्, इदमिन्द्रशत्रुणा मुरुणा हृतम्	३४ ।४०
कुलूताः	=उत्तरापथवासिनो जनाः, एते क्षुद्रनदीजलानि पिबन्ति	१३ ।४३
कुलोत्तारणम्	=तीर्थम्, इदं पुरा विष्णुना कल्पितं कुरुक्षेत्रे स्थितमस्ति	२३ (१५) ।७४
	=तीर्थम्, कुरुक्षेत्रस्थम्, इदमासाद्य द्विजोत्तमः कुलानि तारयेत्	२३ (१६) ।५
कुल्याः	=अयं दाक्षिणात्यो जनपदः	१३ ।४६
कुवलयः	=गणः, इमं कुहूः कार्त्तिकेयाय प्रादात्	३१ ।८०
कुशः	=एतदाख्यो द्वीपः, अस्य प्रमाणम् = चतुष्षष्टि-लक्षयोजनानि	११ ।३६
कुशट्टाः	=एतदाख्या जनाः क्षुद्रनदीः स्वेच्छया पिबन्ति	१३ ।३५
कुशस्थली	=सर्वेषु पुरेष्वियं श्रेष्ठा	१२ ।५१
कुशाः	=एषामुदकेन माघमासे स्नानं कार्यम्	१७ ।४२
	=एतैर्मन्त्रपूतैर्ऋषयो वेनं निजघ्नुः	२३ (२६) ।१७
	=एतान् पार्वत्याः सख्यः समानिन्युः	२५ ।४२
कुशाग्रः	=अनेन पुरा मङ्कणकः क्षतो बभूव	२३ (१७) ।७
कुशेशयः	=शङ्करस्य नाम	२३ (२३) ।३६ (१८)
कुशोदकम्	=अनेन माघमासे स्नानं कार्यम्	१७ ।४२

कुष्ठम्	=रोगः, वेनो म्लेच्छमध्ये समुत्पन्नः सन्ननेनाक्रान्तो बभूव	२३ (२६) ।२९
	=अनेन रोगेण समन्वितं स्वपितरं वेनं तत्पुत्रो ददर्श	२३ (२६) ।३५
कुसुमः	=प्रमथगणः, इमं धाता कार्त्तिकेयाय प्रादात्	३१ ।६५
कुसुमम्	=इदं पञ्चवर्णमादाय षड् ऋतवः शिवविवाहयात्रायां महेशानं जग्मुः	२७ ।१३
कुसुमानि	=एभिर्विष्णोः पूजां कृतवन्तो जनाः	१६ ।२१
	=कदम्बस्य कुसुमैः परिकल्पिते शुभे शयने त्रयोदश्यां कामः स्वपिति	१७ ।९
	=कुन्दस्य कुसुमैः फाल्गुने मासि रुद्रस्य पूजा कर्तव्या	१७ ।४७
	=वैशाखमासे सुगन्धिकुसुमानां जलेन स्नानं कार्यम्	१७ ।५२
	=एभिः पादादारभ्य केशवमर्चयेत्	१८ ।१८
	=देव्यै ये कुसुमान्युपहरन्ति तेषां परिभवो न भवति	३० ।६४
कुसुमायुधः	=चित्रवने विचरन्तं महेशं संतापयितुमुद्यतोऽयं त्रिनेत्रस्य क्रोधाध्मातदृशा दग्धः	६ ।९४-९६
	=दग्धस्यास्य धनुः पञ्चधा जातम्	६ ।९७
	=कामदेवस्य नाम	२७ ।३१
कुहुकाः	=उत्तरापथवासिनो जनाः, एते क्षुद्रनदीजलानि पिबन्ति	१३ ।४३
कुहूः	=नदी, इयं भारतवर्षस्थकुमारद्वीपे हिमवत्पादान्निःसृता	१३ ।२०
	=इयं कुवलयं गणं कार्त्तिकेयाय प्रादात्	३१ ।८१
कूटम्	=ये जनाः कूटम् = कपटं वदन्ति ते महारौरवादिनरकेषु तिष्ठन्ति	१२ ।४०
	=कूटसाक्षिप्रदा जना महारौरवादिनरकान् यान्ति	१२ ।४०
कूटशाल्मलिः	=नरकः, अयं पुष्करद्वीपस्थनरकेषु दशमः	११ ।५६

कूपः	=अस्मिन् सरकतीर्थमध्यस्थे कोटिसंख्याका रुद्रा व्यवस्थिताः सन्ति	२३ (१५) ।२२
	=किंदत्तः कुरुक्षेत्रस्थितः	२३ (१५) ।६०
	=सरस्वतीकूपः कुरुक्षेत्रे स्थितः	२३ (२१) ।१६
	=रुद्रह्रदः	२३ (२४) ।२९
	=रुद्रह्रदाख्यः, अयं कलिद्वापरयोर्मध्ये वर्तते	२३ (२४) ।२९
कूपाः	=इमान् ये विध्वंसयन्ति ते नरकयातनां प्राप्नुवन्ति	१२ ।२३-२४
कूर्मग्रीवः	=गणः, इमं कृत्तिकाः स्वपुत्राय कार्त्तिकेयाय ददुः	३१ ।८६
	=गणः, अयं युद्धे ग्रीवादिभिर्दैत्यान् निजघान	३२ ।६२
कूलम्	=क्षीरसमुद्रस्योत्तरे कूले विश्वकृत् तपश्चरति	२३ (४) ।७
	=अस्मिन् ह्रदं कृत्वा द्वैतवने देवी सरस्वती विराजते	२३ ।१४
	=अस्यापहारेणोह्यमानो वसिष्ठः सरस्वतीं तुष्टाव	२३ (१९) ।१२
कृच्छ्रम्	=एतन्नामकं व्रतम्, आखुसंज्ञकस्य कस्यचिदन्नं भुक्त्वाऽनेन शुद्धिर्विधीयते	१५ ।३०
कृतः	=युगम्, अस्याऽऽदावृक्षो नाम राजा बभूव	२२ ।२६
कृतघ्नः	=पुष्करद्वीपः, अत्र कर्माणि विनश्यन्ति तेनायं 'कृतघ्न'- शब्देनोक्तः	१२ ।४३
	=अयं जनः सर्वेषां पापीयसां मध्ये श्रेष्ठः	१२ ।५६
कृतजप्यम्	=तीर्थं कुरुक्षेत्रस्थम्, अत्र स्नानादिनाऽश्वमेधयज्ञफलं लभ्यते	२३ (१५) ।६२-६३
कृतमाला	=नदी, इयं शुक्तिमत्पर्वतात् समुद्भूता	१३ ।३२
कृतयुगम्	=अस्मिन् हरेः पार्श्वे पूजादिकं प्रशस्तमुक्तम्	२३ (२८) ।४१
कृतस्मरः	=कुमारद्वीपस्थपर्वतः	१३ ।१८
कृत्तिका	=अस्य पादमात्रे मेषराशिः कालरूपिणः शिवस्य शिरःप्रदेशश्च	५ ।३१
	=नक्षत्रम्, अस्मिन् नक्षत्रे योषित्समागमः परिवर्जनीयः	१४ ।५०
कृत्तिकाः	=आसां योगं रागवती सन्ध्या भूत्वा प्रत्यैच्छत्	२५ ।२०

=एताः षड् देव्यः शरवणे स्थितं बालं ददृशुः ३१ ।२२

=एताः षड् देव्यः षण्मुखं शिशुं स्नेहादबीभरन् ३१ ।२४

=आसामुत्सङ्गे शायिनं शिशुकं शिवाग्नि-कुटिलाम्बिका ददृशुः ३१ ।३८

=आसां शिवेन सह संवादः ३१ ।४२

=इमाः षट् पुत्रसहिता दृष्ट्वा देवाः प्रीतिमन्तोऽभूवन् ३१ ।४८

=एतास्तनयं कार्त्तिकेयमभिषिक्तं वीक्ष्य मुदं ययुः ३१ ।५९

=एताः पञ्चगणान् स्वपुत्राय कार्त्तिकेयाय ददुः ३१ ।८६

=इमाः षट् सैनापत्येऽभिषिक्तः कुमारकार्त्तिकेयो भक्त्या प्रणनाम ३२ ।२

कृत्तिमा =नदी, इयमृक्षपर्वतस्य पादात् प्रसूता १३ ।२७

कृत्या =अनया कृताया आर्तेर्नाशको विष्णुः २३ (६) ।१७

=किमियं विधिनाऽसुराणां तेजोनाशाय निर्मितेति बलिः प्रह्लादं पप्रच्छ २३ (८) ।३

कृत्यार्तिनाशः =विष्णुः, अनेन नाम्नाऽदितिर्विष्णुं नमश्चकार २३ (६) ।१७

कृत्रिमः =पुत्रः, अयं षड्विधेषु दायादबान्धवेषु चतुर्थोऽस्ति ३५ ।४१

कृपा =नदी, इयं कुमारद्वीपस्थऋक्षपर्वताद् विनिःसृता १३ ।२५

=अनयाऽन्विता भूत्वा यक्षिणी पापदेशजां स्त्रियं सुगतिवचनमाह २३ (१३) ।४९

=अनया युक्तः (कृपाशीलः) वसिष्ठः २३ (१९) ।११

कृमयः =पापिनो जना नरकं प्राप्य तावदिमान् भक्षयन्ति १२ ।३५

कृमिभोजना =नरकरूपा नदी, पुष्करद्वीपस्थनरकेषु सप्तदशी ११ ।५७

कृशः =शिवस्य नाम २३ (२६) ।१००

कृशरा =अस्या वृथा भक्षणेन नरो नरकयातनां प्राप्नोति १२ ।२०

कृषीवलाः =कृषकाः, एते यत्र सन्ति तत्रैव देशे वासः करणीयः १४ ।५५

कृष्णः	=अस्य जनको धर्मः, जननी चाहिंसा, अन्ये त्रयो भ्रातरः	६।१-२
	=योगाभ्यासरतः	६।२
	=पक्षो भाद्रपदमासस्य, अस्मिन् मृगशिरोनक्षत्रयुताऽष्टमी 'कालाष्टमी' इति नाम्ना प्रसिद्धा	१७।३०
	=फाल्गुनमासस्य पक्षः, अस्याष्टम्यामुपवासः कर्तव्यः	१७।४६
	=वासुदेवो विष्णुरूपः, अयं मदधीनानां केषांचिद् दैतेयानां दानवानां च वीर्यर्द्धिनापि समो नास्तीति बलिः प्रह्लादं प्रत्याह	२३ (८)।३२
	=विष्णुः, अस्मिन् भक्तिर्नविक्षिता बलिना	२३ (८)।४१
	=विष्णुः, अस्य निन्दा बलिना कृता	२३ (८)।४५
	=वामनः, याचमानमिमं प्रति पर्याप्तमहं धनं दद्यामिति त्वया वक्तव्यमिति शुक्रो बलिमाह	२३ (१०)।१६
	=पक्षो भाद्रमासस्य, अस्मिंश्चतुर्दश्यामापगानद्यां पिण्डदानेन मुक्तिर्लभ्यते	२३ (१५)।६
	=पक्षः, अस्य चतुर्दश्यां तिथौ कुरुक्षेत्रस्थितसरकतीर्थे महेश्वरं दृष्ट्वा सर्वकामा लभ्यन्ते	२३ (१५)।२०
	=कृष्णपक्षः, अस्याष्टम्यां स्थाणुतीर्थे वासं कृत्वा सर्वैः पातकैर्मुच्यते	२३ (२८)।३५
	=पक्षः, अस्य चतुर्दश्यां मानवः शङ्करं पूजयित्वा विमुक्तो भवति सर्वपातकैः	२३ (२८)।४६
कृष्णकेशः	=गणः, इमं स्वतनयाय कार्त्तिकेयाय कुटिला ददौ	३१।८४
कृष्णपक्षः	=अस्य चतुर्दश्यां तिथौ कुरुक्षेत्रस्थित-सरकतीर्थे महेश्वरं दृष्ट्वा सर्वकामा लभ्यन्ते	२३ (१५)।२०
	=चैत्रमासे कृष्णपक्षस्याष्टम्यां तिथौ ब्रह्मतीर्थे सोपवासं वासेन मानवाः परं सूक्ष्मं पश्यन्ति	२३ (२१)।२९
कृष्णमृगाः	=एते पुरा व्याधशरपीडिताः कुरुक्षेत्रस्थमानुषसरोऽवगाह्य मानुषत्वमुपागताः	२३ (१४)।५१
कृष्णा	=कृष्णपक्षभवा तिथिः, एतादृश्यामेकादश्यां साध्याः स्वपन्ति	८७।१६

	=कृष्णाजिनम्=कृष्णमृगस्य चर्म, अस्याम्बरं वसानं कश्यपं देवाः प्रणेमुः	२३ (३)।९
कृष्णोदुम्बरकः	=वृक्षः, अयं यमस्य दक्षिणोत्तरे पार्श्वे संजातः	१८।७
कृसरः	=अस्य नैवेद्यं श्रावणमासे हरस्यार्चनेऽर्पणीयम्	१७।६१
केकरलोहितः	=नागभेदः	७।२७
केतुमालः	=वर्षः, अयं जम्बूद्वीपात् पश्चिमभागे स्थितः	१३।५
केदारः	=शिवः, कपिस्थलातीर्थे तर्पणादिना केदारफलं लभ्यते	२३ (१५)।१६
	=तीर्थम्, अत्र प्रवहन्ती सरस्वती 'सुवेणु' नाम्ना विख्याता बभूव	२३ (१६)।३५
	=तीर्थवरः, अयं शिववीटया दारितो हिमवद्भागः, अस्मै शिवो वरं प्रादात्	३४।१०-१४
केदारम्	=महातीर्थं कुरुक्षेत्रस्थम्, अत्र स्नानेन सर्वदानफलं लभ्यते	२३ (१५)।२६
केरलाः	=अयं दाक्षिणात्यो जनपदः	१३।४६
केशपाशः	=कालिन्दीजलानि पृथिव्याः केशपाश इव राजन्ते	६।३१
केशवः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९)।२५
	=अस्य मुरासुरवधविषये यमेन सह संवादः	३४।५१
केशवर्वरा	=प्राग्देशीयो जनपदः	१३।४५
केशाः	=सन्ध्योपासनानन्तरं विदुषा केशाः संशोधनीयाः	१४।३४
	=स्नानानन्तरं केशविधूननं न कार्यम्	१४।५४
	=एतैर्युक्तस्यान्नस्य शुद्धये मृदम्बुभस्मक्षाराणि प्रक्षेप्तव्यानि	१५।१२
	=एषु प्रगृह्य खड्गेन स्वशीर्षं छेत्तुं करम्भासुर इयेष	१८।४७
	=यमस्य तेजसा कात्यायन्याः केशाः संजाताः	१९।९
	=एतेषु परमेश्वरी देवी कात्यायनी असुराञ्जग्राह	२१।३६
	=इमे राज्ञः संवरणस्य नीलाः कुटिलाश्चासन्	२२।५१
	=इमे वामनस्य सूर्यांशव आसन्	२३ (१०)।५१

	=एतान् कुरुक्षेत्रस्थदण्डकतीर्थेऽभ्युक्ष्य जनः पापतः पूतो भवति	२३ (१४) ।४६
	=एषु रावणेन गृहीता सती वेदवती प्राणान् मुमुचे	२३ (१६) ।९
	=एभिर्युक्तमन्नं रक्षसां भागो भवति	२३ (१९) ।३८
	=काचिद् बालखिल्यमुनिपत्नी शिवं केशेषु जग्राह	२३ (२२) ।६६
	=शिवस्य केशा जीमूत-(मेघ)-रूपाः सन्ति	२३ (२६) ।५२
केसरः	=अस्य निर्यासेन = गन्धद्रव्यविशेषेण कालाष्टम्यां शङ्करस्य पूजा कार्या	१७ ।३३
केसरसटाः	=एता विधुन्वता केसरिणा बहवो दानवा निषूदिताः	२१ ।९
केसराण्यम्	=कामदेवस्य धनुषि यन्नाभिस्थानमासीत् तदेव केसराण्यं जातम्। एतदर्थे संस्कृतवाङ्मये लस्तकशब्दः	६ ।९९
केसरी	=सिंहराशिः, सूर्योऽस्य स्वामी, कालरूपिणः शिवस्य हृदयस्थानीयः	५ ।३५
	=नारायणः, प्रह्लादपितुर्हिरण्यकशिपोर्नाशकः, अयं प्रह्लादेन स्तुतः	८ ।५२
	=देव्या वाहनम्, अनेन बहवो दानवा निषूदिताः	२१ ।९
कैकेयाः	=उत्तरापथवासिनो जनाः, एते स्वेच्छया क्षुद्रनदीः पिबन्ति	१३ ।३९
कैम्पुरुषः	=परमो धर्मः सुकेशिं प्रति महर्षिभिरुक्तः	११ ।२०
कैलासः	=पर्वतः, अत्र शङ्कर आश्रितो बभूव	२३ (२२) ।६९
	=पर्वतः, अत्रोमया सहितमासीनं शङ्करं ब्रह्मादयो ददृशुः	२३ (२३) ।३
	=पर्वतः, अत्र ब्रह्मादिदेवा जग्मुः	२३ (२३) ।२१
	=पर्वतः, अयं हिमाद्रिभवनमाजगाम	२६ ।४८
	=पर्वतः, अत्र वैवाहिकं विधिं कर्तुं शिवो दैवतैः सह जगाम	२७ ।४
कोकनदः	=प्रमथः, इमं यक्षाः कार्त्तिकेयाय ददुः	३१ ।७४

कोकनदम्	= रक्तकमलम्; एभिरावृतो वनान्तः संवरणेन दृष्टः	२२ ।३२
कोकनामा	= इमां मातरं श्वेततीर्थं कार्त्तिकेयाय ददौ	३१ ।१०१
कोङ्कणः	= कुमारद्वीपस्थपर्वतः	१३ ।१८
कोटरा	= इमां मातरं प्रयागतीर्थं कार्त्तिकेयाय ददौ	३१ ।९८
कोटिः	= विषाणयोः कोट्या महिषासुरो देव्या भूतगणान् संतापयामास	२१ ।४०
	= संख्या तीर्थानाम्	२३ ।१४; २३ (१३) ।२८
	= संख्या तीर्थानाम्, तीर्थकोटिभिराप्लुता देवी सरस्वती द्वैतवने वर्तते	२३ ।१४
	= संख्या सरकतीर्थान्तर्गतकूपस्थितानां रुद्राणाम्	२३ (१५) ।२२
	= रुद्रकोटिः, अस्याः स्मरणेन परं पदमवाप्यते	२३ (१५) ।२३-२४
	= संख्या यज्ञानाम्, कुरुक्षेत्रस्थे कोटितीर्थे कोटीश्वरदर्शनेन कोटियज्ञफलं लभ्यते	२३ (१५) ।६४
	= संख्या यज्ञानाम्, कोटियज्ञफलं स लभते यः कोटितीर्थे स्नाति	२३ (१५) ।७१
कोटितीर्थम्	= इदं त्रैलोक्ये विख्यातम्	२३ (१३) ।२८
	= तीर्थं कुरुक्षेत्रस्थम्, अत्र स्नानेन कोटियज्ञफलं लभ्यते	२३ (१५) ।६३
	= कुरुक्षेत्रस्थं तीर्थम्, अस्मिन् स्नानेन कोटियज्ञफलं लभ्यते	२३ (१५) ।७०
	= तीर्थम्, अत्र शिवेन स्नानं कृतम्	२५ ।५३
कोटी	= कामदेवधनुष इयं पाटला जाता	६ ।१००
कोटीश्वरः	= हरः कोटितीर्थस्थितः, अस्य दर्शनस्य फलम्	२३ (१३) ।२९
	= अस्य कोटितीर्थे दर्शनेन कोटियज्ञफलं लभ्यते	२३ (१५) ।६३
	= शिवः, कोटितीर्थस्थमिमं दृष्ट्वा गणपतित्वमवाप्यते	२३ (१५) ।७२
कोट्यः	= संख्या, तिस्रः कोट्यः, एतावन्ति तीर्थानि कुरुक्षेत्रस्थे सरकतीर्थे सन्ति	२३ (१५) ।२१
कोनटम्	= तीर्थम्, अत्र शिवेन स्नानं कृतम्	२५ ।५३
कोपः	= इमं देवानां वचांसि निशम्य विष्णुः कृतवान्	१९ ।५

	=अस्माद् देवी कात्यायनी महिषासुरस्य शिरश्चिच्छेद	२१ ।४९
	=दक्षस्य कोपात् सती जीवितं त्यक्तवती	२२ ।१८
	='इमं मयि मा कुरु' इति बलिः प्रह्लादमाह	२३ (९) ।२
	=अस्याकरणाय बलिना प्रह्लादः प्रार्थितः	२३ (९) ।६
	=अयं मोहजनकः	२३ (९) ।७
	=अनेन समायातो वामनो यदि मां हंन्यात् तर्हि तं वधमहं श्लाघ्यतरं मन्य इति बलिः शुक्रमाह	२३ (१०) ।३१
	=अनेन समन्वितो विश्वामित्रो वसिष्ठान्तकरं प्रहरणमन्वैच्छत्	२३ (१९) ।१८
कोलाहलः	=कुमारद्वीपस्थः पर्वतः	१३ ।१६
कोशः	=उमायाः कोशाज्जातत्वात् 'कौशिकी' इति नामधेयमभूत्	२२ ।३
	=पार्वत्याः कोशात् कौशिकी समुद्भूता	२२ ।६
	=कृष्णं कोशं परित्यज्य पार्वती ब्रह्मप्रदत्तवरप्रभावात् पद्मकिञ्जल्कसन्निभं वर्णं लब्धवती	२८ ।२३
	=पार्वत्याः कृष्णवर्णकोशात् कात्यायनी संजाता	२८ ।२४
	=देवी काली रुरोर्दैत्यस्य कोशेन जटा बबन्ध	२९ ।६५
कोशलाः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५४
कोशलाभागः	=उत्तरेऽस्मिन्नुद्दालकमुनिना ध्याता सरस्वती समाजगाम	२३ (१६) ।३२
कोसलः	=एतद्देशोद्भवा जनाः स्वेच्छया क्षुद्रनदीः पिबन्ति	१३ ।३५
कौतुकम्	=अनेनाऽऽविष्टः संवरणो नाम राजा सर्वर्तुकुसुमाख्यं वनं जगाम	२२ ।३१
	=इदं बालखिल्यपत्नीनां शङ्करव्रतविषये महदासीत्	२३ (२२) ।६४
कौतूहलम्	=इदं रुद्रादिवाहनज्ञानविषयकं नारदस्य हृदि वर्तते	९ ।१३
	=नरकगमनहेतुविषयकमिदं सुकेशेर्हृदि वर्तमानम्	१२ ।१
	=इदं देवीसमुद्भवविषयकं नारदस्य हृदि वर्तते	२२ ।१

	=इदमुमाया धर्मगतिविषयेऽभवत्	२३ (२२) ।५१
कौमारी	=देवी, इयं चण्डिकायाः कण्ठदेशात् समुद्भूता	३० ।५
	=देवी, इमां देवा नमश्चक्रुः	३० ।५९
कौमुदी	=अनया युता रजनी कामिभिः प्रशंसिता	१६ ।२०
कौलपतिः	=कश्चित् कौलपतिः स्थाणोर्मठे देवद्रव्यस्य रक्षक आसीत्	२३ (२६) ।५५
	=अयं सौगन्धिके वने श्वा बभूव	२३ (२६) ।५५
कौवीराः	=एतदाख्या जनाः स्वेच्छया क्षुद्रनदीः पिबन्ति	१३ ।३६
कौशल्यम्	=सर्वशिल्पविषयकमेतत् किंपुरुषाणां धर्मो भवति	११ ।२०
कौशिकः	=धृत्या सहायं दक्षयज्ञे निमन्त्रितः	२ ।९
	=इन्द्रस्य नाम	२८ ।२५
कौशिकाः	=एषां प्रियदोषत्वम्	३ ।३८
	=उलूकाः, एते रात्रिसमयं बुद्ध्वा निरगमन्, परं दिवसवशात् तान् वायसा निघ्नन्ति स्म	१६ ।११
कौशिकी	=नदी, इयं भारतवर्षस्थकुमारद्वीपे हिमवत्पादाद् विनिर्गता	१३ ।२२
	=अस्या नामधेयस्य व्युत्पत्तिः	२२ ।३
	=देवी, इयं पार्वत्याः कोशात् समुद्भूता	२२ ।६
	=वर्षाकालवहेयं पापनाशिनी नदी कुरुक्षेत्रस्थासु नवसु नदीष्वन्यतमा	२३ (१३) ।७
	=नदी, अनया सह सरस्वत्याः संगमे स्नानेन परमं पदमवाप्यते	२३ (१३) ।१८
	=नदी, अस्याः संगमे स्नानेन सर्वपापैः प्रमुच्यते नरः	२३ (१५) ।५७
	=गिरिजाकोशादुत्पन्नत्वाद् देव्याः कौशिकीति नामधेयम्	२८ ।२५
	=देवी, इमामादायेन्द्रो विन्ध्यगिरिं जगाम	२८ ।२६
	=अस्या वृत्तं चण्डः शुम्भनिशुम्भाभ्यां श्रावयामास	२९ ।२८
	=देवी, अस्या धूम्रलोचनेन सह संवादः	२९ ।४४

	=विभावरी	२९ ।४६
	=देवी, इयं वीक्षणमात्रेणैव धूम्रलोचनदानवं भस्मसान्नीतवती	२९ ।४८
	=अस्याः सकाशं मार्यया सह चण्डिका जगाम	२९ ।८२
	=देवी, इयं खट्वाङ्गपातैर्दैत्याञ् जघान	३० ।२०
	=देवी, अस्याश्चण्डया सह संवादः	३० ।२७
	=देवी, अस्या निशुम्भेन सह संवादः	३० ।३६
	=योगीश्वरी	३० ।४०
	=इमां प्रति निशुम्भः खड्गमुद्यम्य प्रचिक्षेप	३० ।४२
	=अम्बिका	३० ।४५
	=नदी, इयं मार्जारं गणं कार्त्तिकेयाय प्रादात्	३१ ।७७
क्रतवः	=सर्वेषु क्रतुषु तावदश्वमेधाख्यः क्रतुः श्रेष्ठः	१२ ।४७
	=एते ब्रह्मसभायां ब्रह्माणमुपासते	२३ (३) ।३०
क्रतुः	=अश्वमेधः	१२ ।४७
	=ऋषिः, अयं शङ्करोक्ते प्राभातिके मङ्गले स्मृतः	१४ ।२४
	=यज्ञः, अस्य क्षयं शिवः कृतवान्	२७ ।३१
	=अयं स्वस्तिकरणार्थं प्रार्थितः	३२ ।१८
क्रथः	=गणः, अयं गौतमीनद्या कार्त्तिकेयाय प्रदत्तः	३१ ।७७
क्रमः	=पादक्रमणम्, गवां पादक्रमणेन भूमिर्विशुध्यते	१५ ।११
	=क्रमपाठयुक्ता ऋचो ब्रह्मसभायामिन्द्रादयो देवाः श्रुतवन्तः	२३ (३) ।२१
	=अस्य वेत्तारो देवा ब्रह्मसभायां प्रोक्ता ऋचः श्रुतवन्तः	२३ (३) ।२२
क्रममासाः	=उत्तरापथवासिनो जनाः, एते क्षुद्रनदीजलानि पिबन्ति	१३ ।४२
क्राथेश्वरः	=आपस्तम्बस्य शिष्यः	६ ।९०
क्रिया	=इयं प्रेतस्य सोदकैः सपिण्डजैश्च कार्या	१५ ।४३
	=देवी, इयं बलिसकाशमागता	२३ (२) ।२०
	=ब्रह्मा वामनस्य जातकर्मादिकां क्रियां चकार	२३ (९) ।१७
	=दर्भेण विना (अपि) कृताः क्रियास्तुभ्यं फलं दास्यन्तीति वामनो बलिमाह	२३ (१०) ।८०

	=विष्णुपदह्रदादौ कृता काचिदपि क्रियाऽक्षया भवति	२३ (१०) ।८३
	=अनरकतीर्थे मङ्गलवासरे षष्ठ्यां तिथौ स्नानेन तत्र मुक्तिफलदा क्रिया भवति	२३ (२०) ।३१
	=धर्मस्य क्रिया मूढबुद्धिभिर्बालखिल्यमुनिभिर्न ज्ञाता	२३ (२२) ।७५
	=इयं पातकेभ्यो नियमार्थाय प्रकीर्तिता	२३ (२२) ।८१
क्रियाः	=यज्ञादिकाः, एता देवानां धर्मः	११ ।१५
	=धर्मविधिसंबद्धासु सर्वासु क्रियासु सत्यं प्रवरम्	१२ ।४६
	=मृते सति ब्राह्मणादिभिस्तत्कर्मक्रियाः कार्याः	१५ ।४७
	=अविधिना कृताः (अपि) क्रियास्तुभ्यं फलं दास्यन्तीति वामनो बलिमाह	२३ (१०) ।७९
	=कुरुक्षेत्रे कृतासु क्रियास्वासुरो भागो न भविष्यतीति वामनो बलिमाह	२३ (१०) ।८१
	=आभिर्विशीर्णया सरस्वत्या सह वसिष्ठस्य संवादः	२३ (१९) ।१०
	=आभ्य उपरमो ब्राह्मणस्य परमवित्तेषु परिगणितः	२३ (२२) ।२६
	=स्नानादिक्रियाः केदारतीर्थे कृताः सत्योऽक्षया भवन्ति	३४ ।१५
क्रीडा	=इमां हरो गिरिजया सह विवाहकालेऽकरोत्	२७ ।३७
	=अस्या विनोदार्थं भगवान् वामनो बलेरध्वरं प्रति गच्छन्नतिजाड्यगतिरभवत्	२३ (९) ।४२
	=देवानां क्रीडायाः विनोदेन शिवस्तुष्टो बभूव	२३ (२१) ।१४
क्रीडाविनोदः	=देवानां क्रीडाविनोदेन शिवस्तुष्टो बभूव	२३ (२१) ।१४
क्रीडितम्	=इदं शिव उमया सार्धं कुरुक्षेत्रस्थे विहारतीर्थेऽकरोत्	२३ (२१) ।१३
क्रीतः	=मूल्यैर्गृहीतः पुत्रः	३५ ।४३
क्रोधः	=क्रोधरहिता जना यत्र स्युस्तत्रैव नित्यं वासः कर्त्तव्यः	१४ ।५५
	=इमं देवी कात्यायनी चकार सिंहं हन्तुं समागते सति महिषासुरे	२१ ।४०

	=अयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।३१
	=महता क्रोधेन तावदृषिर्बको मांसमुत्कृत्य पृथूदके तीर्थे जुहाव	२३ (१८) ।२९
	=बालखिल्या महर्षयः क्रोधेन निर्मुक्ता नाभवन्	२३ (२२) ।५०
	=अनेन कलुषीकृता बालखिल्यमुनयो मुग्धा बभूवुः	२३ (२२) ।७४
	=अनेनाभिभूता बालखिल्या आश्रमस्थिता अभूवन्	२३ (२२) ।८४
	=अनेनाऽऽत्मा न ज्ञायते	२३ (२२) ।८५
	=अयं शिवरूप उक्तः	२३ (२६) ।११४
क्रोशः	=परिमाणम्, कुरुक्षेत्रस्थितमानुषतीर्थात् पूर्वेण क्रोशमात्रे 'आपगा' नाम नदी विख्याताऽस्ति	२३ (१५) ।१
	=शिवस्य नाम	२३ (२६) ।१३८
क्रोशाः	=सप्त, समन्तपञ्चकक्षेत्रे राजर्षिः कुरुरन्यान् सप्तक्रोशान् कृषति स्म	२३ ।२७
क्रोष्टुकः	=जम्बुकः, अयमरण्ये यथा मृगराजवधूमनुधावति तथैव चिक्षुरोऽम्बिकामाचक्राम	२१ ।२९
क्रौञ्चः	=एतदाख्यो द्वीपः, अस्य प्रमाणम् = २५६-लक्षयोजनानि	११ ।३७
	=पर्वतः, अयं महासेनेन = स्वामिकार्त्तिकेयेन हतः	३० ।५४
	=अयं स्कन्देन भिन्नः	३१ ।१
	=गणः, अयं गौतमीनद्या कार्त्तिकेयाय प्रदत्तः	३१ ।७७
	=पर्वतः, अस्य गुहायां महिषासुरः कार्त्तिकेयभयात् प्रविवेश	३२ ।८७
	=पर्वतः, इमं महिषासुरेण सह कार्त्तिकेयः शक्त्या बिभेद	३२ ।१०९
	=अस्य मृत्युः कार्त्तिकेयशक्त्या समभूत्	३२ ।१२०
क्लेशाः	=बालखिल्यानां मुनिगणानां क्लेशानां क्षयाय देवी तावद् उमा शङ्करं प्रार्थितवती	२३ (२२) ।४७

क्षणः	=अस्यावधौ राजा संवरणः संज्ञामवाप	२२ ।३६
क्षणदा	=रात्रिः, तस्यां चरतीति क्षणदाचरः = राक्षसः	१२ ।५२
	=अस्यां सुकेशिपुरं सूर्यवत् प्रकाशितं बभूव	१६ ।८
क्षणदाचरः	=राक्षसः, तेषामिन्द्रः (राजा) सुकेशिः	१२ ।५२
क्षत्रम्	=क्षत्रियकुलम्, इदमुत्साद्य परशुरामेण कुरुक्षेत्रे रुधिरेण पञ्चह्रदाः पूरिताः	२३ (१४) ।२
	=क्षत्रियकुलम्, इदं रोषाभिभूतः परशुराम उत्सादितवान्	२३ (१४) ।७
	=इदं रोषाभिभूतेन परशुरामेणोत्सादितम्	२३ (१४) ।१०
क्षत्रियः	=अस्य त्रिष्वाश्रमेषु प्रवेशाधिकारः	१५ ।६२
	=अयं बलिविष्ण्वादीनां कथामाकर्ण्य महीं जयति	२३ (१०) ।९१
क्षत्रियाः	=एते कुमारद्वीपस्य मध्यभागे वसन्ति	१३ ।१२
	=उत्तरापथवासिनो जनाः, एते स्वेच्छया क्षुद्रनदीजलानि पिबन्ति	१३ ।३९
	=एषां सद्यः शौचमपि दिनत्रयपरिमितेन कालेन भवति	१५ ।४६
	=एते कुलोत्तारणाख्ये तीर्थे स्नात्वा परमं पदं पश्यन्ति	२३ (१५) ।७७
	=एते ब्रह्मणो बाहुभ्यां जाताः	२३ (१८) ।२३
	=एते ब्राह्मणद्वेषेण राक्षसा भवन्ति	२३ (१९) ।३४
	=एते सरोमध्यस्थिताद् वटवृक्षाद् विनिर्गताः	२३ (२२) ।३८
	=एते सांनिहितसरःस्थितलिङ्गस्य दर्शनात् परमं पदं पश्यन्ति	२३ (२४) ।३
	=एते सर्वे शिवरूपाः कथ्यन्ते	२३ (२६) ।११०
क्षमा	=इयं मानवानां धर्मेषु स्मर्यते	११ ।२३
	=कात्यायन्या नाम, अनेन नाम्ना सा देवैः स्तुता	१९ ।२०
	=देवी, इयं बलिसमीपमागता	२३ (२) ।१९
	=कुरुक्षेत्रस्थरन्तुकद्वारपालसकाशात् क्षमा याचनीया	२३ (१३) ।२५

	=इयं सरस्वत्यायत्ता	२३ (१९) ।१५
	=अस्याः कर्षणे राजा कुरुः प्रवृत्तोऽभूत् समन्तपञ्चकक्षेत्रे	२३ ।२५
	=इयं शिवरूपा प्रोक्ता	२३ (२६) ।११४
	=पृथिव्या नाम	२७ ।३७
क्षयः	=वृथा दानाद् धनस्य क्षयो भवति	१४ ।४२
	=शशिनः क्षयं दृष्ट्वा रोहिण्या घोरं तपः कृतम्	१६ ।२४
	=सोमस्य क्षये सम्प्राप्ते दृषद्वत्यां स्नात्वा देवतातर्पणेन श्राद्धेन च गयाश्राद्धपुण्यं लभ्यते	२३ (१५) ।४७
	=शङ्करस्य प्रसादाद् मङ्कणस्य तपसः क्षयो नाभूत्	२३ (१७) ।२०-२१
	=बालखिल्यमुनिगणानां क्लेशजातस्य क्षयाय शङ्करमुमा देवी प्रार्थितवती	२३ (२२) ।४७
	=रोगः, वेनो म्लेच्छमध्ये समुत्पन्नः सन्ननेनाक्रान्त आसीत्	२३ (२६) ।२९
	=रोगः, अनेन समन्वितं स्वपितरं वेनं तत्पुत्रो ददर्श	२३ (२६) ।३५
क्षरम्	=क्षरात्मकं विश्वमुच्यते	२३ (११) ।७
क्षान्तिः	=धर्मस्याङ्गम्	१४ ।१
	=इयं सार्ववर्णिकधर्मतयाऽङ्गीकृता	१४ ।२
	=इयं परलोकप्रदायिका	१६ ।२
	=अनया युक्तो नरो धरण्यास्तीर्थे कुरुक्षेत्रस्थे स्नात्वा परमं पदं प्राप्नोति	२३ (१३) ।१९
क्षारः	=एतदाख्यो जलनिधिः, अयं जम्बूद्वीपादनन्तरं वर्तते, अस्य प्रमाणम् = द्विलक्षयोजनानि	११ ।३४
	=अनेन त्रपुसीसयोः शुद्धिर्भवति	१५ ।१३
	=अनेन विवर्जितं भोजनं रात्रावशून्यशयनाख्यायां द्वितीयायां कर्तव्यम्	१७ ।२४
क्षारनदी	=नरकः, पुष्करद्वीपस्थनरकेषु षोडशः	११ ।५७
क्षारम्	=अनेन केशकीटावपन्नमन्नं शुध्यति	१५ ।१२
क्षितिः	=पृथ्वी, इयमदित्या गर्भे विष्णौ स्थिते सति चचाल	२३ (७) ।१४

	=पृथ्वी, इयमदित्याः पदचालनेन खिन्ना कम्पिता च बभूव	२३ (७)।१५
	=पृथ्वी, इयं वामनस्य चरणस्थानीयाऽऽसीत्	२३ (१०)।४९
क्षीरोदः	=सागरः, अत्र पितामहो ब्रह्मा गतवान्	६।६९
	=समुद्रः, उपमाप्रसङ्गेऽयं स्मृतः	७।१०
	=एतदाख्यः समुद्रः, एनं देवाः संप्राप्ताः	२३ (४)।१७
	=अयमुदधीनां मध्ये शिवरूपः	२३ (२६)।११३
क्षुत्	=अनया नितरां पीडिताः सन्तो नरकगताः पापिनः क्षीणा भवन्ति	१२।२९
	=बुभुक्षा, कात्यायनीदेव्या नाम, अनेन नाम्ना सा देवैः स्तुता	१९।१९
क्षुद्रः	=शिवस्य नाम	२३ (२६)।९१
क्षुद्रनद्यः	=आसां संख्या सामान्यरूपेण सहस्रम् उक्ता	१३।३४
क्षुधा	=केचिज्जना नरकान् प्राप्य सूचीमुखा अनया पीडिताः भवन्ति	१२।१३
क्षुब्धः	=शिवस्य नाम	२३ (२६)।९८
क्षुरः	=अनेन रामो दण्डकारण्ये कस्यचिद् राक्षसस्य शिरोऽच्छिनत्	२३ (१८)।६
क्षुरप्रः	=बाणभेदः, अनेन नरः प्रह्लादस्य कार्मुकं चिच्छेद	८।१६
क्षुरप्रम्	=आयुधम्, अनेन देवी निशुम्भस्य गदां करौ च चिच्छेद	३०।४५
	=आयुधम्, इदं देवी कात्यायनी शुम्भोपरि चिक्षेप	३०।५१
क्षुवतः	=अयं मनोः पुत्रोऽभवत्	२३ (२६)।५
क्षेत्रजः	=अयं षड्विधेषु दायादबान्धवेषु द्वितीयः पुत्र उच्यते	३५।४०
	=शङ्करस्य नाम	२३ (२३)।३६ (२)
क्षेत्रपालः	=राजा कुरुः	२३।१९
क्षेत्रम्	=योगशायिनः क्षेत्रमिदं 'वरणा' 'असि' इति नद्योर्मध्यवर्ति	३।२९

	=कुरुजाङ्गलम्	१२ ।४५; २३ (१) ।१
	=कुरुक्षेत्रम्	२३ (१) ।३; २३ (६) ।१२; २३ (१२) ।६; २३ (१५) ।७८; २३ (१६) ।२९; ३१; ३४; २३ (१६) ।३६; ३८
	=कुरुक्षेत्रम्, अस्य कर्षणार्थं कुरुणा कुरुतीर्थे घोरं तपस्तप्तम्	२३ (२०) ।१४
	=समन्तपञ्चकम्, इदं महाफलप्रदम्	२३ ।२१
	=समन्तपञ्चकम्, अस्य रक्षार्थं विष्णुश्चन्द्रनामानं यक्षं वासुकिनामानं पन्नगं च नियोजितवान्	२३ ।३९
क्षेत्राणि	=सर्वक्षेत्रेषु कुरुजाङ्गलनाम क्षेत्रं प्रवरम्	१२ ।४५
क्षोभः	=अयमदित्या गर्भे कृष्णे स्थिते सति महाशैलादिषु बभूव	२३ (७) ।१४
	=अयं पृथिव्या वामनस्य गत्या संबभूव	२३ (१०) ।२
	=इममसुरा जग्मुर्वामनं बलेर्यज्ञे प्रविष्टमवलोक्य	२३ (१०) ।३४
	=अस्मादम्भसि स्कन्नं रेतो मङ्कणः कलशे जग्राह	२३ (१७) ।४
	=बालखिल्यमुनयः स्वयोषितां क्षोभं ददृशुः	२३ (२२) ।६७
	=शिवस्य लिङ्गे नष्टे सति चराचरे महान् क्षोभो बभूव	२३ (२२) ।७०
	=ब्रह्मा कालीमुखं वीक्ष्य क्षोभमगमत्	२७ ।५७
	=युद्धे प्रमथैर्भ्रातृभिश्च ताड्यमानो महिषासुरस्तारकासुरश्च नेममवाप	३२ ।७७
क्षोभणः	=शिवस्य नाम	२३ (२६) ।९८
क्षौरम्	=रिक्तासंज्ञकासु तिथिषु क्षौरकर्म परिवर्जनीयम्	१४ ।४८
	=मङ्गलवासरे क्षौरकर्म निषिद्धम्	१४ ।४९
	=इदमभिजिद्विशाखा-नक्षत्रयोर्वर्जनीयम्	१४ ।५०

ख

खगाः	=एषां वीरभद्रेण सह युद्धम्	४ ।३२-३७
खगेन्द्रः	=गरुडः, अस्य पत्राण्यादाय देवी चण्डमारी चण्डमुण्डावन्वसरत्	२९ ।७६

खगेन्द्रकेतुः	=नारायणः, अयं प्रह्लादेन स्तुतः	८।५३
खगोत्तमाः	=तीक्ष्णतुण्डैरेतैस्ते नरा नरकेषु द्विधाऽऽकृष्यन्ते ये श्राद्धादिकार्येषु निमन्त्रिता अपि क्वचिदन्यत एव भुञ्जते	१२।८
खट्वाङ्गः	=अनेन देवी कौशिकी दैत्याञ् जघान	३०।२०
खट्वाङ्गम्	=आयुधम्, इदमादाय देवी काली चण्डमुण्डोपरि रणमधावत	२९।५७
	=आयुधम्, अनेन देवी काली दानवान् न्यषूदयत्	२९।५८
	=आयुधम्, अनेन देवी काली महादैत्यं रुरुमाजघान	२९।६३
खड्गः	=दक्षयज्ञे द्वारपालस्य धर्मस्याऽऽयुधम्	४।२६
	=अनेन रविप्रभासदृशेन स्वशीर्षं छेत्तुं करम्भासुर इयेष	१८।४७
	=आयुधम्, इममादाय रम्भासुरो महिषमुपाद्रवत्	१८।६२
	=अनेन देवी कात्यायनी सुररिपून् अपातयत्	२१।८
	=आयुधम्, अमुं चिक्षुरो जग्राह	२१।२७
	=आयुधम्, खड्गधरः पुमान् महिषासुरस्य कण्ठाद् विनिर्गतः	२१।४८
	=आयुधम्, अनेन काली दानवांश्चिच्छेद	२९।५८
	=आयुधम्, इममुद्यम्य निशुम्भो देवीं कौशिकीं प्रति प्रचिक्षेप	३०।४२
खदिरः	=अयं मरकतप्रभो ब्रह्मणो देहमध्यात् संजातः	१८।५
खम्	=(आकाशम्) भूतम्, अनेन समं पूर्वं प्रजाः प्रपितामहेन सृष्टाः	२३।४४
	=अत्र सुकेशिनामा निशाचरेन्द्रः सपुरः सबन्धुश्च स्वयम्भुवा पुनरारोपितः	१६।६३
	=अत्र देवी द्विजपुङ्गवानां प्रणामं कृत्वा जगाम	३०।७२
खशाः	=अयं कुमारद्वीपे पर्वताश्रयी देशः	१३।५६
खातम्	=खननम्, अनेन भूमिर्विशुध्यते	१५।११
	=पुष्करिणी, देवखातेषु स्नानं करणीयम	१५।२२

खुरः	=अनेन महिषासुरो देव्या प्रक्षिप्तं वरुणपाशं निरास्थत्	२१ ।४५
खुराः	=एषामग्रभागैर्महिषासुरो भूतगणान् व्यद्रावयत्	२१ ।३९
खेटकाः	=एतदाख्या जनाः स्वेच्छया क्षुद्रनदीजलानि पिबन्ति	१३ ।३७
खेदः	=इमम् अरण्ये संवरणस्य दर्शनेन तपती प्राप	२२ ।४८
	=इममदित्याः पदभारेण पृथिवी बाढमनुबभूव	२३ (७) ।१५
	ग	
गगनम्	=अत्र महर्षेरगस्त्यस्य महाश्रमं दृष्ट्वा विन्ध्यपर्वतो वृद्धिं न याति	१९ ।३५
	=अत्र स्थितोऽपि दुन्दुभिर्देव्याः समीपं जगाम	२० ।२२
	=अत्र स्थितं रविमण्डलं वरुणात्मजो विवेश	२२ ।४१
	=अस्मिन् दैत्यैः पालिते सति दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।९
	=आकाशम्, एतद् वामनाकृतिविष्णुस्थं प्रह्लादो ददर्श	२३ (८) ।१२
	=आकाशम्, अत्र स्थितान् पितॄन् परशुरामः प्राञ्जलिर्भूत्वा वाक्यमब्रवीत्	२३ (१४) ।६
	=चण्डमुण्डौ देव्या भयाद् भूमिं परित्यज्य तावदिदं जग्मतुः	२९ ।७३
गगनेचरः	=सूर्यः, अस्य गतिर्विन्ध्यपर्वतेन निरुद्धा	१९ ।२३
गङ्गा	=नदी, इयं सर्वासु नदीषु प्रधाना मन्यते	१२ ।४५
	='मन्दाकिनी'- नाम्नी वर्षाकालवहा नदी कुरुक्षेत्रस्था	२३ (१३) ।७
	=नदी (कुरुक्षेत्रस्था)	२३ (१५) ।६२
	=सरस्वत्याः पूर्वप्रवाहे स्नानेन गङ्गास्नानस्य फलं लभ्यते	२३ (२१) ।७
	=नदी, इयं शिवरूपा प्रोक्ता	२३ (२६) ।११६
गङ्गाद्वारम्	=अत्र दक्षेण विमलोदानाम्नी सरस्वती प्रकटीकृता	२३ (१६) ।३७
	=अत्र रुषङ्गुर्नाम ब्रह्मर्षिः सदा स्थित आसीत्	२३ (१८) ।१७

गङ्गाधरः =शङ्करः, इदं नाम श्रावणमासे हरार्चने जपनीयम् १७।६२

गजः =अयं विरोचनस्य वाहनम् ९।२८

=अस्य कुम्भौ विजित्येव कात्ययन्याः स्तनौ स्थितौ २०।५

=इममारूढो देवेन्द्रः शच्या सह शिवविवाहयात्रायां शिवोपरि च्छत्रं धारयामास २७।१०

=इममारूढा सती सरस्वती शिवविवाहयात्रायां बालव्यजनं समादधे २७।१२

=इममारुह्य पृथूदकः शिवविवाहयात्रायामनुलेपनमादाय ययौ २७।१४

=शुम्भनिशुम्भाभ्यामिन्द्रस्य गजो बलादाहृतः २९।१३

=शुम्भासुरस्य गजः, अयं देवीबाणेन हतः सन्, निपपात ३०।५२

गजचर्मधरः =शङ्करस्य नाम २३ (२३)।३६ (२५)

गजाः =एतान् रम्भासुरो माल्यवहाख्ययक्षस्य समीपे ददर्श १८।५४

=एभिः सहितो नमरनामा दानवो देव्या उपरि समापतत् २१।४

=एषां वामनाय दानार्थं बलिः प्रतिज्ञातवान् २३ (१०)।४१

गजाननः =इमं गौरी मलाच्चक्रे २८।५८

गजेन्द्रः =नमरस्य वाहनम्, अनेन देव्या वाहनं हरिः = सिंहो मध्यतो गृहीतः २१।१५

गजेन्द्रकर्णः =शिवस्य नाम २३ (२६)।६७

गणः =रुद्रगणो दिण्डिः २३ (१५)।१५

गणकः =अस्यान्नं भुक्त्वा त्रिरात्रपर्यन्तम् उपवासेन नरः शुद्ध्यति १५।३९

गणनायकः =नन्दी २३ (२१)।१२

गणपतिः =अयं कुरुक्षेत्रस्थिते विवरद्वारे स्थितोऽस्ति २३ (१४)।३३

गणाः =त्रिनेत्रस्य गात्ररोमोद्भवाः सिंहमुखाश्च वीरभद्रप्रमुखा एते दक्षयज्ञं नाशितवन्तः ४।१७-५७

	=देवगणाः पितृगणाश्च, एतान् कुरुक्षेत्रस्थ इडास्पदतीर्थेऽर्चयित्वा मानवो मुक्तिमवाप्नोति	२३ (१५) ।२५
	=वेनकृतशिवस्तवश्रवणेन पुरुषो गणानां श्रेष्ठतां व्रजति	२३ (२७) ।११
	=एभिर्वृतः शिवः सर्ज्जकदम्बमध्यस्थवनस्पतिवद् रराज	२६ ।७१
	=सप्तषष्टिकोटिमिता एते शिवविवाहयात्रायां जग्मुः	२७ ।१८
	=एतान् सरस्वतीनदी कार्त्तिकेयाय ददौ	३१ ।८३
	=सुरैर्दत्ता इमे कार्त्तिकेयमन्वयुः	३२ ।२७
	=कार्त्तिकेयस्य तावदिमे दैत्यान् अभ्यद्रवन्	३२ ।४९
गणाधिपः	=अस्य कुम्भे सिन्धुवारको राजते	१८ ।६
	=शिवस्य नाम	२३ (२६) ।१२९
	=भृङ्गिरिटिः	२३ (२७) ।६
गणाध्यक्षः	=शिवस्य नाम	२३ (२६) ।१२९
गणिका	=अस्या अन्नं भुक्त्वा त्रिरात्रपर्यन्तमुपवासेन नरः शुध्यति	१५ ।३९
गणितज्ञता	=गणितविषयस्य परिज्ञानं सर्वासु कलासु श्रेष्ठम्	१२ ।५३
गणितम्	=गणनाविषयकं शास्त्रम्	१२ ।५३
गणेन्द्रनाथः	=शिवस्य नाम	२३ (२६) ।७७
गणेशः	=अयं दक्षयज्ञविनाशको वीरभद्रः	४ ।३६
गणेश्वरः	=त्रिनेत्रस्य गात्ररोमोद्भवेषु गणेषु प्रमुखो वीरभद्रनामा गणः	४ ।३०
गणोत्कटः	=शिवस्य नाम	२३ (२६) ।१३७
गण्डकी	=नदी, इयं भारतवर्षस्थकुमारद्वीपे हिमवत्पादाद् विनिर्गता	१३ ।२२
	=नदी, इयं सुबाहुं गणं कार्त्तिकेयाय ददौ	३१ ।७९
गतिः	=द्वादशयोनीनां पुण्या धर्मा ये ब्रह्मणा प्रोक्तास्ते गतिप्रदा अभिमताः	११ ।२७

	=त्रिभुवने सुकेशिपुरे व्याप्ते सति भास्करस्य गतिराकाशे ज्ञाता नाभूत्	१६ ।९
	=सूर्यस्य गतिर्विन्ध्यपर्वतेन निरुद्धा	१९ ।२३
	=पुरुषोत्तमस्य गतिर्ब्रह्मणा निर्दिष्टा देवान् प्रति	२३ (४) ।६
	=आश्रयः, देवादीनां ब्रह्मणश्च गतिरस्ति विश्वकृत् (विष्णुः)	२३ (४) ।३
	=श्रद्धायुक्तो नरोऽदितिवने ब्राह्मणेभ्यो भोजनदानेन परमगतिं प्राप्नोति	२३ (७) ।६
	=सतां गतिर्भगवान् विष्णुः	२३ (८) ।१८
	=तीर्थानां स्मरणेन देवतानां प्रीणनेन च परमा गतिः प्राप्यते	२३ (१२) ।५
	=मोक्षः, स्वानुलोमायनतीर्थे प्राणायामपरायणा विप्राः परमां गतिं प्रयान्ति	२३ (१४) ।४८
	=मोक्षः, परां गतिं ते यान्ति ये श्रद्धया मानुषाख्यतीर्थस्य माहात्म्यं शृण्वन्ति	२३ (१४) ।५६
	=कुरुक्षेत्रस्थवैतरण्यां स्नात्वा शिवस्यार्चनेन परां गतिमाप्नोति	२३ (१५) ।४२
	=राक्षसीनां योनिदोषेण राक्षससंततिर्वर्धत इत्येषा सनातनी गतिरस्ति	(१९) ।३५
	=पञ्चपातकैर्दूषिता अपि कुरुक्षेत्रतीर्थस्नानेन जना इमां लभन्ते	२३ (२०) ।२०
	=परमामिमां प्राप्नुवन्ति जना औशनसतीर्थं सेवमानाः	२३ (२१) ।२६
	=धर्मस्य गतिर्गहना भवति	२३ (२२) ।४९
	=स्थाणुतीर्थे प्रविष्टो नरः परमामिमां प्रयाति	२३ (२५) ।६
	=ब्रह्मविदां गतिः शिवः	२३ (२६) ।१०७
	=स्थाणुतीर्थप्रभावश्रवणेन परमा तावदियं प्राप्यते	२३ (२७) ।३५
गदा	=दक्षयज्ञे द्वारपालस्य धर्मस्याऽऽयुधम्	४ ।२६
	=आयुधम्, नरेण सह युद्धे प्रवृत्ते प्रह्लाद इमां गृहीतवान्	७ ।६३
	=इमां प्रह्लादो नारायणस्य मूर्ध्नि ताडितवान्	८ ।१

	=नारायणस्य मूर्ध्नि समर्पितेयं प्रह्लादगदा शतधा समभवत्	८ ।३
	=बलेरायुधम्	९ ।३०
	=आयुधम्, देवासुरसंग्रामे वरुणोऽनया महासुरान् विदारयामास	१० ।२५
	=इमां कुबेरः कात्यायन्यै ददौ	१९ ।१५
	=अनया देवी कात्यायनी सुररिपून् अपातयत्	२१ ।८
	=आयुधम्, इमां देवी महिषासुरोपरि चिक्षेप	२१ ।४४
	=आयुधम्, अस्या धारको विष्णुः	२२ ।१२
	=आयुधम्, अनया संवरणस्य पादश्चिह्नित आसीत्	२२ ।४९
	=आयुधम्, इमां विष्णुर्बिभर्ति	२३ (६) ।२५
	=मारुतस्य गदा शुम्भनिशुम्भाभ्यां बलादाहृता	२९ ।१४
	=आयुधम्, इमामादाय धूम्रलोचनो देवीं कौशिकीमभ्यधावत्	२९ ।४६
	=आयुधम्, इमां गृहीत्वा निशुम्भो देवीं कौशिकीं समद्रवत्	३० ।४४
	=आयुधम्, महिषासुरो गदया प्रमथान् पराजितवान्	३२ ।७१
	=आयुधम्, इमामादाय मकराक्षः प्राद्रवत्	३२ ।७८
गदाधरः	=विष्णुः	२२ ।१२
गदाभृत्	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।२५
गन्धः	=गुणः, अस्य पृथिव्यां स्थितिः	१४ ।२६
	=अस्यापहरणेनामेध्याक्तस्य वस्तुनोऽन्येषां चापि पदार्थानां शुद्धिर्भवति	१५ ।१४
	=अनेन विष्णुरर्चनीयः	१७ ।२०
	=अनेनान्वितैः पुष्पैराश्विनशुक्लैकादश्यां विष्णुः पूजनीयः	१८ ।१२
	=कश्यपं परित आज्यस्यायं प्रसृत आसीत्	२३ (३) ।१०
	=अयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।२८
	=अस्य ग्रहणे घ्राणं नियुक्तम्	२३ (८) ।२४
	=अयं भूमाववस्थितः	२३ (११) ।८

गन्धमादनः =पर्वतः, अयं हिमाद्रिभवनस्य द्वारपाल आसीत् २६ ।१९
=पर्वतः, अस्य सप्तर्षिभिः सह संवादः २६ ।२१
=अस्य हिमाद्रिणा सह संवादः २६ ।२३
=अस्य हिमालयेन सह संवादः २६ ।४३
गन्धर्वः =चित्राङ्गदः २३ (२५) ।३३
गन्धर्वराजः =अयं कात्यायन्यै रजतानुलिप्तपानभाजनं ददौ १९ ।१७
गन्धर्वसंघाः =एते पातालस्थितस्यान्धकासुरस्य परिचारणं चक्रुः १० ।५७
गन्धर्वाः =एषां वीरभद्रेण सह युद्धम् ४ ।३२-३७
=एत एकादशरुद्राणां वाहनानि बभूवुः ९ ।१९
=एते देवसेनायां पदातिन एवाऽऽसन् ९ ।२२
=एषां राजा कात्यायन्यै रजतानुलिप्तं पानभाजनं ददौ १९ ।१७
=एते कामबाणपीडितं संवरणं नाम राजानं वारिणा सिषिचुः २२ ।३६
=एतान् वामनाकृतिविष्णुस्थान् प्रह्लादो ध्यानेन ददर्श २३ (८) ।११
=एते वामनरूपधारिणा विष्णुना धार्यन्ते २३ (१०) ।७
=इमे वामनस्योदरे स्थिता आसन् २३ (१०) ।५७
=एते कुरुक्षेत्रं सेवन्ते २३ (१२) ।१७
=एते विष्णुदेहस्य लम्भनार्थं वरदं शिवमाराधयामासुः २३ (१५) ।३०
=इमे कुरुक्षेत्रस्थे फलकीवने तपश्चरन्ति २३ (१५) ।४५
=एभिः कुरुक्षेत्रस्थेऽमृताख्ये स्थाने हनूमान् प्रकटीकृतः २३ (१६) ।३
=एते शोणितोन्मिश्रं तोयं वहन्तीं सरस्वतीं दृष्ट्वा भृशदुःखिता बभूवुः २३ (१९) ।२३
=एभिः कुरुक्षेत्रेऽसंख्यातानि लिङ्गानि प्रतिष्ठापितानि २३ (२५) ।४९
=एभिः सप्तर्षयः पूजिताः २६ ।१७
=एते मधुरस्वरं गायन्तो महादेवमनुजग्मुः २७ ।१५

	=एते शिवविवाहयात्रायां शिवं स्तुवन्तो जग्मुः	२७।१६
	=एते कुमारेऽभिषिक्ते गानं चक्रुः	३१।५६
गभस्तिमान्	=भारताख्यवर्षस्थेषु नवसु द्वीपेष्वन्यतमः	१३।९
गमनम्	=इदं महिष्या सह दानवपार्थिवो रम्भासुरश्चकार	१८।५६
	=ब्रह्मलोकस्य गमने कश्यपो बुद्धिमकरोत्	२३ (३)।१५
गयः	=यजमानः, अस्य यज्ञे सरस्वती समागता, सा च 'विशाला' इति नाम्ना तत्र प्रथिता बभूव	२३ (१६)।२९
गया	=तीर्थम्, अत्र श्राद्धंकरणेन मुक्तिर्भवति	२३ (१२)।८
	=अत्र कृतं श्राद्धं पितॄन् नित्यशः प्रीणाति	२३ (१५)।४८
	=तीर्थम्, अत्र कृतस्य श्राद्धस्य पुण्यं कुमाराभिषेकतीर्थे श्राद्धेन लभ्यते	२३ (२०)।८
गयाशिरः	=एतदाख्यं स्थानं ब्रह्मणः पूर्वा वेदिरुच्यते	२३।१९
	=तीर्थम्, इदं मकराक्षं गणं कार्त्तिकेयाग ददौ	३१।८९
गयाश्राद्धम्	=अस्य पुण्यं कुमाराभिषेकतीर्थे कृतेन श्राद्धेन लभ्यते	२३ (२०)।८
गरुडः	=खगेश्वरः	६।७४
	=विनतातनूजः	१२।४४
	=खगेन्द्रः	१९।२
	=वैनतेयः	२७।९
	=अयं कर्कोटकं नागं दृष्ट्वा तावदूर्ध्वरोमा व्यजायत	२९।७४
	=अयं चण्डमार्या भयाद् मांसपिण्डोपमो बभूव	२९।७५
	=विनतायाः पुत्रः	३१।१०२
	=अयं स्वसुतं मयूरं कार्त्तिकेयाय ददौ	३१।१०२
	=अस्य पुत्रो मयूरः	३१।१०२
गरुडध्वजः	=विष्णुः, अयं योगं वक्ष्यतीति पार्वती कुमारकार्त्तिकेयं प्राह	३२।९
गरुडासनः	=पर्वतः, अयं हिमाद्रिभवनमाजगाम	२६।४६
गर्गः	=मुनिसत्तमः, अयं बलेर्यज्ञे वामनमुपस्थितं वीक्ष्य जपपरायणो बभूव	२३ (१०)।३५

गर्दभः	=अयं भारवहनकाले शुचिर्मन्यते	१५ ।१५
गर्भः	=अस्य स्रावकृन्नरकं व्रजति	१२ ।३५
	=अस्य स्रावे सद्यः शौचं भवति	१५ ।४५
	=अयं रम्भासुरेण प्रयुक्तो महिष्यां समभवत्	१८ ।५७
	=अमरस्य गर्भ इव राजा संवरणस्तपत्याऽरण्ये दृष्टः	२२ ।४८
	=अदित्या गर्भे स्वांशेन संभवाय विष्णुः प्रतिज्ञातवान्	२३ (७) ।१०
	=तव गर्भे सम्भूतोऽहमरातीन् नाशयिष्यामीति विष्णुः प्रतिज्ञातवान्	२३ (७) ।११
	=अदित्या गर्भे कृष्णो विष्णुः स्थितोऽभूत्	२३ (७) ।१४
	=एनमदितिः समादधे	२३ (७) ।१४
	=अदित्या गर्भे मधुसूदनस्य स्थितौ सत्यां दैत्यानां तेजसो हानिर्बभूव	२३ (७) ।१६
	=अदित्या गर्भेऽंशावतीर्णो विष्णुः सुराणां तेजांसि हृतवान्	२३ (८) ।२७
	=महानदी कुटिला पञ्चवर्षसहस्राणि गर्भं धारयामास	३१ ।११
	=इमं मुखेनैवाद्रिनन्दिनी कुटिला शरवणे तत्याज	३१ ।१७
गर्भता	=अदित्या गर्भतां गतो भगवान् विष्णुः	२३ (८) ।१८
गर्भमांसशृगालः	=शिवस्य नाम	२३ (२६) ।९४
गर्भोदकम्	=अण्डस्य गर्भोदकमेव समुद्रनदीरूपेण परिणतम्	२३ (२२) ।३६
गाणपत्यम्	=इदं कोटितीर्थस्य कोटीश्वरदर्शनेनावाप्यते	२३ (१५) ।७२
	=इदं पञ्चवटतीर्थस्थितं महेश्वरमर्चयित्वाऽवाप्यते	२३ (२०) ।१३
गात्रम्	=स्नानानन्तरं गात्रमम्बरपाणिना विमृज्यात्	१४ ।५४
गात्राणि	=इमानि बालखिल्याद्या ऋषयः श्रद्धया पांशुना स्पृशन्ति स्म	२३ (२४) ।१५
गाधिः	=अस्य पुत्रो विश्वामित्रः	२३ (१०) ।३५; २३ (१९) ।१९
गाधिजः	=विश्वामित्रः, अयं बलेर्यज्ञे वामनमुपस्थितं वीक्ष्य जपपरायणो बभूव	२३ (१०) ।३५

	= विश्वामित्रः, अमुं वञ्चयित्वा सरस्वती तावदम्भसो मध्ये वसिष्ठमपोवाह	२३ (१९) ।१९
गाधेयः	= विश्वामित्रः, अस्य शिवेन सह संवादः	२६ ।९
गान्धर्वः	= परमो धर्मः सुकेशिं प्रति महर्षिभिरुक्तः	११ ।१८
गान्धाराः	= एतज्जातीया जनाः स्वेच्छया क्षुद्रनदीजलानि पिबन्ति	१३ ।३८
गायत्री	= एषा शिवरूपा प्रोक्ता	२३ (२६) ।११८
	= द्रुपदानाम्नी, इमां सरस्वत्या जले निमग्नो भूत्वा शिवो जजाप	३४ ।१९
गार्हस्थ्यम्	= आश्रमः, अस्मिन् ब्रह्मचारी वेदानधीत्य गुरवे दक्षिणां च दत्त्वा प्रवेशं कर्तुं शक्नुयात्	१४ ।८
	= आश्रमः, अत्र चतुर्णामपि वर्णानां प्रवेशाधिकारः	१५ ।६२
	= आश्रमः, शूद्रेण केवलमस्मिन्नेव प्रवेशः कर्त्तव्यः	१५ ।६३
	= आश्रमः, अत्र चतुर्णामेव वर्णानां प्रवेशाधिकारः	१५ ।६३
	= अस्य नाशाभावाय हरेः प्रार्थना कर्तव्येति पुलस्त्यो नारदमुपदिदेश	१७ ।२३
गालवः	= अस्याऽऽश्रमस्य विध्वंसनाय पातालकेतुना दैत्येन यत्न आरब्ध आसीत्	३२ ।३७
	= ऋषिः, अस्यार्थे राजा ऋतध्वजः पातालकेतुं बाणेन बिभेद	३३ ।४
	= ऋषिः, अस्य समाधिभङ्गं पातालकेतुर्दैत्यः करोति स्म	३३ ।५
	= अयमाकाशात् पतितमश्वम् ऋतध्वजाय नरेन्द्राय ददौ	३३ ।८
गावः	= इमा ये जना उच्छिष्टाः सन्त एव कामतः स्पृशन्ति ते तप्तकुम्भनामके नरके पतन्ति	१२ ।१६
	= एतासामग्रे ये मूत्रकर्म कुर्वन्ति नरकपतितानां तेषां गुदेभ्यो वायसा अन्त्राणि विनिष्कृन्तन्ति	१२ ।२५
	= एषामासां वा हर्तारो महारौरवाख्यं नरकं व्रजन्ति	१२ ।३८

	=आसां विक्रयिणो जना महारौरवादिनरकेषु व्रजन्ति	१२ ।३९
	=एता माल्यवटाख्ययक्षस्य समीपे रम्भासुरो ददर्श	१८ ।५४
	=आसामेषां वा मुखमिव मुखधारिणो भूता देव्या हास्यात् समुद्भूताः	२१ ।२०
	=आसां वामनाय दानार्थं बलिः प्रतिज्ञातवान्	२३ (१०) ।४१
	=आसामेषां वा ग्रहे मरणेन मुक्तिर्भवति	२३ (१२) ।८
	=आसां सहस्रस्य दानेन यत् फलं लभते तदेव फलं फलकीवनस्थे तीर्थे स्नानेन प्राप्नोति पुरुषः	२३ (१५) ।५०
	=आसां सहस्रस्य दानेन यत् फलं लभते तत् फलं कुरुक्षेत्रस्य चतुर्णां समुद्राणामन्यतमस्मिन् स्नात्वा नरो लभते	२३ (२०) ।१
गिरयः	=एषां चलनमभून्मधुसूदने गर्भस्थे सति	२३ (८) ।५
	=एते वामनस्य गत्या प्रकम्पिताः	२३ (१०) ।६
	=एषां मध्ये हिमवान् शिवरूपः कथितः	२३ (२६) ।११२
गिरिः	=अन्तर्गिरिः, बहिर्गिरिः	१३ ।४४
	=अस्य सुता कर्कटराशिगते दिवाकरे तृतीयायां स्वपिति	१७ ।१४
	=एतान् महिषासुरः स्वतीक्ष्णशृङ्गाभ्यामशीर्णयत	२१ ।४१
	=पर्वतः, उदयः	३१ ।१७
गिरिकः	=शिवस्य नाम	२३ (२६) ।१३०
गिरिकन्यका	=काली, एनां शिवः सुचिरात् समीक्षयामास	२५ ।३८
	=उमा	२५ ।७३
	=काली, अनया सह शिवो विवाहकाले क्रीडामकरोत्	२७ ।३८
गिरिकप्रियः	=शिवस्य नाम	२३ (२६) ।१३०
गिरिजा	=अस्याः करतले कुन्दगुल्मोऽजायत	१८ ।६
	=अस्य भ्राता सुनाभः	२७ ।३५

	=अस्य 'उमा' 'काली' इति नामद्वयम्। इयं विवाहकाले स्त्रीभिः प्रसाधिता, भ्रात्रा सुनाभेन च शङ्कराभ्याशमानीता	२७ ।३५
	=काली, उमा वा। अस्या ब्रह्मणा सह संवादः	२७ ।४६
	=काली, इयं विवाहकालेऽग्नेस्त्रिः प्रदक्षिणं चकार	२७ ।५०
	=इयं शिवप्रयुक्तकालीशब्देन क्रुद्धा सती तपस्तप्तुं जगाम	२८ ।१०
	=शिवपत्नी काली, अनया सह शिवस्य संवादः	२८ ।२४
	=पार्वती, अनया सह शिवस्य संवादः	३१ ।३५
	=पार्वती, इमां सैनापत्येऽभिषिक्तः कुमार-कार्त्तिकेयः प्रणनाम	३२ ।१
	=इमां दृष्ट्वाऽन्धकासुरः कामान्धः संजातः	३३ ।१९-२०
गिरितनया	=इयं 'काली' 'उमा' इति नाम्नी विवाहकाले शङ्करेण सह सुभूमौ क्रीडनार्थं जगाम	२७ ।३७
गिरिपुत्री	=उमा शिवपत्नी, इयं कार्त्तिकेयमभिषिक्तं निरीक्ष्य मूर्ध्नि मुहुर्मुहुरजिघ्रत्	३१ ।५७
गिरिभेदी	=गणः, अयं युद्धे तलेनैव सारोहं कुञ्जरं भस्मसाच्चक्रे	३२ ।६०
गिरिराजः	=हिमालयः, अस्य पुत्री काली	२५ ।३५
	=हिमालयः, अस्याङ्गिरसा सह संवादः	२६ ।३२
गिरिवरः	=विन्ध्यः, अस्य निम्नकरणे यतनार्थं सूर्योऽगस्त्यं प्रति प्राह	१९ ।२६
गिरिशृङ्गम्	=नरके पापिनो जना अस्मात् पात्यन्ते	१२ ।३४
गिरीशः	=हिमवान्, अनेन स्वगृहे वासाय महादेवो निमन्त्रितः	२५ ।३३
	=हिमालयः, अस्याह्वानेन पत्नी मेना पुत्रेण सह सभामाजगाम	२६ ।५०
गुरवः	=एषां निन्दका नरकं यान्ति	१२ ।४
	=एषां येऽवज्ञां कुर्वन्ति ते नरकान् यान्ति	१२ ।११

=इमान् ये जनाः पादेन स्पृशन्ति ते रौरवनरकगामिनो भवन्ति १२।१८

तिक्तः	=रसः, अयमाश्विनशुक्लैकादश्यां विष्णवे समर्पणीयः	१८ ।१४
तिग्मांशुः	=सूर्यः, एतं स्यन्दने स्थितं वरुणात्मजो ददर्श	२२ ।४१
तिथयः	=सर्वेषु तिथिषु दर्शः = अमावस्यातिथिः श्रेष्ठः	१२ ।४८
तिथिः	=दर्शः = अमावस्या	१२ ।४८
	=एकादशी	१७ ।६
	=चतुर्दशी	१७ ।१०; २३ (२१) ।२८; २३ (२५) ।४

= पौर्णमासी	१७ ।११
= प्रतिपद्	१७ ।१३
= द्वितीया, तृतीया	१७ ।१४
= द्वितीया	१७ ।२८
= अष्टमी	१७ ।३०; २३ (२५) ।४
= नवमी	१७ ।३४
= अष्टमी, आश्विनमासस्य	१७ ।३५
= अष्टमी, नवमी	१७ ।३८
= एकादशी, आश्विनमासस्य शुक्लपक्षे	१८ ।११
= महापुण्यायास्तिथेर्विषये देवानां प्रश्नो विष्णुं प्रति	२२ ।२४
= महातिथ्यादिविषयकं प्रश्नजातं विष्णुना देवान् प्रति समाहितम्	२२ ।२५
= एकादशी, ज्येष्ठमासे शुक्लपक्षस्य	२३ (१०) ।८२
= द्वादशी, ज्येष्ठमासे शुक्लपक्षस्य	२३ (१०) ।८४
= भाद्रपदमासे कृष्णपक्षस्य चतुर्दशी	२३ (१५) ।६
= चतुर्दशी, चैत्रशुक्लपक्षस्य	२३ (१५) ।१७
= चतुर्दशी कृष्णपक्षस्य	२३ (१५) ।२०
= दशमी चैत्रमासे शुक्लपक्षस्य, अस्यां पौण्डरीकतीर्थे स्नानादिकं मुक्तिमार्गप्रदायकमुक्तम्	२३ (१५) ।४०
= चतुर्दशी चैत्रशुक्लपक्षस्य, अस्यामलेपकतीर्थे स्नात्वा पापलेपमुक्तो भवति	२३ (१५) ।४४
= एकादशी ज्येष्ठमासे शुक्लपक्षस्य, अस्यामुपोषितो द्वादश्यां ज्येष्ठाश्रमाख्यतीर्थे स्नात्वा नरो नृषु ज्येष्ठत्वं लभते	२३ (१५) ।६८
= द्वादशी ज्येष्ठमासे शुक्लपक्षस्य, अस्यां ज्येष्ठाश्रमाख्यतीर्थे स्नात्वा नरो नृषु ज्येष्ठत्वं लभते ।	२३ (१५) ।६८
= पूर्णिमा कार्त्तिकमासस्य	२३ (१६) ।१६
= षष्ठी चैत्रमासे शुक्लपक्षस्य	२३ (२०) ।८
= षष्ठी चैत्रमासस्य	२३ (२०) ।११
= षष्ठी वैशाखमासस्य	२३ (२०) ।२६

	=षष्ठी कस्यापि मासस्य	२३ (२०) ।३०
	=चैत्रमासे कृष्णपक्षस्याष्टमी तिथिः	२३ (२१) ।२९
	=चतुर्दशी चैत्रमासे कृष्णपक्षस्य	२३ (२४) ।३०
	=त्रयोदशी चैत्रमासस्य	२३ (२५) ।५३
	=कृष्णपक्षस्य चतुर्दशी	२३ (२८) ।४६
	=अक्षया तिथिः, इयं तदा भवति यदा मृगशिरो नक्षत्रे शशिसूर्यौ बृहस्पतिश्च वर्तन्ते	२४ ।२
तिथिनामानि	=नन्दा, रिक्ता, जया, पूर्णा, भद्रा	१४ ।४८
तिमितानि	=तिमितम् = आर्द्रम्, एवंविधेषु सर्वेषु पदार्थेषु बन्धः श्रेष्ठः	१२ ।४९
तिर्यग्योनिः	=अस्यां स्थितो विष्णुर्नरसिंहावतारे सिंहेषु रतिमवाप	२३ (१५) ।२९
तिलाः	=एषां कल्केन सस्नेहपदार्थानां शुद्धिर्भवति	१५ ।६
	=एभिर्मिश्रितस्यौदनस्य नैवेद्यमुमापतेरर्चने माघमासे देयम्	१७ ।४२
	=आश्विनशुक्लैकादश्यामिमे विष्णवे निवेदनीयाः	१८ ।१३
	=एभिः संवत्सरारम्भस्य द्वितीयेऽहनि स्नानं कर्तव्यम्	१८ ।१७
	=प्रस्थपरिमितानामेषां किंदत्तकूपस्थले दानेन परमा सिद्धिरवाप्यते	२३ (१५) ।६०
	=स्थाणुलिङ्गस्य पश्चिमभागे स्थितः सन् कृष्णतिलैः पितॄन् संतर्प्य युगत्रयपर्यन्तं सुखं लभते	२३ (२४) ।२७
	=तिलमधून्मिश्रं हविष्यान्नमिन्द्रः पितृषु प्रादात्	२४ ।९
तिलानि	=एभिर्युता दक्षिणा हिरण्याक्षस्य प्रीत्यर्थं देया	१७ ।३५
	=एभिस्तर्पणं कामयन्ते पितरः पितामहाश्च कुरुक्षेत्रस्थायाम् आपगानद्याम्	२३ (१५) ।५
तिस्रः	=संख्या, एतावत्कोटिपरिमितानां तीर्थानां सरकतीर्थस्थितानाम्	२३ (१५) ।२१
तिस्थिरः	=प्रमथः, इमं वेधाः कार्त्तिकेयाय ददौ	३१ ।६६
तीर्थत्वम्	=इदं तव ह्रदा गमिष्यन्तीति पितरः परशुरामाय वरं ददौ	२३ (१४) ।११

तीर्थनामानि	=नैमिषम्, पुष्करम्, चक्रतीर्थं च	७ ।३७
तीर्थनेमिः	=इमां मातरं नागतीर्थं कार्त्तिकेयाय ददौ	३१ ।९३
तीर्थम्	=माहात्म्यविधिविषयकः प्रश्नः	१ ।८
	=नाकुलेश्वरम्	७ ।२६
	=पृथूदकम् (कुरुक्षेत्रे)	१२ ।४५; २२ ।२०; २३ (१८) ।१६; १७; २३ (१८) ।२०; ३०; २५ ।७३
	=कोटितीर्थैराप्लुता देवी सरस्वती द्वैतवने वर्तते	२३ ।१४
	=समन्तपञ्चकम्	२३ ।१५
	=ब्रह्मसरः, अस्य प्रभावादिकथनाय लोमहर्षणः प्रतिज्ञातवान्	२३ (१) ।४
	=ब्रह्मसरः	२३ (१) ।४; २३ (११) ।२४
	=पारिप्लवम्	२३ (३) ।१७
	=कुरुक्षेत्रम्	२३ (१२) ।१-२
	=रन्तुकः (कुरुक्षेत्रस्थः)	२३ (१२) ।२; १९
	=गया	२३ (१२) ।८
	=सरः कुरुक्षेत्रस्थम्	२३ (१२) ।१९
	=येन विधानेन यस्य तीर्थस्य यत् फलं भवति तद् विस्तरेण वर्णयितुमृषिभिर्लोमहर्षणः प्रार्थितः	२३ (१३) ।२
	=कुरुक्षेत्रम्, अस्य प्रभावेण तत्रत्या अष्टौ नद्यो वैतरणीप्रभृतयः पुण्याः सन्ति	२३ (१३) ।९
	=कुरुक्षेत्रे सरस्वती - कौशिक्योर्नद्योः संगमस्थलम्	२३ (१३) ।१८
	=धरण्यास्तीर्थे कुरुक्षेत्रस्थे स्नात्वा नरः परं पदं प्राप्नोति	२३ (१३) ।१९
	=शालूकिनीनाम्ना प्रसिद्धं कुरुक्षेत्रस्थम्, अत्र स्नानेनाभिमता लोकाः प्राप्यन्ते	२३ (१३) ।२२
	=नागानां तीर्थं कुरुक्षेत्रेऽस्ति, तत्र स्नानेन नागभयं नष्टं भवति	२३ (१३) ।२३
	=रन्तुकतीर्थं कुरुक्षेत्रस्थम्, अत्र स्नानमेकस्यां रजन्यां वासश्च करणीयः	२३ (१३) ।२४

=पञ्चनदसंज्ञकम्, पञ्चनदानां संस्थितत्वाद् नामेदं जातम् २३ (१३)।२६
=पञ्चनदम् २३ (१३)।२७
=कोटितीर्थम् २३ (१३)।२८
=कोटितीर्थम्, अस्मिन् स्नानस्य फलं पञ्चयज्ञावाप्तिः २३ (१३)।२९
=अश्विनोस्तीर्थम्, अत्र श्रद्धया कार्यविधानेन रूपं यशश्च लभ्यते २३ (१३)।३१
=वाराहतीर्थं कुरुक्षेत्रस्थम्, अस्मिन् स्नानेन परमं पदं प्राप्यते २३ (१३)।३२
=सोमतीर्थं कुरुक्षेत्रस्थम्, अत्र तपस्तप्त्वा सोमो व्याधिमुक्तोऽभवत् २३ (१२)।३३, २३ (१३)।३३; २३ (१६)।१५
=एकहंसाख्यम्, अस्मिन् स्नानेन गोसहस्रफलं लभ्यते २३ (१३)।३७
=मुञ्जवटम् (कुरुक्षेत्रस्थम्) २३ (१३)।३८
=मुञ्जवटं कुरुक्षेत्रस्थम्, अत्रैकरात्र्यां निवासेन गाणपत्यमवाप्यते २३ (१३)।३९
=पुष्कराभिधं कुरुक्षेत्रस्थम्, अत्र पितृदेवता अभ्यर्च्य राजाऽश्वमेधफलं विन्दति २३ (१३)।४१
=रामह्रदः कुरुक्षेत्रस्थः २३ (१४)।१
=ह्रदास्तीर्थभूता भवेयुरिति वरं परशुरामः पितॄन् ययाचे २३ (१४)।८
=वंशमूलं कुरुक्षेत्रस्थम् २३ (१४)।१६
=कायशोधनम्, (कुरुक्षेत्रस्थम्) अस्मिन् स्नानेन शरीरशुद्धिः संप्राप्यते २३ (१४)।१७
=कायशोधनम्, (कुरुक्षेत्रस्थम्) इदं यावन्नरा न प्राप्नुवन्ति तावत् तीर्थान्तरेषु सिद्धा भूत्वा भ्रमन्ति २३ (१४)।१८
=लोकोद्धारनामकं कुरुक्षेत्रस्थम् २३ (१४)।२१
=श्रीतीर्थं कुरुक्षेत्रस्थम् २३ (१४)।२३
=सूर्यतीर्थं कुरुक्षेत्रस्थम् २३ (१४)।२६
=भवानीवनं कुरुक्षेत्रस्थितम् २३ (१४)।२९

=सङ्गिनीतीर्थम्	२३ (१४) ।३४
=देवीतीर्थं कुरुक्षेत्रस्थम्	२३ (१४) ।३४
=ब्रह्मावर्तः (कुरुक्षेत्रस्थितः)	२३ (१४) ।३६
=रन्तुकस्य तीर्थं सरस्वती, अत्र स्नानेन कामिकं फलं लभ्यते	२३ (१४) ।३७
=सुतीर्थकम् (कुरुक्षेत्रस्थम्)	२३ (१४) ।४०
=कामेश्वरतीर्थं कुरुक्षेत्रस्थम्, इदमम्बुवने स्थितम्	२३ (१४) ।४२
=मातृतीर्थम् (कुरुक्षेत्रस्थम्)	२३ (१४) ।४३
=इदं दण्डकाख्यं कुरुक्षेत्रस्थम्	२३ (१४) ।४५
=इदं स्वानुलोमायनाख्यं कुरुक्षेत्रस्थम्	२३ (१४) ।४६
=इदं दशाश्वमेधिकाख्यं कुरुक्षेत्रस्थम्	२३ (१४) ।४९
=इदं मानुषाख्यं कुरुक्षेत्रस्थम्	२३ (१४) ।५०
=मानुषाख्यं सरः, अस्मिन् स्नानकरणाय द्विजोत्तमैर्व्याधा निर्दिष्टाः	२३ (१४) ।५४
=इदं मानुषाख्यं सरः कुरुक्षेत्रस्थम्, अस्य माहात्म्यात् कृष्णमृगा मानुषत्वमुपागताः	२३ (१४) ।५४
=इदं मानुषाख्यं सरः कुरुक्षेत्रस्थम्	२३ (१४) ।५५
=इदं ब्रह्मोदुम्बराख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।७
=इदं कपिलस्थलाख्यं कुरुक्षेत्रे	२३ (१५) ।१४
=इदं कलसीनामकं कुरुक्षेत्रस्थम्	२३ (१५) ।१८
=इदं सरकाख्यं कुरुक्षेत्रस्थितम्, अत्र महेश्वरं दृष्ट्वा सर्वकामाँल्लभते	२३ (१५) ।२०
=इदं सरकाख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।२१
=इदं इडास्पदाख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।२४
=इदं केदाराख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।२६
=इदं किंरूपाख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।२७
=इदं अन्यजन्माख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।२८
=इदं नागहृदाख्यं कुरुक्षेत्रस्थितम्	२३ (१५) ।३९
=इदं पौण्डरीकाख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।३९

=इदं त्रिविष्टपाख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।४१
=इदं रसावर्ताख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।४३
=अलेपकं कुरुक्षेत्रस्थम्, अत्र चैत्रशुक्लचतुर्दश्यां स्नात्वा पापलेपमुक्तो भवति	२३ (१५) ।४४
=अलेपकं कुरुक्षेत्रस्थम्	२३ (१५) ।४४
=कुरुक्षेत्रस्थे फलकीवने सर्वदेवैरलङ्कृतं तीर्थमेकं वर्तते	२३ (१५) ।५०
=पाणिखातं कुरुक्षेत्रस्थम्	२३ (१५) ।५१
=मिश्राख्यं कुरुक्षेत्रस्थितम्	२३ (१५) ।५२
=मनोजवाख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।५४
=मधुवटीनामकं देवतीर्थम् (कुरुक्षेत्रस्थितम्)	२३ (१५) ।५५
=देव्यास्तीर्थं मधुवटीसंज्ञकं कुरुक्षेत्रस्थितम्	२३ (१५) ।५५
=अह्नम् (कुरुक्षेत्रस्थम्)	२३ (१५) ।६१
=सुदिनम् (कुरुक्षेत्रस्थम्)	२३ (१५) ।६१
=कृतजप्यम् (कुरुक्षेत्रस्थम्)	२३ (१५) ।६२
=कोटितीर्थम् (कुरुक्षेत्रस्थम्)	२३ (१५) ।६३; ७१
=वामनकं कुरुक्षेत्रस्थम्	२३ (१५) ।६४
=ज्येष्ठाश्रमः (कुरुक्षेत्रस्थः)	२३ (१५) ।६७
=कोटितीर्थं कुरुक्षेत्रस्थम्, अस्मिन् स्नात्वा नरः कोटियज्ञफलं लभते	२३ (१५) ।७१
=कोटितीर्थम्, अत्र कोटीश्वरं दृष्ट्वा गणपतित्वमवाप्यते	२३ (१५) ।७२
=सूर्यतीर्थम्, अस्मिन् स्नात्वा सूर्यलोके महीयते	२३ (१५) ।७३
=कुलोत्तारणाख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।७४; २३ (१६) ।४
=कुलोत्तारणम्, इममासाद्यतेऽपि परमं पदं पश्यन्ति ये ब्रह्मचर्यात् परं मोक्षमिच्छन्ति	२३ (१५) ।७५
=अमृततीर्थम्, अस्मिन् स्नात्वा नरोऽमृतत्वमवाप्नुयात्	२३ (१६) ।४
=इदं शालिहोमाख्यं कुरुक्षेत्रस्थम्	२३ (१६) ।५
=इदं श्रीकुब्जाख्यं कुरुक्षेत्रस्थम्	२३ (१६) ।६
=इदं नैमिषकुब्जाख्यं कुरुक्षेत्रस्थितम्	२३ (१६) ।७

=नैमिषम्	२३ (१६) ।८
=इदं सीताख्यं कुरुक्षेत्रस्थितम्	२३ (१६) ।१२
=इदं ब्रह्मस्थानाख्यं कुरुक्षेत्रस्थम्	२३ (१६) ।१३
=इदं सप्तसारस्वताख्यं कुरुक्षेत्रस्थम्	२३ (१६) ।१७
=पुष्करम्	२३ (१६) ।१९
=पुष्करम्, अत्र ब्रह्मणाऽऽहूता सरस्वती समागता	२३ (१६) ।२१
=इदं पुष्कराख्यं (कुरुक्षेत्रस्थम्)	२३ (१६) ।२३
=नैमिषाख्यम्, अत्र शौनकादीनां लोमहर्षेण सह संवादोऽभूत्	२३ (१६) ।२४
=नैमिषम्	२३ (१६) ।२८
=कुरुक्षेत्रम्, अत्र सरस्वती समागता ऋषेर्मङ्कणस्य संमाननार्थाय	२३ (१६) ।३४
=केदारः	२३ (१६) ।३५; ३४ ।१०-१४;
=गंगाद्वारम्	२३ (१६) ।३७
=इदं सप्तसारस्वताख्यं कुरुक्षेत्रस्थम्	२३ (१७) ।२२; २३ (१६) ।४०
=इदम् औशनसाख्यं कुरुक्षेत्रस्थम्	२३ (२१) ।२५; २३ (१८) ।१; ४; १०; ११; १३; २३ (२१) ।२४
=इदम् विश्वामित्राख्यं कुरुक्षेत्रस्थम्	२३ (१८) ।१४
=विश्वामित्रतीर्थम्, अस्मिन् स्नात्वा ब्राह्मणः परं पदमवाप्नुयात्	२३ (१८) ।१५
=इदं पृथूदकाख्यम्, अस्य गुणानस्मरन्महामुनिरुषङ्गुः	२३ (१८) ।१९
=इदं ब्रह्मयोनिनामाख्यं कुरुक्षेत्रस्थम्	२३ (१८) ।२१
=ब्रह्मयोनिसंज्ञकं पृथूदकतटस्थम्	२३ (१८) ।२४
=अवकीर्णसंज्ञकम्, इदं कुरुक्षेत्रे स्थितम्	२३ (१८) ।२५; ३०; ३३; २३ (१८) ।३६
=यायातं कुरुक्षेत्रस्थम्	२३ (१८) ।३७
=इदं मधुस्रवाख्यं कुरुक्षेत्रस्थम्	२३ (१८) ।३९
=इदं वसिष्ठोद्वाहकाभिधं कुरुक्षेत्रस्थम्	२३ (१८) ।४०

=स्थाणुतीर्थं कुरुक्षेत्रस्थम्	२३ (१९) ।३; २३(२१) ।३०; २३ (२४) ।४; १३; २३ (२८) ।७
=सरस्वती तीर्थम्, अस्य शोधनमृयश्चक्रुः	२३ (१९) ।४०
=कुरुक्षेत्रस्थ चतुः समुद्रात्मकम्, अत्र कृतं तपो दुष्कृतकर्मणोऽपि परिपूर्णं भवति	२३ (२०) ।२
=कुरुक्षेत्रस्थ चतुःसमुद्रात्मकम्	२३ (२०) ।२
=इदं शतसाहस्रिकाख्यं कुरुक्षेत्रस्थम्	२३ (२०) ।३
=इदं शतिकाख्यं कुरुक्षेत्रस्थम्	२३ (२०) ।३
=इदं कुमाराभिषेकाख्यं कुरुक्षेत्रस्थम्	२३ (२०) ।६
=इदं ओजसाख्यं कुरुक्षेत्रस्थम्	२३ (२०) ।६
=इदम् ऋणमोचनाख्यं कुरुक्षेत्रस्थम्	२३ (२०) ।६
=संनिहत्याख्यं कुरुक्षेत्रस्थम्	२३ (२०) ।९
=ओजसम्, अत्र कृतं श्राद्धमक्षयं भवति	२३ (२०) ।१०
=इदं पञ्चवटाख्यं कुरुक्षेत्रस्थितम्	२३ (२०) ।१२
=इदं कुरुनामाख्यं कुरुक्षेत्रस्थितम्	२३ (२०) ।१४
=कुरुक्षेत्रम्, अत्र श्रद्धया निवसतां मानवानां ब्रह्मसदनप्राप्तिविषयकः प्रसङ्गः	२३ (२०) ।१९
=कुरुक्षेत्रम्, अत्र स्नात्वा पञ्चपातकैर्दूषिता अपि नरा मुक्तिं लभन्ते	२३ (२०) ।२०
=कुरुतीर्थम्, एतद् दृष्ट्वा नरः पापमुक्तो भवति परं पदं च प्राप्नोति	२३ (२०) ।२१
=इदं स्वर्गद्वाराख्यं कुरुक्षेत्रस्थम्	२३ (२०) ।२३
=इदं शिवद्वाराख्यं कुरुक्षेत्रस्थम्	२३ (२०) ।२३
=इदम् अनरकाख्यं कुरुक्षेत्रस्थम्	२३ (२०) ।२४; २५
=अनरकम्, अत्र स्नातो नरः सर्वैर्देवैरनुज्ञातः परं पदमवाप्नुयात्	२३ (२०) ।३२
=इदं कुब्जाख्यं कुरुक्षेत्रस्थम्	२३ (२१) ।१
=इदं यज्ञोपवीतिकाख्यं कुरुक्षेत्रस्थम्	२३ (२१) ।४
=इदं सचक्रकाख्यं कुरुक्षेत्रस्थम्	२३ (२१) ।५
=इदं विहाराख्यं कुरुक्षेत्रस्थम्	२३ (२१) ।१०; १३
=दुर्गातीर्थं कुरुक्षेत्रस्थम्	२३ (२१) ।१५

=इदं पितृनामाख्यं कुरुक्षेत्रस्थम्	२३ (२१) ।१८
=ब्रह्मतीर्थं कुरुक्षेत्रस्थम्	२३ (२१) ।२८
=कुरुक्षेत्रस्थं सरः, इदं शक्रः पुनः पूरितवान्	२३ (२२) ।१०
=आत्मरूपायां नद्यां संयमस्तीर्थमुच्यते	२३ (२२) ।२४
=इदं सांनिहिताख्यं कुरुक्षेत्रस्थम्	२३ (२४) ।१ २३ (२४) ।२९
=रुद्रह्रदाख्यं कुरुक्षेत्रस्थम्	२३ (२४) ।३०
=शुक्रतीर्थं कुरुक्षेत्रस्थम्	२३ (२५) ।१
=सोमतीर्थं कुरुक्षेत्रस्थम्	२३ (२५) ।१
=दक्षतीर्थं कुरुक्षेत्रस्थम्	२३ (२५) ।२
=इदं स्कन्दनामाख्यं कुरुक्षेत्रस्थम्	२३ (२५) ।२
=रुद्रकरं कुरुक्षेत्रस्थम्	२३ (२५) ।१४
=स्थाणुतीर्थम्, अस्मिन् कृष्णाष्टम्यां वासं कृत्वा सर्वैः पातकैर्मुच्यते	२३ (२८) ।३६
=इदं पृथूदकाख्यं कुरुक्षेत्रस्थम्	२३ ।४३; २४ ।१; ४; २७ ।१४
=कुब्जाम्रम्	२५ ।५१
=चण्डिकेश्वरः	२५ ।५१
=कनखलम्	२५ ।५२
=कर्कन्धः	२५ ।५२
=कोनटम्	२५ ।५३
=कोटितीर्थम्	२५ ।५३
=कुब्जकम्	२५ ।५३
=पृथूदकम्	२५ ।५४; ३२ ।११४
=सारस्वतम्	२६ ।२८
=अस्मिन् स्नात्वा शक्रो ब्रह्महत्यापापादमुच्यत	२९ ।११
=इदम् औजसाख्यं कुरुक्षेत्रस्थम्	३१ ।५१
=पृथूदकः	३१ ।८८
=चक्रतीर्थम्	३१ ।८९
=कनखलः	३१ ।८९
=गयाशिरः	३१ ।८९
=मानसः	३१ ।९०

=पुष्करम् ३१ ।९०
=सोमतीर्थम् ३१ ।९१
=प्रभासः ३१ ।९१
=औशनसम् ३१ ।९१
=सप्तसारस्वतम् ३१ ।९२
=इन्द्रतीर्थम् ३१ ।९२
=उदपानः ३१ ।९२
=नागतीर्थम् ३१ ।९३
=कुरुक्षेत्रम् ३१ ।९३
=त्रिविष्टपम् ३१ ।९४
=चरणपावनम् ३१ ।९४
=बदरिकाश्रमः ३१ ।९६
=रुद्रमहालयः ३१ ।९८
=प्रयागः ३१ ।९९
=सर्वपापविमोचनः ३१ ।१००
=श्वेततीर्थम् ३१ ।१०१

तीर्थमाहात्म्यम् =औशनसतीर्थमाहात्म्यम्, इदमाकर्ण्य ऋषयस्तस्य कपालमोचनमिति नाम चक्रुः २३ (१८) ।१३
=कुरुक्षेत्रस्थकुब्जतीर्थस्य माहात्म्यं लोमहर्षणो महर्षीन् प्रत्याह २३ (२१) ।२

तीर्थयात्रा =इमां ब्राह्मणाः कुर्वते स्म प्रह्लादशासने ७ ।२४
=एनां रन्तुकं समभिवाद्यैव समाचरेत् २३ (१३) ।११
=ऋषयः कदाचित् सरस्वत्यां तीर्थयात्रां कृतवन्तः २३ (१९) ।२६
=इमां वेनपुत्रः स्वजनकमुद्दिश्य ययौ २३ (२६) ।५०

तीर्थवंशः =सरस्वत्याः पार्श्वभागे स्थितस्थास्य सनातनस्य विस्तरेण वर्णनाय महर्षिभिर्लोमहर्षणं प्रति प्रश्नः २३ (११) ।२

तीर्थवटः =एतं शङ्करः करेण धारयामास २३ (२४) ।१२

तीर्थवरः =सोमतीर्थम्, अत्र स्नानेन राजसूययज्ञफलं लभ्यते २३ (१३) ।३४

	=ब्रह्मोदुम्बरनामा कुरुक्षेत्रस्थः, अस्मिन् स्नातो ब्रह्मलोकमवाप्नोति	२३ (१५) ।११
तीर्थानि	=पृथिवी-अम्बर-रसातल-स्थानामेषां विषये प्रह्लादस्य च्यवनं प्रति प्रश्नः	७ ।३६
	=एतद्विषये च्यवनस्य प्रह्लादं प्रति समाधानम्, तीर्थनामानि च	७ ।३७
	=सर्वेषु तीर्थेषु पृथूदकनामकं तीर्थं प्रवरम्	१२ ।४५
	=एतानि प्रपितामहेन पूर्वं भूतगणैः समं निर्मितानि	२३ ।४५
	=एषां प्रमाणविषयकः प्रश्नो द्विजानां लोमहर्षणं प्रति	२३ (१) ।२
	=सरस्वत्याः पार्श्वभागे स्थितानि	२३ (११) ।२
	=कुरुक्षेत्रस्थानि, एषां स्मरणादिप्रभावकथनम्	२३ (१२) ।४
	=एषां स्मरणादिभिः परमा गतिः प्राप्यते	२३ (१२) ।५
	=कुरुक्षेत्रस्थेषु तीर्थेषु निर्विघ्नं भ्रमणाय तत्रत्यस्य यक्षेन्द्रस्य स्तवनेन प्रसादः प्राप्तव्यः	२३ (१२) ।२१
	=कुरुक्षेत्रस्थानि, एषां वर्णनविषयकः प्रश्नो लोमहर्षणं प्रति	२३ (१३) ।१
	=कुरुक्षेत्रस्थानामेषां यात्रा रन्तुकं समभिवाद्यैव समाचरणीया	२३ (१३) ।११
	=कोटिसंख्याकानि	२३ (१३) ।२८
	=एषां सेवी कपिलद्वारपालयात्रायाः समनन्तरं कुरुक्षेत्रस्थरामह्रदस्य यात्रां कुर्यात्	२३ (१४) ।१
	=कायशोधनतीर्थे स्नानेन नराः सिद्धा भूत्वा तीर्थेषु भ्रमन्ति	२३ (१४) ।१८
	=एषां स्मरणं कुर्वल्लोकोद्धारतीर्थे स्नानेन शाश्वतान् लोकान् पुमान् पश्यति	२३ (१४) ।२१
	=कोटित्रयपरिमितानि तीर्थानि कुरुक्षेत्रस्थे सरकतीर्थे सन्ति	२३ (१५) ।२१
	=इमानि कुरुक्षेत्रस्थे मिश्रकतीर्थे व्यासेन दधीच्यर्थं मिश्रितानि	२३ (१५) ।५२

	=सर्वेषु तीर्थेषु स्नानस्य फलं मिश्रकतीर्थे स्नानेन लभ्यते	२३ (१५) ।५३
	=तीर्थसेवी द्विजोत्तमः कुलोत्तारणाख्यं तीर्थमासाद्य कुलानि तारयति	२३ (१६) ।४
	=एतान्यभिगन्तुं द्विजाती रहोदरो न शशाक	२३ (१८) ।८
	=पृथिव्यां सर्वतीर्थेषु वेदनार्तो महामुनी रहोदरो जगाम	२३ (१८) ।९
	=स्थाणुतीर्थस्य समीपतः कानि दृश्यानि कानि च गुह्यानि तीर्थानीति मुनिर्मार्कण्डेयः सनत्कुमारं प्रति पप्रच्छ	२३ (२२) ।६
	=एषामुत्पत्तिं सनत्कुमारो मार्कण्डेयं श्रावयामास	२३ (२२) ।१६
	=येषां चित्तमात्मन्येव व्यवस्थितं तेषां सकलैस्तीर्थैः प्रयोजनं नास्ति	२३ (२२) ।२३
	=एतानि मध्यं प्राप्ते दिवाकरे स्थाणुतीर्थं समायान्ति	२३ (२४) ।४
	=एषु स्नानार्थं देवताभिर्वेनपुत्रो निर्दिष्टः	२३ (२६) ।४६
	=एतानि स्वस्तिकरणार्थं प्रार्थितानि	३२ ।२०
तुङ्गप्रस्थः	=कुमारद्वीपस्थपर्वतः	१३ ।१७
तुङ्गभद्रा	=महानदी, सह्यपादविनिर्गता	१३ ।३०
तुण्डम्	=मुखम्, अनेन महिषासुरो भूतगणान् व्यद्रावयत्	२१ ।३९
	=अस्याग्रभागेन महिषासुरो देव्या प्रक्षिप्तं जलेशपाशं नाशयामास	२१ ।४५
तुण्डा	=इमां मातरं श्वेततीर्थं कार्त्तिकेयाय ददौ	३१ ।१०१
तुण्डानि	=एतैः पक्षिणो नरकपतितानां जनानामुपरि स्थित्वा तांस्तुदन्ति	१२ ।९
	=येषां वायसानां वज्रवत् तुण्डानि भवन्ति ते साधुजनानां पैशुन्यमाचरतां पुरुषाणां नरकपतितानां जिह्वामाकर्षन्ति	१२ ।१०
तुण्डिकेशः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५५
तुम्बराः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५४

तुम्बिवीणाप्रियः	=शिवस्य नाम	२३ (२६) ।८६
तुरगः	=अयं शङ्कुकर्णस्य वाहनम्	९ ।२९
	=एनमारुह्य संवरणो नाम राजा प्रतिष्ठानपुरं जगाम	२२ ।३८
तुरङ्गमः	=अयं कुजम्भस्य वाहनम्	९ ।२८
	=अस्माद् राजा संवरणो निपपात	२२ ।३५
तुरङ्गाः	=चिक्षुरस्य तुरङ्गान् दुर्गा देवी चतुर्भिः शरैर्जघान	२१ ।२६
तुरुष्काः	=एते कुमारद्वीपस्योत्तरभागे स्थिताः	१३ ।११
तुरुसाः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५४
तुला	=राशिः, शुक्रसदनम्, कालरूपिणः शिवस्य नाभिस्थानम्	५ ।३७
	=राशिः, अस्य स्वरूपं सञ्चरस्थानानि च	५ ।५४
	=राशिः, अस्मिन् यदा सूर्यो वर्तते तदा क्रमेण हरिः, कामः, शिवश्च प्रबुध्यते	१७ ।२७
तुषाराः	=उत्तरापथवासिनो जनाः, एते क्षुद्रनदीजलानि पिबन्ति	१३ ।४०
तूणीपादाः	=उत्तरापथवासिनो जनाः, एते क्षुद्रनदीजलानि पिबन्ति	१३ ।४३
तूणौ	=अक्षय्यशरौ तूणौ कात्यायन्यै विवस्वान् ददौ	१९ ।१४
तूर्याणि	=वाद्यानि, देवासुरसंग्रामे एतान्यवाद्यन्त	९ ।५२
तृणम्	=एतज्जलेन शुध्यति	१५ ।४
तृणानि	=इमानि पथि स्थितानि मारुतेनैव शुद्धिमर्हन्ति	१५ ।१६
	=एतानि शिवरूपाण्युक्तानि	२३ (२६) ।११७
तृतीयः	=कश्यपस्तृतीयः प्रजापतिरासीत्	२३ (३) ।१२
तृतीयं नरकम्	=वर्ज्याऽऽदानादिरूपम्	३५ ।३
तृतीया	=तिथिः, अस्यां गिरिसुता स्वपिति	१७ ।१४
तृतीयाध्यायः	=रुद्रस्य संतापः, ब्रह्महत्याया रुद्रदेहे प्रवेशः, रुद्रस्य बदरिकाश्रमादौ गमनम्, कुरुजाङ्गले विष्णुरुद्रयोः संवादः, रुद्रेण विष्णोः स्तवनम्,	

प्रयागे योगशायिनो वासकथनम्, वाराणस्या महिमा, भगवतो लोलाख्यरवेः प्रभावः, रुद्रस्य वाराणसी-तीर्थेषु स्नानम्, केशवरुद्रसंवादः, रुद्रस्य केशवनिर्दिष्टे दिव्यह्रदे स्नानम्, रुद्रहस्ततलात् कपालस्य पतनम्, कपाली-कपालमोचनइति नाम्नोर्निमित्तकीर्तनम् ३ ।१-५१

तृतीयोऽध्यायः = लोमहर्षणेन सहर्षीणां संवादः, इन्द्रस्यादितिसमीपे गमनम्, अदित्या सहेन्द्रस्य संवादः, अदित्या सह देवानां कश्यपसमीपे गमनम्, देवानां कश्यपेन सह संवादः, कश्यपेन सह देवानां ब्रह्मसदने गमनम्, ब्रह्मसभावर्णनम्, ब्रह्मसभायां सर्वविद्याविशारदेरितशब्दस्य देवैः श्रवणम्, देवैर्ब्रह्मणे प्रणामः, ब्रह्मणो देवैः सह संवादः २३ (३) ।१-३८

तृप्तिः = इमां तस्य पितरः प्रयान्ति ये मनसा फलकीवनं स्मरन्ति २३ (१५) ।४९

तृषा = अनया युक्तः श्वा कश्चित् सरस्वत्यां स्नात्वा सर्वकिल्बिषैर्विमुक्तोऽभवत् २३ (२६) ।५८

तृष्णा = कात्यायन्या देव्या नाम, अनेन नाम्ना विष्णुप्रभृतिभिर्देववरैः सा स्तुता १९ ।१९

तेजः = राक्षसानां तेजसो ज्योतिरतिक्रमितुं सूर्यनक्षत्रचन्द्रमसो नाशक्नुवन् १६ ।७

= इदं महिषासुरेण त्रस्तानां देवानां वचो निशम्य विष्णुशङ्करादेर्वदनाद् विनिःसृतम् १९ ।६

= विष्णुशङ्करादिवदनाद् विनिःसृतं तेजः कात्यायनस्य प्रवराश्रमे गतम् १९ ।७

= महेश्वरादेस्तेजसा कात्यायन्या वक्त्रादिकमभवत् १९ ।९-१२

= इन्द्रस्य तेजसा कात्यायन्या मध्यभागोऽभवत् १९ ।१०

= कात्यायनाख्यस्यर्षेस्तेजः, अस्माद् देवी समुद्भूतेति तस्याः कात्यायनीति नाम जगति प्रसिद्धम् १९ ।१३

	=शङ्करस्य तेजोऽंशेन महिषासुरविनाशकः सुतो भविष्यतीति विष्णुना देवाः संदिष्टाः	२२ ।१९
	=इदं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।२८
	=असुरतेजसो हानिनिमित्तं प्रह्लादो बलिं श्रावयामास	२३(८) ।१६
	=असुराणां तेजांसि तावददित्या गर्भेंऽशावतीर्णो विष्णुर्हृतवान्	२३ (८) ।२७
	=वामनस्य तेजसा तावदसुरा निष्प्रभा बभूवुः	२३ (१०) ।३४
	=वामनस्य तेजसा संक्षोभमापन्ना असुरास्तं पूजयामासुः	२३ (१०) ।३७
	=पितॄणां तेजसा पापान्मुक्तिं परशुरामः प्रार्थितवान्	२३ (१४) ।८
	=मङ्कणस्य तेजसा मोहितं सज्जगन्नर्तनमकरोत्	२३ (१७) ।९
	=इदं 'भूर्भुवः स्वः' इति संज्ञिताच् छब्दादभवत्	२३ (२२) ।३१
	=अनेन शोषितं शेषमुदकं कललत्वमुपागतम्	२३ (२२) ।३३
	=आद्यं निःसृतं तेज एव 'आदित्य'-शब्देनोच्यते	२३ (२२) ।३५
	=स्थाणुलिङ्गस्य तेजसाऽऽद्यलिङ्गं रञ्जितं बभूव	२३ (२४) ।१९
	=वेनकृत-शिवस्तवश्रवणेन पुरुषस्तेजसा युक्तो भवति	२३ (२७) ।१२
	=शैलनन्दिन्याः काल्यास्तेजसा देवा विजिताः	२५ ।२५
	=अनेन युक्तं चकार पार्वती मृन्मयं शिवम्	२५ ।४३
तेजस्	=अनेन सहितोऽग्निः सुप्रभातकरणार्थं प्रार्थ्यते	१४ ।२६
तेजस्विनः	=सर्वेषां तेजस्विनां मध्ये अर्कः = सूर्यः प्रवरः	१२ ।४९
तैलम्	=इदं चित्रा-हस्त-श्रवणनक्षत्रेषु वर्जनीयम्	१४ ।५०
	=अनेन वर्जितं भोजनं रात्रावशून्यशयनाख्यायां कर्तव्यम्	१७ ।२४
तोमरम्	=आयुधम्, देवासुरसंग्रामे वरुणेन सह युद्धेऽस्य प्रयोगं विरोचनः कृतवान्	१० ।२६
तोमराः	=अयं कुमारद्वीपे पर्वताश्रयी देशः	१३ ।५७
तोयधराः	=मेघाः, एते कात्यायन्याऽलकैर्जिताः	२० ।४
तोयनिधिः	=एतान् महिषासुरो विध्वंसयामास	२१ ।४१
तोयम्	=अनेनामेध्याक्तस्य वस्तुनः शुद्धिर्भवति	१५ ।१४

	=इदं मारुतेन शुध्यति	१५ ।१६
	=तोयस्वरूपस्थः सन् विष्णुरखिलं विश्वं बिभर्ति	२३ (६) ।३२
	=बलैः पाणौ तोये पतिते सति वामनोऽवामनोऽभूत्	२३ (१०) ।४८
	=सरस्वती विश्वामित्रेण शप्ता शोणितोन्मिश्रं तोयं संवत्सरं यावदवहत्	२३ (१९) ।२२
	=सरस्वत्यास्तोयम् (जलम्) अरुणातोयमिश्रितं दृष्ट्वा राक्षसा दुःखिता अभूवन्	२३ (१९) ।३१
	=तीर्थजलम्, अस्याभिषेकेण वेनः शुद्धो भविष्यतीति देवताभिर्वेनपुत्रो विनिर्दिष्टः	२३ (२६) ।४९
तोया	=नदी, इयं विन्ध्यपादात् प्रसूता	१३ ।२९
तोयात्मा	=शङ्करस्य नाम	२३ (२६) ।१५२
तोरणम्	=बहिर्द्वारम्, अयं भागो यस्य संशुद्धजाम्बूनदमय आसीद् एतादृशो रम्यतर आश्रमोऽगस्त्येनान्तरिक्षे कृतः	१९ ।३३
तोशलाः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५४
त्यागः	=वेदवह्निगुरुमातृपितृणां त्यागेन नरके गमनं भवति	१२ ।३४
	=बलिः प्राणानां त्यागं प्रशस्तं मनुते परं वामनस्य समक्षं नास्तीति कथनं प्रशस्तं नैव मनुते	२३ (१०) ।२१
	=देहस्य त्यागाय व्यासो व्यासस्थल्यां निश्चयं चकार पुत्रशोकेनाभिभूतः सन्	२३ (१५) ।५८
त्यागी	=देवादीनां त्यागी 'अपविद्ध'-संज्ञको भवति	१५ ।३४
त्रपा	=लज्जा, कात्यायनीदेव्या नाम, अनेन नाम्ना विष्णुप्रभृतिभिर्देववरैः सा स्तुता	१९ ।१९
त्रपु	=रङ्गम्, अस्य शुद्धिः क्षारपदार्थेन भवति	१५ ।१३
त्रयः	=आश्रमाः, ब्रह्मचर्यं गार्हस्थ्यं वानप्रस्थं च	१५ ।६२
	=लोकाः	१६ ।३३
	=एतेषु प्रलम्बो राजा संवरण आसीत्	२२ ।५२

	=एभिरानत आसीद् राजा संवरणः	२२ ।५२
	=एभिर्गभीरो राजा संवरण आसीत्	२२ ।५२
	=ब्राह्मणाः, एतावद्भ्योऽदितिवने भोजनदानेन नरः परमगतिमाप्नोति	२३(७) ।६
	=लोकाः	२३ (८) ।१९
	=अग्नयः	२३ (१०) ।९
	=लोकाः, एते वामनेन सर्वदेवमयरूपेण जिताः	२३ (१०) ।६५
	=लोकाः, एतेषु विश्रुतमस्ति वामनकं तीर्थम्	२३ (१५) ।६४
	=लोकाः, एषु विश्रुतं तीर्थं कोटितीर्थाख्यं कुरुक्षेत्रे स्थितमस्ति	२३ (१५) ।७१
त्रयम्	=पुरीषाद्युत्सर्गानन्तरं गुह्यदेशे वारत्रयं मृदं शौचार्थमाहरेत्	१४ ।३१
त्रयस्त्रिंशोऽध्यायः	=रघुवंशीयनृपस्य ऋतध्वजस्य बाणप्रक्षेपकथनम्, गालवर्षेः पातालकेतुदैत्यकर्तृकः समाधिभङ्गः, विश्वावसुकर्तृकस्याश्वस्य आकाशात् पतनम्, अन्धकासुरस्य पातालान्निर्गमनम्, तस्य पार्वत्याः सम्प्राप्तिविषये विचारणा, अन्धकासुरस्य प्रह्लादेन सह संवादः, गाधिगीतश्लोकस्य प्रह्लादेन कथनम्, नन्दिना मयतारप्रभृतीनां दैत्यानां पराजयः, अन्धकासुरेण नन्दिनोः निपातः, अन्धकासुरस्य भयाद् गौरी शतरूपाऽभवत्, शतावरीदेव्या अन्धकासुरस्य निपातः, गौरी अन्तर्धानं गता, नन्दी सर्वान् दानवान् पराजितवान्, अन्धकासुरस्य पाताले गमनं तत्र गौर्याश्चिन्तनं च	३३ ।१-४७
त्रयी	=वेदत्रयी (ऋग्यजुःसामरूपा), इयं नित्यमध्येतव्या	१५ ।५२
त्रयोदशः	=श्रीवामनपुराण एतत्संख्याकोऽध्यायः	१३ ।५८
	=एतावन्ति धर्मस्याङ्गानि	१६ ।५
त्रयोदशं नरकम्	=धर्मार्थकामहान्यादिप्रयुक्तम्	३५ ।१३

त्रयोदशी	=तिथिः, अस्यां शुभे शयने कामः स्वपिति	१७।९
	=तिथिश्चैत्रमासस्य, अस्यां शुक्रार्कचन्द्रसंयोगे शुभे दिने ब्रह्मणा स्थाणुलिङ्गं प्रतिष्ठितम्	२३ (२५)।५४
त्रयोदशोऽध्यायः	=जम्बूद्वीपस्थ-संस्थानकथन-प्रसङ्गे नववर्षाणां स्थितिः, तत्र भारतवर्षं विहायाष्टसु वर्षेषु युगावस्थाया अभावः, भारतवर्षस्य नवद्वीपानां परिगणनम्, कुमारद्वीपस्था जातयः, तासां संव्यवहारः, कुमारद्वीपस्य पर्वता नद्यो जनपदाः, पर्वताश्रयिणो देशाः, एषु देशेषु प्रचलित-देश-धर्मकथनाय महर्षीणामाश्वासनं सुकेशिं प्रति	१३।१-५८
	=लोमहर्षेण महर्षीन् प्रति कुरुक्षेत्रस्थानां सप्तवनानां नवनदीनां च कथनम्, तीर्थस्नानगमनस्मरणफलम्, कुरुक्षेत्रस्थतीर्थानां यात्राक्रमो विधिश्च, रन्तुकं द्वारपालं समभिवाद्यैव तीर्थयात्रां प्रारभेतेति तीर्थयात्राक्रमविधिप्रस्तावः, द्वारपालस्य कपिलमहायक्षस्य कृत्यकथनम्, उदूखलमेखलानाम्न्या यक्षिण्याः कृत्यं तस्याः पापदेशजया कयाचित् स्त्रिया सह संवादश्च	२३ (१३)।१-५०
त्रयोविंशोऽध्यायः	=संवरणपुत्रस्य कुरोर्जातकर्मादिसंस्काराः, सौदामन्या सह कुरोर्विवाहः, कुरोर्यौवराज्यपदेऽभिषेकः, कीर्तिप्राप्त्यर्थमस्य द्वैतवनादौ विचरणम्, समन्तपञ्चकक्षेत्रकथनप्रसङ्गे देवानां विष्णुं प्रति ब्रह्मवेदिसंख्याविषयकः प्रश्नः, पञ्चब्रह्मवेदयः, समन्तपञ्चकक्षेत्रे कुरोः सीराकर्षणम्, इन्द्रेण सह कुरोः संवादः, विष्णुना सह कुरोः संवादः, कुरुणा विष्णवे शिरःसम्प्रदानम्, विष्णोः सकाशात् कुरवे वरप्राप्तिः, समन्तपञ्चकक्षेत्रस्य रक्षार्थं विष्णुना व्यवस्था कृता, समन्तपञ्चकक्षेत्रस्थपृथूदकतीर्थस्य माहात्म्यकथनम्	२३।१-४५
	=ब्रह्मणा सह बालखिल्यमहर्षीणां शिवदर्शनार्थं कैलासे गमनम्, ब्रह्मकृता शिवस्य स्तुतिः,	

	शिवेन स्वलिङ्गस्य स्थाणुनामकरणम्, स्थाणोर्महिमा, ब्रह्मदेवर्षीणां संवादः शिवलिङ्गविषये, भवान्या सह ब्रह्मदेवर्षीणां संवादः, शङ्करस्य हस्तिरूपधरस्य ब्रह्मदेवर्षिभिः सह देवदारुवने गमनम्, शिवेन स्वलिङ्गस्य पश्चिमे सरःपार्श्वे स्थापना, ब्रह्मादिदेवकृतस्तुत्या प्रसन्नस्य शङ्करस्य हस्तिरूपपरित्यागः, स्वलिङ्गे सन्निधानकरणं च	२३ (२३) ।१-३६
त्रिंशोऽध्यायः	=देव्या मुखादिभ्यो ब्रह्माणीप्रभृतिदेवीनामुद्भवः, शिवदुर्गासंवादः, शिवस्य शुम्भनिशुम्भपार्श्वे दूतरूपेण गमनम्, शिवदूतीति देव्या नामधेयम्, देवताभिर्वध्यमाना महासुरा रक्तबीजं शरणं जग्मुः, रक्तबीजस्य मातृभिः सह युद्धम्, रक्तक्षये रक्तबीजो हीनबलो मृतश्च बभूव, निशुम्भस्य मृडान्या सह युद्धम्, निशुम्भदेवीसंवादः, निशुम्भस्य वधः, शुम्भस्य वधः, देवकृत-देवी-स्तुतिः, देवी देवकृतया स्तुत्या प्रसन्ना बभूव, सा देवेभ्यो वरं व्यतरत्, देव्या स्वर्गलोके गमनम्, पुराणप्रशंसा	३० ।१-७३
त्रिकर्मनिरतः	=शिवस्य नाम	२३ (२६) ।९९
त्रिकूटः	=पर्वतः, अयं हिमाद्रिभवनमाजगाम	२६ ।४७
त्रिगर्ताः	=अयं कुमारद्वीपे पर्वताश्रयी देशः	१३ ।५७
त्रिगुणाश्रयम्	=एतत् सरस्वत्या रूपम्	२३ (११) ।१८
त्रिजटः	=शिवस्य नाम	२३ (२६) ।७३
त्रिदशाः	=देवा इन्द्रादयः, एते ब्रह्मसभां प्रविश्य ब्रह्मणे प्रणामं चक्रुः	२३ (३) ।३४
	=देवाः, इमे वामनं ज्ञातुमीशाना न सन्ति	२३ (९) ।२८
त्रिदिवः	=अत्र निर्वृतो भूत्वा यथा चरामि तथा कुरुष्वेति सूर्योऽगस्त्यं बभाषे	१९ ।२४

=स्वर्गः, कुरुणा सह वार्तां विधायात्रेन्द्रो जगाम २३ (२०) ।१७

त्रिनेत्रः =शिवस्य नामान्तरम् २ ।१
=अस्य पञ्च वक्त्राणि २ ।३५
=यक्षाधिपतेस्तनूजेन पाञ्चालिकेन सहास्य संवादः ६ ।४६-५६
=शिवः, चित्रवने विचरताऽनेन कामो दग्धः ६ ।९६
=नारायणः, अस्य प्रह्लादकृता स्तुतिः ८ ।५३
=शिवः, अनेनोक्तं मङ्गलं प्रातःकाले पुरुषेण वाच्यम् १४ ।२०
=अस्य क्रोधेन सूर्योऽम्बरतलात् पपात १६ ।४४
=शङ्करः, पारणान्तेऽस्य स्नपनं कार्यम् १७ ।४४
=शङ्करः, अस्य पूजा ज्येष्ठमासेऽर्क-कुसुमैः कर्तव्या १७ ।५५
=शिवस्य नाम २३ (२६) ।७३; २५ ।७५; २७ ।४०; २८ ।५; १०
=शिवः, अयं स्थावराधिपं हिमवन्तं विवाहावसरे ननाम २७ ।२१

त्रिनेत्रा =कात्यायनी, अतितुष्टा सतीयम् अट्टाट्टहासमकार्षीत् १९ ।१८

त्रिपुरः =असुरः, अयं शिवेन हतस्तेन शिवस्त्रिपुरान्तकारीति नाम्ना प्रसिद्धो बंभूव १४ ।२३

त्रिपुरघ्नः =शिवस्य नाम २३ (२६) ।७३

त्रिपुरनाशनः =शिवस्य नाम २६ ।३
=शिवः, अयं मन्दरगिरौ महर्षीणामभिनन्दनं चक्रे २६ ।३-५

त्रिपुरान्तकः =शिवस्य नाम ३ ।५१; २५ ।७५; २७ ।३४
=शिवः, अस्य सकाशं गमनाय विष्णुः कुटिलामग्निं च निर्दिदेश ३१ ।३३

त्रिपुरान्तकारी =शिवः, अयं शङ्करोक्ते प्राभातिके मङ्गले स्मृतः १४ ।२३

त्रिपुरान्तकृत् =शिवः, अयं पार्वत्याः पूजया तुष्टिमगमत् २५ ।४४

त्रिबली	=अनया निबद्धो मध्यदेश आसीत् संवरणस्य राज्ञः	२२ ।४९
त्रिभुवनम्	=अस्मिन् सुकेशिपुरस्य विस्तारः संजातः	१६ ।८
त्रिरात्रम्	=नित्यनैमित्तिककर्मणोर्हानिं कुर्वतः पुरुषस्यान्नं भुक्त्वा शुद्धये त्रिरात्रपर्यन्तमुपवासः कार्यः	१५ ।३८
	=गणकादेरन्नं भुक्त्वा त्रिरात्रपर्यन्तमुपवासेन शुद्धिः स्यात्	१५ ।३९
	=एतत्कालपर्यन्तमदितिवने स्थित्वा नरः सर्वान् कामान् प्राप्नोति	२३ (७) ।१४
	=एतावति काले ये प्राच्यां सरस्वत्यां व्रतादिकमाचरन्ति तेषां दुष्कृतं नश्यति	२३ (२१) ।२०-२१
त्रिलोचनः	=शिवस्य नामान्तरम्	२ ।१९-२५
	=अस्य प्रभावः	२ ।३३
	=शिवः, अयमन्धकेन समाराधितः	९ ।४
	=अनेनान्धकाय वरा वितीर्णाः	९ ।५-६
	=शिवः, अयं देवसेनायाः पृष्ठभागेऽवस्थितो बभूव	९ ।१२
	=शङ्करः, अयं सूर्येण निपातितं राक्षसपुरं विज्ञाय क्रुद्धो बभूव	१६ ।४३
	=शङ्करः, अस्य पूजा कालाष्टम्यां तिथौ धत्तूरपुष्पैः करणीया	१७ ।३२
	=शङ्करः, अस्य समीपं गमनाय ब्रह्मा विचारयामास	२३ (२३) ।२
	=शङ्करस्य नाम	२३ (२३) ।३६ (२३); ३० ।११
त्रिवली	=अनया युक्तः कात्यायन्या मध्यभाग आसीत्	२० ।७
त्रिविष्टपः	=देशः, अत्र शिवेन स्नानं कृतम्	२५ ।५२
	=तीर्थम्, इदं भद्रकाली मातरं कार्त्तिकेयाय प्रददौ	३१ ।९४
त्रिविष्टपम्	=स्वर्गः, एतद् वामनः शक्राय ददौ	२३ (१०) ।८५
	=तीर्थं कुरुक्षेत्रस्थम्, इदं देवैर्निषेवितम्	२३ (१५) ।४१
	=स्वर्गलोकः, अत्र देवा जग्मुः	२८ ।५१

	=स्वर्गलोकः; अत्राहं पुनरेष्यामि, अरुणाक्षमसुरं विनिहत्येति देवी देवानाह	३० ।७१
त्रिशिराः	=अयं कुरुक्षेत्रे महेश्वरं संपूज्याभिलषितकामानवाप	२३ (२५) ।२३
त्रिशीर्षः	=शिवस्य नाम	२३ (२६) ।७३
त्रिशूलम्	=इदमायुधं महेश्वरस्य	२ ।४५-४७
	=इदं त्रिशूली = शङ्करः कात्यायन्यै ददौ	१९ ।१४
	=आयुधम्, इदं सिंहोपरि प्राहिणोद् नमरो नाम दानवः	२१ ।१४
	=अनेन देवी मारी दैत्याञ् जघान	३० ।२०
त्रिशूली	=शङ्करः, महर्षिशापादस्य लिङ्गं पतितम्, तदाऽयमन्तर्हितः	६ ।६६
	=शङ्करः, अयं कात्यायन्यै त्रिशूलं ददौ	१९ ।१४
त्रिषवणम्	=त्रिकालम्, वानप्रस्थाश्रमिभिस्त्रिकालस्नानं कर्तव्यम्	१५ ।५८
त्रिहायणी	=एतादृश्यां महिष्यां दानवपार्थिवो रम्भासुरः कामभावं चक्रे	१८ ।५५
त्रेतायुगः	=अस्मिन् ब्रह्मण आश्रमे पूजादिकं प्रशस्तमुक्तम्	२३ (२८) ।४१
त्रैपुराः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५४
त्रैलोक्यगोप्ता	=शिवस्य नाम	२३ (२६) ।१३८
त्रैलोक्यम्	=एतत् कामयमानैर्देवासुरैः शरवर्षेणासृङ्नदी प्रवर्तिता	९ ।५१
	=इदं रजनीचरैर्ग्रस्तम्	१६ ।३३
	=अस्य विजयी पुत्रो रम्भासुरेण वह्निसकाशात् प्रार्थितः	१८ ।५०
	=अत्र बलिना राज्यं कृतम्	२३ (२) ।६
	=इदं दैत्येन्द्रेण हिरण्यकशिपुना निखिलं मुक्तमासीत्	२३ (२) ।१७
	=इदं बलिसंस्थं वीक्ष्य शक्रः स्वमातुर्निलयं जगाम	२३ (३) ।२
	=अस्य नेता विश्वकृदुच्यते	२३ (४) ।३

=अस्याधिपतिर्मम पुत्रो भूयादित्यदितिर्विष्णुं वरं ययाचे	२३ (७) ।७
=इदं सनाथं कर्तुं विष्णुर्वामनरूपेणावतीर्णः	२३ (८) ।१९
=अस्य राज्यमैश्वर्यं वा तथा नातिदुर्लभं यथा भवद्विधा गुरवो दुर्लभाः सन्तीति बलिः प्रह्लादमाह	२३ (९) ।५
=अस्य शक्राय प्रदानार्थं भगवान् विष्णुरदितिं प्रतिज्ञातवान्	२३ (९) ।३४
=एतदिन्द्राय सर्वदेवमयरूपो वामनो ददौ	२३ (१०) ।६५
=इदम् इन्द्रः शशास	२३ (१०) ।८६
=अस्मिन् विश्रुतं तीर्थं 'पारिप्लव'-नामकं कुरुक्षेत्रस्थम्	२३ (१३) ।१७
=अस्मिन् कोटितीर्थं विख्यातम्	२३ (१३) ।२८
=अस्मिन् विश्रुतं तीर्थं कायशोधनाख्यम्	२३ (१४) ।१७
=अस्मिन् विश्रुतं तीर्थं लोकोद्धारनामकं कुरुक्षेत्रस्थितम्	२३ (१४) ।२०-२१
=अस्मिन् विश्रुतं तीर्थं कपिलाह्रदनामकं कुरुक्षेत्रस्थम्	२३ (१४) ।२४-२५
=अस्मिन् विश्रुतं सूर्यं कुरुक्षेत्रस्थे सूर्यतीर्थे दृष्ट्वा ज्ञानयुतो नरो मुक्तिं लभते	२३ (१४) ।२८
=अत्र विश्रुतं स्वानुलोमायनं तीर्थम्	२३ (१४) ।४७
=अत्र दुर्लभं तीर्थं सरकाभिधं कुरुक्षेत्रस्थम्	२३ (१५) ।२०
=अस्मिन् विश्रुतं तीर्थमास्ते अन्यजन्माख्यं कुरुक्षेत्रस्थम्	२३ (१५) ।२८
=अस्मिन् कुरुक्षेत्रस्थनारदाश्रम एव 'अन्यजन्म' इति नाम्ना तीर्थं प्रसिद्धं बभूव	२३ (१५) ।३६
=अत्र विश्रुतमस्ति शालिहोत्रतीर्थम् (कुरुक्षेत्रस्थम्)	२३ (१६) ।५
=अस्मिन् विश्रुतमस्ति श्रीकुञ्जाख्यं तीर्थम्	२३ (१६) ।६
=अस्मिन् दुर्लभं तीर्थं कुरुक्षेत्रे वर्तते सोमतीर्थाख्यम्	२३ (१६) ।१५

	=अत्र दुर्लभं तीर्थं कुरुक्षेत्रे स्थितं सप्तसारस्वताख्यम्	२३ (१६) ।१७
	=अत्र विश्रुतमस्ति कुरुक्षेत्रस्थितं पञ्चवटाख्यं तीर्थम्	२३ (२०) ।१२
	=अत्र कुरुक्षेत्रस्थमनरकाख्यं तीर्थं विश्रुतमस्ति	२३ (२०) ।२४
	=अत्र विहाराख्यं तीर्थं विख्यातमस्ति	२३ (२१) ।१०
	=अत्र सरस्वतीकूपः प्रसिद्धः	२३ (२१) ।१६
	=अत्र औशनसं तीर्थं दुर्लभमुच्यते	२३ (२१) ।२५
	=अस्य प्रभुः शङ्करः	२३ (२३) ।४
	=शिवस्य लिङ्गं त्रैलोक्ये वन्दितमस्ति	२३ (२३) ।३१
	=अत्र हारीतस्थापितं लिङ्गं विख्यातमस्ति	२३(२५) ।२७
	=इदं शुम्भनिशुम्भाभ्यां स्ववशे स्थापितम्	२९ ।१५
त्रैविद्यम्	=एतत् सरस्वत्या रूपम्	२३ (११) ।१०
त्र्यक्षः	=शिवस्य नाम	२३ (२६) ।६५
त्र्यम्बकः	=शिवः, अयं विष्णुब्रह्मभ्यां स्तुतः	६ ।७८
	=शिवः, अस्मिन् या भक्तिः सा रक्षसां धर्मः	११ ।२६
	=शङ्करः, अयं पौषे मासि पूजनानन्तरं नमस्कार्यः	१७ ।४१
	=शिवः, एनं नमश्चकार देवर्षिर्नारदः	२३ (१५) ।३५
	=शङ्करस्य नाम	२३ (२३) ।३६ (७); २३ (२६) ।७३; १४२
त्वक्	=एषा स्पर्शं गृह्णाति	२३ (८) ।२४
त्वष्टा	=अयं वामनस्य भ्रूस्थानीय आसीत्	२३ (१०) ।५४
	=देवः, अयं चक्रानुचक्रौ प्रमथौ कार्त्तिकेयायादात्	३१ ।६६

द

दंष्ट्रप्रान्तः	=एकेन दंष्ट्रप्रान्तेन विष्णुना वसुन्धरा समुद्धता	२३ (९) ।२४
दंष्ट्रा	=एकयैव दंष्ट्रया विष्णुना पृथ्वी समुद्धृता	२३ (८) ।२६
दक्षः	=अस्य दुहिता सती	१ ।५
	=दक्षदुहिता	१ ।१६
	=प्रजापतिश्रेष्ठः	२ ।७
	=यज्ञे शक्रादयो देवा निमन्त्रिताः	२ ।८-१६

	=अयं धर्मादीन् देवान् यज्ञीयकार्येषु नियोजितवान्	२।१२-१५
	=लोकपतिः	२।१७
	=कनखले क्रतुमयजत्, क्रतोर्विनाशाय वीरभद्रादयो गणाः समागताः	४।१८-१९
	=अस्य कोपाज्जीवितं त्यक्तवती सती मेनायां पुनर्जन्म ग्रहीष्यतीति विष्णुना देवा विज्ञापिताः	२२।१८
	=द्विजोत्तमः, अयं ब्रह्माणमुपास्ते ब्रह्मसभायाम्	२३ (३)।२७
	=प्रजापतिः, एनं वामनाकृतिस्थितं प्रह्लादो ध्यानेन ददर्श	२३ (८)।१४
	=अस्याऽऽश्रमः कुरुक्षेत्रे 'दक्षेश्वर'-नामकं शिवलिङ्गमस्ति। तस्य दर्शनेनाश्वमेधयज्ञफलं प्राप्यते	२३ (१३)।२१
	=दक्षेश्वरनामकं शिवलिङ्गं कुरुक्षेत्रस्थं दृष्ट्वाऽश्वमेधयज्ञफलमवाप्यते	२३ (१३)।२१
	=अनेन गङ्गाद्वारे विमलोदानाम्नी सरस्वती प्रकटीकृता	२३ (१६)।३७
	=अस्य कन्या सती योगदृष्ट्या प्राणानुत्ससर्ज	२६।१०
	=अस्य विनाशकर्त्ता शिवः	२७।३१
दक्षतीर्थम्	=इदं कुरुक्षेत्रे स्थाणुवटं दक्षिणतः प्रतिष्ठितम्	२३ (२५)।२
दक्षदयिता	=इयं दक्षयज्ञविनाशने प्रवर्तमानं रुद्रं दृष्ट्वा विललाप	५।७
दक्षयज्ञकरः	=शिवः, अयं विष्णुब्रह्मभ्यां स्तुतः	७।७९
दक्षयज्ञक्षयंकरः	=शिवस्य नाम	२६।३४
दक्षयज्ञघ्नः	=शङ्करः, अयमाषाढमासेऽर्चनीयो नमस्कार्यश्च	१७।५९
दक्षादयः	=एतान् प्रजापतीन् स्थाणुः पूर्वमसृजत्	२३ (२८)।२६
दक्षाश्रमः	=अयं कुरुक्षेत्रेऽस्ति	२३ (१३)।२१
दक्षिणः	=कुमारद्वीपस्य दक्षिणभाग आन्ध्राः स्थिताः	१३।११
दक्षिणम्	=यमस्य दक्षिणे पार्श्वे पालाशः (वृक्षः) संजातः	१८।७
दक्षिणा	=यो जनश्चण्डालादन्त्यजाद् वा दक्षिणां प्रतिगृह्णाति सोऽश्मनि कीटको भवति	१२।३६

	=वेदान् अधीत्य गुरवे दक्षिणां च निवेद्य ब्रह्मचारी गार्हस्थ्याश्रमे प्रवेशं कर्तुं प्रभवेत्	१४ ।७
	=दिक्, अस्यां मुखं कृत्वा भोजनं न विधेयम्	१४ ।५१
	=इयं कालाष्टम्यां शङ्कराय धूपादिदानानन्तरं ब्राह्मणाय प्रदेया	१७ ।३३
	=इयं तिलसहिता हिरण्याक्षस्य प्रीत्यर्थं देया	१७ ।३५
	=मार्गशिरे मासि रुद्रार्चायां रक्तशालिर्दक्षिणारूपेण देया	१७ ।३९
	=पौषे मासि त्र्यम्बकस्यार्चायां मुद्गैः सहिता दक्षिणा देया	१७ ।४१
	=फाल्गुनमासे रुद्रार्चने नैवेद्यसहिता दक्षिणा द्विजातिभ्यो देया	१७ ।४८
	=इयं सनैवेद्यं चैत्रमासे देया	१७ ।५०
	=इयं श्रावणमासे हरार्चने श्वेतवृषभादेर्देया	१७ ।६२
	=अनया विरहिता (अपि) यज्ञास्तुभ्यं फलं दास्यन्तीति वामनो बलिमाह	२३ (१०) ।७९
	=दक्षिणार्थं ब्रह्मणाऽऽहूताः सुरभयो विवरान्निर्गताः	२३ (१४) ।३२
	=एतस्या हेतोर्नैमिषेया ऋषयः पुरा धृतराष्ट्रसमीपे ययुः	२३ (१८) ।२८
दक्षिणायनम्	=कर्कटराशिगते दिवाकरे दाक्षिणायनं प्रवर्तते	१७ ।१२
दक्षिणार्णवः	=अत्र शूरस्य भयात् पातालकेतुनामा दैत्यः संप्राप्तः	३२ ।४०
दक्षिणोत्तरम्	=यमस्य दक्षिणोत्तरे पार्श्वे कृष्णोदुम्बरकः (वृक्षः) संजातः	१८ ।७
दक्षेश्वरः	=एतन्नामकं शिवलिङ्गं कुरुक्षेत्रस्थं दृष्ट्वाऽश्वमेधयज्ञफलं प्राप्यते	२३ (१३) ।२१
दण्डः	=पराजितः पुरुषो दण्डं प्रयच्छति	८ ।५७
	=अमुमादाय वैवस्वतो यमः प्रह्लादं हन्तुकामो देवासुरसंग्रामेऽधावत्	१० ।१४
	=यस्मिन् देशे नृपो दण्डरुचिर्भवेत् तस्मिन् देशे बुद्धिमान् न वसेत्	१४ ।५६

	=इमं यमः कात्यायन्यै ददौ	१९ ।१५
	=आयुधम्, अनेन देवी दैत्यानां शिरांसि निर्बिभेद	२१ ।११
	=यमस्य, अयं कुपितया देव्या महिषासुरोपरि मुक्तः	२१ ।४५
	=न्यस्तदण्डं कश्यपं देवाः प्रणेमुः	२३ (३) ।९
	=ब्रह्मणः, एतेन हता इव दैत्या विष्णुतेजः प्रभावेण निस्तेजसोऽभूवन्	२३ (८) ।२
	=मरीचिः पलाशदण्डं वामनाय ददौ	२३ (९) ।३७
	=आषाढदण्डमादाय वामनो बलेरध्वरमगात्	२३ (९) ।३९
	=इमं गुरुः कार्त्तिकेयाय ददौ	३१ ।१०३
दण्डकः	=अस्य नाम्नाऽरण्यं प्रसिद्धम्	२३ (१८) ।५
	=प्रमथः, इमं सूर्यः कार्त्तिकेयाय प्रादात्	३१ ।६४
	=गणः, अयं युद्धे महासुरान् महार्णवे प्रचिक्षेप	३२ ।५३
दण्डकतीर्थम्	=कुरुक्षेत्रस्थितम्, इदं दर्शनादेव पुनाति	२३ (१४) ।४५
दण्डकम्	=एतन्नाम्ना प्रसिद्धमरण्यम्, इदं संत्यज्यागस्त्यो विन्ध्याचलं जगाम	१९ ।२८
	=एतन्नाम्ना प्रसिद्धमरण्यम्, पर्वकालावशिष्टे कालेऽगस्त्योऽत्र स्थितो भूत्वा तपश्चचार	१९ ।३४
	=तीर्थम् (कुरुक्षेत्रस्थम्)	२३ (१४) ।४५
दण्डकाः	=अयं दाक्षिणात्यो जनपदः	१३ ।४८
दण्डकारण्यम्	=वनम्, अत्र पुराकाले राघवेण राक्षसा हिंसिताः	२३ (१८) ।५
	=महावनम्	२३ (१८) ।६
दण्डधारी	=शिवस्य नाम	२३ (२६) ।१३७
दण्डविधानम्	=अस्य वर्जनं ब्राह्मणस्य परमं वित्तमुक्तम्	२३ (२२) ।२६
दत्तः	=पुत्रः, अयं षड्विधेषु दायादबान्धवेषु तृतीयोऽस्ति	३५ ।४१
दधि	=शुभं वस्तु, अस्य प्रातःकाले स्पर्शः कार्यः	१४ ।३६
	=अनेनाक्ताः सक्तवो ज्येष्ठमासे त्रिनेत्रस्य पूजने दक्षिणारूपेण देयाः	१७ ।५६
	=इदं श्रावणमासे हरार्चने नैवेद्यरूपेण समर्पणीयम्	१७ ।६१

	=इदमादाय कुरुक्षेत्रस्थे नागतीर्थे स्नानं कृत्वा नरो नागभयाद् विमुक्तो भवति	२३ (१३) ।२३
	=इदं युगन्धरे प्राश्य पापदेशजा काचित् स्त्री कुरुक्षेत्रे सपुत्रा वस्तुमियेष	२३ (१३) ।४७
दधीचिः	=अस्यार्थं व्यासेन मिश्रकतीर्थे तीर्थानि मिश्रितानि	२३ (१५) ।५३
दध्योदनम्	=इदं श्रावणमासे हरार्चने नैवेद्यरूपेण देयम्	१७ ।६१
दध्योदयः	=एतन्नामकः समुद्रः। अस्य प्रमाणम् = ५१२ लक्षयोजनानि	११ ।३७
दनुः	=अस्य हस्ततलान्महागज ऐरावतः समुत्पन्नः (दनुः, धनुरिति रुद्रस्य स्थाने पाठभेदः)	९ ।१५
	=दैत्यमाता, अस्या नन्दनाश्चण्डमुण्डादयो विन्ध्यपर्वतस्य मूलमागत्य तत्र सज्जितास्तस्थुः	२० ।२०
	=इयं कश्यपस्य भार्या	२९ ।१
	=अस्यास्त्रयः पुत्रा आसन् शुम्भ-निशुम्भ-नमुचिनामधेयाः	२९ ।१-२
	=अस्याः पुत्रौ शुम्भ-निशुम्भौ	२९ ।२०
	=कश्यपस्य भार्या, अस्याः पुत्रो मुर आसीत्	३४ ।३०
दनुनाथः	=महिषासुरः, अस्मै चण्डमुण्डाभ्यां कात्यायन्या अङ्गसौष्ठवादिकं वर्णितम्	२० ।१५
दनुनायकः	=दुन्दुभिः, अस्य देव्या सह संवादः	२० ।३३
दन्तधावनम्	=एतत् कृत्वा शिरःस्नानं कुर्यात्	१४ ।३४
दन्ताः	=नागस्य = हस्तिनो दन्तास्तक्षणाच्छुध्यन्ति	१५ ।७
दन्ती	=विरोचनस्य हस्ती, अयं देवासुरसंग्रामे वरुणं स्वदन्ताभ्यां प्रक्षिप्तवान्	१० ।२९
दन्तौ	=आभ्यां चिक्षुरो नाम महादैत्यः सर्वदेवमयवामनस्य पादाङ्गुष्ठं गृहीतवान्	२३ (१०) ।६१
दमः	=धर्मस्याङ्गम्	१४ ।१
	=अयं सार्ववर्णिकधर्मतयाऽङ्गीकृतः	१४ ।२
	=अनेन समन्वितैर्वामनार्थं यज्ञाः क्रियन्ते	२३ (१०) ।१९
दमादिगुणभूषणः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२२

दम्पती	=आभ्यां सह ये भेदं कुर्वन्ति ते नरकेषु पतन्ति	१२ ।५
दम्भः	=अस्य धर्मविनाशनात्मकस्य समारम्भविषये प्रह्लादस्य नर-नारायणौ प्रति प्रश्नः	७ ।४८
	=एतदर्थं यो जपकर्म समाचरति स मार्जारः प्रकीर्तितः	१५ ।२९
दया	=इयं मानवानां धर्मः	११ ।२३
	=इयं परलोकप्रदायिका	१६ ।२
	=कात्यायन्या नाम, अनेन नाम्ना सा देवैः स्तुता	१९ ।२०
	=अस्याः करणार्थम् उमादेवी शङ्करं प्रार्थितवती	२३ (२२) ।४७
	=अस्याः कर्षणे राजा कुरुः समन्तपञ्चकक्षेत्रे प्रवृत्तोऽभूत्	२३ ।२५
दयितम्	=(**पित्रादेर्मृतस्य**) इदं गुणवते दानेनाक्षयं भवति	१५ ।५१
दरदाः	=उत्तरापथवासिनो जनाः, एते स्वेच्छया क्षुद्रनदी-जलानि पिबन्ति	१३ ।४०
दराः	=उत्तरापथवासिनो जनाः, एते क्षुद्रनदीजलानि पिबन्ति	१३ ।४०
दरिद्रः	=बले राज्ये कश्चिद् दरिद्रो नासीत्	२३ (१०) ।२४
दर्पः	=अस्य हानिर्न भवति यस्य चेतसि चक्रपाणि-स्तिष्ठति	२० ।४४
	=अयं महासुराणां देव्या विनाशितः	२१ ।३८
	=दैत्यानां दर्पस्य विनाशक आसीद् देवसेनानीः शिवः	२२ ।१०
दर्पणः	=अस्य दर्शनं कृत्वा विद्वान् शिरःस्नानं कुर्यात्	१४ ।३५
दर्भः	=अनेन विना (अपि) कृता या क्रिया सा तुभ्यं फलं दास्यतीति वामनो बलिमाह	२३ (१०) ।८०
दर्वी	=ऋषिविशेषः, अनेन कुरुक्षेत्रे पूर्वं चत्वारः समुद्राः समाहृताः	२३ (२०) ।१
दर्शनम्	=रजस्वलायाः स्त्रिया दर्शनं न कर्तव्यम्	१४ ।४५
	=अस्माद् हरिः (= वामनः) उपकारकृदिति बलिः शुक्रमाह	२३ (१०) ।३०
	=तीर्थानां दर्शनं पापनाशनं भवति	२३ (१२) ।४

	=कुरुक्षेत्रस्थं दण्डकतीर्थं दर्शनादेव पुनाति	२३ (१४) ।४५
	=कुरुक्षेत्रस्थमानुषतीर्थस्य दर्शनात् किल्विषमुक्तो भवति मानवः	२३ (१४) ।५०
	=कुरुक्षेत्रस्थस्य तावदिडास्पदतीर्थस्य दर्शनादेव मानवो मुक्तिमवाप्नोति	२३ (१५) ।२५
	=कुरुक्षेत्रस्थे काम्यकवने पूषाख्यसूर्यस्य दर्शनान्मुक्तिर्लभ्यते	२३ (२०) ।३४
	=शिवस्य दर्शनाय देवाः कुरुक्षेत्रस्थे विहाराख्यतीर्थे समागताः	२३ (२१) ।११
	=कुरुक्षेत्रस्थसरस्वतीकूपस्य दर्शनान्नरो मुक्तिमाप्नोति	२३ (२१) ।१७
	=वटस्य दर्शनादिविषयकः प्रश्नो मार्कण्डेयेन सनत्कुमारं प्रति कृतः	२३ (२२) ।८
	=बालखिल्यमुनीनां दर्शनार्थं देवः शङ्करो नग्नः सन् पर्यटनं चकार	२३ (२२) ।५६
	=स्थाणुतीर्थस्य दर्शनान्मोक्षो लभ्यते	२३ (२३) ।१६
	=स्थाणुलिङ्गस्य दर्शनान्मुक्तिर्भवति	२३ (२४) ।२५
	=उमाया लिङ्गस्य दर्शनमात्रेण मानवः सिद्धिं प्राप्नोति	२३ (२५) ।८
	=कुरुक्षेत्रे रुद्रस्थापितलिङ्गस्य दर्शनादग्निष्टोमफलं लभ्यते	२३ (२५) ।२९
दर्शनशास्त्रम्	=योगः	३२ ।९
दर्शम्	=अमावस्यायां विहितं शुभकार्यम्। अनेन पितॄणां प्रीणनं कार्यम्	१५ ।४९
दश	=संख्या, धर्मस्याङ्गनाम्	१४ ।२
	=दशदिनपर्यन्तं ब्राह्मणेन मृतकक्रियाः कार्याः	१५ ।४७
	=राज्ञः संवरणस्य दश पद्मान्यासन्	२२ ।५३
दशनाः	=कात्यायन्याः, एते प्रजापतीनां तेजसः संजाताः	१९ ।१२
	=एते राज्ञः संवरणस्य शुभ्रा आसन्	२२ ।५१
दशनानि	=पूष्णो दशननाशनः शङ्करः स च ज्येष्ठमासे नमस्कार्यः	१७ ।५७

दशमः = वामनपुराणेऽयमन्धकविजयाख्योऽध्यायः १० ।५७

दशमं नरकम् = शिष्टाचारविनाशादिप्रयुक्तम् ३५ ।१०

दशमाध्यायः = इन्द्रान्धकयोर्युद्धम्, अन्धकेनेन्द्रस्य वज्रगजेन्द्रयोः पातनम्, इन्द्रस्यामरावत्यां प्रवेशः, यमप्रह्लादयोर्युद्धम्, यमान्धकयोर्युद्धम्, यमो युद्धक्षेत्रादन्तर्धानमगात्, वरुणविरोचनयोर्युद्धम्, शशाङ्कविरोचनयोर्युद्धम्,वरुणेन विरोचनगजेन्द्रयोः प्रक्षेपः, वरुणो जम्भादिदैत्यान् निपातयामास, अन्धकासुरस्य भयाद् वरुणः समुद्रं प्रविवेश, अग्निमायासुरयोर्युद्धम्, अन्धकासुरपरिघेण ताडितोऽग्निर्भयाद् रणाजिराद् बहिर्जगाम, अन्धकासुरेण देवसैन्यं विजितम्, अन्धकासुरः पातालेऽवसत् १० ।१-५७

दशमी = तिथिः, अस्यां भुजगेन्द्राः स्वपन्ति १७ ।१६

= तिथिश्चैत्रमासे शुक्लपक्षस्य, अस्यां पौण्डरीकतीर्थे स्नानादिकं मुक्तिमार्गप्रदायकमुक्तम् २३ (१५) ।४०

दशमोऽध्यायः = वामनस्य गत्या सपर्वतवनाया उर्व्याः संक्षोभः, उर्व्याः संक्षोभविषये बलिशुक्रयोः संवादः, ईश्वरो ममाध्वरमागमिष्यतीति शुक्रमुखादाकर्ण्य बलेः स्वकर्त्तव्यविषयिणी पृच्छा, शुक्रेण कर्तव्यविषयकोपदेशो बलिं प्रति, तत्र बलेः स्वकीयभिमतम्, बलेरध्वरे वामनस्योपस्थितिः, बलिना यज्ञवाटस्थितस्य वामनस्य पूजा, वामनेन पदत्रयपरिमितभूमेर्याचना, भूमिदानात् पूर्वं बलिपाणौ संकल्पार्थं तोये पतिते सति वामनस्य सर्वदेवमयरूपधारणम्, सर्वदेवमयेन वामनेनासुरपुङ्गवानां हननं पुरन्दराय त्रैलोक्यदानं च, भगवता सुतलं नाम पातालं विविधा वराश्चान्ये बलये प्रदत्ताः, बलेर्भगवन्तं प्रति तावदुपभोगोपपादक-उपादानविषयिणीपृच्छा, भगवता तं प्रत्युपादान कथनम्, बलेर्वरं प्रदाय विष्णोः =

	वामनस्य ततोऽदर्शनम्, बलिविष्ण्वोश्चरितस्य स्मरणे फलकथनम्	२३ (१०) ।१-९१
दशाननः	= गणः, इमं कुटिला कार्त्तिकेयाय ददौ	३१ ।८५
दशार्णा	= नदी, इयमृक्षपर्वतात् प्रसूता	१३ ।२५
दशार्णाः	= अयं विन्ध्यमूलस्थो जनपदः	१३ ।५३
दशाश्वमेधम्	= वाराणसीस्थम्	३ ।४१
	= पापमोक्षार्थं शङ्करेणात्र स्नानं कृतम्	३ ।४३
दशाश्वमेधिकम्	= एतत् कुरुक्षेत्रस्थं सुविश्रुतं तीर्थम्	२३ (१४) ।४९
दशेरकाः	= उत्तरापथवासिनो जनाः, एते क्षुद्रनदीजलानि पिबन्ति	१३ ।४१
दस्यवः	= एभिः पीड्यमाना जना ऋषीणां शरणं ययुः	२३ (२६) ।१८
दहतिः	= प्रमथः, इममंशुमान् (सूर्यः) कार्त्तिकेयाय ददौ	३१ ।७०
दहदहा	= इमां मातरं सर्वपापविमोचनतीर्थं कार्त्तिकेयाय ददौ	३१ ।९९
दहनः	= प्रमथः, इममंशुमान् (सूर्यः) कार्त्तिकेयाय प्रादात्	३१ ।७०
दाक्षायणी	= अस्याः पुत्रो वरुणः	१० ।४३
दाक्षिणात्याः	= दक्षिणदेशीया जनपदाः पुण्ड्रप्रभृतयोऽनेके परिसंख्याताः	१३ ।४६-४९
दाता	= इमं ये निवारयन्ति ते नरकेषु पतन्ति	१२ ।४
	= अस्य प्रतिषेधकः पुरुषश्चाण्डालसंज्ञको भवति	१५ ।३६
दानफलम्	= सर्वेषां दानानां फलं कुरुक्षेत्रस्थकेदाराख्यतीर्थे स्नानेन लभ्यते	२३ (१५) ।२७
दानबीजम्	= अस्य फलं कुरुक्षेत्रे प्राप्यते	२३ (१०) ।२६
	= इदं यदि जनार्दने पतति तर्हि मया सर्वमेवावाप्तमिति बलिः शुक्रमाह	२३ (१०) ।२८
दानम्	= एतद् मानवानां धर्मः	११ ।२३
	= धर्मस्याङ्गम्	१४ ।१
	= इदं सार्ववर्णिकधर्मतयाऽङ्गीकृतम्	१४ ।२
	= यः सदाचारमुल्लङ्घ्य प्रवर्तते तस्य दानमपि भूतये न भवति	१४ ।१६

=गृहस्थेन वृथा दानं न कर्त्तव्यम्	१४ ।४१
=वृथा दानेन धनक्षयो भवति	१४ ।४२
=अस्योचिते कालेऽभावात् पुरुषः 'षण्ढः' इत्युच्यते	१५ ।२८
=इदं विभवे सति यो न करोति स 'आखुः' इत्युच्यते	१५ ।३०
=भूमेर्दानेन पितरः सुप्रीता भवन्ति	१५ ।५०
=इदं परलोकप्रदायकम्	१६ ।२
=तुलास्थे सूर्ये द्वितीयायां लक्ष्मीधरमूर्तेर्दानं कर्त्तव्यम्	१७ ।२८
=इदं ज्येष्ठमासे त्रिनेत्रस्य पूजने कर्तव्यम्	१७ ।५५-५६
=इदं स्वशक्त्यनुसारेण कर्त्तव्यम्	१८ ।१७
=अस्य करणाय सूर्येणागस्त्यो भाषितः	१९ ।२४
=सूर्योक्तं दानं कर्तुमगस्त्यः प्रतिज्ञातवान्	१९ ।२५
=अस्य कर्षणे समन्तपञ्चके राजा कुरुः प्रवृत्तोऽभूत्	२३ ।२५
=इदं समन्तपञ्चकक्षेत्रे कुरुणा कृष्टे भूभागेऽक्षयं भवति	२३ ।३४
=अनेन वीराणां समागमः श्लाघ्यो भवति	२३ (१०) ।२३
=एतद् बाधाविहीनं सद् बलवत् स्मृतम्	२३ (१०) ।२३
=अस्मिन् कृते कुरुक्षेत्रे मया सर्वं प्राप्तमिति बलिः शुक्रमाह	२३ (१०) ।२७
=इदमुपभोगेन शतगुणं भवतीति बलिः शुक्रमाह	२३ (१०) ।२९
=वामनाय दत्तं दानं मम विशिष्टं स्यादिति बलिः शुक्रमाह	२३ (१०) ।२९
=अस्मिन् विघ्नो न त्वया कार्य इति बलिः शुक्रं प्रार्थितवान्	२३ (१०) ।३१
=अविधिपूर्वकम् (अपि) दत्तस्य दानस्य फलं त्वमवाप्स्यसीति वामनो बलिमाह	२३ (१०) ।७८
=ज्येष्ठमासे शुक्लपक्षस्य द्वादश्यां दानेन परमं पदमवाप्यते	२३ (१०) ।८४
=कन्यादानम्, इदं कुरुक्षेत्रस्थे पुष्कराख्यतीर्थे कार्त्तिक्यां कृत्वाऽभिमतं फलं लभ्यते	२३ (१३) ।४३

दानवः	=प्रह्लादः	७ ।२२; २३ (२) ।४
	=रक्तबीजः	१८ ।३८
	=नमरः	१८ ।३८; २० ।३७; २१ ।४
	=महिषासुरः, अयं कात्यायन्या नाशितः	१८ ।३८
	=रम्भः, अयं वह्निसकाशाद् वरं (पुत्रप्राप्तिरूपम्) प्राप्तवान्	१८ ।५३
	=महिषाख्यः, अस्य त्रासेन देवा रसातलं गन्तुमाशङ्कितवन्तः	१९ ।४
	=चण्डो मुण्डश्च, एतौ द्वावपि विन्ध्यशृङ्गे वसन्तीं कात्यायनीमपश्यताम्	२० ।१
	=नमरः, अयं सिंहोपरि त्रिशूलं रणे प्राहिणोत्	२१ ।१४
	=नमरः, एनं सिंहस्तलेनाऽऽजघान	२१ ।१६
	=नमरः, गतासुमेनं देवी सव्येन पाणिना भ्रामयामास	२१ ।१७
	=करालास्यः	२१ ।३१
	=उग्रकार्मुकः	२१ ।३२
	=उदग्रः	२१ ।३२
	=उद्धतः	२१ ।३२
	=दुर्धरः	२१ ।३२
	=दुर्मुखः	२१ ।३२
	=वाष्कलः	२१ ।३२
	=विडालनयनः	२१ ।३२
	=बलिः	२३ (३) ।३; २३ (४) ।२
	=बलिः, अनेन युद्ध आदित्याः पराजिताः	२३ (३) ।३
	=हिरण्यकशिपुः, एनं नारसिंहेन वपुषा विष्णुर्जघान	२३ (१५) ।२९
	=महिषः	२९ ।१८
दानवपतिः	=बलिः, अस्य प्रह्लादेन सह संवादः	२३ (८) ।८
दानवयूथपालः	=दुन्दुभिनामा दैत्यः, अयं महिषासुरेण देव्याः समीपे प्रेषितः	२० ।२१
दानवराट्	=महिषासुरः, कात्यायनी महिषासुरमुद्दिश्य शब्दममुं प्रयुक्तवती	२० ।३०

दानवसत्तमः	=महिषाख्यः, एनं देवी प्रत्यपीडयत्	२० ।४२
दानवाः	=एभिः प्रह्लादो दृष्टः सभाजितश्च	८ ।७०
	=दनुपुङ्गवाः, हयग्रीयप्रमुखाः, एते हुताशादिसुरैः सह द्वन्द्वयुद्धं चक्रुः	९ ।४८
	=एभिः पाताले महिषीमादाय प्रविष्टो रम्भासुरः परित्यक्तः	१८ ।५८
	=एषां नाशनार्थं दुर्गा विन्ध्यपर्वतस्योर्ध्वशृङ्गे स्थिताऽभूत्	१९ ।३६
	=एते देव्या वाहनेन केसरिणा निषूदिताः	२१ ।९
	=एते देव्या वध्यमानाः पलायिताः	२१ ।११
	=एतेषां बलं देवी कात्यायनी भूतगणैः सार्धं शातयामास	२१ ।२२
	=एते वाष्कलप्रभृतयः कात्यायन्या सह युद्धार्थमाजग्मुः	२१ ।३३
	=एषां विनाशकं विष्णोश्चक्रम्	२१ ।४४
	=एषामिन्द्रो महिषः	२२ ।११
	=एते बहवो वासुदेवबलाधिका मदधीनाः सन्तीति बलिः प्रह्लादं प्रत्याह	२३ (८) ।३१
	=इमे विनाशं यास्यन्ति तवाविवेकवशादिति प्रह्लादो बलिं प्रत्याह	२३ (८) ।३४
	=इमे विष्णोरेकांशांशकलातः प्रादुर्भूताः	२३ (८) ।३६
	=इमे बलिना यज्ञभाग्भुजः कृताः	२३ (१०) ।१२
	=एषां कृते भीषणाः पञ्चनदा रुद्रेण कृताः	२३ (१३) ।२७
	=एते सिंहादिभिर्निपात्यमानाः शुम्भमुपाश्रयन्त	२९ ।८८
	=एते देव्या विविधै रूपैर्निपात्यमानाः प्रलयं प्रजग्मुः	३० ।२३
दानवाधमः	=महिषासुरादिः, कोऽप्येष देवीवचनानुसारेण देव्याः समक्षं स्थातुं नैव शक्नोति	२० ।४०
दानवेन्द्रः	=महिषाख्यो दानवः, अनेन देवाः पराजिताः	२२ ।११
दानवेन्द्राः	=एषां शिरोभिश्चण्डमारी देवी तावदनुपमां स्रजमकरोत्	२९ ।७८-७९

दानवेश्वरः	=प्रह्लादः, अनेन नरस्य नारायणस्य च मूर्ध्नि गदा प्रक्षिप्ता	८।१-३
	=दुन्दुभिः	२०।३५
	=बलिः, अस्य प्रह्लादेन सह संवादः	२३ (८)।७
	=बलिः	२३ (१०)।७४
	=बलिः, अस्य वामनेन सह संवादः	२३ (१०)।७४
दानानि	=सर्वेषां दानानां फलं स लभते यः कुरुक्षेत्रस्थे केदाराख्यतीर्थे स्नाति	२३ (१५)।२७
	=एतानि ज्येष्ठाश्रमाख्यतीर्थे विष्णुना प्रतिष्ठितेभ्यो विप्रेभ्यो दत्तान्यक्षयाणि भवन्ति	२३ (१५)।७०
दान्तः	=विष्णुः, अनेन नाम्नाऽदितिर्विष्णुं नमश्चकार	२३ (६)।१९
दाम्भिकः	=नारायणः, एनं विजेतुं प्रह्लादश्चिन्तयामास	८।३०
दायः	=विभक्तव्यपितृद्रव्यम्, अयमिन्द्रस्यासुरैर्हृतः	२३ (७)।९
दायादः	=अस्य परिकल्पनां प्रवक्तुं सनत्कुमारो ब्रह्माणं प्रार्थितवान्	३५।३२
दायादबान्धवः	=एते औरस-क्षेत्रज-दत्त-कृत्रिम-गूढोत्पन्न-अपविद्धभेदैः षड्विधा भवन्ति	३५।३४
	=एते नामधारकाः कानीन-सहोद-क्रीत-पौनर्भव-स्वयंदत्त-पारशवभेदैः षड्विधा भवन्ति	३५।३६
दारक्रिया	=पाणिग्रहणसंस्कारः, स्वपुत्रस्य दारक्रियार्थं संवरणो नरपतिर्यत्नमकरोत्	२३।४
दाराः	=परदाराणामवमर्शित्वं रक्षसां धर्मः	११।२६
	=परस्य दारेषु ये रता भवन्ति तेषामालिङ्गनार्थं नरके वह्नितप्ता शाल्मली समुपस्थाप्यते	१२।३०
	=एषां परिग्रहो गृहस्थेन वृथा न करणीयः	१४।४१
	=एषां वृथा परिग्रहात् संतत्या हानिर्लोके भयं च भवति	१४।४३
	=परस्य दारासु नोत्तमैर्जनैर्बुद्धिः कार्या,=परदारा मृत्यवे प्रभवन्ति	१४।४४
दारु	=अनेन रचितं वस्तु जलेन शुध्यति	१५।४

	=अस्मिन् वह्निरवस्थितः	२३ (११) ।८
दारुवनम्	मदनाभिसृतो हर इह विवेश, अत्र हराय शापः प्रदत्तो भार्गवाङ्गिरसैर्महर्षिभिः	६ ।५८-६५
	=अत्र विष्णुब्रह्मभ्यां हरः स्तुतः	६ ।८१
	=अत्र शिवलिङ्गस्य नयने बालखिल्या यत्नं चक्रुः	२३ (२३) ।१७
दाल्भ्यः	=दल्भिपुत्रो बकः	२३ (१८) ।२६
दासः	=दासवर्गेण यत् कृतं तच्छुचि भवति	१५ ।८
दासी	=दासीं कृत्वा विन्ध्यवासिनीं देवीमानयेति शुम्भो धूम्रलोचनमादिदेश	२९ ।४१
दाहः	=अनेन भूमिर्विशुध्यते	१५ ।११
दिक्	=उदङ्, प्राङ्	१४ ।३३
	=प्राची	१८ ।२६
	=प्रतीची	१८ ।२८
	=उत्तरा	१८ ।२९
	=ऐशानी	१८ ।३०
	=आग्नेयी	१८ ।३१
	=नैर्ऋती	१८ ।३२
	=वायवी	१८ ।३३
	=याम्या = दक्षिणा दिक्, अत्रागस्त्यो जगाम	१९ ।३२
	=उदीची	२३ (४) ।७
	=सौम्या = उत्तरा	२३ (४) ।१६
	=प्राक् = प्राची	२३ (६) ।१२
	= आशा = पश्चिमा	२३ (११) ।२
	=पश्चिमा	२३ (१२) ।२
	=पश्चिमा, इमां सरस्वती नदी प्रयाता	२३ (१२) ।२
	=स्थाणुतीर्थस्य पश्चिमदिग्भागे विश्वामित्रस्याऽऽश्रम आसीत्	२३ (१९) ।३
	=सरस्वत्याः प्राची दिक्, एनां नरनारायणादयो देवा निषेवन्ते	२३ (२१) ।२२
दिग्वासाः	=दिगम्बरोऽपि नग्नो भूत्वा परिभ्रमणं न कुर्यात्	१४ ।४७

दिङ्नामानि	=उदङ्ग; प्रतीची, दक्षिणा	१४ ।५१
दिण्डिः	=रुद्रगणः, अनेन समन्वितं रुद्रमर्चयित्वा शिवलोकः प्राप्यते	२३ (१५) ।१५
	=देवः, कपिस्थलातीर्थेऽस्य नमस्कारेण केदारफलं लभ्यते	२३ (१५) ।१६
दितिजः	=दुन्दुभिः, अयं महिषासुरोक्तं वाक्यं देव्यै कथितवान्	२० ।२४
	=दैत्यो दुन्दुभिः, अनेन महिषासुरसन्देशः कात्यायन्यै कथितः	२० ।३०
दितिजोत्तमः	=प्रह्लादः, अस्य बलिना सह संवादः	२३ (९) ।३
दितिनन्दनः	=बलिः	२३ (८) ।४२
दितिवनम्	=वनं कुरुक्षेत्रस्थम्	२३ (१३) ।४
दितीशः	=प्रह्लादः, अयं गदामादाय वेगेन नारायणमाक्रान्तवान्	७ ।६४
	=महिषासुरः, एनं कात्यायन्या विषये चण्डमण्डावूचतुः	२० ।२
दितीश्वरः	=प्रह्लादः	७ ।३५
दिनत्रयम्	=क्षत्रियाणां सद्यः शौचमपि दिनत्रयपरिमितेन कालेन भवति	१५ ।४६
दिनम्	=सोमस्य दिने दृषद्वत्यां स्नात्वा कृतेन श्राद्धेन गयाश्राद्धपुण्यं लभ्यते	२३ (१५) ।४७
	=मङ्गलस्य वैशाखमासस्य षष्ठ्यां तिथावनरकतीर्थे स्नानेन नरः पापमुक्तो भवति	२३ (२०) ।२६
	=आदित्यस्य दिने काम्यकवने स्नात्वा नरो मनसा चिन्तितं लभते	२३ (२०) ।३४
दिनानि	=ब्राह्मणादिभिर्मृतकक्रियाः कतिचिद्दिनानि यावत् पृथक् कार्याः	१५ ।४७
दिवसः	=सुकेशिपुरं वीक्षमाणाश्चक्रवाकपक्षिण इदं वदन्ति यदयं दिवस एवेति, एतेन ते वियोगं नालभन्त	१६ ।१३

दिवसनामानि	=अर्कः, भूमिपुत्रः, शुक्रः, रविजः, बुधः	१४ ।४९
दिवस्पतिः	=सूर्यः, अयं राक्षसानां छिद्रं ज्ञातवान्	१६ ।३७
दिवा	=अस्मिश्चन्द्रो दिवाकरं परिभूय सूर्यवत् तपन्नास्ते	१६ ।२८
	=तपत्या अवलोकनानन्तरं संवरणो नाम राजा निशि निद्रां विहाय दिवा सुष्वाप	२२ ।३९
	=दिवसः, इदं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।३३
	=अस्मिन् काले कुरुक्षेत्रे नित्यं भ्रमणकारिण्या कयाचिद् यक्षिण्या पापदेशजा स्त्री भयवचनैराक्षिप्ता	२३ (१३) ।४८
दिवाकरः	=सूर्यः, अयं तस्मै प्रकुप्येद् यः निजं धर्मं संत्यजेत्	१५ ।६६
	=सूर्यः, अयं भर्तृशोकार्तया चक्रवाककान्तया तपसाऽऽराधितः	१६ ।१७
	=सूर्यः, एनं परिभूय चन्द्रः सूर्यवत् तपति	१६ ।२८
	=सूर्यः, अस्य 'लोल' इति नामधेयं शङ्करश्चकार	१६ ।५९
	=अयं यथा शङ्करेण भूमितले पातितस्तत्सर्वं पुलस्त्यो नारदं प्रति कथयामास	१६ ।६२
	=अयं यदा कर्कटराशिं संप्रयाति तदा देवानां रजनी दक्षिणायनं च प्रवर्तेते	१७ ।१२
	=सूर्यः, अयं यावद् वृश्चिकराशौ वर्तते तावद् देवादीनां शयनं भवति	१७ ।२६
	=सूर्यः, अस्य गतिर्विन्ध्यपर्वतेन निरुद्धा	१९ ।२३
	=सूर्यः, अस्य वचसः पूर्तये महर्षिरगस्त्यः प्रतिज्ञातवान्	१९ ।२५
	=देवः सूर्यः, अयं महिषासुरो बभूव	२० ।२६
	=सूर्यः, अस्य समीपे वरुणात्मज उपविष्टः	२२ ।४३
	=सूर्यः, अयं वरुणात्मजं प्रति तदीयागमने हेतुमपृच्छत्	२२ ।४४
	=सूर्यः, अनेन वसिष्ठाय तनूजा तपती संवरणार्थे निवेदिता	२२ ।४६
	=सूर्यः, अयं वसिष्ठेन संवरणस्य कृते तपत्या दांनाय प्रार्थितः	२२ ।५९

	=सूर्यः, अस्मिन् उत्तरायणस्थेऽपि दैत्यपथे संप्रवृत्ते सति दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।८-१२
	=सूर्यः, अयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।३३
	=सूर्यः, राहुग्रस्ते दिवाकरे संनिहत्यां कृतस्य श्राद्धस्य फलं कुमाराभिषेकतीर्थे कृतेन श्राद्धेन संप्राप्यते	२३ (२०) ।९
	=सूर्यः, अस्मिन् मध्यं प्राप्ते सति सर्वाणि तीर्थानि स्थाणुतीर्थमायान्ति	२३ (२४) ।४
	=अयं निशुम्भेन बहुशो निर्जितः	२९ ।२१
दिवाकराः	=सूर्याः, एषां तेजसा कात्यायन्याः पादाङ्गुल्यो बभूवुः	१९ ।११
	=एते सर्वे देवाः कुटिलां ब्रह्मलोकं नीतवन्तः	२५ ।६
	=एते स्वास्तिविधानार्थं प्रार्थिताः	३२ ।१९
दिवानिशम्	=अस्मिन् प्रह्लादकोपेन परिदग्धः सन् बलिः परितप्तो बभूव	२३ (९) ।६
दिव्यः	=धर्मः, अयं प्लक्षादिशाकान्तद्वीपेषु वसतां नराणां कृते प्रवर्तते	११ ।४५
दिव्यगतिः	=वरुणस्य वाहनं जलधिसंज्ञकः शिशुमार आसीत्	९ ।१७
दिव्यदेहः	=इमं वेनः स्थाणुतीर्थस्य माहात्म्यात् प्राप्तवान्	२३ (२६) ।६२
दिव्यम्	=दिव्यं वर्षसहस्रं यावत् प्रह्लादो नारायणेन सह युद्धं चक्रे	८ ।३१
	=सरस्वत्या रूपम्	२३ (११) ।१४
दिव्या	=देवी, इयं बलिसमीपमागता	२३ (२) ।१९
	=ईदृशीं वाणीं श्रोष्यथेति ब्रह्मा देवान् प्राहुः	२३ (४) ।११
दिशः	=अष्टौ, आसु नारायणस्य चरितं ख्यातिं जगाम	७ ।२१
	=इमा नारायणप्रह्लादाभ्यां युद्धे शरोत्करैश्छादिताः	८ ।११
	=आसु सर्वासु शुद्धासु सतीषु दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।७
	=इमाः सर्वाः प्रह्लादादिभिर्गोपिताः	२३ (२) ।९

	=एता वामनस्य श्रोत्रस्थानीया आसन्	२३ (१०) ।५२
दिशाः	=दिशावासिनः प्राणिनो वेनेन नमस्कृताः	२३ (२६) ।५९
दिशाप्रवाहः	=कुरुक्षेत्रे सरस्वती नदी पूर्वादिदिशाप्रवाहेण याति	२३ (२१) ।९
दिशाभागः	=सरस्वत्याः पश्चिमे दिशाभागे यमुना नदी संश्रिता	२३ (२१) ।८
दीक्षाः	=अस्याः प्रतिष्ठया संयुक्ता विप्रा विष्णुना ज्येष्ठाश्रमाख्यतीर्थे प्रतिष्ठिताः	२३ (१५) ।६९
दीक्षितः	=शिवस्य नाम	२३ (२६) ।१३४
दीनः	=ईदृशोऽहमस्मीति त्रिनेत्रः प्रार्थनीयः	१७ ।४५
	=अयं वेनकृतशिवस्तवश्रवणेन महतो भयाद् विमुच्यते	२३ (२७) ।१०
दुःखम्	=इदं देवा मुमुचुर्वामनावतारे संजाते	२३ (९) ।१४
	=स्वपितुर्दुःखेन वेनपुत्रो दुःखितो बभूव	२३ (२६) ।४४
दुःखितः	=बलिराज्ये कश्चिद् दुःखितो नासीत्	२३ (१०) ।२४
दुःसहः	=शिवस्य नाम	२३ (२६) ।१३९
दुःसहाः	=सर्वेषु दुःसहेषु वृषेषु नीलवर्णो वृषः श्रेष्ठः	१२ ।५५
दुःस्वप्नः	=अयं प्रभातकाले शिवोक्तस्य मङ्गलस्य पठनेन नश्यति	१४ ।२८
	=देव्याः स्तुतिपराणां दुःस्वप्ननाशो भवति	३० ।६५
दुग्धम्	=इदं सर्वेषु श्वेतगुणयुक्तेषु वस्तुषु श्रेष्ठम्	१२ ।५२
दुग्धाब्धिः	=शाकद्वीपानन्तरं वर्तमानः षष्ठस्समुद्रः, अस्य प्रमाणम् = २०४८ लक्षयोजनानि, अत्र शेषपर्यङ्के हरिरास्ते	११ ।३८
दुग्धोदा	=महानदी, इयं सह्यपर्वतस्य पाददेशाद् विनिर्गता	१३ ।३१
दुन्दुभयः	=वाद्यानि, इमे नारायणप्रह्लादयोर्युद्धकाले तावदाकाशे देवैर्वादिताः	८ ।९
दुन्दुभिः	=अस्य वाहनं महोरगः	९ ।२९
	=दानवयूथपालः	२० ।२१
	=दैत्यः, अस्य मयनामा दैत्यः, अयं महिषासुरेण देव्याः समीपे प्रेषितः	२० ।२१

	= वाद्यम्, अस्य स्वन इव स्वन आसीद् मयपुत्रस्य, एतेन स्वनसाम्यवशात् तदीयं नाम दुन्दुभिरिति प्रयुक्तम्	२० ।२१
	= अस्य देव्या सह संवादः	२० ।२३
	= दूतः, महिषासुरेण देव्याः समीपे सम्प्रेषितः	२० ।२२
	= मयस्य पुत्रः, अयं महिषासुरेण प्रेषितो देव्याः समीपं जगाम	२० ।२२
	= दैत्येन्द्रः	२० ।२३
	= दितिजः	२० ।२४
	= अयं देव्यै महिषासुरसन्देशं कथयामास	२० ।२५; २० ।३०
	= मयस्य पुत्रः, अस्य कात्यायन्या सह संवादः	२० ।३०
	= दैत्येशः	२० ।३१
	= मयजः	२० ।३२
	= दानवेश्वरः, अयं देव्या वचनं महिषाय यथातथं निवेदयामास	२० ।३५
	= दानवेश्वरः	२० ।३५
	= वाद्यम्, इममाहत्य उदूखलमेखलानाम्नी महायक्षी कुरुक्षेत्रे नित्यं भ्रमति	२३ (१३) ।४५
	= वाद्यम्, इममाहत्य काचिद् यक्षी कुरुक्षेत्रे निशि पापदेशजां स्त्रियं बोधितवती	२३ (१३) ।४६
दुरतिक्रमः	= शिवस्य नाम	२३ (२६) ।१३९
दुराचारः	= अनेन पुरुषः क्वचिदपि न नन्दति	१४ ।१७
दुराराध्यः	= शङ्करस्य नाम	२३ (२३) ।३६ (६)
दुरिष्टम्	= दुरितं पापं वा, किं केनचिद् दुरितेनासुरा निस्तेजसोऽभवन्निति बलिः प्रह्लादं पप्रच्छ	२३ (८) ।३
दुरोदरम्	= देवासुरयोर्युद्धं प्राणपणोपविद्धं दुरोदरम् = द्यूतमिवाभूत्	९ ।४४
दुर्गः	= संसारगहनं दुर्गं स निस्तरेद् यः कुरुक्षेत्रस्थितकलसंतीर्थस्य तटे स्थितां दुर्गां पश्येत्	२३ (१५) ।१९
दुर्गतिः	= इमां पापिनां कृते कुरुक्षेत्रस्य द्वारपालः कपिलनामा महायक्षः प्रयच्छति	२३ (१३) ।४४

	=एतां स नावाप्नोति यः कुरुक्षेत्रस्थ इडास्पदतीर्थे स्नाति पितृदेवगणान् अर्चयति च	२३ (१५)।२६
	=दुर्गातीर्थे पितृणां पूजनेन दुर्गतिर्नावाप्यते	२३ (२१)।१६
दुर्गन्धा	=नदी, इयं विन्ध्यपर्वतस्य पादात् प्रसूता	१३।२९
दुर्गा	=देवी कात्यायनी, अनया महिषासुरादेर्वधः कृतः	१८।४१
	=कात्यायनी, इयं दानवनाशनार्थं विन्ध्यपर्वतस्योर्ध्वशृङ्गे स्थिताऽभूत्	१९।३६
	=कात्यायनी देवी, अस्या दुन्दुभिना सह संवादः	२०।३०
	=देवी कात्यायनी, अनया सह योद्धुं नमरो नाम दानव आजगाम	२०।३८
	=कात्यायनी, अनया वर्मबन्धनविषयकं निवेदनं देवानां नाङ्गीकृतम्	२०।४०
	=कात्यायनी देवी, अनया दानवसैन्ये धनुर्नामितम्	२१।७
	=देवी कात्यायनी,. अनया वध्यमाना दैत्या दानवाश्च पलायिताः	२१।१२
	=देवी कात्यायनी, इयं चिक्षुरप्रहितं शरसङ्घं स्वशरैश्चिच्छेद	२१।२५
	=देवी, इयं लीलया वीणां जग्राह	२१।३४
	=देवी कात्यायनी, अस्याः समक्षं महिषासुरः समाजगाम	२१।४१
	=देवी, इयं महिषासुरस्य पृष्ठमारुरोह	२१।४६
	=देवी कात्यायनी, इयं देवान् सान्त्वयित्वाऽन्तर्हिता बभूव	२१।५२
	=देवी, इयं कुरुक्षेत्रस्थिते कलसीतीर्थे स्थिता	२३ (१५)।१८
	=देवी, इमां कुरुक्षेत्रस्थितकलसीतीर्थस्य तटे स्थितां दृष्ट्वा संसारगहनं दुर्गं निस्तरेत्	२३ (१५)।१९
	=देवी	२३ (२१)।१५
	=अनया सेवितं दुर्गातीर्थं कुरुक्षेत्रे स्थितम्	२३ (२१)।१५
	=देवी, इयं चण्डमुण्डावापतन्तौ वीक्ष्य वक्त्रे त्रिशाखां भ्रुकुटीं चकार	२९।५५
	=देवी, इयं कुपिता सती चण्डं मुण्डं च विशिरस्कं चकार	२९।८१

	=अनया सह शिवस्य संवादः	३० ।११-१२
दुर्गाः	=सर्वेषु दुर्गमवस्तुषु वैतरणी नदी प्रधाना	१२ ।५६
	=एते पश्चिमायामाशायां स्थिता जानपदा जनाः	१३ ।५२
दुर्गातीर्थम्	=इदं कुरुक्षेत्रे स्थितम्	२३ (२१) ।१५
दुर्जयः	=नारायणः, अयं युद्धे देवासुरैरपि दुर्जय आसीत्	८ ।३४-३५
	=दैत्यः, अयं वासुदेवबलाधिको बलिना प्रोक्तः प्रह्लादं प्रति	२३ (८) ।३१
	=शिवस्य नाम	२३ (२६) ।१३९
दुर्ज्ञेयः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२३
दुर्दरः	=कुमारद्वीपस्थः पर्वतः	१३ ।१६
	=पर्वतः, अयं हिमाद्रिभवनमाजगाम	२६ ।४८
दुर्दशः	=शिवस्य नाम	२३ (२६) ।१३९
दुर्दान्तः	=शिवस्य नाम	२३ (२६) ।१३४
दुर्धरः	=दानवः, अयं देव्या सह युद्धार्थमाजगाम	२१ ।३२
दुर्धर्षः	=शिवस्य नाम	२३ (२६) ।१३९
दुर्भिक्षम्	=अस्मिन्नकिञ्चनः पुत्रादिबन्धुवर्गो येन स्वपोषणपरेण मानवेन परित्यज्यते स श्वयोनौ पात्यते	१२ ।२६
दुर्मुखः	=दानवः, अयं देव्या सह युद्धार्थमाजगाम	२१ ।३२
	=शिवस्य नाम	२३ (२६) ।१३६
दुर्लभम्	=त्रैलोक्यस्यापि दुर्लभं तीर्थमस्ति कुरुक्षेत्रस्थितं सरकाभिधम्	२३ (१५) ।२०
	=भुवि दुर्लभं तीर्थं किंरूपनामकमुच्यते कुरुक्षेत्रस्थितम्	२३ (१५) ।२७
	=एतादृशं वस्तु सप्तसारस्वते तीर्थे स्नात्वा नरः शिवार्चनेन लभते	२३ (१७) ।२२
	=इह लोके परत्र च दुर्लभं (वस्तु) मानवः प्राच्यां सरस्वत्यां श्राद्धं कृत्वा लभते	२३ (२१) ।२३
	=इदमपि शिवलिङ्गस्य पूजनेन प्राप्यते	२३ (२३) ।११
दुर्वारणः	=शिवस्य नाम	२३ (२६) ।१३९

दुर्वासाः	=अत्रिपुत्रः, शङ्करांशश्च	२ ।४८
दुर्विज्ञेयः	=शङ्करस्य नाम	२३ (२३) ।३६ (६)
दुर्विषहः	=शिवस्य नाम	२३ (२६) ।१३९
दुष्कृतम्	=ब्रह्महत्या-सुरापानादिकार्यम्, अनेन महारौरवादिनरकेषु पतनं भवति	१२ ।४२
	=एतत् कुर्वन्तोऽपि जनाः कुरुजाङ्गलस्य संसेवनेन कलुषैर्विमुक्ता भवन्ति	२३(१२) ।१३
	=राज्ञो धृतराष्ट्रस्य दुष्कृतेन तदीयं राष्ट्रमक्षीयत	२३ (१८) ।३१
	=इदं कर्म य आचरन्ति तेषामपि कृते प्राची सरस्वती पुण्या वर्तते	२३ (२०) ।२०
	=तस्य दुष्कृतं नश्यति यः प्राच्यां सरस्वत्यां त्रिरात्रं व्रतादिकमाचरति	२३ (२१) ।२१
	=इदं बालखिल्यानां देवी तावदुमाशङ्करमपृच्छत्	२३ (२२) ।४७
	=इदं स्थाणुतीर्थप्रभावतो नश्यति	२३ (२४) ।२४
दुष्कृतानि	=एषां सर्वेषां नाशनी तावदरुणा नदी वर्तते	२३ (१९) ।३०
दुष्टचारी	=कृतघ्नः पुरुषोऽनेन शब्देन बोधितः, अस्य निष्कृतिर्न विद्यते	१२ ।५७
दुष्प्रकाशः	=शिवस्य नाम	२३ (२६) ।१३९
	=शङ्करस्य नाम दुस्तरसंसारमहासंहारकरः	२३ (२३) ।३६(२५)
दुहिता	=अनया सहैकस्मिन्नासने गृहस्थः स्थितिं न कुर्यात्	१४ ।४६
दूतः	=महिषासुरस्य चण्डो मुण्डश्च, एतौ कात्यायन्या विषये महिषासुरमूचतुः	२० ।२
	=महिषासुरस्य दुन्दुभिनामा, अयं सन्देशहरत्वेन देव्याः समीपे जगाम	२० ।२२
दूर्वा	=शुभं वस्तु, अस्याः प्रातःकाले स्पर्शः करणीयः	१४ ।३६
दूषणः	=अयं कुरुक्षेत्रे महेश्वरं संपूज्याऽभिलषितकामनाप	२३ (२५) ।२३
दृढशृङ्गः	=पर्वतः, अयं हिमाद्रिभवनमाजगाम	२६ ।४७
दृषद्वती	=देवनदी, अस्याः सरस्वत्याश्चान्तरे देवनिर्मितो देशः 'ब्रह्मावर्त' इति नाम्ना प्रसिद्धः	२३ (१२) ।९

=नदी कुरुक्षेत्रस्था, अस्यां स्नानेनाग्निष्टोमयज्ञफलं लभ्यते २३ (१५) ।४६
=नदी, अस्याः संगमे स्नानेन नरः सर्वपापैः प्रमुच्यते २३ (१५) ।५७
दृष्टिः =भगवतो वामनस्य दृष्टावशेषाणि ऋक्षाणि (नक्षत्राणि) स्थितान्यासन् २३ (१०) ।५१
=शङ्करेण स्वदृष्ट्या दिवाकरो न संप्रदग्धः १६ ।६२
देवः =नारायणः, अयं प्रह्लादेन स्वविजयार्थं स्तुतः ८ ।४९
=ब्रह्मा ११ ।३२
=शिवः १४ ।२०; (२३ (१५) ।३१; २३ (१५) ।३४; २३ (२१) ।११
=अस्य मार्गे पुरीषाद्युत्सर्गं न कुर्यात् १४ ।३०
=एतदीयखातेषु स्नानं कर्तव्यम् १५ ।२२
=अग्निः १९ ।३
=अनिलः १९ ।३
=अश्विनीकुमारः १९ ।३
=इन्दुः १९ ।३
=जलेशः १९ ।३
=वेधाः १९ ।३
=शक्रः १९ ।३
=सूर्यः १९ ।३; २३ (१४) ।२८
=हुताशः २१ ।४३
=रुद्रः २२ ।९
=अमरः २२ ।३८; ४८
=पुरन्दरः २३ (३) ।२
=ब्रह्मा, एतमवलोक्य देवाः शिरोभिः प्रणता बभूवुः २३ (३) ।३६
=विष्णुः, अस्य सकाशाद् वरप्राप्तयेऽदिति-कश्यपौ ब्रह्मणा प्रेरितौ २३ (४) ।१४
=विष्णुः, अस्य कश्यपादिदेवैः पूजा कृता २३ (६) ।१०
=विष्णुः, अयं प्रह्लादेन नमस्कृतः २३ (८) ।२५

=वामनः, एनं स एव जनो वेत्ति यस्मिंस्तस्य प्रसादो भवति	२३ (९)।३०
=सर्वदेवमयो देवो वामनः, अयं बलेरध्वरमगात्	२३ (९)।३९
=वामनः अयं बलेरध्वरमुपेयाय	२३ (१०)।११
=वामनः, अयं सत्त्वे स्थितः	२३ (१०)।१३
=वामनः, अयं संसारस्याघहारी	२३ (१०)।१७
=चन्द्रमाः	२३ (१०)।५३
=वामनः, अस्य बलिना सह संवादः	२३ (१०)।७७
=सनातनमेनं हृदयस्थं ते पश्यन्ति ये कुरुजाङ्गलं नित्यं सेवन्ते	२३ (१२)।१४
=वामनः, अयं सर्वदेवैः सह कोटितीर्थे प्रतिष्ठितः	२३ (१३)।३०
=सनातनो देवः शिवः	२३ (१४)।२२
=वृद्धकेदारः	२३ (१५)।१४
=दिण्डिः, कुरुक्षेत्रस्थकपिस्थलातीर्थे	२३ (१५)।१६
=महेश्वरः, इमं सरकतीर्थे कृष्णपक्षस्य चतुर्दश्यां दृष्ट्वा सर्वकामाँल्लभते	२३ (१५)।२०
=विष्णुः	२३ (१५)।३१; ३४
=शिवः, अयं शारभं रूपमास्थाय नरसिंहेन सह दिव्यं वर्षसहस्रकं युद्धं चकार	२३ (१५)।३१
=महेश्वरः	२३ (१६)।१
=शङ्करः, अनेन नृत्यन् मङ्कणको निवारितः	२३ (१६)।४०
=शङ्करः	२३ (१७)।११; १७; २०; २३ (२२)।६८
=शङ्करः, अयं सुरादिभिर्मङ्कणं नृत्यन्तं निवारयितुं प्रार्थितः	२३ (१७)।११
=शङ्करः, अस्य मङ्कणेन सह संवादः	२३ (१७)।११-१२; १४; २०
=नरः	२३ (२१)।२१
=नारायणः	२३ (२१)।२१
=सनत्कुमारः	२३ (२२)।१३
=शङ्करः, अस्योमया देव्या संवादः	२३ (२२)।५१
=शङ्करः, अयं बालखिल्यमहर्षीणामाश्रमे नग्नः सन् बभ्राम	२३ (२२)।५५-५६

=शङ्करः, अस्य ब्रह्मादिभिः सह संवादः २३ (२३)।१६
=पूषा २३ (२६)।१३१
=भगः २३ (२६)।१३१
=शूली = शिवः, अनेन सह समन्तपञ्चकक्षेत्रे वासाय विष्णुः प्रार्थितो राजर्षिकुरुणा २३।३६
=वह्निः २८।५१
=शिवः, अयं नन्दिनं प्राह यद् गिरिजायाः पुत्रो गजाननो भविष्यति २८।६२

देवकुलारामाः =इमान् भङ्क्त्वा ये विध्वंसयन्ति तेषां चर्म देहात् पृथक् क्रियते नरके यमकिङ्करैः १२।२३-२४

देवगणाः =एभिर्देवी स्तुतिभिः स्तुता २१।५१

देवगुरुः =कश्यपः, अस्य समीपं देवा गतवन्तः २३ (३)।७८

देवता =अस्या निन्दकैः सहाऽऽलापं कृत्वा सूर्यदर्शनेन शुद्धो भवति जनः १५।२४

देवताः =अभुक्तवतीष्वेवैतासु ये भोजनं कुर्वन्ति ते जनाः सूचीमुखा भूत्वा नरकेषु पतन्ति १२।१२
=आभिः सह चिक्षुरो नाम दैत्यो युद्धमकरोत् २१।२३
=आसां माहात्म्यविषयकः प्रश्नो द्विजानां लोमहर्षणं प्रति २३ (१)।२
=एता यदि वामनो मत्कृतेन दानेन पुष्णाति तर्हि मया सर्वमेव प्राप्तमिति बलिः शुक्रमाह २३ (१०)।२७
=एता मत्कृतेन दानेन परितुष्टाः स्युरिति बलिः शुक्रमाह २३ (१०)।२९
=आसां प्रीणनेन परमा गतिः प्राप्यते २३ (१२)।५
=एताः कुरुजाङ्गलं सेवन्ते २३ (१२)।१२
=इमाः कुरुक्षेत्रस्थपुष्कराख्यतीर्थे कार्त्तिक्यां कन्यादानेन प्रसन्ना भूत्वाऽभिमतं फलं प्रयच्छन्ति २३ (१३)।४३
=एतास्तर्पयित्वा दृषद्वत्यां स्नानानन्तरमग्निष्टोमयज्ञफलं लभते। २३ (१५)।६६
=एषां नरकतीर्थे प्रीणनं कार्यम् २३ (२०)।२८
=आसां नन्दिना सह संवादः २३ (२१)।१३

=आभिर्वेनपुत्रः पितुरुद्धाराय निर्दिष्टः २३ (२६)।४५

=सर्वा एताः शिवस्य शरीरे गोष्ठे गाव इवाऽऽसते २३ (२६)।६९

=आसां ब्रह्मणा सह संवादः २५।७

=जयादयो देवताः कालीं द्रष्टुं जग्मुः २८।१३

='अरीन् निषूदय' इतीमा देवीं प्रार्थयाञ्चक्रिरे ३०।६१

=एता इन्द्रादयः कुरुक्षेत्रे कुमारस्याभिषेकाय यत्नं चक्रुः ३१।५४

=आसामनुज्ञा प्रार्थिता कुमारकार्त्तिकेयेन महिषतारकौ देवशत्रू विजेतुम् ३२।३४

देवदंष्ट्रा =शिवस्य नाम २३ (२६)।१४४

देवदारुवनम् =एतद् वनमाश्रितानां बालखिल्यानां मुनिगणानां क्लेशक्षयार्थमुमा देवी शङ्करं प्रार्थितवती २३ (२२)।४६

=अत्र शङ्करो देवादिभिः सह गत्वा करेण स्वलिङ्गं जग्राह २३ (२३)।३२

देवदेवः =पुलस्त्यः, अस्य नारदेन सह संवादः २२।५५

=विष्णुः, अस्य कलावतारमेवासुरतेजोहानौ निमित्तं प्राह प्रह्लादो बलिं प्रति २३ (८)।१७

=विष्णुः, इममाक्षिपन् बलिः प्रह्लादेन भर्त्सितः २३ (८)।३५

=विष्णुर्वामनाख्यः, अस्य साहाय्यं महानागः शेषः कल्पयामास २३ (९)।४३

=शङ्करः, अस्य मङ्कणेन सह संवादः २३ (१७)।१५

=महेश्वरः २३ (२०)।१३

=स्थाणुः २३ (२२)।१०

=शङ्करः २३ (२२)।६९; २३ (२३)।२

=शिवः, अनेन स्वेच्छया लिङ्गं पातितम् २३ (२३)।१९

=शिवः २३ (२३)।१९

=शिवस्य नाम २३ (२६)।१४२

=शङ्करः, अस्याश्रमे वसतो देशं गिरिराजसुता काली समाजगाम २५।३५

देवदेवपतिः	=वामनः, अयं बलेर्यज्ञमुपस्थितः सन् यज्ञं वह्निं च तुष्टाव	२३ (१०) । ३८
देवदेवेशः	=विष्णुः, अयमदित्या नमस्कृतः	२३ (७) ।१२
	=वामनः, इमं बलियज्ञे प्रत्येकं पूजयामास	२३ (१०) ।३७
	=शिवस्य नाम	२३ (२६) ।६४; १०६
देवनदी	=सरस्वती	२३ (१२) ।१९
	=दृषद्वती	२३ (१२) ।१९
देवनामानि	=वामदेवः	७ ।२; १३; १८
	=वासवः	७ ।१८
	=सहस्राक्षः	७ ।१९
देवपतिः	=शिवः, अनेनोक्तं मङ्गलं प्रातःकाले पुरुषेण वाच्यम्	१४ ।२०
	=शिवः, अयं विश्वकर्मरचिते गृहे गार्हस्थ्यलक्षणं यज्ञं चक्रे	२८ ।४
देवभटः	=स्वर्गस्थः कोऽपि देवभटो महिषासुरेण सह संग्रामं कर्तुं न शशाक	२० ।२७
देवभागः	=अस्योपरोधाद् वामनेनाऽऽत्मनः कृतं वधमहं श्लाघ्यतरं मन्य इति बलिः शुक्रमाह	२३ (१०) ।३१
देवभूतिः	=अस्या निमित्तं वामनः प्रवृत्तोऽभूत्	२३ (१०) ।१६
देवभेदः	=मानसाः	२३ (३) ।१३
देवमणिः	=शिवः, मनोजवतीर्थे स्थितस्यास्य दर्शनेन मनसा चिन्तितं सर्वं सिध्यति	२३ (१५) ।५४
देवमातरः	=एता विष्णौ प्रसुप्ते सति स्वपन्ति	१७ ।४
देवमाता	=अदितिः	२३ (३) ।१७; २३ (४) ।१४; २३ (६) ।५; ११; १३; १७; २३ (८) ।१०; १९; २३ (९) ।१२; १४; २३ (१०) ।५४; २७ ।५; ३१ ।५८
	=अदितिः, इयं वामनावतारे संजाते दुःखं मुमोच	२३ (९) ।१४

	=अदितिः, एनामदितिवने दृष्ट्वा नरः शूरं पुत्रं जनयते	२३ (१३) ।१३
देवमार्गः	=कुरुक्षेत्रस्था प्राची सरस्वती देवमार्गेण प्रविष्टा तस्मान्निःसृतात्त वर्तते	२३ (२१) ।१९
देवमित्रा	=इमां मातर रुद्रमहालयः कार्त्तिकेयाय ददौ	३१ ।९८
देवयाजी	=गणः, इम कुटिला कार्त्तिकेयाय ददौ	३१ ।८५
देवयुगः	=अस्याऽऽदौ महिषासुरवधविषयिणी कथा संवृत्ता	२१ ।३
देवराजः	=इन्द्रः, अस्य वाहनं श्वेतवर्णो महागजः	९ ।१५
	=इन्द्रः, अस्य बलि-पराक्रमात् पराजयोऽभूत्	२३ (२) ।१४
	=इन्द्रस्य नाम	२८ ।३५
देवराज्यम्	=इदं बलिना विक्रम्य पराजितम्	२३ (२) ।१५
देवर्षयः	=एभिरुत्तरः कोशलाभागः सेवितो वर्तते	२३ (१६) ।३२
देवर्षिः	=नारदः, अयं पुलस्त्येन संबोधितः	१८ ।४३
	=नारदः	२३ (१५) ।३२
देववरः	=शङ्करः	२० ।४३
देववरा	=काचिन्नदी स्यात्, एतत्पर्यन्तं पृथूदकसरो वर्तते	२३ (१) ।९
देववराः	=विष्णुः, रुद्रः, इन्द्रः, इन्दुः, अनिलः, अग्निः, भास्करश्च	१९ ।१८
	=विष्णुप्रभृतयः, एते कात्यायनीं तुष्टुवुः	१९ ।१८
देवसेना	=इयमन्धकेन सह युद्धार्थं निर्जगाम	९ ।११
देवसैन्यम्	=अस्य विनाशाय बलिवृत्रयोरुद्यमः	९ ।३१
देवाः	=एते प्रह्लादशासने वृद्धियुक्ताः सञ्जाताः	७ ।२५
	=प्रह्लादनारायणयुद्धदर्शनोत्सुका देवा अम्बरे संनिपतिताः	८ ।८
	=एते नारायणप्रह्लादयोर्युद्धस्य प्रेक्षकाः	८ ।१०
	=शतक्रतुः, यमः, जलेश्वरः, धनदः, वायुः, हुताशश्च	९ ।४५-४७
	=एषां परमो धर्मः	११ ।१५
	=विष्णुः	११ ।१५; १७

=हरः ११।१६; १७

=भानुः ११।२०

=अच्युतः, शङ्करः, भास्करश्च ११।२४

=एषां निन्दया नरकप्राप्तिर्भवति १२।३

=येषां निन्दा यैरनिशं श्रूयते ते नरकयातनां प्राप्नुवन्ति १२।२१-२२

=गृहस्थाश्रमे वसन् द्विजो धनमर्जयित्वा तेन देवान् संप्रीणयेत् १४।१२

=वरान् देवान् प्रातर्विबुध्य पुरुषोऽनुस्मरेत् १४।२०

=स्नानानन्तरं विद्वान् देवान् तोयेन पूजयेत् १४।३५

=एषामालयस्य प्रदक्षिणा कार्या १४।५२

=एषामर्चनं य उचिते काले न करोति स षण्ढः परिगीयते १५।२८

=एते तं सभ्यं कुक्कुटमाहुर्यः समागतानां पक्षपातं समाश्रयति १५।३२

=एषां त्यागी 'अपविद्ध'-संज्ञको भवति १५।३४

=एषां क्रिया कार्या वानप्रस्थाश्रमे वसता १५।५७

=एषां पूजासु निशाचराः संसक्ता बभूवुः १६।३५

=एषां मातरो विष्णौ प्रसुप्ते सति स्वपन्ति १७।४

=साध्याः १७।१६; १८।१०

=एते सर्वे रक्तबीजाख्येन दैत्येन विजिताः १८।७०

=एभी रक्तबीजभयात् स्वस्थानानि परित्यक्तानि १८।७२

=एते महिषासुरेण निर्जिता विष्णुं द्रष्टुं गतवन्तः १९।१

=एते वीतशोका भूत्वा कात्यायनीमभितस्तस्थुः १९।३७

=अमराः २०।३०; २१।५२; २२।१७

=एषां देव्या सह संवादः २०।३९

=एषां युगस्याऽऽदौ महिषासुरवधविषयिणी कथा संवृत्ता २१।३

=सुराः २३ (६)।८; ९; २१।५२; २३ (३)।३८

=एषां सेनानी शिव आसीत् पश्चात् स सैनापत्यं तत्याज	२२ ।१०
=एते सेनानाथेन शम्भुना निराकृताः	२२ ।११
=एते मुक्तिकामार्थं पृथूदकसरः सेवन्ते	२३ (१) ।१०
=एतानुत्साद्य बलिना त्रैलोक्ये राज्यं कृतम्	२३ (२) ।५
=एभिर्दैत्यकृता मखशोभा दर्शिता	२३ (२) ।९
=एषां राज्यं बलिना विक्रम्य पराजितम्	२३ (२) ।१५
=एते कथं पराजिता इति प्रश्न ऋषीणां लोमहर्षणं प्रति	२३ (३) ।१
=एषां श्रेयसो विधानायेन्द्रादिभिः कश्यपः प्रार्थितः	२३ (३) ।१४
=एतेऽदित्या सह ब्रह्मसदनाय प्रस्थिताः	२३ (३) ।१७
=त्रिदशाः	२३ (३) ।३४; २३ (९) ।२८
=इन्द्रादयः, एते ब्रह्माणमवलोक्य शिरोभिः प्रणता बभूवुः	२३ (३) ।३६
=एषां प्रभुर्ब्रह्मा	२३ (३) ।३८
=एषां प्रभुर्विश्वकृदुच्यते	२३ (४) ।३
=एतान् पुरुषोत्तमो वेत्ति	२३ (४) ।५
=एत आदिदेवं तत्त्वतो न विदुः	२३ (४) ।५
=एते वरप्रार्थनार्थं ब्रह्मणा पृष्टाः	२३ (४) ।१३
=एभिर्ब्रह्मण आदेशः शिरसा धारितः	२३ (४) ।१६
=एभ्यो विष्णुर्वरं प्रायच्छत्	२३ (६) ।७
=विबुधाः	२३ (६) ।९
=विश्वेदेवाः	२३ (६) ।११
=देवमयो भगवान् विष्णुः	२३ (६) ।१६
=एषां लक्ष्मीः समृद्धा बभूव मधुसूदने गर्भस्थे सति	२३ (८) ।६
=मरुतः	२३ (८) ।१०
=रुद्राः	२३ (८) ।१०
=वसवः	२३ (८) ।१०; २३ (१०) ।५६
=आदित्याः	२३ (८) ।११

=विश्वे	२३ (८)।११
=साध्याः	२३ (८)।११
=एषां विष्णोरेकांशांशकलाया जन्म	२३ (८)।३६
=इमे दुःखं मुमुचुर्वामनावतारे संजाते	२३ (९)।१४
=एते वामनेनैव (वामनरूपधारिणा विष्णुना) धार्यन्ते	२३ (१०)।७
=एषां पालनकर्मणि विष्णुर्वामनरूपेण प्रवृत्तोऽभूत्	२३ (१०)।६४
=एषां सुखेन सम्पन्ने सुतले वासं कर्तुं वामनो बलिमाह	२३ (१०)।७२
=एषामरणिः सरस्वती	२३ (११)।६
=त्रयः, एते सरस्वत्या रूपम्	२३ (११)।११
=एते कुरुक्षेत्रं सेवन्ते	२३ (१२)।१७
=एषां माताऽदितिः	२३ (१३)।१३
=सर्वैर्देवैः सह वामनो देवः कोटितीर्थे प्रतिष्ठितः	२३ (१३)।३०
=कुरुक्षेत्रस्थिते सूर्यतीर्थे देवान् अर्चयित्वा मानवः सूर्यलोकं गच्छति	२३ (१४)।२७
=एषामर्चने रते जनः सुतीर्थकतीर्थे पितृन् प्रीणाति	२३ (१४)।४१
=एतान् उद्दिश्य ब्रह्मोदुम्बरतीर्थे विप्रभोजनेन पितरः सुखिता भवन्ति दुर्लभं च ददति	२३ (१५)।१२
=एषां गणान् कुरुक्षेत्रस्थ इडास्पदतीर्थेऽर्चयित्वा मानवो मुक्तिमवाप्नोति	२३ (१५)।२५
=एते विष्णुदेहस्य लम्भनार्थं वरदं शिवमाराधयामासुः	२३ (१५)।३०
=एभिस्त्रिविष्टपनामकं कुरुक्षेत्रस्थं तीर्थं निषेवितम्	२३ (१५)।४१
=इमे कुरुक्षेत्रस्थे फलकीवने तपश्चरन्ति	२३ (१५)।४५
=सर्वदेवैरलङ्कृतं सुमहदेकं तीर्थं फलकीवनेऽस्ति	२३ (१५)।५०
=एषामर्चनेन मधुवटीतीर्थे शुचिर्नरः सिद्धिं लभते	२३ (१५)।५६

=इमे पुत्रशोकाभिभवेन देहत्यागमङ्गीकृतवन्तं व्यासं व्यासस्थल्यामुत्थापयामासुः	२३ (१५) ।५९
=एभिः सब्रह्मकैः पवनः प्रसाद्य प्रकटीकृतः	२३ (१६) ।२
=एभिः कुरुक्षेत्रस्थेऽमृताख्ये स्थाने हनूमान् प्रकटीकृतः	२३ (१६) ।३
=एभ्यः पूर्वोऽस्ति शिवः	२३ (१७) ।१८
=एते शोगितोन्मिश्रं तोयं वहन्तीं सरस्वतीं दृष्ट्वा दुःखिता बभूवुः	२३ (१९) ।२३
=एषामृणेन मुक्तो भवति नर ऋणमोचनाख्यं कुरुक्षेत्रस्थं तीर्थमासाद्य	२३ (२०) ।६
=एतेऽनरकतीर्थे स्नाताय परं पदमनुजानन्ति	२३ (२०) ।३२
=एभिर्निषेवितं कुरुक्षेत्रस्थं कुब्जाख्यं तीर्थम्	२३ (२१) ।१
=एते विहाराख्ये तीर्थे कुरुक्षेत्रस्थे समागताः शिवं नापश्यन्	२३ (२१) ।११
=कुरुक्षेत्रस्थे सरस्वतीकूपे देवान् संतर्प्याक्षय्यं सर्वं लभते नरः	२३ (२१) ।१७
=एते सरस्वत्याः प्राचीं दिशं सदा निषेवन्ते	२३ (२१) ।२२
=एते शिवलिङ्गं चालयितुं शक्ता नाभूवन्	२३ (२३) ।१७
=एते रुद्रदर्शनकाङ्क्षिणः कैलासपर्वतं जग्मुः	२३ (२३) ।२१
=एते शिवदर्शनिच्छया पुण्यं महत् सरो गताः	२३ (२३) ।२४
=एते कुरुक्षेत्रस्थं सरो गत्वा शिवादर्शनेन चिन्तान्विता अभूवन्	२३ (२३) ।२५
=इमे भवानीदत्तममृतं पपुः	२३ (२३) ।२८
=एते हस्तिरूपधरं शङ्करं सरोमध्ये व्यवस्थितं ददृशुः	२३ (२३) ।३०
=एते सफलतामवाप्य शिवस्य स्तवं चक्रुः	२३ (२३) ।३५
=एभिर्भक्त्या स्तुतः शङ्करः प्रसन्नो बभूव	२३ (२३) ।३६
=एषां महादेवेन शङ्करेण सह संवादः	२३ (२४) ।१
=एते शङ्करेणाभीष्टं प्राप्य स्वानि स्थानानि भेजिरे	२३ (२४) ।६
=एते ब्रह्माणं शरणं ययुः	२३ (२४) ।८

=एते 'मानुषेभ्यो भयं तीव्रं रक्षास्माकं पितामह' इति ब्रह्माणं प्रार्थितवन्तः २३ (२४) ।९
=एषां ब्रह्मणा सह संवादः २३ (२४) ।२०
=एषां हितकामनया ब्रह्मा स्थाणुलिङ्गमुपर्युपरि सप्त लिङ्गानि चकार २३ (२४) ।२१
=एभिः शाश्वतीः समाः स्थाणुलिङ्गं पूजितम् २३ (२५) ।५४
=एते यज्ञैर्विना नो प्रीयन्ते २३ (२६) ।१४
=एतैः सचराचरं धार्यते २३ (२६) ।१५
=सवासवा एते वेनस्य दक्षिणहस्तादुत्पन्नं पुरुषं पृथिव्यामभ्यषिञ्चन् २३ (२६) ।२२
=एषां निन्दको वेन आसीत् २३ (२६) ।२८
=सर्वेषु देवेषु शिवो विशिष्टः २३ (२७) ।८
=एतैर्वेनः स्थाणुतीर्थे स्नानाय निवारित आसीत् २३ (२७) ।२०
=एषां विष्णुना सह संवादः २४ ।१
=एते विष्णुवचनात् पुण्यतीर्थं पृथूदकं जग्मुः २४ ।४
=एते मेनां हिमवते ददुः २४ ।१०
=एतान् ब्रह्मा काल्याः समानयनाय समादिदेश २५ ।२४
=एते शैलनन्दिनीं कालीं समाजग्मुः २५ ।२५
=एभिः पितॄनाराध्य महिषतारकयोर्वधोद्देश्येनेयं काली हराय दत्ता २६ ।५७
=एभिर्वृतः शिवः सर्ज्जकदम्बमध्यस्थ-वनस्पतिवद् रराज २६ ।७१
=एते शिवस्य विवाहयात्रायां पृष्ठतो जग्मुः २७ ।८
=एते महामोहस्थिते सति शङ्करे भीता अभूवन् २८ ।३१
=एषां शिवेन सह संवादः २८ ।४६; ३१ ।५०
=एते शिववचनमाकर्ण्य पङ्कमग्ना इवाभूवन् २८ ।४८
=एभिः पुत्रकामः शङ्करो निवारितः २८ ।६३
=एते निशुम्भेन बहुशो निर्जिताः २९ ।२१
=एते निशुम्भे हते हृष्टा बभूवुः ३० ।४७
=एते देव्याः कौशिक्याः स्तुतिं चक्रुः ३० ।५६
=एतेषां देव्या सह संवादः ३० ।६६; ७०
=एषां सकाशमग्निर्जगाम ३१ ।४

=एते सैनापत्येऽभिषिक्ताय कार्त्तिकेयाय स्वान् स्वान् प्रमथान् प्रददुः ३१।६२

=एषां कार्त्तिकेयेन सह संवादः ३२।९०

=एते सरस्वत्या अन्तर्जले निमग्ने सति शिवे स्वासनेभ्यः प्रचलिताः ३४।२२

=एते लोकेषु क्षुब्धेषु सत्सु ब्रह्मणः समीपमाजग्मुः ३४।२३

=एते विष्णोर्भवनं जग्मुः ३४।२५

देवाचार्यः =बृहस्पतिः, अस्य देवैः सह संवादः २४।७

देवाचार्यगृहम् =धनूराशिः, अत्र मूलनक्षत्रस्य पूर्वाषाढाया उत्तराषाढायाश्चाद्योऽंशः कालरूपिणः शिवस्योर्वोर्युगलम् ५।३९

देवाधिदेवः =वामनः सर्वदेवमयः, अस्य तेजःप्रोद्भूतानि परमं सर्वाणि ज्योतींषि तपश्चासन् २३ (१०)।५८

=ब्रह्मा, अस्य माहात्म्यं मुनिर्मार्कण्डेयः सनत्कुमारं प्रति पप्रच्छ २३ (२२)।१३

देवार्चनम् =बालखिल्याः सदा देवार्चनपरायणाः सन्ति २३ (२२)।४२

देवालयः =अस्य प्रदक्षिणा कार्या १४।५२

देवासुरयुद्धम् =एतन्नामको वामनपुराणे नवमोऽध्यायः ९।५२

देवी =सरस्वती ११।१८; २०।३६; २१।३६; २३।१३; २३ (१०)।५३; २३ (११) २३; २३ (१६)।२१; २३ (१९)।१२; १४; २३ (२१)।५

=भवानी ११।१९; २१।५०; २३ (२३)।२७; २९

=अस्यां भक्तिर्मानवानां धर्मः ११।२४

=कात्यायनी १७।१५; १८।८; ३७; १९।८;१३; १९;२१;३७;२०।१;३;३०;३३; ३५;२१।३३;५१;२३ (१५)।१८ २८।७६; ३०।४८

=कात्यायनी, अस्याः प्राप्तिं महिषासुरश्चिन्तितवान् २० ।१७
=कात्यायनी, महिषासुरेण प्रेषितो दुन्दुभिनामा दूतोऽस्यै संदेशं व्याजहार २० ।२२
=शिवा २० ।२४
=दुर्गा २० ।३०; ३८;२१ ।७; २१ ।१२; १३; २५;३४;४१; ४६;५२; २३ (१५) ।१८; २३ (२१) ।१५
=कात्यायनी, अस्या दुन्दुभिना सह संवादः २० ।३४
=कात्यायनी, अस्या वचनं यथातथं दुन्दुभिर्महिषाय निवेदयामास २० ।३५
=अम्बिका २० ।३९; २१ ।२१; २७; ४०; ३० ।२८
=कात्यायनी, अस्या उपरि सगजाश्वरथः समापतन्नमरनामा दानवः २१ ।४
=कात्यायनी, अस्या वाहनं केसरी २१ ।९
=कालरात्रिः २१ ।१२
=कात्यायनी, अस्या उपरि नमरो नाम दानवः शक्तिं मुमोच २१ ।१४
=कात्यायनी, अस्यै सिंहेन कुञ्जरस्कन्धात् निक्षिप्य गतासुर्नमरदानवो निवेदितः २१ ।१६
=मृडानी २१ ।४३; ४७; २८ ।७७; ३० ।३२; ३० ।६२
=कात्यायनी, अनया मृद्यमानो महिषासुरो धरणीधराभोऽपि हीनबलो बभूव २१ ।४८
=इमां देवगणाः स्तुवन्ति स्म २१ ।५१
=नारायणी २१ ।५१
=अस्याः समुद्भवविषयकाः प्रश्ना नारदस्य पुलस्त्यं प्रति २२ ।१
=उमा २२ ।३; २३ (२२) ।४५; ५० २३ (२२) ।६९; २३ (२३) ।२६;
=कौशिकी २२ ।३; ३० ।२०;२७
=पार्वती २२ ।६;८;२३ (२१) ।११

=सती	२२ ।९
=तपती, सूर्यपुत्री, अस्या वरुणात्मजेन वसिष्ठेन सह संवादः	२२ ।४७
=तपती	२२ ।६०
=सूर्यपुत्री तपती, अस्या विधिवत् पाणिग्रहणाय वसिष्ठेन संवरणः समादिष्टः	२२ ।६०
=लक्ष्मीः	२३ (२) ।१३;१८
=ऋद्धिः	२३ (२) ।१९
=कीर्तिः	२३ (२) ।१९
=दिव्या	२३ (२) ।१९
=द्युतिः	२३ (२) ।१९
=धृतिः	२३ (२) ।१९
=प्रभा	२३ (२) ।१९
=भूतिः	२३ (२) ।१९
=महामतिः	२३ (२) ।१९
=क्षमा	२३ (२) ।१९
=ह्रीः	२३ (२) ।१९
=ह्री-प्रभृतयः प्रवरा देव्यो बलिविक्रमेण तुष्टाः सत्यस्तं सेवन्ते स्म	२३ (२) ।१९
=इडा	२३ (२) ।२०
=क्रिया	२३ (२) ।२०
=पुष्टिः	२३ (२) ।२०
=श्रुतिः	२३ (२) ।२०
=शान्तिः	२३ (२) ।२०
=स्मृतिः	२३ (२) ।२०
=अदितिः	२३ (७) ।१०
=अदितिः, अनेन शब्देन विष्णुरदितिं संबोधयामास	२३ (७) ।१०
=अनेन सम्बोधन-शब्देन महामुनिर्मार्कण्डेयः सरस्वतीं तुष्टाव	२३ (११) ।६
=सरस्वती, अस्या एव सकाशात् सर्वेऽर्था उपलभ्यन्ते	२३ (११) ।२१

=लक्ष्मी, इयं कुरुक्षेत्रस्थे श्रीतीर्थे स्नातस्य सान्निध्यं प्रयच्छति २३ (१४) ।२३
=अस्या नाम्ना तीर्थमेकं कुरुक्षेत्रे प्रसिद्धम् २३ (१४) ।३४
=निद्रा २३ (१५) ।१८
=भद्रा २३ (१५) ।१८
=माया २३ (१५) ।१८
=सनातनी २३ (१५) ।१८
=देवी २३ (१५) ।१९
=अस्यास्तीर्थं मधुवटीनामकं कुरुक्षेत्रे स्थितम् २३ (१५) ।५५
=अनया समनुज्ञातो नरः सिद्धिं लभते मधुवटी-तीर्थे देवादीनामर्चनेन २३ (१५) ।५६
=उमा, अस्याः शङ्करेण सह संवादः २३ (२२) ।५१; ५३
=अस्या ब्रह्मादिभिः सह संवादः २३ (२३) ।२६
=भवानी, अनया सरोमध्ये व्यवस्थितो हस्तिरूपधरः शङ्करो दृष्टः २३ (२३) ।२९
=सरस्वती (कुरुक्षेत्रस्था) २३ (२५) ।१०
=इयं शिवं प्रत्युवाच २५ ।५०
=गिरिजा शिवपत्नी, इयं स्वसुतं विनायकं दृष्ट्वा परमां मुदमवाप २८ ।७५
=अस्या भयाच्चण्डमुण्डौ सलिले निमग्नौ बभूवतुः २९ ।१८
=विभावरी २९ ।६४
=चण्डमारी २९ ।६७
=चण्डिका २९ ।७९
=ब्राह्मी ३० ।२०
=मारी ३० ।२०; ६२
=ऐन्द्री ३० ।२१
=कुमारी ३० ।२१
=माहेश्वरी ३० ।२१
=वाराही ३० ।२१;६२
=वैष्णवी ३० ।२१;६२
=नारसिंही ३० ।२२;५९;६२

	=रुद्रदूती	३० ।२२
	=चण्डा	३० ।२७
	=चर्ममुण्डा	३० ।२८;६२
	=चण्डिका, अस्या निशुम्भेन सह संवादः	३० ।३५
	=कौमारी	३० ।५९
	=वाराही, इमां नमश्चक्रुर्देवाः	३० ।५९
	=विश्वेश्वरी	३० ।६१
	=ऐन्द्री	३० ।६२
	=कुमारी	३० ।६२
	=ब्रह्माणी	३० ।६२
	=योगिनी	३० ।६२
	=अस्या देवैः सह संवादः	३० ।६७
	=चर्चिका	३० ।६७
	=शाकम्भरी	३० ।६९
	=इयं द्विजपुङ्गवानां प्रणामं कृत्वा खं जगाम	३० ।७२
	=कुटिला	३१ ।५
	=धमधमा	३१ ।९६
देवीतीर्थम्	=अत्र स्नात्वोत्तमं रूपं प्राप्यते	२३ (१४) ।३४
देवीनामानि	=सर्वदा, वरदा, दुर्गा, कात्यायनी चेति	१८ ।४१
देवेशः	=शिवः, अयमन्धकेनाऽऽराधितः	९ ।४
	=ब्रह्मा, अनेन जलोपरि स्थितायाः पृथिव्या उपरि शैलेन्द्रः कर्णिकाकारः स्थापितः	११ ।३२
	=विष्णुः, इमं मनसा प्रह्लादो जगाम	२३ (८) ।८
	=विष्णुः, अयं ते त्राता भविष्यतीति प्रह्लादो बलिमाह	२३ (९) ।१०
	=विष्णुः, अयं बलिना संस्मृतः प्रह्लादसकाशाच्छाप-प्राप्त्यनन्तरम्	२३ (९) ।११
	=शङ्करः	२३ (२२) ।४४
	=ब्रह्मा	२३ (२२) ।७३
	=शिवस्य नाम	२३ (२६) ।६४
देवौ	=अश्विनौ	२३ (८) ।१०

	=विष्णुः शिवश्च लोकोद्धारतीर्थस्थितावेतौ देवौ प्रणिपातेन प्रसाद्य नरो मुक्तिमाप्नुयात्	२३ (१४) ।२२
देव्यः	=षट् कृत्तिकाः	३१ ।२२
देशः	=मध्यदेशः	१२ ।५१, १३ ।३६
	=देशानुशिष्टो धर्मो न परित्याज्यः	१४ ।३८
	=कात्यायन्याः सौन्दर्यविषये चण्डमुण्डौ महिषासुरं सूचयामासतुर्यत् कुमार्याः कात्यायन्या ऊरू वृत्तावरोमौ कोमलौ समनुत्तमौ च तथा शोभेते यथा मकरध्वजेन निर्मितौ देशौ जनानामावासनार्थं सन्निविष्टौ स्तः	२० ।११
	=ब्रह्मावर्तः	२३ (१२) ।९
	=पापदेशः, अस्मिञ्जातां स्त्रियं काचिद् यक्षी ददर्श	२३ (१३) ।४६
	=युगन्धरः	२३ (१३) ।४६
	=उत्तरकोशलाभागः, अत्र तावदुद्दालकेन मुनिना ध्याता सरस्वती समागता	२३ (१६) ।३३
	=त्रिविष्टपः	२५ ।५२
	=चीनः	२५ ।५९
देशनामानि	=मत्स्य-कुशट्ट-कुणि-कुण्डल-पाञ्चाल-काशि-कोसल-वृक-शबर-कुवीर-भूलिङ्गाः	१३ ।३५-३६
	=निराहार-हंसमार्ग-कुपथ-तङ्गण-खश-कुथप्रावरण-ऊर्ण-पुण्य-सहूहुक-त्रिगर्त-किरात-तोमर-शिशिराद्रिकाः, एते कुमारद्वीपस्य पर्वतेषु स्थिताः सन्ति	१३ ।५६-५७
देशाः	=सर्वेषु देशेषु मध्यदेशः श्रेष्ठः	१२ ।५१
	=बहूनां क्षुद्रनदीनां जलानि तावदुदङ्मध्योद्भवा देशाः पिबन्ति	१३ ।३४
	=कुमारद्वीपे पर्वताश्रयिणो निराहारादयः	१३ ।५६
	=कुमारद्वीपस्थाः, अत्र प्रचलिता धर्माः	१३ ।५८

	=सुराजकेषु देशेषु वासः कर्तव्यः	१४ ।५५
	=यत्र राजा सदैवाशक्तोऽपि दण्डरुचिः स्यात् तेषु देशेषु बुद्धिमान् न वसेत्	१४ ।५६
देशान्तरम्	=अस्मिन् मृते सति जने सद्य एव शौचं भवति	१५ ।४४
देहः	=अस्याऽऽनतिम् = क्षीणतां शैथिल्यं वा दृष्ट्वा प्राज्ञो वानप्रस्थाश्रमे प्रवेशं कुर्यात्	१५ ।५६
	=ब्रह्मणो देहमध्याद् मरकतप्रभः खदिरः संजातः	१८ ।५
	=अस्मादपि प्रियतरः कृष्णः = विष्णुरासीत् प्रह्लादस्य	२३ (८) ।४२
	=मनुजानां देहे नोद्वेगो भवति स्म वामनावतारे जाते	२३ (९) ।१६
	=विष्णोर्देहस्य लम्भनार्थं वरदं शिवमाराधयामासुः	२३ (१५) ।३०
	=अस्य त्यागाय व्यासो व्यासस्थल्यां निश्चयं चकार पुत्रशोकेनाभिभूतः सन्	२३ (१५) ।५८
	=अस्मात् संभवैः कलुषैः स विमुक्तो भवति यः शालिहोत्रतीर्थे स्नाति	२३ (१६) ।६
	=राजर्षिः कुरुरुग्रेण तपसाऽऽत्मनो देहं चकर्ष	२३ (२०) ।१८
	=तस्य देहमाश्रित्य दुष्कृतं किञ्चिदपि न तिष्ठति यः प्राच्यां सरस्वत्यां त्रिरात्रं व्रतादिकमाचरति	२३ (२१) ।२१
	=आत्मा, अस्मिन् यो हि विभुः स्थितः सोऽनादिरुच्यते	२३ (२२) ।७६
	=अयं शीघ्रं न शुद्ध्यति	२३ (२२) ।८२
	=बीजं मम देहे वर्तत इति राजर्षि कुरुणा प्रत्युत्तरितम्	२३ ।२९
देहत्यागः	=अस्मै निश्चयं चकार व्यासस्थल्यां पुत्रशोकाभिभूतः सन् व्यासः	२३ (१५) ।५८
देही	=अस्य धरण्यां कृताः सर्वेऽपराधा नश्यन्ति यदि स कुरुक्षेत्रस्थे धरण्यास्तीर्थे स्नाति	२३ (१३) ।२०

	=अयमात्मसंबोधसुखे प्रविष्टं ज्ञेयं संप्राप्य कामान् विजहाति	२३ (२२) ।२५
दैतेयाः	=एते बहवो वासुदेवबलाधिका मदधीनाः सन्तीति बलिः प्रह्लादं प्रत्याह	२३ (८) ।३१
दैत्यः	=प्रह्लादः, अस्योपरि देवैः पुष्पवृष्टिः कृता	८ ।९
	=नमरः	१८ ।६६
	=रम्भः	१८ ।६७
	=रक्तबीजाख्यः, अनेनेन्द्ररुद्रादयः सर्वे देवा विजिताः	१८ ।७०
	=दुन्दुभिः	२० ।२१
	=मयः	२० ।२१; २० ।३०; ३२; २१ ।५०; २३(२) ।७
	=महिषासुरः, अस्य सन्देशं दुन्दुभिर्देव्यै श्रावयामास	२० ।२५
	=महिषः	२० ।३१; ३५
	=चिक्षुरः	२० ।३७;२१ ।२४;२३ (१०) ।६१
	=असिलोमा	२१ ।५०
	=चण्डः	२१ ।५०
	=मुण्डः	२१ ।५०
	=बलिः	२३ (२) ।१;३;१८; २३(३) ।६;१४;२३ (१०) ।१
	=विरोचनः	२३ (२) ।३
	=हिरण्यकशिपुः	२३ (२) ।४; १६
	=शम्बरः	२३ (२) ।७
	=अयःशङ्कुः	२३ (८) ।३०
	=अश्वशिराः	२३ (८) ।३०
	=भङ्गकारः	२३ (८) ।३०
	=महाहनुः	२३ (८) ।३०

	=विप्रचित्तिः	२३ (८) ।३०
	=शङ्कुः	२३ (८) ।३०
	=शिविः	२३ (८) ।३०
	=हयशिराः	२३ (८) ।३०
	=कुक्कुराक्षः	२३ (८) ।३१
	=दुर्जयः	२३ (८) ।३१
	=प्रघसः	२३ (८) ।३१
	=प्रतापी	२३ (८) ।३१
	=शंभुः =इति वसुदेवबलाधिकानां दुर्जयानां नामानि निर्दिश्यन्ते	२३ (८) ।३१
	=बलिः, अस्य शुक्रेण सह संवादः	२३ (१०) ।१२
दैत्यता	=त्रैलोक्ये दैत्यतां गते दैत्यराजे बलिरभिषिक्तो बभूव	२३ (२) ।६-१२
दैत्यनाथः	=प्रह्लादः, अयं नारायणस्य नाराचेन भिन्नहृदयो जातः	८ ।२५-२७
दैत्यपः	=प्रह्लादः, अस्य बलिना सह संवादः	२३ (९) ।६
दैत्यपति	=बलिः, अयं प्रह्लादं प्रसादयामास	२३ (९) ।१
	=बलिः, अस्य वामनेन सह संवादः	२३ (१०) ।४३
	=बलिः	२३ (१०) ।४३;४६
	=बलिः, अस्य वामनेन सह संवादः	२३ (१०) ।४६
दैत्यपथः	=अस्मिन् दिवाकरे संप्रवृत्ते सति दैत्यराजे बलिरभिषिक्तो बभूव	२३ (२) ।८-१२
दैत्यबलम्	=इदं सहस्राक्षे पराङ्मुखे संजातेऽन्धकासुरेण पादमुष्टितलादिभिर्निपातितम्	१० ।१३
दैत्याः	=दितेः पुत्राः, हयग्रीवप्रमुखाः, एते हुताशादिसुरैः सह द्वन्द्वयुद्धं चक्रुः	९ ।४९
	=एषां परमो धर्मः	११ ।१६

=एभिरजेयः पुत्रो रम्भासुरेण वह्निसकाशात् प्रार्थितः १८ ।५१
=एते देव्या कुलिशादिभिर्हताः २१ ।१०
=एते दुर्गादेव्या वध्यमानाः पलायिताः २१ ।११
=एषां बलम् = सैन्यं महिषासुरस्य शिरसि च्छिन्ने सति हाहाकारं चकार २१ ।४९
=एषां दर्पस्य विनाशक आसीद् देवसेनानीः शिवः २२ ।१०
=एषां वंशे पुरा बलिर्बभूव २३ (२) ।३
=एषां राज्ये सर्वैरसुरैर्बलिरभिषिक्तः २३ (२) ।१२
=एषां नृपं बलिं लक्ष्मीर्देवी प्रविष्टा २३ (२) ।१८
=दैत्यमयो भगवान् विष्णुः २३ (६) ।१६
=एभिर्निराकृतान् स्वतनयान् दृष्ट्वाऽदितिर्निर्वेद-माप्नोत् २३ (६) ।१५
=एषां तेजसो हानिर्बभूव गर्भस्थे मधुसूदने सति २३ (७) ।१६
=एषां तेजोहीनत्वविषये कारणं बलिः प्रह्लादं पप्रच्छ २३ (८) ।२
=एषां तेजोहीनत्वे हेतुं बलिः प्रह्लादं पप्रच्छ २३ (८) ।३
=एते निस्तेजसोऽभूवन् मधुसूदने गर्भस्थे सति २३ (८) ।५
=एषां बलं बलिः प्रह्लादं प्रत्याह २३ (८) ।२९
=एषां सत्तमः प्रह्लादः २३ (८) ।३३
=इमे विनाशं यास्यन्ति तवाविवेकवशादिति प्रह्लादो बलिं प्रत्याह २३ (८) ।३४
=इमे विष्णोरेकांशांशकलातः प्रदुर्भूताः २३ (८) ।३६
=इमे वामनस्य देवमयं रूपं दृष्ट्वा तमुपागच्छन् २३ (१०) ।६०
=एतान दुर्वृत्तचेष्टानहं भूयो वधिष्यामीति देवी देवानाह ३० ।७०
=इमान् कार्त्तिकेयगणाः सहसाऽभ्यद्रवन् ३२ ।४९
दैत्याधिपः =बलिः, अस्य प्रह्लादेन सह संवादः २३ (८) ।२०

दैत्याधिपतिः	=बलिः	२३ (१०) ।३
	=बलिः अस्य शुक्राचार्येण सह संवादः	२३ (१०) ।३;१५
दैत्येन्द्रः	=दुन्दुभिः, अनेन शब्देन देवी कात्यायनी महिषासुरस्य दूतं दुन्दुभिं संबोधयामास	२० ।२३
	=महिषः, अस्य वधः शङ्करस्य तेजोऽंशेनोत्पन्नसुतेन भविष्यतीति विष्णुना देवाः संदिष्टाः	२२ ।१९
	=महिषः	२२ ।१९
	=बलिः, इमं प्रवरा देव्योऽप्सरसश्च प्रपद्यन्ते स्म	२३ (२) ।२१
	=बलिः, अस्य प्रह्लादेन सह संवादः	२३ (८) ।१५
दैत्येशः	=दुन्दुभिः, इमं प्रति कात्यायन्या स्वकुलधर्मः प्रोक्तः	२० ।३१
दैत्येश्वरः	=महिषासुरः, अस्मै कात्यायन्या अङ्गसौष्ठवं चण्डमुण्डाभ्यां वर्णितम्	२० ।१३
	=बलिः, अस्य वामनावतारधारिणा विष्णुना सह संवादः	२३ (१०) ।६७
दैन्यम्	=अनेन युक्ता राक्षसा मुनीन् प्रति स्वसंततितारणविषये समीहितमूचुः	२३ (१९) ।३१
दैवतानि	=एभिरजेयः पुत्रो रम्भासुरेण वह्निसकाशात् प्रार्थितः	१८ ।५१
	=एभिः सर्वैरवध्यं महिषासुरं देवी कात्यायनी युद्धेऽपीडयत्	२० ।४२
	=देवाः, एषां निःश्रेयसार्थं शरणं भवेति देवा विष्णुमुक्तवन्तः	२३ (६) ।६
	=एतानि जनः कुरुक्षेत्रस्थकपिलाह्रदे स्नात्वाऽर्चयेत्	२३ (१४) ।२४
	=एभिः सह पितरः सुतीर्थकतीर्थे कुरुक्षेत्रस्थे नित्यं सन्निहिताः सन्ति	२३ (१४) ।४०
	=इमानि कुरुक्षेत्रस्थे सोम-तीर्थेऽर्चयित्वा स्वर्गं लभते नरः	२३ (१६) ।१६

	=एभिः सह स मोदते यः पञ्चवटतीर्थस्थितं महेश्वरमर्चयति	२३ (२०) ।१३
	=एतानि सर्वाणि शिवपत्नीं गिरिजा शशाप	२८ ।५४
दैवम्	=इदं श्राद्धम्, अस्मिन् निमन्त्रितो यदि क्वचिदन्यतो भुङ्क्ते तर्हि स नरकगतः संस्तीक्ष्णतुण्डैः खगोत्तमैर्द्विधा कृष्यते	१२ ।८
दोर्दण्डाः	=एतैर्दुर्गदिव्या बलिनो महासुरा निर्धूताः विशीर्णदर्पाश्च कृताः	२१ ।३८
दोषः	=राक्षसीनां योनिदोषेण राक्षससंततिर्वर्धते	२३ (१९) ।३५
दोषाः	=सर्वैर्दोषैर्विवर्जितः पुत्रः प्राप्यतेऽदितिवनेऽदित्या देवमातुर्दर्शनेन	२३ (१३) ।१३
	=सर्वैर्दोषैर्विवर्जितो भवति मानवः कुरुक्षेत्रस्थसोमेश्वरतीर्थे स्नानेन	२३ (१३) ।३-५
	=सर्वैर्दोषैर्विवर्जितः स भवति यो रुद्राणां स्मरणं करोति	२३ (१५) ।२३
दौहित्री	=पितॄणां दौहित्री काली	२७ ।४२
द्युतिः	=देवी, अनया बलिः सेवितः	२३ (२) ।१९
द्युलोकः	=इमं रागवती देवैर्नीता	२५ ।१७
द्यौः	=लोकः, अत्र कामादयो देवा उर्वशीमधिगृह्य जग्मुः	७ ।२०
	=अस्यामखण्डः शशी दृश्यते	१६ ।२६
	=स्वर्गः, अत्र यथाम्बुदो वृष्टिधारौघं पातयति तथैव नमरो विन्ध्यशैलोपरि बाणवृष्टिं कृतवान्	२१ ।५
	=लोकः, अत्र महेन्द्रं प्राप्य दैत्यकन्येव संवरणं प्राप्य सूर्यपुत्री तपती भवनोत्तमेषु रेमे	२२ ।६१
	=इयं वामनस्य सर्वदेवमये रूपे शिरःस्थानीयाऽऽसीत्	२३ (१०) ।४९
	=लोकः, अत्र व्याधाः संप्राप्ता मानुषाख्यसरसि स्नानप्रभावेण	२३ (१४) ।५५

	=स्वर्गलोकः, अत्र तपस्तप्तुं शिवपत्नी गिरिजा उत्पपात	२८।१०
द्रवः	=अयं प्लावेन शुध्यति	१५।१३
द्रव्यसंपद्	=इमां बलियज्ञस्थां वामनस्तुष्टाव	२३ (१०)।३८
द्रव्याणि	=अमेध्यातिरिक्तद्रव्याणां शुद्धिर्गन्धापहरणेन भवति	१५।१४
द्रुमाः	=इमे विष्णोरेकांशांशकलातः प्रादुर्भूताः	२३ (८)।३७
द्रोणः	=पक्वं द्रोणाढकपरिमितमन्नं यद्यमेध्याभिप्लुतं भवेत् तर्हि शुद्धये तस्याग्रभागः परित्याज्यः शेषस्य च प्रोक्षणं विधेयम्	१५।१७
द्वन्द्वयुद्धम्	=इदं हयग्रीवप्रमुखाणां दैत्यानां हुताशप्रभृतिदेवैः सहाभूत्	९।४८
द्वात्रिंशोऽध्यायः	=कार्त्तिकेयस्य गिरिजादिभिः सह संवादः, शिवादीनां कार्त्तिकेयेन सह संवादः, कार्त्तिकेयस्य विष्णवे प्रणामः, कार्त्तिकेयाय विष्णुकृतं स्वस्त्ययनम्, कार्त्तिकेयस्य गणैः सह भूम्यामागमनम्, गणानां नादः, दैत्यस्य पातालकेतोरन्धकासुरेण सह संवादः, कार्त्तिकेयगणानां दैत्यैः सह युद्धम्, तारकस्य भद्रकाल्या सह महिषासुरस्य कार्त्तिकेयेन सह बाणासुरस्य च मकराक्षेण सह युद्धम्, तारकासुरस्य कार्त्तिकेयकृतो वधः, कार्त्तिकेयस्य महिषासुरं निहन्तुं हिमाचले गमनम्, क्रौञ्चमहिषभेदनविषये कार्त्तिकेयस्य ब्रह्मादिभिः सह संवादः, अस्मिन् संवादे पुरातनी श्रुतिः, क्रौञ्चभेदनविषये कार्त्तिकेयस्य तावदिन्द्रेण सह संवादः, इन्द्रकार्त्तिकेयकर्तृका क्रौञ्चपर्वतस्य प्रदक्षिणा, इन्द्रकार्त्तिकेययोः शङ्करादिभिः सह संवादः, कार्त्तिकेयस्य क्रौञ्चेन सह संवादः, कार्त्तिकेयकृतः क्रौञ्चस्य महिषस्य च वधः, विष्णुकार्त्तिकेययोः संवादः, कार्तिकेयस्य पृथूदकतीर्थे	

स्नानेन तेजोऽवाप्तिः, सचक्रनेत्राख्यगणस्य शिवाद् वरप्राप्तिः, (बाणासुरवधसमर्थं चक्रं प्राप्तम्) सचक्रनेत्रगणस्य कार्त्तिकेयेन सह संवादः ३२।१-१२०

द्वादश =आदित्याः ९।१२

=शूद्राणां सद्यः शौचमपि द्वादशदिवसपरिमितेन कालेन भवति १५।४६

=क्षत्रियेण द्वादशदिनपर्यन्तं मृतकक्रियाः कार्याः १५।४७

द्वादशं नरकम् =अनाचारादिप्रयुक्तम् ३५।१२

द्वादशः =वामनपुराणे कर्मविपाको नाम द्वादशोऽध्यायः १२।५७

द्वादशाह्निकम् =शूद्राणां सद्यः शौचमपि द्वादशाह्निकं भवति १५।४६

द्वादशी =अस्यां ब्राह्मणेभ्योऽनुज्ञां संप्राप्य विष्णोः शयनं कार्यम् १७।८

=तिथिः, ज्येष्ठमासे शुक्लपक्षस्य द्वादश्यां तिथौ वामनदर्शनादिना परमं पदमवाप्यते २३ (१०)।८४

=तिथिर्ज्येष्ठमासे शुक्लपक्षस्य, अस्यां ज्येष्ठाश्रमाख्यतीर्थे स्नात्वा नरो नृषु ज्येष्ठत्वं लभते २३ (१५)।६८

द्वादशोऽध्यायः =सुकेशे राक्षसराजस्य नरकगमनविषयकः प्रश्नो महर्षीन् प्रति, महर्षिभिस्तत्तत्कर्मभिः करम्भसिकतादि-नरकप्राप्तिवर्णनम्, देवादीनां मध्ये प्रवरत्वकथनम्, अन्ते वैतरण्याख्यनरकस्य कृतघ्नस्य च प्रधानत्वख्यापनम्, कृतघ्नस्य निष्कृतिरब्दकोटिभिरपि न भवतीत्यभिमतस्य कथनम् १२।१-५७

=महर्षेर्मार्कण्डेयस्य स्तुत्या तुष्टा सती सरस्वती कुरुक्षेत्रमाप्लावितवती। तीर्थमाहात्म्यकथनं लोमहर्षणेन मुनीन् प्रति, ब्रह्मावर्तदेशस्य निर्माणं स्थितिश्च, कुरुक्षेत्रस्य माहात्म्यकथनम्, ब्रह्मादीनां कुरुक्षेत्रसेवनम्, कुरुक्षेत्रे तत्रत्यतीर्थेषु चाऽऽवश्यकविधेयकथनम् २३ (१२)।१-२१

	=सरोमाहात्म्याभिधः	२३ (१२) ।१-२१
द्वापरः	=युगम्, अस्य कलियुगस्य च मध्ये व्यासेन पृथूदकसरसः प्रमाणमुक्तम्	२३ (१) ।६
	=युगम्, अस्मिन् शङ्करं पूजयित्वा नरो विमुक्तो भवति	२३ (२८) ।४५
द्वापरयुगः	=अस्मिन् ब्रह्माश्रमस्य पूर्वेण पूजादिकं प्रशस्तमुक्तम्	२३ (२८) ।४१
द्वारपालः	=दक्षयज्ञवाटस्य द्वारपालो धर्मः	२ ।१२
	=रन्तुकः	२३ (१३) ।११
	=रन्तुकनामा कुरुक्षेत्रस्थितः, अत्रैकस्मिन् दिवसे निवासः करणीयः	२३ (१३) ।२४
	=रन्तुकनामकः कुरुक्षेत्रस्थितः। अस्य पूजा प्रयत्नतः कार्या	२३ (१३) ।२५
	=यक्षेन्द्रो रन्तुकः कुरुक्षेत्रस्थः	२३ (१३) ।२६
	=कपिलः कुरुक्षेत्रस्य	२३ (१३) ।४४
	=कुरुक्षेत्रस्य द्वारपालः कपिलनामा महायक्षः	२३ (१३) ।४४
	=रन्तुको द्वारपालः कुरुक्षेत्रस्य, अस्य तीर्थे सरस्वत्यां स्नात्वा नरः कामिकं फलं लभते	२३ (१४) ।३७
द्वारम्	=कुरुक्षेत्रस्य द्वारं यक्षिण्या वासस्थानम्	२३ (१३) ।४१
द्वाविंशोऽध्यायः	=देव्याः समुद्भवविषयकः प्रश्नो नारदस्य पुलस्त्यं प्रति, हिमवतः पुत्र्या उमायाः कोशात् कौशिकी जाता, नारदस्य कौशिक्यादिविषयका अनेके प्रश्नाः पुलस्त्यं प्रति, सत्यां प्रनष्टायां रुद्रस्य तपस्तप्तुमुद्योगस्तस्य देवसैनापत्यपरित्यागः, दानवेन्द्रेण महिषासुरेण देवानां पराजयः, देवानां श्वेतद्वीपे हरेर्दर्शनार्थं गमनम्, विष्णुदेवसंवादः, श्रीविष्णुना महिषासुरवधोपायकथनम्, अग्निष्वात्तपितॄणां मानसी कन्या मेना, एतस्याः समाराधनाय श्रीविष्णुना देवा निर्दिष्टाः, कुरु-	

क्षेत्रस्थपृथूदकतीर्थे पितृपूजनाय श्रीविष्णुना देवा आदिष्टाः, कुरुक्षेत्रादिविषयकाः प्रश्ना देवानां श्रीहरिं प्रति, भगवता सोमवंशोद्भवस्य ऋक्षस्य तत्पुत्रस्य संवरणस्य च कथनम्, संवरणस्य वेदाध्ययनमरण्यगमनं च, अरण्ये संवरणेन कन्यकानां तासां मध्य उत्तमायास्तपत्याश्चावलोकनम्, दर्शनानन्तरं परस्परमुभयोर्मोहप्राप्तिः, संवरणस्य तपतीं प्रति मनोभावं ज्ञात्वा वसिष्ठः सूर्यसकाशं गतस्ततश्च तपती संवरणार्थे याचिता सती प्राप्ता, वसिष्ठेन स्वाश्रमे तपत्याः समानयनम्, तपती वसिष्ठं प्रति संवरणस्याङ्गसौष्ठवं मनोभावं चोक्तवती, तत्र संवरणस्याऽऽगमनम्, वसिष्ठेन तपत्याः परिचयदानम्, वसिष्ठादेशेन संवरणस्तपत्या विधिवत् पाणिग्रहणमकरोत् तयोः परस्परमानन्दावाप्तिश्च २२।१-६१

=स्थाणुतीर्थवटमाहात्म्यादिविषयकः प्रश्नो लोमहर्षणं प्रत्यृषीणाम्, सनत्कुमार-मार्कण्डेयसंवादे सनत्कुमारेण पूर्वं स्थावरजङ्गमे नष्टे सत्येकार्णवे च जाते बृहदण्डस्य वर्णनम्, भिन्नादण्डात् प्रणवस्योत्पत्तिः, आद्यं निःसृतं तेज एवाऽऽदित्यपदवाच्यं बभूव, ब्रह्मादेरुत्पत्तिरण्डमध्यादिदेशेभ्यः, वटवृक्षाद् ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणामुत्पत्तिः, बालखिल्यमुनीनां तपश्चर्या, देव्या उमायाः प्रार्थनया शङ्करेण भिक्षुरूपिणा बालखिल्यानां तपःपरीक्षणप्रसङ्गे तत्राश्रमेषु पर्यटनम्, तत्र बालखिल्यपत्नीनां क्षोभः, बालखिल्यमुनीभिः शिवलिङ्गस्य पातनम्, बालखिल्यमुनीनां ब्रह्मणः समीपे गमनम्, तत्र ब्रह्मणा तेषामुपदेशः २३ (२२)।१-८६

द्विजः	=ब्रह्मचारी द्विजो वेदाध्ययनानन्तरं गुरुणाऽनुज्ञातो गार्हस्थ्याद्याश्रमेषु प्रविशेत्, गुरोरेव वा गेहे वसेत्	१४।९
	=द्विजो ब्रह्मचारी विधिपूर्वकं ब्रह्मचर्याश्रमे वसन् मृत्युं जयति	१४।१०
	=गृहस्थाश्रममावसन् द्विजः स्वकर्मणा धनमर्जयेत्, तेन च भक्तिपूर्वकं सदाचाररतः सन् पितृदेवातिथीन् संप्रीणयेत्	१४।१२
	=द्विजेन्द्राणां वाग्विप्रुषः पवित्रा भवन्ति	१५।१०
	=ब्राह्मणः, अस्य त्रिष्वाश्रमेषु प्रवेशाधिकारः	१५।६२
	=अनेन शब्देन सूर्येण महर्षिरगस्त्यः संबोधितः	१९।२४
	=वरुणात्मजः, अयं भास्करं प्रणनाम	२२।४२
	=मङ्कणः	२३ (१७)।२
द्विजन्मानः	=एषां शुश्रूषार्थं सरोमध्यस्थिताद् वटवृक्षाच् शूद्राः समुत्पन्नाः	२३ (२२)।३९
	=एषां तपसाऽऽत्मनः शोषणादिकं प्रशस्यते	२५।५५
द्विजराज्यम्	=इदं सोमतीर्थे तपस्तप्त्वा सोमः संप्राप्तवान्	२३ (१६)।१५
द्विजसत्तमः	=मुनिर्मङ्कणः	२३ (१७)।१२
द्विजसत्तमाः	=एभिः सह लोमहर्षणस्य संवादः	२३ (१५)।८
द्विजाः	=उपाध्यायमधःकृत्वा येऽधीयते ते द्विजा अधमा भवन्ति, तान् योऽध्यापयति स नरके शिलां शिरसा वहति	१२।३१
	=ब्रह्मघ्नादयो द्विजा महारौरवगामिनो भवन्ति	१२।३९
	=एतान् सम्यक् संपूज्य विष्णोः शयनं कार्यम्	१७।७
	=यज्ञसंस्तवविद्भिः शिक्षाविद्भिश्चैभिरीरितं स्वरं देवा ब्रह्मसभायां श्रुतवन्तः	२३ (३)।२३
	=एषां लोमहर्षणेन सह संवादः	२३ (७)।१५; २३ (१०)।८९; २३ (१८)।५; १२; ३९; २३ (२०)।३

=एषां चेष्टितानि वामनस्य सर्वदेवमयस्य पशव आसन् २३ (१०)।५९
=एषामुत्तमस्तीर्थसेवी कपिलद्वारपालयात्रायाः समनन्तरं कुरुक्षेत्रस्थितरामह्रदस्य यात्रां कुर्यात् २३ (१४)।१
=पक्षिणो ब्राह्मणाश्च, एभिर्निषेविता कुरुक्षेत्रे 'आपगा'-नाम नदी विख्याताऽस्ति २३ (१५)।१
=एभिः सह लोमहर्षणस्य संवादः २३ (१५)।२१; २३ (१६)।९; २३ (२१)।१०
=एषां परस्परं राक्षसमोक्षविषये विचारः २३ (१९)।३७
='एषामरीन् निषूदय' इतिं देवा देवीं प्रार्थितवन्तः ३०।६१
द्विजातयः =एषां निन्दया नरकगमनं भवति १२।३
=एतेषां निन्दां येऽनिशं शृण्वन्ति ते नरकयातनां प्राप्नुवन्ति १२।२१-२२
=एभ्यो नैवेद्यसहिता दक्षिणा फाल्गुनमासे रुद्रार्चने देया १७।४८
द्विजातिः =रहोदरः, एकस्य ब्राह्मणस्य नामधेयम् २३ (१८)।७-८
द्विजेन्द्रः =वसिष्ठः, इमं प्रति सूर्यपुत्र्यास्तपत्या विषये संवरणो वसिष्ठं पप्रच्छ २२।५८
=एषां वाग्विप्रुषः पवित्रा भवन्ति १५।१०
द्विजोत्तमः =अत्रिः २३ (३)।२७
=गौतमः २३ (३)।२७
=दक्षः २३ (३)।२७
=नारदः २३ (३)।२७
=पुलहः २३ (३)।२७
=प्रचेताः २३ (३)।२७
=भृगुः २३ (३)।२७
=मरीचिः २३ (३)।२७
=वसिष्ठः २३ (३)।२७

	= अयं कुरुक्षेत्रस्थ एकहंसाख्यतीर्थे स्नात्वा गोसहस्रदानस्य फलं लभते	२३ (१३)।३७
	= अयं कुरुक्षेत्रस्थं कुलोत्तारणाख्यं तीर्थमासाद्य कुलानि तारयति	२३ (१६)।४
द्विजोत्तमाः	= एभिः सह लोमहर्षणस्य संवादः	२३ (१४)।४८; २३ (१७)।१०
	= एषां व्याधैः सह संवादः	२३ (१४)।५२
	= एषां लोमहर्षणेन सह संवादः	२३ (१४)।५६; २३ (१५)।१; २३ (२०)।२; ३१; २३ (२१)।२९
द्वितीया	= अशून्यशयनाख्या, इयं सर्वकामदा प्रोक्ता	१६।२३
	= तिथिः अस्यां विश्वकर्मा स्वपिति	१७।१४
	= अशून्यशयनाख्या, अस्यां विश्वकर्मा स्वपिति, अस्यां पर्यङ्कस्थस्य हरेरर्चा कर्तव्या	१७।१९
	= तिथिः, अस्यां तुलास्थे सूर्ये लक्ष्मीधरमूर्तेर्दानं कर्त्तव्यम्	१७।२८
द्विजातिः	= नरोत्पत्तिप्रलयाख्यः;	
द्वितीयोऽध्यायः	= शरत्कालस्य प्रादुर्भावः, तदीया गुणाः, शङ्करस्य मन्दरपर्वत आगमनम्, दक्षेण क्रतोरारम्भः; तत्र शक्रादयो निमन्त्रिताः, कार्येषु नियोजिताश्च। पुलस्त्येन पुरातनी कथा नारदं प्रति श्राविता, पितामहरुद्रयोः परस्परं प्रश्नः, नारदस्य जन्म, रुद्रस्य बदरिकाश्रमगमनम्, नर-पुरुषयोर्युद्धम्, पितामहरुद्रसंवादो नरप्रलयश्च	२।१-५६
	= वामनमाहात्म्यादिविषयकाः प्रश्ना ऋषीणां लोमहर्षणं प्रति, दैत्यवंशकथने हिरण्यकशिपु-प्रह्लाद-विरोचन-बलीनां जन्मनिर्देशः, बलेरभिषेकः, बलिसमीपं लक्ष्म्या आगमनम्, लक्ष्म्या बलिं प्रति स्वकीयागमनहेतु-कथनम्, लक्ष्म्या बलिशरीरे प्रवेशः, ह्री-कीर्तिप्रभृतिप्रवरदेवीनामप्सरसां च बलिसमीपमागमनम्, एवं बलिना प्राप्तैश्वर्यस्य प्रशंसा	२३ (२)।१-२१

द्वितीयं नरकम् = फलस्तेयादिरूपम् ३५ ।२

द्वितीयः = द्वितीयवरस्य प्रार्थनायै नारायणेन प्रह्लादः प्रेरितः ८ ।६०

द्विदलकम् = द्विदलयुतमन्नं मनुवचनानुसारेण भोज्यं भवति १५ ।३

द्विपदाः = सर्वेषु द्विपदेषु विप्रः श्रेष्ठः १२ ।५०

द्वीपः = प्लक्षः ११ ।३५
= अयं कुशाख्यः, सप्तसु द्वीपेषु चतुर्थः ११ ।३६
= शाल्मलिः, एतन्नामकस्तृतीयो द्वीपः ११ ।३६
= क्रौञ्चः ११ ।३७
= पुष्करः ११ ।३९; ४६
= पुष्करः; अस्य संस्थितिर्द्वादशाध्याये कथिता १३ ।१
= पुष्करः, जम्बूः १३ ।१
= श्वेतः २२ ।१२; २३ (४) ।१६

द्वीपनामानि = इन्द्रद्वीपः, कसेरुमान्, ताम्रवर्णः, गभस्तिमान् नागद्वीपः, कटाहः, सिंहलः, वारुणः कुमारः १३ ।९-१०

द्वीपम् (द्वीपानि) = इमानि सप्त कथितानि ११ ।३०
= एतन्नाम प्रजापतिना ब्रह्मणा स्थानानां कृतम् ११ ।३३
= जम्बूद्वीपम् ११ ।३३

द्वीपाः = सप्तसंख्याकाः, एषां धर्माः क्रियाश्च पृथग् भवन्ति ११ ।४३
= नवसंख्याका द्वीपा भारताख्ये वर्षे सन्ति, एते सर्वे सागरान्तरिता अगम्याश्च १३ ।८
= सप्तसंख्याकाः, इमे सुप्रभातकरणार्थं प्रार्थ्यन्ते १४ ।२७
= एतान् वामनाकृतिविष्णुस्थितान् प्रह्लादो ध्यानेन ददर्श २३ (८) ।१३
= इमे विष्णोरेकांशांशकलातः समुद्भवन्ति २३ (८) ।३७
= एभिः सहितां पृथ्वीं वामनो मृदु गच्छन् चालयामास २३ (९) ।४१

द्वेषः	=यो नित्यं परगुणैः सह द्वेषं करोति स श्वानसंज्ञको भवति	१५।३१
	=अयं शिवरूप उक्तः	२३ (२६)।११४
द्वैतम्	=अस्मिन् व्यवस्थितं ब्रह्म सरस्वत्या व्याप्तम्	२३ (११)।२०
	=अस्मिन् व्यस्तभूतं सर्वमपि लक्ष्यं सरस्वत्याः स्वरैर्व्यञ्जनैश्च संबद्धम्	२३ (११)।२२
द्वैतवनम्	=वनम्, अत्राऽऽगत्य नृपतिश्रेष्ठः कुरुः संतुष्टो बभूव	२३।१२
	=इदं शुना केनचित् परित्यक्तम्	२३ (२६)।५७
द्वौ	=द्वयोरपि वेदयोरध्ययनानन्तरं गुरुणाऽनुज्ञातः सन् ब्रह्मचारी गार्हस्थ्याश्रमे प्रवेशं कर्तुं प्रभवेत्	१४।७
	=एताभ्यां शुक्ल आसीद् राजा संवरणः	२२।५३
	=संख्या (पुरुषयोः), आभ्यां होत्रात्मानं विष्णुमुद्दिश्य हूयते	२३ (५)।१-३२
	=ब्राह्मणौ, आभ्यामदितिवने भोजनदानेन नरः परमगतिमाप्नोति	२३ (७)।६

ध

धत्तूरः	=अस्य पुष्पैः कालाष्टम्यां तिथौ शङ्करस्य पूजा करणीया	१७।३२
	=विटपः, अयं महेश्वरस्य रतिकृद् वर्तते	१८।४
धत्तूरकुसुमानि	=एभिराषाढमासे दक्षयज्ञघ्नस्यार्चनं कार्यम्	१७।५८
धनदः	=यक्षाधिपतिः, अस्य पुत्रेण पाञ्चालिकेन सह शङ्करस्य संवादः	६।४६-५६
	=महाव्रती, अस्य शिष्योऽर्णोदरः	६।९१
	=अस्य वाहनं शैलाकारो नरोत्तमोऽभूत्	९।१८
	=कुबेरः, अस्य जम्भेन सह युद्धम्	९।४७
	=कुबेरः, अयं कात्यायन्यै गदां ददौ	१९।१५
	=कुबेरः, शिव एव कुबेर उक्तः	२३ (२६)।१२०
धनम्	=अस्याऽऽधिपत्यं गुह्यकानां धर्म उच्यते	११।२५

	=गृहस्थाश्रमं प्रविश्य द्विजः स्वकर्मणा धनमर्जयेत्, तेन च पितृदेवातिथीन् संप्रीणयेत्	१४।१२
	=इदं सदाचारस्य शाखा	१४।१९
	=वृथा दानाद् धनस्य क्षयो भवति	१४।४२
	=इदं धर्मत एवाऽऽहार्यम्	१५।५२
	=इदमहं पर्याप्तं दद्यामिति त्वया याचमानं वामनं प्रति वक्तव्यमिति शुक्रो बलिमाह	२३ (१०)।१६
	=अस्य समृद्धिं स वैश्यः प्राप्नोति यो बलिविष्ण्वादीनां कथां शृणोति	२३ (१०)।९१
	=अनेन स नरो युज्यते यः श्रद्धया विहारतीर्थे स्नानमाचरति	२३ (२१)।१५
	=अस्य प्राप्तये वेनकृतः शिवस्तवः श्रोतव्यः	२३ (२७)।९
धनसम्पदः	=आसां कामना कुमारेश्वरमाहात्म्यात् सिध्यति	२३ (२५)।१९
धनिष्ठा	=धनिष्ठानक्षत्रस्याऽऽद्यमर्धम्। शनिक्षेत्रम्। अस्य मकरराशिः	५।४०
	=अस्य नक्षत्रस्यान्त्यमर्धम्। कुम्भराशिः	५।४१
धनुः	=राशिः, देवाचार्यगृहम्। कालरूपिणः शिवस्योर्वोर्युगलम्	५।३९
	=राशिः, अस्य स्वरूपं संचरस्थानानि च	५।५६
	=शार्ङ्गम् आजगवं चैतन्नामकं नर-नारायणयोः समीपस्थं प्रह्लादेन दृष्टम्	७।४६
	=शार्ङ्गम्	८।१
	=इदं दानवसैन्यविनाशाय भगवत्या कात्यायन्या नामितम्	२१।६
	=चिक्षुरस्य, अस्मिश्छिन्ने सति चिक्षुरः खड्गं जग्राह	२१।२७
	=इदं यन्त्राणां मध्ये शिवरूपमुक्तम्	२३ (२६)।११३
धनुर्धराः	=एषामष्टौ सहस्राणि कुरुजाङ्गले सुदुष्कृतान् वारयन्ति	२३ ।४२
धनेश्वरः	=कुबेरः, अस्य गदां देवी महिषासुरस्योपरि चिक्षेप	२१।४४

धन्वी	=शिवस्य नाम	२३ (२६) ।७७
धमधमा	=देवी, इमां केदारतीर्थे कार्त्तिकेयाय ददौ	३१ ।९६
धरणी	=पृथिवी, अस्यास्तीर्थे कुरुक्षेत्रस्थे स्नात्वा नरः परमं पदं प्राप्नोति	२३ (१३) ।१९
	=पृथिवी, अत्र कृताः सर्वेऽपराधाः कुरुक्षेत्रस्थे धरण्यास्तीर्थे स्नातस्य पुरुषस्य नश्यन्ति	२३ (१३) ।२०
	=पृथिवी, इयं सर्वेषां भूतानां धारिणीति 'धरणी' उच्यते	२३ (२२) ।३४
धरणीधरः	=अस्य सदृशः महिषासुरो देव्या मृद्यमानः सन् हीनबलो बभूव	२१ ।४८
धरा	=पृथिवी, इयं विष्णुना दंष्ट्रया समुद्धृता	२३ (८) ।२६
धराधरः	=नारायणः, अस्य प्रह्लादकृता स्तुतिः	८ ।५१
धर्मः	=दक्षयज्ञे द्वारपालः, वीरभद्रेण सहास्य युद्धम्	४ ।२२-२९
	=दक्षयज्ञे वीरभद्रेण जितोऽयम्	४ ।२९
	=अस्य स्वरूपम्, अस्य भार्या — अहिंसा, अस्य पुत्राः - हरि - कृष्ण - नरनारायणाः	६ ।१-२
	=एतत्कार्येषु ब्राह्मणा निरता आसन् प्रह्लादशासने	७ ।२४
	=अस्य विधानाय नारायणेन प्रह्लादोऽनुशिष्टः	८ ।६६
	=अयमेवेह लोके परलोके चाव्ययं श्रेयोऽभिमतः	११ ।१३
	=अस्य समाश्रयेण सुखं भवति	११ ।१३
	=देवानाम्	११ ।१५
	=दैत्यानाम्	११ ।१६
	=सिद्धानाम्	११ ।१७
	=गन्धर्वाणाम्	११ ।१८
	=विद्याधराणाम्	११ ।१९
	=किंपुरुषाणाम्	११ ।२०
	=पितृणाम्	११ ।२१
	=ऋषीणाम्	११ ।२२
	=अस्य परिज्ञानमृषीणां धर्मः	११ ।२२

=मानवानाम् ११ ।२३-२४

=गुह्यकानाम् ११ ।२५

=राक्षसानाम् ११ ।२६

=पिशाचानाम् ११ ।२७

=प्लक्षादि - शाकान्तद्वीपेषु वसतां नराणां कृते दिव्यो धर्मः प्रवर्तते ११ ।४५

=पैशाचः, इममाश्रित्य पुष्करद्वीपवासिन आसते ११ ।४६

=धर्मविधिक्रियासु सत्यं श्रेष्ठम् १२ ।४६

=सार्ववर्णिकधर्मस्य दशाङ्गानि निरुक्तानि १४ ।२

=ब्रह्मचारिणो धर्मः १४ ।४

=सदाचारस्यायं मूलभूतः १४ ।१९

=इमं प्रभातकाले शिवोक्तमङ्गलपाठानन्तरं समुत्थाय विचिन्तयेद् मानवः १४ ।२९

=प्रातःकाले शुभवस्तुजातस्य स्पर्शं विधाय निजजातिधर्मः करणीयः १४ ।३७

=कुलधर्मः स्वगोत्रधर्मश्च न त्याज्यः १४ ।३८

=पुरुषो धर्मेषु भेदं न कुर्यात् १४ ।३९

=अस्मिन् स्थितैर्नरैर्वर्ज्यं भोज्यमृषिभिः सुकेशिं प्रत्युक्तम् १५ ।१

=अस्मादेव धनमाहार्यम् १५ ।५२

=अस्य संप्राप्तिर्निर्दिष्टाचारस्य विधानेन गृह एव भवति १५ ।५४

=वर्णानां धर्मः, एतद्विषयकं कथनं महर्षीणां सुकेशिं प्रति १५ ।६१

=स्वधर्मं यः संत्यजेत् तस्मै दिवाकरः प्रकुप्येत् १५ ।६६

=अमुं चिन्तयन् राक्षसराजः सुकेशिः स्वपुरं जगाम १५ ।६७

=अनेन युक्तं वचः सुकेशी राक्षसान् प्रत्युवाच १६ ।१

=आद्यो धर्मो दान-दयाऽहिंसादिरूपः १६ ।४

=त्रयोदशाङ्गरूपः, अस्य पालनं सुकेशिवचनात् सर्वे निशाचराश्चक्रुः १६ ।५

=अनेन संयुता निशाचरा बभूवुः १६ ।३५

=स्वधर्माद् विच्युतिः स्वधर्मविघातकारिणी भवति	१६ ।३७
=अयं संवत्सरं यावत् कृतेन व्रतेनाक्षयो भवति	१८ ।२४
=अयं रक्तबीजभयाद् दूरे गतः	१८ ।७२
=शुल्काख्यः, अयं स्वकुलस्य कात्यायन्या दुन्दुभिं प्रति प्रोक्तः	२० ।३१
=अस्मिन् निरतो बभूव संवरणाख्यो राजा	२२ ।२७
=इममविरोधयन् कुरुः सौदामिन्या[1] सह पौलोम्या सह मघवानिव रेमे	२३ ।६
=ब्रह्मणो वेदयो धर्मस्य सेतुत्वेन स्वीकृताः	२३ ।१८
=अष्टाङ्गः, अयं राजर्षिकुरुणाऽऽख्यातो विष्णुसमक्षम्	२३ ।२८
=अस्मिन् प्रवृत्ते सति दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।७
=अस्मिन्नुत्थिते सति दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।१०
=चतुष्पादो धर्मः, अस्मिन् स्थिते सति दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।११
=अयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।३१
=वामनावतारे संजातेऽस्मिन् सर्वभूतानां मतिरभूत्	२३ (९) ।१५
=अस्य पद्धतिर्वामन एव संस्थितेति वामनस्तवे ब्रह्मा न्यवेदयत्	२३ (९) ।२७
=अयं वामनस्य मनःस्थानीयोऽभवत्	२३ (१०) ।५३
=अनेन हीना राक्षसा भवन्ति	२३ (१९) ।३२
=अस्य गतिर्गहना भवति	२३ (२२) ।४९
=अस्य काचित् क्रिया बालखिल्यमुनिभिर्न ज्ञाता	२३ (२२) ।७५
=अस्य सर्वस्वं विदित्वा क्षिप्रमेव फलं लभते	२३ (२२) ।७६
=मनुपुत्रः क्षुवतो धर्मेण रोदसी आवृत्य ब्रह्मसदनं प्राप्तवान्	२३ (२६) ।८

---

[1] 'सौदामनी' इत्येव व्याकरणानुसारि शुद्धं रूपम् । 'सौदाम्नी' इत्यपि पुराणपाठभेद इति वागीशः शास्त्री ।

=अस्य प्रमाणं श्रुतिर्भवति २३ (२६) ।१३
=अयं दशलक्षणसंयुक्तः शिवरूप उच्यते २३ (२६) ।११६
=अस्याहिंसाख्यायां भार्यायां पुत्रचतुष्टयमभूत् ३४ ।६९-७०
=अस्य पुत्रेण सनत्कुमारेण सह संवादः ३५ ।४९
=अयं स्वपुत्रं सनत्कुमारं योगाचार्याय ब्रह्मणे समर्पितवान् ३५ ।५१-५२
धर्मक्षेत्रम् =समन्तपञ्चकक्षेत्रे कुरुणा कृष्टं भूमिस्थानम् २३ ।३३
धर्मज्ञः =पुलस्त्यः, अयं नारदेन पृष्टो रुद्रादिवाहनकथनाय ९ ।१३
धर्मपद्धतिः =इयं वामनाख्ये विष्णावेव संस्थितेति वामनस्तवे ब्रह्मोवाच २३ (९) ।२७
धर्मपन्थाः =अस्मिन् स्थितेन मङ्कणेन सह शङ्करस्य संवादः २३ (१७) ।१२
धर्मराजः =अस्य वाहनं पौण्ड्रकनामा महिषः ९ ।१६
=यमः, अस्य किङ्करा नरकपतितानां नराधमानां श्रवणेषु लोहमयान् कीलान् क्षिपन्ति १२ ।२२
धर्मराट् =अयं कर्कटराशिगते दिवाकरे पञ्चम्यां स्वपिति १७ ।१४
धर्मसर्वस्वम् =इदं ब्रह्मा बालखिल्यमुनीन् प्रति श्रावयामास २३ (२२) ।७५
धर्मस्थानम् =द्वैतवनस्थं समन्तपञ्चकनाम तीर्थम्, अत्र नृपतिः कुरुर्जगाम २३ ।१५
धर्माः =द्वादशयोनीनां कृते ब्रह्मणा कथिता एते गतिप्रदाः सन्ति ११ ।२८
=मनुजादीनां धर्मा महर्षिभिः सुकेशिं प्रति प्रोक्ताः ११ ।३०
=कुमारद्वीपस्थदेशवासिनाम्, एते महर्षिभिः सुकेशिं प्रत्युक्ताः १३ ।५८
=वर्णाश्रमाणां धर्मा न कदाचिदपि हेयाः १५ ।६४
=त्रयः, एते सरस्वत्या रूपम् २३ (११) ।१०
धर्मारण्यम् =अत्र स्नानार्थं रुद्रो गतः ३ ।१०
धातवः =त्रयः, एते सरस्वत्या रूपम् २३ (११) ।११
धाता =अस्मिन् प्रह्लादेन स्वकीयं मनः संनिवेशितम् ८ ।७२
=जगतां धाता = विष्णुर्वामनाख्यः २३ (९) ।२६
=जगतो धातुः = वामनरूपिणो विष्णोर्मायया जगत् पीडितमभूत् २३ (१०) ।८

	=शिवस्य नाम	२३ (२६) ।१३२; १४५
	=देवः अयं कार्त्तिकेयाय त्रीननुचरान् ददौ	३१ ।६५
	=अयं द्वौ गणेश्वरौ कार्त्तिकेयाय प्रादात्	३१ ।७२
धातुकी	=नदी, इयं भारतवर्षस्थकुमारद्वीपे हिमवत्पादाद् विनिःसृता	१३ ।२१
धान्यम्	=शालिः	१२ ।५०
	=शूर्पधान्यं जलेन शुध्यति	१५ ।५
	=अनेन स युक्तो भवति यः श्रद्धया विहाराख्यतीर्थे स्नानमाचरति	२३ (२१) ।१५
धान्यानि	=सर्वेषु धान्येषु शालिनामकं धान्यं मुख्यम्	१२ ।५०
धारा	=नारायणभुजनिःसृतास्तिस्रो धाराः	२ ।४७-४९
	=जलधारा, अस्या मेघा यथा दिव उपरि वृष्टिं कुर्वन्ति तथैव नमरो विन्ध्यशैलोपरि बाणवृष्टिं चकार	२१ ।५
धावमानः	=शिवस्य नाम	२३ (२६) ।८१
धूतपापा	=नदी, इयं भारतवर्षस्थ-कुमारद्वीपे हिमवत्पादाद् निःसृता	१३ ।२१
	=नदी, इयं जम्बूकं गणं कार्त्तिकेयाय ददौ	३१ ।८०
	=नदी, इयं महारावं गणं कार्त्तिकेयाय ददौ	३१ ।८२
धूपः	=कालाष्टम्यामनेन शङ्करस्य पूजा करणीया	१७ ।३३
	=सर्जनिर्यासस्य धूपं हिरण्याक्षायाऽऽघ्रापयेत्	१७ ।३४
	=अयं कार्त्तिके स्थाणोरर्चने श्रीवासस्य निर्यासेन देयः	१७ ।३६
	=अयं मार्गशिरे मासि रुद्रार्चायां श्रीवृक्षस्य निर्यासेन देयः	१७ ।३९
	=अयं पौषे मासि त्र्यम्बकस्य पूजायां मधुकनिर्यासेन देयः	१७ ।४०
	=उमापतेरर्चने माघमासे कदम्बनिर्यासेन धूपो देयः	१७ ।४२
	=अयं वैशाखमासे शङ्करपूजने सर्जवृक्षस्य देयः	१७ ।५३
	=अयं श्रावणमासे हरार्चनेऽगुरोर्देयः	१७ ।६०

=अयं केशवाय धूपनीयः १८ ।१८

=अयं कुरुक्षेत्रस्थाय यक्षाय देयः २३ (१२) ।२०

ध्रुवः =अयमुपरिष्टात् पातु इति प्रार्थितम् ३२ ।२४

=शिवस्य नाम २३ (२६) ।१३४

धूम्रलोचनः =अस्य शुम्भेन सह संवादः २९ ।४०

=अस्य कौशिक्या सह संवादः २९ ।४४

=अयं गदामादाय देवीं कौशिकीं समभ्यधावत् २९ ।४६

धूर्तः =शिवस्य नाम २३ (२६) ।१२९

धृतगष्ट्रः =कश्चिद् राजा, अयं बकेन वाहनैः सार्धं हुतः २३ (१८) ।२६

=राजा, अनेन बकः प्रसादितः २३ (१८) ।२७

=एनं दक्षिणार्थं दाल्भ्यो बकोऽयाचत २३ (१८) ।२८

=राजा, अस्य राष्ट्रमृषिर्बकोऽवकीर्णतीर्थे जुहाव २३ (१८) ।३०

=अनेन बकनामा ऋषिः प्रसादितः २३ (१८) ।३३

=राजानमिमं बकनामक ऋषिः पुनरुत्थापयामास राज्येन यशसा च २३ (१८) ।३५

धृतिः =देवी, इयं बलिसमीपमागता २३ (२) ।१९

=इयं पृथिव्या परित्यक्ता मधुसूदने गर्भस्थे सति २३ (८) ।५

=इयं वामनस्य कटिभागे स्थिताऽऽसीत् २३ (१०) ।५७

=इयं सरस्वत्यायत्ता २३ (१९) ।१५

=इयं शिवरूपा प्रोक्ता २३ (२६) ।११४

धेनुः =अस्या स्ववत्सायाः प्रातःकाले स्पर्शः शुभसूचको भवति १४ ।३६

=इयं श्रावणमासे हरार्चने दक्षिणायां देया १७ ।६२

धैर्यम् =वामनस्य धैर्ये महार्णवः स्थित आसीत् २३ (१०) ।५६

ध्यानम् =लोकेनोक्तं शुभाशुभं ज्ञातुं सूर्यो ध्यानं दध्यौ १६ ।३२-३३

=अस्य पथि प्रह्लादो मनोऽकरोत् २३ (८) ।१९

=अस्मिन् नारदः स्थित आसीत् कुरुक्षेत्रस्थान्यजन्मतीर्थतटस्थमश्वत्थवृक्षमाश्रित्य २३ (१५) ।३२

ध्वजः =चिक्षुरस्य ध्वजं दुर्गादेवी शरेणैकेन चिच्छेद २१ ।२६

न

नकुलीशः	= गणः, अयं कुरुक्षेत्रे स्थाणोः पश्चिमदिग्भागे	२३ (२५) ।१३
	विद्यते	२३ (२५) ।१३
	=आयुधम्, अनेन स्थाणुर्महादेवः परबलं न्यसूदयत्	३२ ।५०
परिचर्या	=इमां पार्वत्यास्तत्सख्यश्चक्रुः	२५ ।४२
परिचारिकाः	=अप्सरसः, संवरणस्य दर्शनेन यदा सूर्यपुत्री तपती खेदमवाप तदाभिस्तपत्याः परिचर्या कृता	२२ ।४८
परिणामः	=अनेन विवर्जितं सरस्वत्या रूपम्	२३ (११) ।१४
परित्यागः	=चतुर्थे संन्यासाश्रमे सर्वसङ्गपरित्यागः कर्तव्यः	१५ ।५९
परित्राणम्	=सरस्वत्याः परित्राणार्थमृषयः परं यत्नं प्रचक्रिरे	२३ (१९) ।२७
परिपन्थिनः	=चतुर्युगव्यवस्थायाः परिपन्थिनो वामनेन (विष्णुना) नियन्तव्या भवन्ति	२३ (१०) ।७०
परिभवः	=देव्याः स्तुतिबलिकुसुमकराणां जनानां परिभवो न भवति	३० ।६३
परिभ्रमणम्	=दिगम्बरोऽपि नग्नो भूत्वा परिभ्रमणं न कुर्यात्	१४ ।४७
परिमाणम्	=अन्धकासुररथस्य	९ ।२६
	=क्रोशमात्रम्	२३ (१५) ।१
	=प्रस्थः, प्रस्थपरिमितानां तिलानां किंदत्तकूपस्थले दानेन परमा सिद्धिरवाप्यते	२३ (१५) ।६०
परिवादः	=ब्रह्मशङ्करयोः परस्परम्	२ ।२९
परिश्रमः	=वाराणसेयेषु पुरुषेषु स्त्रीषु चाप्यस्याभावः	३ ।३५
परे	=एषां मर्माणि निकृन्तन्निव यो भाषते स श्वानसंज्ञको भवति	१५ ।३१
पर्णधारपुटः	=शिवस्य नाम	२३ (२६) ।७८
पर्णाशा	=नदी, इयं भारतवर्षस्थकुमारद्वीपे पारियात्रपर्वताद् निःसृता	१३ ।२३
पर्णासा	=नदी, इयं श्रुतवर्णं गणं कार्त्तिकेयाय ददौ	३१ ।८१
पर्युषितम्	=पर्युषितमप्यन्नं यदि स्नेहयुक्तं स्यात् तर्हि तद् भोज्यं भवति	१५ ।२

पर्व = अस्मिन् ये मैथुनमाचरन्ति ते पापिनो नरके वह्नितप्तां शाल्मलीमालिङ्गन्ति १२ ।३०
= एषां कालेऽगस्त्यमुनिरम्बरस्थमाश्रमम् आवसत् १९ ।३४
पर्वकालः = अस्मिन्नगस्त्यमुनिरम्बरस्थमाश्रमम् आवसत् १९ ।३४
पर्वतः = कालञ्जरः, हिमाद्रिः, विन्ध्यः ६ ।५५-५६
= शिशिराद्रिः ६ ।१०६
= मन्दरनामकः ७ ।१०
= मेरुः ९ ।८; २२ ।३८; २३ (२२) ।३६
= शैशिराद्रिः १२ ।४४
= हिमवान् १२ ।५५; १३ ।२२; १९ ।१६ २२ ।३; २३ (२६) ।११२; ३१ ।६७; ३४ ।८;
= परियात्रः १३ ।२४;२६ ।४८
= ऋक्षः १३ ।२७
= सह्यः १३ ।३१
= शुक्तिमान् १३ ।३२; २६ ।४७
= विन्ध्यः १३ ।५५; १९ ।२१; २६; २७; २८; ३०; ३५; २० ।३; १६; ३६; २१ ।५; २२ ।४;२६ ।४८;२८ ।२६; २९ ।१९;४३;७७;३० ।७०;३१ ।६७
= प्रालेयाद्रिः २२ ।१७
= अद्रिः २३ (८) ।१३
= कैलासः २३ (२२) ।६९; २३ (२३) ।३; २१; २६ ।४८; २७ ।४; ३२ ।८७
= हिमयुक्तः (हिमालयः) २४ ।१०
= मन्दरः २५ ।७४; २६ ।४६; ६६; २७ ।३; ६१; ६२; २८ ।१; २९· ३७; ३३ ।१८
= सुनाभः २६ ।१६; ३२ ।११०
= गन्धमादनः २६ ।१९

	= उदयः	२६ ।४६; ३१ ।१५
	= उद्दालकः	२६ ।४६
	= गरुडासनः	२६ ।४६
	= रम्यकः	२६ ।४६
	= वराहः	२६ ।४६
	= वारुणः	२६ ।४६
	= हेमकूटः	२६ ।४६
	= चित्रकूटः	२६ ।४७
	= त्रिकूटः	२६ ।४७
	= दृढशृङ्गः	२६ ।४७
	= मन्दरकः	२६ ।४७
	= वेगसानुः	२६ ।४७
	= शृङ्गवान्	२६ ।४७
	= अञ्जनः	२६ ।४८
	= दुर्दरः	२६ ।४८
	= निषधः	२६ ।४८
	= मलयः	२६ ।४८
	= महेन्द्रः	२६ ।४८
	= मन्दरः, अस्मिन् देवी गिरिजा शम्भुना सार्धं रेमे	२८ ।७६
	= क्रौञ्चः	३० ।५४; ३२ ।८७; १०७
	= मैनाकः	३२ ।६८
	= हिमाचलः	३२ ।८४;११२
पर्वतकूटम्	= ईदृशं विष्णुशङ्करादिवदनाद् विनिःसृतं तेजः कात्यायनस्याऽऽश्रमे गतम्	१९ ।७
पर्वताः	= कुलसंज्ञका महेन्द्रादयः, एते कुमारद्वीपे सन्ति	१३ ।१४
	= कोलाहल-वैभ्राज-मन्दर-दुर्दर-वातन्धम-वैद्युत-मैनाक-सरस-तुङ्गप्रस्थ-नाग-गोवर्धन-उज्जायन-पुष्प-अर्बुद-रैवत-ऋष्यमूक-गोमन्त-चित्रकूट-कृतस्मर-श्रीपर्वत-कोङ्कणाख्याः कुमारद्वीपस्थिताः	१३ ।१६-१८

	= विन्ध्यः	१३ ।२९
	= इमानाश्रित्य कुमारद्वीपे स्थिता निराहारादयो देशाः	१३ ।५६
	= श्वेतद्वीपगमनप्रसङ्गे सर्वान् पर्वतान् देवाः क्रान्तवन्तः	२३ (४) ।१८
	= महाशैलाः	२३ (७) ।१४
	= अद्रयः	२३ (८) ।३७
	= एभिराच्छन्नामपि मेदिनीं वामनो मृदु गच्छंश्चालयामास	२३ (९) ।४१
	= एभिः सहिता पृथ्वी वामनस्य गत्या संक्षुभिता	२३ (१०) ।१
	= गिरयः	२३ (१०) ।६
	= अण्डस्य जरायुरेव पर्वताः सन्ति	२३ (२२) ।३६
	= एते शिवरूपाः कथिताः	२३ (२६) ।११६
	= पर्वतवासिनः प्राणिनो वेनेन नमस्कृताः	२३ (२६) ।१५७
	= गन्धमादनेन समाहूता मेर्वादिपर्वतास्त्वरया हिमाद्रिभवनं विविशुः	२६ ।४५
पलिता	= इमां मातरं प्रयागतीर्थं कार्त्तिकेयाय ददौ	३१ ।९९
पवनः	= अयं वामनरूपधारिणा विष्णुनैव धार्यते	२३ (१०) ।७
	= अस्य नाम्ना ह्रद एकः कुरुक्षेत्रे प्रसिद्धः	२३ (१६) ।१
	= वायुदेवः, अयं पुत्रशोकेन कुरुक्षेत्रस्थे पवनह्रदे लीनो बभूव	२३ (१६) ।२
पवनह्रदः	= तीर्थम्, (कुरुक्षेत्रस्थम्), अस्मिन् स्नात्वा शैवं पदमवाप्यते	२३ (१६) ।१
पवित्रः	= शङ्करस्य नाम	२३ (२३) ।३६ (१३)
पवित्रम्	= शिवः पवित्राणां पवित्ररूपः	२३ (२६) ।१२१
पशवः	= इमान् वामनाकृतिविष्णुस्थितान् प्रह्लादो ध्यानेन ददर्श	२३ (८) ।१३
	= वामनस्य पशव इष्टय आसन्	२३ (१०) ।५९
	= एते शिवरूपा उक्ताः	२३ (२६) ।११७

पशुः =अस्य वृथा मारणं गृहस्थेन न कर्त्तव्यम् १४ ।४१
=वृथा पशुमारणेन पातकं भवति १४ ।४२
=एषां विषयेऽनृतमुक्तवान् धृतराष्ट्रो नृप ऋषिं बकं प्रति २३ (१८) ।२९
=इमां क्रुद्धः सन् रुद्रो निषूदयति ३२ ।५०

पशुपतिः =शिवस्य नाम २३ (२६) ।७२; २६ ।३६

पशुपालः =राजा कुरुः २३ ।९

पश्चिमः =कुमारद्वीपस्य पश्चिमभागे यवनाः स्थिताः १३ ।११
=स्थाणुतीर्थस्य पश्चिमदिग्भागे विश्वामित्रस्याश्रमः आसीत् २३ (१९) ।३
=सरस्वती नदी विप्राणां हिताय कुञ्जानि कृत्वा पश्चिमं मार्गं प्रयाता २३ (२१) ।६

पश्चिमा =दिक्, अस्यां स्थिता अनेके सूर्पारकादयो जानपदा जनाः संख्याताः १३ ।५२
=दिक्, इमां सरस्वती नदी प्रयाता २३ (११) ।२

पह्लवाः =एतदाख्या जनाः स्वेच्छया क्षुद्रनदीजलानि पिबन्ति १३ ।३७

पांशवः =इमे वायुना समुदीरिता महादुष्कृतकर्माणं परमं पदं नयन्ति स्म २३ (२४) ।२३

पांशुः =अनेनेन्द्रः कुरुक्षेत्रस्थं सरः पूरितवान् २३ (२२) ।१०
=अनेन सरसः पूरणाय ब्रह्मा देवान् आदिदेश २३ (२४) ।१०
=अनेनेन्द्रः सरः पूरयामास २३ (२४) ।११
=अनेन स्वगात्राणि स्पृशन्ति स्म बालखिल्याद्या ऋषयः २३ (२४) ।१५
=अनेन निर्धूतपापा भूत्वा मुनयो ब्रह्मणः पदं प्रयाताः २३ (२४) ।१६
=एनं प्रयत्नेनोपसेव्य सिद्धाः परमं पदं प्रयाताः २३ (२४) ।२२

पाकः =पुनः पाकेन मृन्मयानां भाण्डानां मेध्यता भवति १५ ।७
=अस्मिन् सरस्वती संस्थिता २३ (११) ।१३

पाकशासनः =इन्द्रः; अयं पांशुना सरः पूरयामास २३ (२४) ।११

पाञ्चाला:	= एतदाख्या जनाः स्वेच्छया क्षुद्रनदीः पिबन्ति	१३ ।३५
पाञ्चालिकः	= यक्षाधिपतेस्तनूजः, अनेन सह शङ्करस्य संवादः	६ ।४६-५६
पाञ्चालिकेशः	= धनदस्य पुत्रः पाञ्चालिकोऽयं शिववरदानप्रभावादेतन्नाम्ना प्रथितो जातः	६ ।५४
पाटला	= कामदेवधनुषः कोटी पाटला जाता	६ ।१००
पाणिः	= हस्तनक्षत्रम्, सोमपुत्रस्य सद्म, अस्य कन्याराशिः, कालरूपिणः शिवस्य जठरस्थानम्	५ ।३६
	= अस्य तले सप्तवारं मृदमाहरेत् पुरीषाद्युत्सर्गानन्तरम्	१४ ।३१
	= अनेन स्नानानन्तरं गात्रं विमृज्यात्	१४ ।५४
	= सव्येन पाणिना देवी गतासुं नमरं नाम दानवं भ्रामयामास	२१ ।१७
	= अनेन लीलया दुर्गा देवी वीणां जग्राह	२१ ।३४
	= सूर्यपुत्र्यास्तपत्याः पाणिग्रहणाय वसिष्ठो नरेन्द्रं संवरणमादिदेश	२२ ।६०
	= बलेः पाणौ तोये पतिते सति वामनोऽवामनोऽभूत्	२३ (१०) ।४८
	= हस्तः, अनेन विष्णुर्बलिदत्तं सलिलं गृहीतवान्	२३ (१०) ।६७
	= अनेन काचिद् बालखिल्यमुनिपत्नी भिक्षुरूपधरं शिवं जग्राह	२३ (२२) ।६५
पाणिकर्णः	= शिवस्य नाम	२३ (२६) ।६७
पाणिकूर्मः	= गणः, इमं पृथूदकतीर्थं कार्त्तिकेयाय ददौ	३१ ।८८
पाणिखातम्	= तीर्थं कुरुक्षेत्रस्थम्, अत्र स्नानेन राजसूयफलमवाप्यते	२३ (१५) ।५१
पाणित्यजः	= प्रमथः, इमं पूषा कार्त्तिकेयाय प्रादात्	३१ ।६६
पातकम्	= वृथापशुमारणेन नरकप्रदमिदं प्राप्यते	१४ ।४२
	= एभिः स विमुक्तो भवति यः कुरुक्षेत्रस्थ औशनसतीर्थे स्नानमाचरति	२३ (१८) ।२

	= एतानि सर्वाणि नाशयति कुरुक्षेत्रस्थितं कपिस्थल(ष्ठला)-संज्ञकं तीर्थम्	२३ (१५)।१४
	= एतानि सर्वाणि नाशयति दर्शनमात्रेणैव ज्येष्ठाश्रमनामकं तीर्थं कुरुक्षेत्रस्थम्	२३ (१५)।६७
पातकानि	= पञ्चभिः पातकैर्दूषिताः (नराः) कुरुक्षेत्रतीर्थ-स्नानेन मुक्तिं लभन्ते	२३ (२०)।२०
	= कुरुक्षेत्रस्थेऽनरकतीर्थे स्नानेन पातकैर्मुच्यते	२३ (२०)।२६
	= एभिः स मुच्यते यो वैशाखमासस्य षष्ठ्यां तिथावनरकतीर्थे स्नानं करोति	२३ (२०)।२७
	= अनरकतीर्थे कलशदानेन सर्वाणि पातकानि नश्यन्ति	२३ (२०)।२९
	= कुरुक्षेत्रस्थं काम्यकवनं सर्वपातकानां नाशकमस्ति	२३ (२०)।३२
	= एभिः स वर्जितो भवति यः कुरुक्षेत्रस्थं सरस्वतीकूपं पश्यति	२३ (२१)।१७
	= एभ्यो नियमार्थाय क्रिया भवति	२३ (२२)।८१
	= एतानि स्थाणोर्मन्दिरे प्रवेशेन नश्यन्ति	२३ (२५)।५२
	= एभिर्वेनो मुक्तो बभूव स्थाणुलिङ्गस्य दर्शनात्	२३ (२७)।१७
	= सर्वैः पातकैः स्थाणुतीर्थे कृष्णाष्टम्यां वासं कृत्वा मुच्यते	२३ (२८)।३६
	= सर्वैः पातकैर्मानवः कृष्णपक्षस्य चतुर्दश्यां शङ्करं पूजयित्वा विमुक्तो भवति	२३ (२८)।४६
पातालकेतुः	= दैत्येन्द्रः, अयं सूकराननो भूतलाद् रसातलं संप्राप्तः	३२।३५
	= दैत्यः, अस्यान्धकेन सह संवादः	३२।३७
	= दैत्यः, अयं गालवस्य समाधिभङ्गं करोति स्म	३३।५
	= अयं विश्वावसोः पुत्रीं मदालसां जहार	३३।१३
	= दैत्यः, इमम् ऋतध्वजनामा राजा बाणेन जघान	३३।४३
पातालतलम्	= लोकः, अत्र वर्तमानानि सर्वाणि रत्नानि महिषासुरेणार्जितानि	२०।२८

पातालम् =लोकः, नारायणस्य विस्मयकरं चरितं पातालेष्वपि प्रथितम् ७ ।२१
=अत्र च्यवनेन प्रह्लादं प्रति स्वकीयाऽऽगमनकारणमुक्तम् ७ ।३४
=अत्र वासार्थमन्धकासुरो विवेश, गन्धर्वादयोऽपि तत्र समावसन् १० ।५७
=भुवनम्, अत्र महिषीमादाय रम्भासुरो गतः १८ ।५७
=लोकः, इदं महिषासुरस्य वश्यमासीत् २० ।२६
=लोकः, अस्मिन् देव्याः प्रमथगणैः संताड्यमाना दैत्याः प्रवेशं कृतवन्तः २१ ।५०
=सुतलाख्यम्, इदं विष्णुना बलेर्दत्तम् २३ (१०) ।६६
=भुवनम्, अत्र वासं कर्तुं बलिर्वामनं प्राह २३ (१०) ।७१
=भुवनम्, अत्र वसतो ममोपभोगोपपादकं किं भविष्यतीति बलिर्वामनं पप्रच्छ २३ (१०) ।७७
=भुवनं लोकश्च, अत्र बलिः स्थितोऽभूत् २३(१०) ।८६
=लोको भुवनं च, अत्रामृतं पिबतः पितामहस्योद्गारात् समुद्भूता सुरभिः समाश्रिता २३ (१४) ।३०
=लोको भुवनं च, इदं लोकमातृभिः सुरभिभिर्व्याप्तम् २३ (१४) ।३१
=लोकः, अत्र नमुचिर्जगाम २९ ।६
=लोकः, अस्मिन् यानि रत्नान्यासन् तावन्ति शुम्भस्य वेश्मन्यासन् २९ ।३३
=भुवनं लोकश्च, अत्र कार्तिकेयगणानां निनादः प्राविशत् ३२ ।३१

पात्रम् =ताम्रस्य पात्रे गुडोदनं रुद्राय देयम् १७ ।४८
=अखिलं पात्रं वामनं बलियज्ञ उपस्थितं वीक्ष्य सदस्याः साधुशब्दमुदीरितवन्तः २३ (१०) ।३९

पादः =अम्बिकायाः पादान्नरोत्तमः संभूतः ९ ।१८
=हिमवत्पर्वतस्य, अस्मात् सरस्वतीप्रभृतयोऽनेका नद्यो विनिःसृताः १३ ।२२

	=ऋक्षपर्वतस्य, अस्माद् नर्मदादयोऽनेका नद्यः प्रसूताः	१३ ।२७
	=विन्ध्यपर्वतस्य, अस्मादनेका नद्यः प्रसृताः	१३ ।२९
	=सह्यनामकपर्वतस्य, अस्माद् गोदावरी-प्रभृतयो महानद्यो निर्गताः	१३ ।३१
	=एतद्गतमम्भो गृहाद् बहिः क्षेप्यम्	१५ ।२१
	=एतद्द्वयं कात्यायन्याः कमलोदरसन्निभं वर्तते	२० ।१४
	=आभ्यामेव देवी कात्यायनी महिषासुरं हतवती	२१ ।२
	=आभ्यां देवी कात्यायनी महिषासुरं ममर्द	२१ ।४७
	=अनेन देवी कात्यायनी महिषासुरस्य हृदयमाजघ्ने	२१ ।४९
	=हरपादमूले निषण्णा सती देवी कात्यायनी देवान् सान्त्वयामास	२१ ।५२
	=संवरणस्य पादौ चक्रगदासिभिश्चिह्नितावास्ताम्	२२ ।४९
	=राज्ञः संवरणस्य पादयोरङ्गुलयो दीर्घाः सुपर्वाश्चासन्	२२ ।५१
	=सर्वदेवमयवामनस्य पादस्याङ्गुष्ठं चिक्षुरो नाम महादैत्यो जग्राह	२३ (१०) ।६१
पादघातः	=एभिर्देवी कात्यायनी महिषासुरं निषूदितवती	२० ।४३
पादतलम्	=अनेन सर्वदेवमयो वामनः सर्वानसुरान् प्रमथितवान्	२३ (१०) ।६२
पादन्यासः	=भगवतो वामनस्य पादन्यासस्य विक्षोभात् पृथिवी प्रचलिता	२३ (१०) ।५
पादाङ्गुल्यः	=एता वामनस्य पिशाचा आसन्	२३ (१०) ।४९
पादौ	=नारायणोरुसमुद्भूताया बालाया पादावलक्तक-समकान्तिमन्तावास्ताम्	७ ।१२
	=कात्यायन्याः, एतौ ब्रह्मणस्तेजसा बभूवतुः	१९ ।११
	=एतौ चिक्षुरस्य देव्या कात्यायन्या छिन्नौ	२१ ।३०
	=एतौ प्रणम्य प्रार्थनीयो वर इति ब्रह्माऽदिति-कश्यपौ निर्दिदेश	२३ (४) ।१४
	=अनयोः (शङ्करस्य) व्रीडितः सन् पपात मङ्कणः	२३ (१७) ।१६

	=ब्रह्मणः पद्भ्यां शूद्राः सञ्जाताः	२३ (१८) ।२३
	=काश्चिद् बालखिल्यमुनिपत्न्यः शङ्करं पादयोर्जगृहुः	२३ (२२) ।६६
पानम्	=इदमन्यैर्धृतं बुधो न धारयेत्	१४ ।५२
	=अस्य भाजनं गन्धर्वराजः कात्यायन्यै ददौ	१९ ।१७
	=इदं जगतो जनित्री देवी कात्यायनी चकार	२१ ।३७
पाप:	=एषामभावे सति दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।१०
	=एषां विमोचनीं देवीं सरस्वतीं राजा कुरुर्द्वैतवने ददर्श	२३ ।१३
पापदेश:	=अस्मिञ्जातया कयाचित् स्त्रिया सह कुरुक्षेत्रवासिन्या यक्षिण्याः संवादः	२३ (१३) ।४६
	=अस्मिञ्जातां स्त्रियं कुरुक्षेत्रे काचिद् यक्षी ददर्श	२३ (१३) ।४६
पापम्	=अस्य प्राप्तिरिज्यायुद्धवणिज्यादिकर्मणां व्यवहारदोषेण भवति	१३ ।१३
	=अस्य प्रशमनकारिण्यः सरस्वतीप्रभृतयः काश्चन नद्योऽभिमताः	१३ ।३३
	=अस्य बन्धनाद् मुच्यते स मर्त्यो यः शिवोक्तं मङ्गलं प्रातःकाले पठति	१४ ।२१
	=शिवोक्तं मङ्गलं श्रुत्वा स्मृत्वा पठित्वा च मर्त्यः सर्वपापैः प्रमुच्यते	१४ ।२२
	=अस्यापहन्त्री महिषासुरवधविषयिणी कथा	२१ ।३
	=इदं सर्वं संचिन्त्यमानेऽपि विष्णुर्व्यपोहति	२३ (६) ।२६
	=इमानि ज्ञानेन नष्टानि भवन्ति	२३ (८) ।२१
	=अस्मान्मुक्तिं परशुरामः पितॄन् ययाचे	२३ (१४) ।८
	=अस्मात् त्वं मुक्त इति पितरः परशुरामाय वरं ददुः	२३ (१४) ।११
	=अस्मात् स पूतो भवति यो दण्डकतीर्थे केशान् अभ्युक्षति = सिञ्चति	२३ (१४) ।४६
	=इदं तेषां नश्यति य आपगातटवर्तिभ्यो विप्रेभ्यः श्यामाकं प्रयच्छन्ति	२३ (१५) ।२
	=गोकर्णार्चनेन सर्वविधं पापं विनश्यति	२३ (२५) ।१६

	=वेदनिन्दा महत् पापमुच्यते	२३ (२६) ।४३
	=मैथुनाय स्वकन्याह्वानरूपेण महता पापेन ब्रह्मणः शिरोऽशीर्यत	२३ (२८) ।५
	=इन्द्रस्तीर्थे स्नात्वा ब्रह्महत्यापापादमुच्यत	२९ ।११
पापमोक्षः	=अस्य स्थानं वाराणसी	३ ।४१
पापाः	=न्यासापहरणरूपपापयुक्ता जना नरके निगडैर्बध्यन्ते	१२ ।२९
	=पर्वणि मैथुनकारकाः पापिनो नरके पतन्ति	१२ ।३०
	=सर्वेषु पापिजनेषु कृतघ्नः श्रेष्ठः	१२ ।५६
	=पापिनः, एभ्यो दुर्गतिं प्रयच्छति कुरुक्षेत्रस्य द्वारपालः कपिलनामा महायक्षः	२३ (१३) ।४४
पापानि	=ब्रह्मणश्चरणौ प्रणम्य देवाः सर्वपापेभ्यो विमुक्ता अभवन्	२३ (३) ।३७
	=वामनस्य माहात्म्यं श्रृण्वन् सर्वपापैः प्रमुच्यते	२३ (१०) ।८७; ९१
	=इमानि क्षीणानि सरस्वतीनद्याः स्मरणात्	२३ (११) ।३
	=तीर्थानां दर्शनेन पापानि नश्यन्ति	२३ (१२) ।४
	=कुरुक्षेत्रवास-गमनकथनेनापि सर्वपापानि नश्यन्ति	२३ (१२) ।७
	=कुरुक्षेत्रे गच्छामि वसामि वाऽहमिति वदन् पुरुषः पापैः प्रमुच्यते	२३ (१२) ।९
	=एतानि कुरुक्षेत्रस्थसप्तवनानां नामानि हरन्ति	२३ (१३) ।३
	=सर्वेषां पापानां विमोचने धरण्यास्तीर्थे (कुरुक्षेत्रस्थे) स्नात्वा नरः परमं पदं प्राप्नोति	२३ (१३) ।१९
	=एभिर्विवर्जितांल्लोकान् स नरः प्राप्नोति यः कुरुक्षेत्रे हरेण संयुक्तं हरिं पूजयति	२३ (१३) ।२२
	=एभिर्विमुक्तो भवति मानुषाख्यसरसि स्नात्वा	२३ (१४) ।५५
	=इमानि कुरुक्षेत्रस्थमिडास्पदाख्यं तीर्थमपहन्ति	२३ (१५) ।२४
	=सर्वाणि पापानि कुरुक्षेत्रस्थितमन्यजन्माख्यं तीर्थं नाशयति	२३ (१५) ।२८
	=कुरुक्षेत्रस्था वैतरणी नदी पापानि नाशयति	२३ (१५) ।४१

	=एभिः स मुक्तो भवति यो वैतरण्यां स्नात्वा शिवमर्चयति	२३ (१५) ।४२
	=एषां लेपाद् विमुक्तो भवति चैत्रशुक्लचतुर्दश्यामलेपकतीर्थे स्नानेन तत्र शिवपूजनेन च	२३ (१५) ।४४
	=एभिः सर्वैर्नरः प्रमुच्यते कौशिक्याः संगमे स्नानेन	२३ (१५) ।५७
	=एभिर्विशुद्धात्मा भवति नरो विष्णुपदतीर्थे वामनस्यार्चनेन	२३ (१५) ।६६
	=पापानि सर्वाणि क्षयं नयति सरस्वती	२३ (१६) ।३४
	=सर्वेषां पापानां क्षयकारिणी वर्तते सुवेणुनाम्नी नदी	२३ (१६) ।३५
	=एतानि राक्षसाः कुर्वन्ति	२३ (१९) ।३२
	=एभिर्विवर्जिता अभूवन्नरुणासंगमे स्नात्वा राक्षसाः	२३ (१९) ।४३
	=एभिर्विवर्जिता लोकाः कुरुक्षेत्रे शतक्रतोर्यज्ञस्य करणेन प्राप्यन्ते	२३ (२०) ।१६
	=एभिर्मुक्तो भवति नरः कुरुतीर्थं दृष्ट्वा	२३ (२०) ।२१
	=जानताऽपि कृतानि पापानि शिवलिङ्गस्य पूजया शुद्ध्यन्ति	२३ (२३) ।१२
	=कुरुक्षेत्रे स्थाणोः पश्चिमदिग्भागस्थं नकुलीशगणमभ्यर्च्य सर्वैः पापैः प्रमुच्यते	२३ (२५) ।१४
	=एभिर्मुच्यते हस्तिपादेश्वरशिवं दृष्ट्वा	२३ (२५) ।२५
	=एतानि वायुना स्थापितलिङ्गस्य दर्शनाद् विनश्यन्ति	२३ (२५) ।३९
	=स्थाणुलिङ्गस्योत्पत्तिं श्रुत्वा पापैः प्रमुच्यते	२३ (२७) ।२३
	=स्थाणुतीर्थप्रभावश्रवणेन सर्वैः पापैर्मुच्यते	२३ (२७) ।३५
	=सर्वपापेभ्यो मानवो मुक्तो भवति स्थाणुतीर्थस्य माहात्म्यं श्रुत्वा	२३ (२८) ।४९
पापिनः	=इमे नरकान् यान्ति	१२ ।३
	=याज्यकर्मपराणां विप्रादीनां विघ्नकारका एते नरकेषु शिलायां पेष्यन्ते	१२ ।२८

पापीयांसः	=एषु सर्वेषु कृतघ्नो नरः श्रेष्ठः	१२ ।५६
पापीयान्	=कृतघ्नः	१२ ।५६
पायसम्	=अस्य वृथा भक्षणेन पुरुषो नरकयातनामाप्नोति	१२ ।२०
	=इदं स्थाणवे नैवेद्यतया समर्पयेत्	१७ ।३६
पारः	=शिवस्य नाम	२३ (२६) ।९३
पारक्यम्	=एतस्मिन्नर्थेऽतिशयेन लोलुपत्वमपि रक्षसां धर्मः	११ ।२६
पारणम्	=इदम् उमापतेरर्चने षड्भिर्मासैः कर्त्तव्यम्	१७ ।४४
	=अस्यान्ते त्रिनेत्रस्य स्नपनं कार्यम्	१७ ।४४
	=इदं रुद्रार्चनस्य षड्भिरपरैर्मासैः कर्त्तव्यम्	१७ ।६३
पारमेष्ठ्यम्	=अनेन कर्मणाऽहं देवशत्रूणां वधं करिष्य इति विष्णुर्देवान् प्राह	२३ (६) ।९
पारशवः	=शूद्रायां ब्राह्मणादुत्पन्नः पुत्रः	३५ ।४६
पारा	=नदी, इयं पारियात्रपर्वतोद्भूता	१३ ।२४
पारावताः	=उत्तरापथवासिनो जनाः, एते स्वेच्छया क्षुद्रनदीजलानि पिबन्ति	१३ ।३८
पारिप्लवम्	=तीर्थं कुरुक्षेत्रस्थम्, अत्र हरिबलदेवदर्शनानन्तरं गन्तव्यम्	२३ (१३) ।१७
पारियात्रः	=कुमारद्वीपस्थेषु सप्तसु कुलपर्वतेष्वन्यतमः	१३ ।१४
	=पर्वतः, अस्माद् वेदस्मृतिप्रभृतयोऽनेका नद्यो निर्गताः	१३ ।२४
	=पर्वतः, अयं हिमाद्रिभवनमाजगाम	२६ ।४८
पार्थिवः	=संवरणो नाम राजा, इमं तपतीतापितं विज्ञाय वरुणात्मजो दिवाकरसमीपं गतः	२२ ।४०
	=राजा, अस्य लक्षणैरुपेतः सुतस्तपत्यां संवरणेनोत्पन्नः	२३ ।१
	=एषामृषभः = वरिष्ठो राजर्षिः कुरुरासीत्	२३ ।२२
पार्थिवर्षभः	=राजर्षिः कुरुः	२३ ।२२
पार्वती	=इयं हिमवतः सुता सर्वासां सतीस्त्रीणां मध्ये वरिष्ठा	१२ ।५५

=अस्याः कोशात् कौशिकी समुद्भूता २२।६
=देवी, अस्याः संभवं वक्तुं पुलस्त्येन प्रतिज्ञातम् २२।८
=देवी २३ (२१)।११
=इयं तपस्तप्तुं पितरं प्राह २५।३९
=इयं विनोदनार्थं मृन्मयं शिवं तेजसा युक्तं चकार २५।४३
=अस्याः स्वरूपवर्णनम् २५।६३-६४
=अस्याः शिवेन सह संवादः २५।६५
=गिरिराजसुता, इयं शिवस्याऽऽदेशेन पितुर्भवनं जगाम २५।७२
=अस्य वल्लभः शिवः २७।३२
=अनया सह रममाणस्य शिवस्य महान् कालोऽभ्यगात् २८।६
=अस्याः क्रोधाविष्टायाः शिवेन सह संवादः २८।७
=अस्यां तपसि स्थितायां सत्यां तत्र कश्चिद् व्याघ्र उपस्थितो बभूव २८।१४
=इयं ब्रह्मणो वरमवाप्य पद्मकिञ्जल्कसन्निभा समभवत् २८।२३
=अनया सहामरगुरुः शिवो वर्षसहस्रपर्यन्तं महामोहनके तस्थौ २८।३०
=गौरी २८।५६
=शैलेयी २८।५८; २८।६९; ३३।४५
=गिरिजा ३२।१
=कुमारकार्त्तिकेयस्य माता ३२।९
=इमां मन्दरपर्वते सखीमध्ये स्थितामन्धकासुरो ददर्श ३३।१८
=विभावरी ३३।३९
=शतरूपा ३३।३९
=अम्बिका ३३।४०

पार्श्वम् =यमस्य दक्षिणे पार्श्वे पलाशः (वृक्षः) संजातः १८।७

पार्षदाः =एभिः सार्द्धं शिवो विवाहावसरे शैलराजपुरं प्रविवेश २७।२२

	=कार्त्तिकेयगणाः, एभिर्युद्धे ताड्यमानोऽपि महिषासुरो नाकम्पत	३२ ।६८
पालः	=दानवयूथस्य, मयासुरस्य पुत्रो दुन्दुभिनामा, अयं महिषासुरेण देव्याः समीपे संप्रेषितः	२० ।२१
पालनकर्म	=देवानां पालनकर्मणि विष्णुर्वामनरूपेण प्रवृत्तोऽभूत्	२३ (१०) ।६४
पालनम्	=इदं वामनः करोति	२३ (१०) ।१३
पावकः	=अग्निः, अयं शम्बरासुरेणान्धकासुरेण च सह युद्धमकरोत्	१० ।५१-५२
	=वह्निः, अयं रम्भासुरेण पुत्रप्रदानार्थं प्रार्थितः	१८ ।५१
	=अग्निदेवः, अस्य तेजसा कात्यायन्या नेत्रत्रयं संजातम्	१९ ।९
	=इमं यथा पतङ्गा अभिधावन्ति तथैव देवमयं वामनं दैत्या उपसर्पन्ति स्म	२३ (१०) ।६०
	=अयं विष्णुना समन्तपञ्चकक्षेत्रस्य रक्षार्थं नियोजितः	२३ ।४०
	=अग्निः, अयं शङ्करस्याजिरे जगाम	२८ ।३८
	=अग्निः, अयं शिवमुद्दिश्य शिरसाऽवनिं जगाम	२८ ।४४
	=अग्निः, अस्य कुटिलादेव्या सह संवादः	३१ ।५
	=हिरण्यरेताः, अस्य रोम-श्मश्रु-नेत्र-केशाद्याः सर्वे हिरणमया जातास्तस्माल्लोकेषु नामेदं सिद्धम्	३१ ।१०
	=अग्निः, अस्य ब्रह्मणा सह संवादः	३१ ।२६
	=अग्निः, अनेन सह शिवः शरवणं जगाम	३१ ।३७
	=अग्निः, अयं महासेननामानं पुत्रं प्राप्य प्रीतियुतोऽभवत्	३१ ।४१
	=अग्निः, अयं तनयं स्कन्दमभिषिक्तं वीक्ष्य मुदं ययौ	३१ ।५९
	=अग्निः, इमं सैनापत्येऽभिषिक्तः कुमारकार्त्तिकेयः प्रणनाम	३२ ।१
पावकत्रयम्	=एतत् सरस्वत्या रूपम्	२३ (११) ।१०

पावकार्चिषः	=इमाः क्रुद्धस्य रुद्रस्य गात्रेभ्यो निष्क्रान्तानि द्रः रुद्र-जया-शङ्कर-सती	४ ।१७
पावनः	=अस्मादारभ्य चतुर्मुखपर्यन्तं ब्रह्मसरः संनिहितम्	२३ (१) ।५
पावनी	=नदी, इयं पारियात्रपर्वताद् विनिःसृता	१३ ।२३
पावनोत्तमः	=शिवस्य नाम	२३ (२६) ।१०५
पाशः	=आयुधम्, अमुं प्रह्लादो नरोपरि वेगेन प्रचिक्षेप	८ ।२२
	=अनेन देवी कात्यायनी महिषासुरं बबन्ध	२१ ।४२
पाशग्रन्थिः	=वाराणस्यां गजेन्द्रेष्वेव वर्तते	३ ।३७
पाशाः	=सर्वेषु पाशेषु नागपाशः प्रवरः	१२ ।४९
	=सुरविप्रैः सह विरोधे कृते त्वां वारुणाः पाशा बन्धिष्यन्तीति वामनो बलिमाह	२३ (१०) ।७६
पाशुपतः	=महेश्वरस्य शरोऽयम्	५ ।२७
पाशुपतम्	=शास्त्रम्, हरार्चनोपयुक्तम्	६ ।८७
पाषाणाः	=इमान् स्वयोषितां क्षोभमालोक्य हस्तेषु बालखिल्यमुनयो गृहीतवन्तः	२३ (२२) ।६७
पिङ्गलः	=शङ्करस्य कर्णाभूषणरूपोऽयं फणी	९ ।२६
	=अयं सुप्रभातकरणाय प्राभातिकमङ्गलपद्येन प्रार्थ्यते	१४ ।२५
	=प्रमथः, इमं सूर्यः कार्त्तिकेयाय प्रादात्	३१ ।६४
	=गणः, इमं मानसतीर्थं कार्त्तिकेयाय ददौ	३१ ।९०
	=अयं युद्धे दण्डेन दानवान् ननाश	३२ ।५६
पिण्डः	=एनमिन्द्र आषाढमासस्य चन्द्रक्षयतिथौ मृगशिरोनक्षत्रे पितृषु भक्तितः प्रादात्	२४ ।८
पिण्डाः	=पञ्चपिण्डान् प्रदायैव परवारिणि स्नानमाचरणीयम्	१५ ।२२
	=एतान् भाद्रमासे कृष्णपक्षस्य चतुर्दश्यां मध्याह्ने आपगानद्यां प्रदाय मुक्तिं लभते	२३ (१५) ।६
पिण्डाकारः	=इममृषयः स्कन्दाय ददुः	३१ ।८७

पिण्डारकः	=गणः, अयं तुण्डेन युद्धे दानवान् विददार	३२ ।६३
पितरः	=एषां येऽवज्ञां कुर्वन्ति ते नरकेषु पतन्ति	१२ ।११
	=गृहस्थाश्रमे वसन् द्विजः स्वकर्मणा धनमर्जयित्वा तेन पितॄन् संप्रीणयेत्	१४ ।१२
	=विद्वान् स्नानानन्तरं तोयेन पितॄन् पूजयेत्	१४ ।३५
	=एषां प्रीणनं दर्शपूर्णादिभिः शुभकार्यैः कर्तव्यम्	१५ ।४९-५०
	=एषां क्रिया वानप्रस्थाश्रमे वसता कार्या	१५ ।५७
	=दिव्याः पितरः सन्ति 'अग्निष्वात्त' इति नामधेयाः	२२ ।१६
	=एषां पृथूदकतीर्थे पूजाविधानाय विष्णुना देवाः समादिष्टाः	२२ ।२०
	=दिव्याः, एते कस्यां महातिथ्यामस्माभिः संपूज्या इति देवा विष्णुं पप्रच्छुः	२२ ।२४
	=एतानहं कव्यादान् करिष्य इति विष्णुः प्रतिज्ञातवान्	२३ (६) ।८
	=एषां परमः पतिर्विष्णुरदित्या नमस्कृतः	२३ (६) ।२४
	=एते परशुरामेण क्षत्रियरुधिरेण तर्पिताः	२३ (१४) ।३
	=एषां परशुरामेण संवादः	२३ (१४) ।३
	=एभिर्वरयाचनायै परशुराम आदिष्टः	२३ (१४) ।५
	=एतान् गगने स्थितान् परशुरामः प्राञ्जलिर्भूत्वा वाक्यमब्रवीत्	२३ (१४) ।६
	=एषां प्रसादात् परशुरामः पापान्मुक्तिं प्रार्थितवान्	२३ (१४) ।७
	=एते परशुरामस्य शुभं वाक्यं श्रुत्वा परमप्रीता बभूवुः	२३ (१४) ।९
	=एषां भक्त्या तपस्ते वर्धतामिति पितरः परशुराममूचुः	२३ (१४) ।१०
	=एते कुरुक्षेत्रस्थपरशुरामह्रदेषु तर्पणेन यथाभिलषितं वरं प्रयच्छन्ति	२३ (१४) ।१२
	=परमप्रीतैरेभिः परशुरामाय बहवो वराः प्रदत्ताः	२३ (१४) ।१३
	=एते परशुरामाय वरं प्रदायान्तर्हिता बभूवुः	२३ (१४) ।१४
	=एतान् कुरुक्षेत्रस्थे कपिलाह्रदनामकतीर्थे स्नात्वाऽर्चयेत्	२३ (१४) ।२४

=सूर्यतीर्थे कुरुक्षेत्रस्थिते पितॄन् अर्चयित्वा सूर्यलोकं गच्छति	२३ (१४) ।२७
=एते दैवतैः सह सुतीर्थकतीर्थे नित्यं संनिहिताः	२३ (१४) ।४०
=एतान् स प्रीणाति यः सुतीर्थकतीर्थेऽभिषेकं पितृदेवार्चनं च करोति	२३ (१४) ।४१
=एषामर्चने रतः सुतीर्थकतीर्थे पितॄन् प्रीणाति	२३ (१४) ।४१
=एते शंसन्ति यदस्माकं कुले पुत्रः पौत्रो वा कश्चिद् आपगानद्यां मां तिलैः संतर्पयिष्यतीति	२३ (१५) ।४
=एतान् उद्दिश्य ब्रह्मोदुम्बरतीर्थे विप्रभोजनेन पितरः सुखिता भवन्ति दुर्लभं चार्पयन्ति	२३ (१५) ।१२
=एते ब्रह्मोदुम्बरतीर्थे विप्रभोजनेन सुखिता भवन्ति दुर्लभं चार्पयन्ति	२३ (१५) ।१२
=एषां गणान् कुरुक्षेत्रस्थ इडास्पदतीर्थेऽर्चयित्वा मानवो मुक्तिमवाप्नोति	२३ (१५) ।२५
=एतान् यः कुरुक्षेत्रस्थेऽन्यजन्माख्यतीर्थे संतपर्यति स ऐन्द्रं ज्ञानं लभते	२३ (१५) ।३७
=एतान् गयाश्राद्धं नित्यशः प्रीणाति	२३ (१५) ।४८
=ये फलकीवनं स्मरन्ति तेषां पितरस्तृप्तिं प्रयान्ति	२३ (१५) ।४९
=एषामर्चनेन मधुवटीतीर्थे शुचिर्नरः सिद्धिं लभते	२३ (१५) ।५६
=इमान् कुरुक्षेत्रस्थसोमतीर्थेऽर्चयित्वा नरः स्वर्गं लभते	२३ (१६) ।१६
=एतान् नरो मधुना तर्पयेद् मधुस्रवाख्यतीर्थे स्नात्वा	२३ (१८) ।३९
=एषामृणेन मुक्तो भवति नर ऋणमोचनाख्यं कुरुक्षेत्रस्थं तीर्थमासाद्य	२३ (२०) ।६
=एतेषां कृते उदकमक्षय्यं भवति तावदोजसतीर्थे स्नानेन	२३ (२०) ।११
=एतान् दुर्गातीर्थे संपूज्य नरो दुर्गतिं न प्राप्नोति	२३ (२१) ।१६
=कुरुक्षेत्रस्थे सरस्वतीकूपे पितॄन् संतर्प्याक्षय्यं सर्वं लभते नरः	२३ (२१) ।१८

	=एतान् स तारयति य औशनसतीर्थे भक्त्या श्राद्धं करोति	२३ (२१) ।२७
	=एते स्थाणुवट-स्थाणुलिङ्गयोरन्तरे कृतेन श्राद्धेन प्रीताः पितरो भुवि दुर्लभं वितरन्ति	२३ (२४) ।१४
	=एषां तर्पणं स्थाणुतीर्थजलेन कृत्वा नरोऽनन्तफलभाग् भवति	२३ (२४) ।१६
	=एते स्थाणुलिङ्गस्य संस्थितिपर्यन्तं तत्तीर्थजलेन तर्पिता उत्तमं जलं पिबन्ति	२३ (२४) ।१८
	=एतान् यो भयात् त्रायते स पुत्रः कथ्यते	२३ (२६) ।३१
	=एषां प्राच्यां सरस्वत्यामाराधनाय विष्णुर्देवानादिदेश	२४ ।३
	=एषु भक्तितः पुरन्दर आषाढमासे चन्द्रक्षयतिथौ मृगशिरोनक्षत्रे पिण्डं प्रादात्	२४ ।८
	=प्रीताः पितरो मेनां स्वकन्यां स्वीकृतवन्तः	२४ ।९
	=एतानाराध्य देवैर्महिषतारकवधोद्देश्येन काली मेनायै दत्ता	२६ ।५७
	=एषां दौहित्री काली	२७ ।४२
पिता	=इमं ये पादेन स्पृशन्ति ते रौरवनरकगामिनो भवन्ति	१२ ।१८
	=अस्य त्यागेन नरो नरकं प्राप्नोति	१२ ।३४
	=अस्य निन्दकैः सहाऽऽलापं कृत्वा सूर्यदर्शनेन शुद्धिर्भवति	१५ ।२४
	=अस्यार्चनं य उचिते काले न करोति स षण्ढः परिगीयते	१५ ।२८
	=एनं यः परित्यजति सोऽपविद्धसंज्ञको भवति	१५ ।३४
	=अयं पुत्रे जाते सति सचैलं स्नानं कुर्यात्	१५ ।४१
	=अस्यार्थं समुद्दिश्य भूमिदानादिकं स्वयं कर्त्तव्यम्	१५ ।५०
	=कश्यपः, इन्द्रस्य, बलिपराजयार्थमुपायं प्रष्टुमदित्या सह देवाः कश्यपं प्रति जग्मुः	२३ (३) ।६
	=स्वपितरं वेनपुत्रस्तीर्थतोयेनाभ्यषिञ्चत्	२३ (२६) ।५१

=यस्य पुत्री रूपाभिजनसंपत्त्या शुभं पतिं प्राप्नोति स धन्यो मन्यते २६ ।३८
=शिवः सर्वेषां पिताभिमतः २६ ।३९

पितामहः =अस्य रुद्रेण सह परिवादः २ ।२९
=अयं शिवलिङ्गप्रभावेण भुवनान् संक्षुब्धान् दृष्ट्वा विष्णुसमीपे गतवान् ६ ।६९-७०
=ब्रह्मा, एनं पुरस्कृत्य देवा विष्णुं द्रष्टुं जग्मुः १९ ।१
=ब्रह्मा, अस्य कोपेन वदनात् तेजो विनिःसृतम् १९ ।६
=ब्रह्मा, अस्योत्तरवेदिः समन्तपञ्चकम् २३ (१) ।१४
=लोकानां पितामहो ब्रह्मा ब्रह्मसभायामास्ते २३ (३) ।२५
=बलेः पितामहः प्रह्लादः २३ (८) ।१
=ब्रह्मा, अनेन वासुदेवस्य रूपादिकं न ज्ञायते २३ (८) ।२३
=अस्यामृतं पिबत उद्गारात् सुरभिः समुद्भूता २३ (१४) ।३०
=ब्रह्मा, अस्यर्षिभिः सह संवादः २३ (१६) ।१९
=ब्रह्मा, अनेन समाहूता सरस्वती पुष्करेषु समागता २३ (१६) ।२१
=ब्रह्मा, अमुं मानयन्तीं सरस्वतीं दृष्ट्वां मुनयस्तां बहु मेनिरे २३ (१६) ।२२
=अस्य सरसः सरस्वती प्रवृत्ता २३ (१९) ।१३
=ब्रह्मा २३ (१९) ।१३; २३ (२३) ।३६; २३ (२४) ।९
=एनं सृष्टिकर्त्ता समुपाद्रवत् प्रजानां महावृत्तेर्विधानाय २३ (२८) ।२८
=ब्रह्मा, अस्य कुटिलया सह संवादः २५ ।११
=ब्रह्मा, अयं कुटिलायै शापं ददौ २५ ।१२-१३
=अयमृगादिवाङ्मयैर्बन्धनैः कुटिलां बबन्ध २५ ।१५
=ब्रह्मा, अयं हंसेन शिवविवाहयात्रायां शिवपार्श्वस्थः सन् प्रयाति स्म २७ ।९
=ब्रह्मणो नाम २७ ।४९; ५८; २८ ।१८; २२;
=ब्रह्मा, अस्य कुटिलया सह संवादः ३१ ।१४

	=ब्रह्मा, अयं शरवणे शिवेन स्मृतो देवैः सह जगाम	३१ ।४७
	=अनेन सह सनत्कुमारस्य संवादः	३५ ।३०
पितृकन्या	=मेना, इयं तिस्रस्तनया अजीजनत्	२४ ।११
पितृकुलम्	=अस्मिन्नप्सरोभिः कामबाणपीडिता कन्या प्रापिता	२२ ।३७
पितृतीर्थम्	=तीर्थं कुरुक्षेत्रस्थम्	२३ (२१) ।१८
पितृदेवताः	=एताः कुरुक्षेत्रस्थे पुष्कराख्यतीर्थेऽभ्यर्च्य राजाऽश्वमेधफलं विन्दति	२३ (१३) ।४१
पितृप्रसादः	=अनेन परशुरामः पापान्मुक्तिं प्रार्थितवान्	२३ (१४) ।७
पितृभक्तिः	=अनया परशुरामं प्रति प्रसन्ना बभूवुः पितरः	२३ (१४) ।४
पितृश्राद्धम्	=इदं केदारतीर्थे विहितं सद् अक्षयं भवति	३४ ।१४
पितृहा	=अयं प्राच्यां सरस्वत्यां स्नात्वा शुद्धिमवाप्नोति	२३ (२१) ।१८-१९
पित्र्यर्क्षम्	=मघानक्षत्रम्, अस्य सिंहराशिः, सूर्यक्षेत्रम्, कालरूपिणः शिवस्य हृदयस्थानीयमेतत्	५ ।३५
पिनाकी	=शङ्करः	२३ (२२) ।४८
	=शङ्करः, अनेन नाम्ना ब्रह्मा शङ्करमस्तौत्	२३ (२३) ।५
	=शिवस्य नाम	२७ ।३१
	=शङ्करः, अस्य शुक्रमग्निना पीतम्	३१ ।३
पिपीलिकाः	=नरके पापिनो जना इमा भक्षयन्ति	१२ ।३५
पिप्पलश्रोणी	=नदी, इयमृक्षपर्वतात् प्रसूता	१३ ।२६
पिशङ्गः	=असुरः, अयं महिषासुरेण कात्यायन्याः प्राप्तिप्रयासप्रसङ्गे समादिष्टः	२० ।१९
पिशाचाः	=एषां परमो धर्मः सुकेशिं प्रति महर्षिभिरुक्तः	११ ।२७
	=एते वामनस्य सर्वदेवमये रूपे पादाङ्गुलिस्थानीया आसन्	२३ (१०) ।४९
	=एते सरस्वत्याख्ये तीर्थवरे समागताः	२३ (१९) ।२४
	=एते वेनकृतशिवस्तवपाठप्रभावेण गृहे विघ्नं न कुर्वन्ति	२३ (२७) ।१२

=एते स्वस्तिविधानार्थं प्रार्थिताः ३२ ।१९

पिशाचिका =नदी, इयमृक्षाख्यपर्वतात् प्रसूता १३ ।२६

पीडा =भवत्या गर्भे वसन्नहं पीडां नैव करिष्यामीति विष्णुरदितिं प्राह २३ (७) ।१३

पीतवासाः =नारायणः, अयं प्रह्लादेन भक्त्या स्तुतः ८ ।४८

पुंस्त्वम् =वामनस्य पुंस्त्वमासीत् कश्यपो मुनिः २३ (१०) ।५५

पुच्छम् =वासुकेः पुच्छे सिता दूर्वाऽजायत १८ ।९

=अनेन महिषासुरो भूतगणान् व्यद्रावयत् २१ ।३९

पुण्डरीकः =यज्ञविशेषः, अस्य फलमेकहंसतीर्थे स्नानेन लभ्यते २३ (१३) ।३८

पुण्डरीकवनालयः =शिवस्य नाम २३ (२६) ।१४१

पुण्डरीकाक्षः =नारायणः, अयं प्रह्लादेन स्वविजयार्थं स्तुतः ८ ।४९

=विष्णुः, एनं वरमयाचत राजर्षिः कुरुः २३ ।३६

=शिवस्य नाम २३ (२६) ।१४१

पुण्ड्रकाः =उत्तरापथवासिनो जनाः, एते क्षुद्रनदीजलानि पिबन्ति १३ ।४२

पुण्ड्राः =अयं दाक्षिणात्यो जनपदः १३ ।४६

पुण्यम् =अस्य प्राप्तिरिज्यायुद्धादिकर्मभिर्भवति १३ ।१२

=सदाचारतरोः संसेवनेन पुरुषः पुण्यमवाप्नोति १४ ।१९

=देवयुगस्याऽऽदौ संवृत्ता महिषासुरवधविषयिणी कथा पुण्यप्रदा कथ्यते २१ ।३

=अस्य वर्धनं कुरुक्षेत्रस्य द्वारम्, तच्च कस्याश्चिद् यक्षिण्या वासस्थानम् २३ (१३) ।४१

=गयाश्राद्धस्य पुण्यं स लभते यः सोमस्य क्षये सोमस्य दिने च दृषद्वत्यां श्राद्धं करोति २३ (१५) ।४७

=मातृभक्तेरिदं रेणुकाश्रममासाद्य नरो लभते २३ (२०) ।५

=गयाश्राद्धजन्यं पुण्यं कुमाराभिषेकतीर्थे कृतेन श्राद्धेन लभ्यते २३ (२०) ।८

	=आषाढकृष्णपक्षे चतुर्दश्यां गोकर्णार्चनस्य पुण्येन सर्वविधं पापं नश्यति	२३ (२५) ।१६
	=इदं कुरुक्षेत्रे कार्तवीर्येण स्थापितस्य लिङ्गस्य दर्शनादवाप्यते	२३ (२५) ।४१
पुण्याः	=जम्बूद्वीपस्था नव वर्षाः	१३ ।६
	=सरस्वतीप्रभृतयो नद्यः पुण्याः पापप्रशमनाश्च	१३ ।३३
	=अयं कुमारद्वीपे पर्वताश्रयी देशः	१३ ।५७
पुत्रः	=अयं सर्वेषां स्पर्शवतां श्रेष्ठः	१२ ।४७
	=गुरोः पुत्रः, ब्रह्मचारी स्वेच्छया गुरोरभावे तत्पुत्रं शुश्रूषन् ब्रह्मचर्याश्रमे वसेत्	१४ ।९
	=भूमेः पुत्रो मङ्गलः, तस्य दिने क्षौरकर्म न करणीयम्	१४ ।४९
	=पुत्रे जाते पिता सचैलं स्नानं कुर्यात्	१५ ।४१
	=अनेनैतैर्वा संयुक्ता अभवन् निशाचरास्त्रयोदशाङ्गधर्मपरिपालनानन्तरं प्रवृद्धिं गताः सन्तः	१६ ।६
	=एतदर्थं रम्भ-करम्भाभ्यां तपस्तप्तम्	१८ ।४३
	=अयं त्रैलोक्यविजयी रम्भासुरेण वह्निसकाशात् प्रार्थितः	१८ ।५०
	=अस्येव राजा कुरुः प्रजाः पालयामास	२३ ।८
	=अदितेरिन्द्रः, अयमदित्या बलिवधोपायकथनेन सन्तोषं प्रापितः	२३ (३) ।४
	=कश्यपः, अयं धर्मभृतां वरः पुत्र उक्तः	२३ (३) ।३४
	=अस्य प्राप्तयेऽदित्या वरो याचनीयः	२३ (४) ।१५
	=अस्य प्राप्त्यर्थमदित्या वरो याचितः	२३ (६) ।५
	=मम पुत्रस्त्रैलोक्याधिपतिः स्यादित्यदितिर्विष्णुं वरं ययाचे	२३ (७) ।७
	=अस्यार्थमदित्याऽदितिवने घोरं तपः कृतमासीत्	२३ (१३) ।१२
	=अदितिवनेऽदित्या देवमातुर्दर्शनेन शूरस्य पुत्रस्य प्राप्तिर्भवति	२३ (१३) ।१३

=अनेन सहितां पापदेशजां काञ्चित् स्त्रियं कुरुक्षेत्रे यक्षी ददर्श २३ (१३)।४६
=अनेन सहितया कयाचित् स्त्रिया सह कुरुक्षेत्रनिवासिन्या यक्षिण्याः संवादः २३ (१३)।४६
=अनेन शब्देन पितरः परशुरामं संबोधितवन्तः २३ (१४)।१०
=अयं कश्चिदेतादृशोऽस्माकं कुले भविष्यति योऽस्मानापगानद्यां तिलैस्तर्पयिष्यतीति पितरः शंसन्ति २३ (१५)।४
=अस्य शोकेनाभिभूतः सन् व्यासो व्यासस्थल्यां देहत्यागाय निश्चयं चक्रे २३ (१५)।५८
=अस्य शोकं स न विन्दति यो व्यासस्थलीमभिगच्छति २३ (१५)।५९
=अस्य शोकेन पवनः कुरुक्षेत्रस्थे पवनह्रदे लीनो बभूव २३ (१६)।२
=यो भयात् पितॄंस्त्रायते स पुत्रः कथ्यते २३ (२६)।३१
=वेनस्य पुत्रः, अनेन स्वपिता तारितः २३ (२६)।६२
=स्वाङ्गमलादुद्भूतं गजमुखं पुरुषं स्वपुत्रं विदित्वा पार्वती तं परिषष्वजे २८।७०
=अग्निः कुटिलादेवी च रुद्रशुक्रोद्भवपुत्रविषये परस्परं विवादं चक्रतुः ३१।३२
=अस्य शब्दस्य व्युत्पत्तिः ३४।७७
=अस्यार्थो हेतुदर्शनपूर्वकम् ३५।२०
=अयं सर्वेभ्यः पापेभ्यस्तारयति ३५।२९
=अयं विपश्चिता विधातव्यः ३५।२९

पुत्राः =एतान् यो मानवः स्वपोषणपरः सन् दुर्भिक्षादौ परित्यजति स श्वयोनौ पात्यते १२।२६
=इन्द्रादयो देवाः, एषां श्रेयोविधानाय कश्यपो ब्रह्मलोकगमने मतिमकरोत् २३ (३)।१५
=एभिः स नरः समन्वितो भवति यो देव्यास्तीर्थे स्नानमाचरति २३ (१४)।३५
=एषां पित्रा रुषङ्गुणा सार्धं संवादः २३ (१८)।१७
=एभिः पिता रुषङ्गुः सरस्वत्यां समानीतः २३ (१८)।१९

	=एतान् धर्मेणोत्पाद्य वेनपुत्रः पितुर्ऋणैर्मुक्तो बभूव	२३ (२७) ।३२
पुत्री	=सवितुः पुत्री तपती, अस्या वसिष्ठेन सह संवादः	२२ ।५५
	=अनेन शब्देन वसिष्ठः सूर्यपुत्रीं संबोधयामास	२२ ।५६
	=यस्य पुत्री रूपाभिजनसंपत्त्या शुभं पतिं प्राप्नोति स पिता धन्योऽभिमतः	२६ ।३८
	=काली, 'अधुना मया त्वं शिवाय दत्ताऽसि' इति हिमवान् कालीं प्रत्याह	२६ ।५९
पुत्रोत्पत्तिः	=तवोदरात् (पुत्रोत्पत्तिं प्रति देवैरहं निषिद्धः) इति शिवो गिरिजामाह	२८ ।५२
पुनर्भवः	=द्विविधः पुत्रः	३५ ।४३
पुनर्भूः	=पुनः संस्कृता स्त्री, अस्याः पतिर्नरकगामी भवति	१२ ।३५
पुंनामनरकम्	=इदं प्राणिनं सर्वतो विनाशयति	३५ ।१९
पुंनामपापानि	=परदाराभिगमनादीनि	३५ ।१-१८
पुमांसः	=एभिरजेयः पुत्रो रम्भासुरेण वह्निसकाशात् प्रार्थितः	१८ ।५१
	=एषां कुरुक्षेत्रे वासेन मुक्तिर्भवति	२३ (१२) ।८
पुमान्	=अस्य शुभाशुभानि विधात्रा प्रागेव प्रतिपादितानि	२० ।१८
	=महिषासुरस्य कण्ठात् खड्गधरः पुमान् विनिर्गतः	२१ ।४८
	='त्वं पुमान्' इति शिवः स्तुतः	२३ (२६) ।१४४
पुरः	=सुकेशिनामकस्य निशाचरस्य [१]पुरस्त्रिभुवने व्यापृतो जातः	१६ ।८
पुरन्दरः	=इन्द्रः; अस्यान्धकासुरेण सह संग्रामः	१० ।२
	=इन्द्रः; अयं स्वमातुर्निलयं जगाम	२३ (३) ।२
	=इन्द्रः; अस्मै वामनः सर्वदेवमयरूपस्त्रैलोक्यं ददौ	२३ (१०) ।६५
	=इन्द्रः; अयमाषाढमासे चन्द्रक्षयतिथौ मृगशिरोनक्षत्रे पितृषु पिण्डं प्रादात्	२४ ।८

---

[१] पुरं ....व्यापृतं जातम् इत्येव व्याकरणसम्मतमिति वागीशः शास्त्री।

पुरम्	=दानवानाम्, अत्र च्यवनः प्रविवेश	७।३१
	=इदं गगनस्थं शिववरात् सुकेशिना प्राप्तम्	११।६
	=कुशस्थली	१२।५१
	=राक्षसराजः सुकेशीर्महर्षीन् प्रणम्य स्वकीयं पुरं जगाम	१५।६७
	=अस्मिन् सुकेशेर्धर्मकथनं राक्षसान् प्रति	१६।१
	=सुकेशिपुरम्, इदं तेजस्त्वाच्चन्द्रवल्लक्षितमभूत्	१६।९
	=सुकेशिपुरमवलोकयन्तश्चक्रवाकपक्षिणो वियोगं नालभन्त	१६।१३
	=सुकेशिनामकस्य राक्षसराजस्य, इदं भानुनाऽम्बरतलान्निपातितम्	१६।३८-३९
	=सुकेशेः पुरं यथा भास्करेण भुवि सन्निपातितं तत्सर्वं पुलस्त्यो नारदं प्रति कथयामास	१६।६२
	=अनेन सहितं सुकेशिनामानं निशाचरेन्द्रं स्वयम्भूर्ब्रह्मा पुनराकाशे समारोपयत्	१६।६३
	=प्रतिष्ठानम्, इदं मेरुशिखरस्थम्, अत्र संवरणो नाम राजा जगाम	२२।३८
	=कुमारपुरम्	२३ (२०)।७
पुराणम्	=मात्स्यम्	१२।४८
	=वामनम्	२३ (१)।८
	=वामनम्, अस्य श्रवणेन मुक्तिर्लभ्यते	२३ (२२)।३
	=वामनपुराणम्, इदं रक्षोघ्नमिति नियतैः श्रोतव्यम्	३०।७३
पुराणर्षिः	=लोमहर्षणः	२३ (१)।३
पुराणानि	=एषामर्थान् ये नाभिनन्दन्ति ते नरकान् गच्छन्ति	१२।२
	=सर्वेषु पुराणेषु मुख्यं मत्स्यपुराणमस्ति	१२।४८
पुराणि	=सर्वेषु पुरेषु कुशस्थलीनामकं पुरं श्रेष्ठम्	१२।५१
पुरातनः	=आद्यो धर्मः, अयं मुनिभिः सुकेशिं प्रत्युक्तः	१६।४
पुरातनी कथा	=सुकेशिविषयिणी कथा	११।३
	=महिषासुरवधविषयिणी कथा	२१।३

	=शिवस्य कपालीरूपधारणविषयिणी	२ ।२०
पुरी	=वाराणसी	१६ ।५१
	=शैलराजपुरी, इयं सुरपुरीव बभूव	२६ ।१५
पुरीषम्	=अस्य जले परित्यागो नरकस्य हेतुः	१२ ।३२
	=इदं न लङ्घयेत्	१५ ।२१
पुरुषः	=ब्रह्मणा सृष्टः	२ ।३९
	=कपालाद् भवः, सूर्ये क्षिप्तश्च	२ ।४९-५६
	=सदाचारमुल्लङ्घ्य वर्तमानस्य पुरुषस्य यज्ञदानतपांसि भूतये न भवन्ति	१४ ।१६
	=अयं दुराचारेण क्वचिदपि न नन्दते	१४ ।१७
	=निर्दिष्टाचारस्य विधानेनायं गृह एव धर्मार्थकामान् प्राप्नोति	१५ ।५४
	=रौद्रदर्शनः कश्चित् पुरुषोऽग्निमध्यादुत्तस्थौ, स च सर्वान् महिषान् जघान	१८ ।६८
	=तस्य पुरुषस्य धरण्या कृताः सर्वेऽपराधा नश्यन्ति यः कुरुक्षेत्रस्थे धरण्यास्तीर्थे क्षान्तियुक्तः सन् स्नाति	२३ (१३) ।२०
	=अयं कुरुक्षेत्रस्थ-केदाराख्यतीर्थे स्नात्वा सर्वदानफलं लभते	२३ (१५) ।२७
	=अयं कुरुक्षेत्रस्थे किंरूपाख्ये महातीर्थे स्नात्वा सर्वयज्ञफलं लभते	२३ (१५) ।२७
	=शिवः	२३ (१५) ।३३
	=विष्णुः	२३ (१५) ।३३
	=अयं फलकीवनस्थे तीर्थे स्नात्वा गोसहस्रफलं लभते	२३ (१५) ।५०
	=अनेन विजानता ब्राह्मणा नावमन्तव्याः	२३ (१८) ।३४
	=अयं कुरुक्षेत्रस्थे सोमतीर्थे स्नात्वा राजसूयफलं लभते	२३ (२०) ।४
	=अयं कुरुक्षेत्रस्थे कुमाराभिषेकतीर्थे स्नात्वा कुमारपुरमाप्नोति	२३ (२०) ।७
	=अनेन शब्देन गुणातीतो भगवान् उच्यते	२३ (२२) ।२१

=अयं शरीरस्य संक्लेशैः शुद्धिं नाप्नोति २३ (२२) ।८१
=ह्रस्वदर्शनः पुरुषो वेनस्य मध्यमानात् करात् समुत्तस्थौ २३ (२६) ।१९
=वेनस्य मध्यमानाद् दक्षिणहस्तादेकः पुरुषो दिव्यलक्षणलक्षितः समुत्पन्नो बभूव २३ (२६) ।२१

पुरुषार्थः =मोक्षः २३ (१५) ।७५

पुरुषोत्तमः =नरः, अनेन प्रह्लादोपरि महेश्वरास्त्रं प्रयुक्तम् ७ ।६२
=नारायणः, अस्य प्रह्लादकृता स्तुतिः ८ ।४९
=संवरणस्य पुत्रः कुरुः २३ ।३
=शिवः, एनं नारदस्तुष्टाव २३ (१५) ।३६
=विष्णुः, अनेन शब्देन देवा विष्णुं सम्बोधितवन्तः २३ ।१७

पुरोडाशः =दक्षयज्ञे साध्यादिदेवा इममादाय भक्षयन्तः क्वचित् पलायिताः ५ ।४

पुरोहितः =अन्धकस्य पुरोहितः शुक्रः ९ ।६
=वसिष्ठः, संवरणाख्यस्य सोमवंशोद्भवस्य राज्ञः २२ ।२८
=अनेन संयुक्तो राजा धृतराष्ट्रो बकस्य समीपं जगाम २३ (१८) ।३२

पुलस्त्यः =ऋषिरयं वामनपुराणविषये नारदेन पृष्टः १ ।२
=नारदं प्रत्युवाच २ ।१
=अस्य नारदेन सह संवादः ३ ।४६;५०;४ ।१;७ ।१;७ ।६५;८ ।३७;
७२; ९ ।५२; १० ।१;११ ।५८; १२ ।५७;
१५ ।६७;१६ ।१; ५; १८ ।१; ४१;
१९ ।१; २३; २० ।१; ३०; ३३;
३५; २१ ।३; २२ ।२; ८; २२ ।२२;
२३ ।१;२५ ।१;१२; २६; ६०;६२;६५;
६८;२६ ।६; १२; २४;४२;५५; २७ ।१;३१;
४३;२८ ।१;२८ ।४८;२९ ।१;४०;४६;
३० ।१;७२; ३१ ।२; ३२ ।१; १४;
१८; २६; ३४ ।२; ३५ ।३०

	=अयं नारदं प्रति हरवचनमुक्तवान्	६ ।८१
	=धर्मज्ञः	९ ।१३
	=ऋषिः, अयं प्राभातिकमङ्गले स्मर्यते सुप्रभातकरणाय	१४ ।२४
	=ब्रह्मवित्तमः	२२ ।१
	=देवदेवः	२२ ।५५; २३ ।१
	=अयं वामनाय पीतवाससी ददौ	२३ (९) ।३७
पुलस्त्यनारद-संवादः	=वामनपुराणस्य नवमेऽध्याये	९ ।५२
पुलहः	=ऋषिः, अयं प्राभातिकमङ्गले सुप्रभातकरणाय स्मर्यते	१४ ।२४
	=द्विजोत्तमः, अयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।२७
	=अयं वामनायाऽऽसनं ददौ	२३ (९) ।३७
	=अयं स्वस्तिकरणार्थं प्रार्थितः	३२ ।१८
पुलीयाः	=एते पश्चिमामाशां स्थिता जानपदा जनाः	१३ ।५०
पुष्करः	=द्वीपः, अत्र ये जना वसन्ति ते पैशाचधर्ममाश्रयन्ते	११ ।४६
	=अयं द्वीपो रौद्रदर्शन उक्तः	११ ।४६
	=द्वीपः, अयं दुर्दशः, शौचरहितो घोरः, कर्मार्थनाशकृत् किमर्थं मन्यत इति सुकेशेर्महर्षीन् प्रति प्रश्नः	११ ।४७
	=अस्मिन् रौरवादिनरकाः स्थिता इत्यस्य घोरदर्शनत्वम्	११ ।४८
	=द्वीपः, अस्य संस्थितिर्द्वादशाध्याये कथिता	१३ ।१
	=तीर्थं कुरुक्षेत्रस्थम्, अत्र पितृदेवता अभ्यर्च्य राजाऽश्वमेधयज्ञफलं विन्दति	२३ (१३) ।४२
पुष्करद्वीपः	=अयं दुग्धाब्धेरनन्तरमास्ते	११ ।३९
	=अस्य वर्णनं वामनपुराणस्यैकादशाध्याये	११ ।५८
पुष्करद्वीपम्	=अस्य प्रमाणम् = ४ कोटि ५२ लक्षयोजनानि	११ ।४१-४२
पुष्करद्वीपवर्णनम्	=एतन्नामको वामनपुराण एकादशोऽध्यायः	११ ।५८
पुष्करम्	=एतन्नामकं तीर्थमन्तरिक्षे	७ ।३७

	=एषां मालां बिभर्ति विष्णुः	२३ (६) ।१७
	=तीर्थम्, अत्र स्थिता सरस्वती सर्वासु सरित्सु श्रेष्ठा वर्तते	२३ (१६) ।२३
	=तीर्थम्, अत्र पितामहस्य यज्ञो बभूव	२३ (१६) ।१९
	=तीर्थम्, अत्र ब्रह्मणाऽऽहूता सरस्वती समागता	२३ (१६) ।२१
	=तीर्थं कुरुक्षेत्रस्थम्, अत्र सरस्वती महात्मना मङ्कणेन समानीता	२३ (१६) ।२३
	=तीर्थम्, इदं बाहुशालं गणं कार्त्तिकेयाय ददौ	३१ ।९०
पुष्करमाली	=विष्णुः, अनेन नाम्नाऽदितिर्विष्णुं नमश्चक्रे	२३ (६) ।१७
पुष्करा	=इयं ब्रह्मणः प्रतीची वेदिः	२३ ।२०
पुष्करारण्यम्	=अत्र स्नानार्थं रुद्रो गतः	३ ।८
पुष्टिः	=कात्यायन्या नाम, अनेन नाम्ना सा देवैः स्तुता	१९ ।२०
	=देवी, इयं बलिसमीपमागता	२३ (२) ।२०
	=अस्या वर्धकस्य श्रेयसो विधानायेन्द्रादिभिः कश्यपः प्रार्थितः	२३ (३) ।१४
पुष्पः	=कुमारद्वीपस्थपर्वतः	१३ ।१७
पुष्पदन्तः	=प्रमथः, इममम्बिका कार्त्तिकेयाय ददौ	३१ ।६९
	=गणः, अयं युद्धे दैतेयदानवान् विननाश	३२ ।५५
पुष्पम्	=जातीपुष्पम्	१२ ।५०
	=सदाचारस्य पुष्पं कामः	१४ ।१९
	=इदं कुरुक्षेत्रस्थाय यक्षाय देयम्	२३ (१२) ।२०
पुष्पवर्षम्	=इदं नारायणप्रह्लादोपरि देवा मुमुचुः	८ ।१९
पुष्पाणि	=सर्वेषु पुष्पेषु जात्याः पुष्पं श्रेष्ठम्	१२ ।५०
	=श्वेतपुष्पाणि प्रातःकाले स्प्रष्टव्यानि	१४ ।३७
	=धत्तूरस्य पुष्पैः कालाष्टम्यां तिथौ शंकरं संपूजयेत	१७ ।३२
	=एभिर्विष्णुरर्चनीयः	१७ ।२०
पुष्यम्	=नक्षत्रम्, शशिनो गृहम्, अस्य कर्कराशिः, कालरूपिणः शिवस्य पार्श्वस्थानीयमेतत्	५ ।३४

पूजनम्	=इदं शंकरस्य वैशाखमासे आम्रमञ्जरीभिः कार्यम्	१७ ।५२
पूजा	=इमां महाभागवताश्चक्रुः	१६ ।१९
	=देवब्राह्मणानां पूजासु निशाचराः संसक्ता बभूवुः	१६ ।३५
	=कालाष्टम्यां लिङ्गेषु शङ्करपूजाऽक्षया भवति	१७ ।३१
	=आश्विनमासस्य नवम्यां तिथौ पङ्कजैः पूजा कार्या हिरण्याक्षस्य	१७ ।३४
	=इयं पौषे मासि त्र्यम्बकस्य तगरैः कर्त्तव्या	१७ ।४०
	=इयं ज्येष्ठमासेऽर्ककुसुमैस्त्रिनेत्रस्य कर्त्तव्या	१७ ।५५
	=उदकेन विना (अपि) कृता पूजा तुभ्यं फलं दास्यतीति वामनो बलिमाह	२३ (१०) ।८०
	=पार्वती मृन्मयस्य शिवस्य पूजामकरोत्	२५ ।४४
	=शङ्करस्य पूजां गिरिवरो मन्दरो दिव्यफलादिभिश्चक्रे	२५ ।७५
पूतोग्रदृष्टिः	=शिवस्य नाम	२३ (२६) ।८६
पूपाः	=इमे घृतसहिता आषाढमासे दक्षयज्ञघ्नस्य पूजने नैवेद्यरूपेण समर्पणीयाः	१७ ।५९
	=इमे श्रावणमासे हरार्चने नैवेद्यरूपेण समर्पणीयाः	१७ ।६१
पूयविण्मूत्रम्	=शोणितपूयभोजनाख्ये नरके ते पतन्ति ये मातृपितृगुरूणामवज्ञां कुर्वन्ति	१२ ।११
पूर्णकालः	=विषोद्बन्धनादिभिर्भिन्नेन हेतुना मृते सति (अशौचस्य) पूर्णकालानन्तरमेव शौचं भवति	१५ ।४५
पूर्णम्	=(पूर्णिमायां विहितम्) शुभकार्यम्, अनेन पितॄणां प्रीणनं कार्यम्	१५ ।४९
पूर्णा	=संज्ञा, ५, १०, १५, तिथीनाम्, एतत्संज्ञकासु तिथिषु योषित्समागमः परिवर्जनीयः	१४ ।४८
पूर्णिमा	=आषाढी	१७ ।३
	=कार्त्तिकमासस्य (कार्त्तिकी) अस्यां कुरुक्षेत्रस्थपुष्कराख्यतीर्थे कन्यादानं कृत्वाऽभिमतं फलं लभ्यते	२३ (१३) ।४३

	=कार्त्तिकमासस्यान्तिमा तिथिः	२३ (१६) ।१६
पूर्वः	=जम्बूद्वीपस्य पूर्वभागे भद्राश्वनामको वर्षः स्थितः	१३ ।३
	=भारतवर्षीयकुमारद्वीपस्य पूर्वभागे किराताः स्थिताः	१३ ।११
	=देवेभ्यः पूर्वः शङ्करोऽस्ति	२३ (१७) ।१८
	=देवेभ्यः पूर्वः शङ्करोऽस्ति	२३ (१७) ।१८
पूर्वतराः	=कुलस्य प्राचीनाः पुरुषाः, एतैः प्रसह्य कुले शुल्कं निर्धारितमिति देव्या दुन्दुभिर्निर्दिष्टः	२० ।३४
पूर्वा	=इयं पूर्वाषाढनक्षत्रम्। देवाचार्यगृहम्। अस्य धनूराशिः। कालरूपिणः शिवस्योर्वोर्युगलम्	५ ।३९
	=प्राची दिक्, इमामाश्रित्योत्सर्गो नैव कार्यः	१४ ।३०
पूषा	=दक्षयज्ञविनाशने प्रवर्तमानेन शङ्करेण सममस्य युद्धम्, तत्रायं भग्नदन्तो निःसंज्ञश्च बभूव	५ ।१०-१८
	=अस्य दशननाशनः शङ्करो ज्येष्ठमासे नमस्कार्यः	१७ ।५७
	=सूर्यः, अयं कुरुक्षेत्रस्थे काम्यकवने प्रकटः स्थितोऽस्ति	२३ (२०) ।३४
	=अयं वामनस्य भ्रूस्थानीय आसीत्	२३ (१०) ।५४
	=देवः, अस्य दन्तविनाशनः शिवः कीर्त्यते	२३ (२६) ।१३१
	=देवः, अयं द्वौ प्रमथौ कार्त्तिकेयाय ददौ	३१ ।६६
पृथिवी	=लोकः, अत्र नैमिषं तीर्थं वर्तते	७ ।३७
	=अस्यां कात्यायनस्य महर्षेस्तेजः प्रसिद्धमभवत्	१९ ।१३
	=लोकः, अस्यां देवा महिषासुरेण विजिता भूत्वा विचरन्ति	२० ।२५
	=लोकः, अस्य प्रभुर्दानवराट् च महिषासुर आसीत्	२० ।३०
	=अस्यां देव्याः शूलेन विद्धः सन् महिषासुरो निपपात	२१ ।४३

=अस्यां देव्या महिषासुरोपरि प्रक्षिप्ता गदा न्यपतत्	२१ ।४४
=लोकः, अत्र सूर्यपुत्र्यास्तपतीति नाम प्रसिद्धम्	२२ ।५९
=लोकः, अत्र संवरणस्य पुत्रः कुरुनाम्ना प्रख्यातः	२३ ।३
=सौम्यदिशि स्थिता, अत्र वर्तमानान् नदीपर्वतादीन् भागान् सर्वान् देवाः क्रान्तवन्तः	२३ (४) ।१८
=क्षितिः	२३ (७) ।१५
=भूमिः	२३ (८) ।५; २३ (१०) ।६; २३ (१०) ।७; २३ (१०) ।६३; २३ (११) ।८;
=उर्वी	२३ (८) ।१२; २३ (१०) ।१
=मही	२३ (८) ।१३; २३ (१०) ।२; २३ (१०) ।५
=धरा	२३ (८) ।२६
=मेदिनी	२३ (१०) ।६२
=धरणी	२३ (१०) ।१९; २३ (१३) ।२०
=चतुरन्तायां पृथिव्यां मनुपुत्रः क्षुवतो राजाऽऽसीत्	२३ (२६) ।५
=अस्यां सवासवा देवा वेनस्य दक्षिणहस्तात् समुत्पन्नं पुरुषमभ्यषिञ्चन्	२३ (२६) ।२३
=अस्या रञ्जनाद् वेनस्य दक्षिणहस्तात् समुत्पन्नपुरुषस्य राजेति संज्ञा	२३ (२६) ।२४
=अस्या धरणः (धारकः) शिवः स्मृतः	२३ (२६) ।१३२
=क्ष्मा	२७ ।३७
=एतद्रूपस्य नारायणस्य प्रह्लादकृता स्तुतिः	८ ।५४
=इयं सुप्रभातकरणाय प्राभातिकमङ्गलेन प्रार्थ्यते	१४ ।२६
=अवनिः	१९ ।३
=मही	१९ ।१९; २३ (१०) ।९१;
=वसुन्धरा	२१ ।२४; २३ (९) ।२४
=क्षितिः	२३ (७) ।१४; २३ (१०) ।४९
=अचला	२३ (८) ।२६
=भूमिः	२३ (९) ।४०
=मेदिनी	२३ (९) ।४१
=अस्या वामनाय दानार्थं बलिः प्रतिज्ञातवान्	२३ (१०) ।४२

पृथुलोचनः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।३१
पृथूदकः	=तीर्थं कुरुजाङ्गलस्थम्	२३ ।४३
	=कुरुक्षेत्रस्थं तीर्थम्, अस्य माहात्म्यं विष्णुना देवान् प्रति बोधितम्	२४ ।१
	=तीर्थं कुरुक्षेत्रस्थम्, अयमनुलेपनमादाय शिवविवाहयात्रायां ययौ	२७ ।१४
	=तीर्थम्, इदं कार्त्तिकेयाय गणान् ददौ	३१ ।८८
पृथूदकम्	=इदं तीर्थं सर्वेषु तीर्थेषु प्रवरम्	१२ ।४५
	=कुरुक्षेत्रस्थितं तीर्थम्, अस्मिन् पितृपूजाविधानाय विष्णुना देवाः समादिष्टाः	२२ ।२०
	=कुरुक्षेत्रस्थितं तीर्थम्, अस्य विषये देवानां प्रश्नो विष्णुं प्रति	२२ ।२३
	=तीर्थं कुरुक्षेत्रस्थम्	२३ (१८) ।१६; २३ (१८) ।१७
	=तीर्थम्, अत्र नयनाय ब्रह्मर्षि-रुषङ्गुः पुत्रानाह	२३ (१८) ।१७
	=इदं सरस्वत्यास्तीर्थं कुरुक्षेत्रे वर्तते	२३ (१८) ।१८
	=तीर्थं कुरुक्षेत्रस्थम्, अस्य सर्वान् गुणान् महामुनी रुषङ्गुरस्मरत्	२३ (१८) ।१९
	=तीर्थम्, इदं सरस्वत्या उत्तरे वर्तते, तत्र तनुत्यागेनामरता लभ्यते	२३ (१८) ।२०
	=तीर्थं कुरुक्षेत्रस्थम्, अत्र जप्यपरो नरोऽमरतां लभते	२३ (१८) ।२०
	=इदं तीर्थं कुरुक्षेत्रस्थम्, इदं समाश्रित्य सरस्वत्यास्तटे स्थितो ब्रह्मा ब्रह्मयोनिं निर्मितवान्	२३ (१८) ।२१
	=अस्य तटे ब्रह्मयोनिसंज्ञकं तीर्थं स्थितम्	२३ (१८) ।२४
	=महातीर्थं कुरुक्षेत्रस्थम्, अत्र स्थितेऽवकीर्णतीर्थे बको धृतराष्ट्रस्य राष्ट्रं जुहाव	२३ (१८) ।३०
	=तीर्थं कुरुक्षेत्रस्थम्, अत्र देवा विष्णुवचनाज्जग्मुः	२४ ।४
	='अत्र तीर्थयात्रायामहं गमिष्यामि' इति भिक्षुरूपधरः शिव उमां प्रत्युवाच	२५ ।४९

	=तीर्थम्, 'अत्र त्वं किं फलं लब्धासि' इति देवी शिवं पप्रच्छ	२५ ।५०
	=तीर्थं कुरुक्षेत्रस्थम्, अत्राहं गमिष्यामीति शिव उमां प्रत्युवाच	२५ ।५४
	=तीर्थम्, अस्मिन् शङ्करः स्नानं चक्रे विधानतः	२५ ।७३
	=तीर्थवर्यम्, अत्र गमनाय विष्णुः सनत्कुमारं प्राह	३२ ।११४
	=तीर्थम्, अत्र गत्वा शम्भुं प्रसमीक्ष्य च कार्त्तिकेयो रविसदृशो बभूव	३२ ।११५
पृथ्वीश्वराः	=एषामुत्पत्तिविषयकः प्रश्नो मार्कण्डेयस्य सनत्कुमारं प्रति	२३ (२८) ।१
पृषार्चिः	=शङ्करस्य नाम	२३ (२३) ।३६ (११)
पृष्ठम्	=अस्य मांसं येऽश्नुवन्ति ते वृकभक्षनामके नरके क्षिप्यन्ते	१२ ।३७
	=वासुकेः पृष्ठेऽसिता दूर्वाऽजायत	१८ ।९
	=शरीरस्य पश्चाद्भागः, महिषासुरस्य पृष्ठं दुर्गा देवी समारूढा	२१ ।४६
	=वामनस्य पृष्ठे वसवः स्थिता आसन्	२३ (१०) ।५६
	=चण्डिकायाः पृष्ठदेशाद् वाराही संजाता	३० ।७
पृष्ठमांसाशिनः	=कृतघ्नाः, एते वृकभक्षनामके नरके क्षिप्यन्ते	१२ ।३७
पैतामहम्	=ब्रह्मास्त्रम्, इदं प्रह्लादेन नरोपरि क्षिप्तम्	७ ।६१
पैतृकः	=परमो धर्मः, अयं सुकेशिं प्रति महर्षिभिरुक्तः	११ ।२१
पैतृकम्	=पितृनुद्दिश्य क्रियमाणे श्राद्धादिकार्ये निमन्त्रितो यदि क्वचिदन्यत्र भुङ्क्ते तर्हि स नरकं याति	१२ ।८
पैशाचः	=धर्मः, इमं पुष्करद्वीपवासिनः समाश्रयन्ते	११ ।४६
पैशुन्यम्	=अन्यथामतिर्यो नरः साधुजनानाम् इदमाचरति, स नरकयातनामाप्नोति	१२ ।१०
पौण्डरीकम्	=तीर्थं कुरुक्षेत्रस्थम्	२३ (१५) ।३९
	=तीर्थं कुरुक्षेत्रस्थम्, अत्र स्नानेन पुण्डरीकफलं लभ्यते	२३ (१५) ।३९

पौण्ड्रः	=यमस्य महिषः, अस्य विषाणं चण्डमारी देवी समुत्पाटयामास	२९ ।७१
पौण्ड्रकः	=एतन्नाम्ना महिषः, रुद्रौजःसंभवः कृष्णवर्णो धर्मराजस्य वाहनम्	९ ।१६
	=यमराजस्य महिषः, अनेन राजर्षिः कुरुः समन्तपञ्चकक्षेत्रं कर्षितुमुद्यतोऽभूत्	२३ ।२३
पौत्रः	=अनेनैभिर्वा संयुक्ता निशाचरा अभवंस्त्रयोदशाङ्गधर्माचरणात्	१६ ।६
	=बलेः पौत्रः प्रह्लादः	२३ (८) ।४
	=बलिः प्रह्लादस्य, अनयोर्दैत्यतेजोहानिविषये संवादः	२३ (८) ।३३
	=अयं कश्चिदस्माकं कुले भविष्यति यो मामापगानद्यां तिलैस्तर्पयिष्यतीति पितामहाः शंसन्ति	२३ (१५) ।४
पौत्राः	=एभिः स नरः समन्वितो भवति, यो देव्यास्तीर्थे स्नानमाचरति	२३ (१४) ।३५
पौनर्भवः	=पितृद्वयसम्बन्धवान् पुत्रः	३५ ।४४
पौराणिकोत्तमः	=लोमहर्षणः, अयमृषिभिरनेन विशेषणेन संबोधितः	२३ (१३) ।२
पौरिकाः	=अयं दाक्षिणात्यो जनपदः	१३ ।४९
पौर्णमासी	=तिथिः, अस्यामुमानाथश्चर्मसंस्तरे स्वपिति	१७ ।११
पौलोमी	=पुलोम्नो मुनेः पुत्री = इन्द्राणी, अनया सह मघवानिव सौदामन्या सह कुरू रेमे	२३ ।६
पौषः	=मासः, अस्मिन् हविषा स्नानं कर्त्तव्यम्	१७ ।४०
प्रकाशकृत्	=शिवस्य नाम	२३ (२८) ।१२
प्रकृतयः	=इमा अनेकास्तव-वर्धिता इति वामनस्तुतौ ब्रह्मा न्यवेदयत्	२३ (९) ।२७
प्रकृतिः	=अत्र स्थिते लोके दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।१०
	=इयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।२९

	=अस्यां प्रह्लादः स्थितो बभूव	२३ (८) ।१५
प्रघसः	=दैत्यः, अयं बलिना वासुदेवबलाधिकः प्रोक्तः प्रह्लादं प्रति	२३ (८) ।३१
प्रचेताः	=द्विजोत्तमः, अयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।२७
प्रजा	=इमां देवेशो ब्रह्मा रचितवान्	११ ।३२
	=इयं पूर्वं समस्तैर्भूतगणैः समं प्रपितामहेन सृष्टा	२३ ।४४
	=इयं कुरुक्षेत्रस्थमातृतीर्थे स्नातस्य नित्यं विवर्धते	२३ (१४) ।४४
	=आसां बीजसम्भवमेकं बृहदण्डं पूर्वमभूत्	२३ (२२) ।१७
	=अस्याः कामनया चिन्तितस्य ब्रह्मणः सकाशात् सप्तर्षय उत्पन्ना बभूवुः	२३ (२२) ।४०
प्रजाः	=एता राजा कुरुः पुत्रवत् पालयामास	२३ ।८
	=आसां पालने तत्परेषु राजसु दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२) ।११
	=आसामुत्तमः पतिः कश्यपः	२३ (३) ।१२
	=आसां पतयो विद्यया ब्रह्माणमुपास्ते	२३ (३) ।२६
	=इमा वामनः स्वयमत्ति	२३ (१०) ।१३
	=आसां महावृत्तेर्विधानाय सृष्टिकर्ता पूर्वं पितामहसमीपं जगाम	२३ (२८) ।२९
	=आभ्योऽन्नं विहितं पूर्वं पितामहेन	२३ (२८) ।३०
	=एता जलादुदतिष्ठन्	२३ (२८) ।३२
प्रजापतयः	=एषां तेजसा कात्यायन्या दशनाः सञ्जाताः	१९ ।१२
	=दक्षाद्याः, एतान् वामनाकृतिविष्णुस्थितान् प्रह्लादो ध्यानेन ददर्श	२३ (८) ।१४
	=दक्षाद्याः	२३ (८) ।१४; २३ (२८) ।२६
	=ब्रह्मण उत्पन्नाः सप्तर्षयः प्रजापतयोऽभवन्	२३ (२२) ।४०
प्रजापतिः	=ब्रह्मा, अयं चतुर्दिशं वर्तमानानि स्थानानि द्वीपसंज्ञानि कृतवान्	११ ।३३
	=तृतीयः प्रजापतिः कश्यपः	२३ (३) ।१२
	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।२४; २३ (६) ।३२

=अयं वामनस्य वृषणस्थानीय आसीत् २३ (१०) ।५५
=इमं दक्षिणे पाणावादाय शङ्करः स्कन्दान्तिकमुपागमत् ३२ ।६
प्रजापालः =राजा कुरुः २३ ।९
प्रणयः =अस्माददितिर्हरिं तुष्टाव २३ (६) ।१५
प्रणवः =अनेन भूषिता वेदा वामनस्य समीपमागताः २३ (९) ।३८
=ओंकारः, एष शिवरूप उक्तः २३ (२६) ।११८
प्रणामः =हिमवतः पुत्री काली शङ्करवधूर्भूत्वा सप्तर्षिभ्यः प्रणाममकरोत् २६ ।६०
=इमं कृत्वा वरदा देवी तावदन्तर्हिताऽभूत् ३० ।७२
प्रतापः =अयं वासुदेवस्य ब्रह्माद्यैर्न ज्ञायते २३ (८) ।२३
प्रतापी =दैत्यः, अयं वासुदेवबलाधिको बलिना प्रोक्तः प्रह्लादं प्रति २३ (८) ।३१
प्रतिज्ञा =इयं प्रह्लादेन नरनारायणयोर्विजयार्थं कृता ७ ।५२
=अस्याः करणाय बलिर्निषिद्धः शुक्राचार्येण २३ (१०) ।१५
प्रतिपत् =अस्यां ब्रह्मा स्वपिति १७ ।१३
प्रतिप्रणामः =इमं भास्करो देवो वरुणात्मजाय चकार २२ ।४२
प्रतिषेधकः =दातुः प्रतिषेधकश्चाण्डालसंज्ञको भवति १५ ।३६
प्रतिष्ठा =विश्वस्य प्रतिष्ठा विष्णावस्ति २३ (६) ।३०
=दीक्षाया इयम्, अनया संयुक्ता विप्रा विष्णुना ज्येष्ठाश्रमाख्ये तीर्थे प्रतिष्ठिताः २३ (१५) ।६९
=लिङ्गस्य प्रतिष्ठायां शिवस्य प्रीतिः २३ (२३) ।१०
प्रतिष्ठानम् =मेरुशिखरस्थं पुरम्, अत्र संवरणो नाम राजा जगाम २२ ।३८
प्रतीची =दिक्, अस्यां शिरः कृत्वा शयनं वर्ज्यम् १४ ।५१
=दिक्, अस्यां मुखं कृत्वा भोजनं वर्जनीयम् १४ ।५१
प्रतीहारः =नन्दी, इमं वञ्चयित्वा हंसरूपमास्थाय वह्निर्भवाजिरं प्रविवेश २८ ।४१
प्रथमं नरकम् =परदाराभिगमनादिरूपम् ३५ ।१

प्रथमः	=अस्मिन्नहनि प्रेतस्यास्थिसञ्चयः कार्यः	१५ ।४२
प्रथमाध्यायः	=कुरुजाङ्गलस्य स्थितिः, तत्रासीनं लोमहर्षणं प्रति द्विजानां पृथूदकसरसः प्रमाणादिविषये प्रश्नाः, लोमहर्षणेन क्रमशः समाधानारम्भः, पृथूदकसरसः स्थितिः, पृथूदकसरसो माहात्म्यम्, समन्तपञ्चकस्य स्थितिः	२३ (१) ।१-१४
प्रदक्षिणम्	=इदं कुरुक्षेत्रस्थसरसः करणीयमेव	२३ (१२) ।१९
	=इदं कार्यं कुरुक्षेत्रद्वारस्य	२३ (१३) ।४१
	=अग्नेः प्रदक्षिणं कर्तुं ब्रह्मा गिरिजामुवाच तदीयविवाहकाले	२७ ।४७
प्रदक्षिणा	=इयं देवालयादीनां कर्त्तव्या भवति	१४ ।५२
	=स्थाणुवटस्य प्रदक्षिणादिविषयकः प्रश्नो मार्कण्डेयेन सनत्कुमारं प्रति कृतः	२३ (२२) ।९
प्रपा	=जलशाला । इमां भङ्क्त्वा ये जना विध्वंसयन्ति तेषां चर्म देहतः पृथक् क्रियते नरकेषु यमकिङ्करैः	१२ ।२३-२४
प्रपितामहः	=ब्रह्मा, अस्य तेजसा कात्यायन्याः पादौ सञ्जातौ	१९ ।११
	=बलेर्हिरण्यकशिपुः, बलिना स्वविक्रमादिभिरयं विशेषितः	२३ (२) ।१७
	=ब्रह्मा, अनेन पूर्वं प्रजा समस्तैर्भूतगणैः समं सृष्टा	२३ ।४४
प्रभवः	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।३५
प्रभा	=देवी, इयं बलिसमीपमुपागता	२३ (२) ।१९
	=वामनस्यानया बलियज्ञे समुपस्थिता असुरा निष्प्रभा बभूवुः	२३ (१०) ।३४
प्रभाकरः	=चन्द्रः (द्र. प्रभाकरौ)	२३ (१०) ।६४
	=आदित्यः (द्र. प्रभाकरौ)	२३ (१०) ।६४
प्रभाकरौ	=चन्द्रादित्यौ, एतौ नभसः परं देशं विक्रममाणस्य वामनस्य जानुमूले स्थितावास्ताम्	२३ (१०) ।६४
प्रभातम्	=अस्मिन् काले पुरुषेण मङ्गलं वाच्यम्	१४ ।२०

	=कालः, अस्मिन् शिवोक्तं प्राभातिकं मङ्गलं भक्त्या पठनीयम्	१४ ।२८
	=शिवो रात्रावुमया सह रेमे प्रभाते च पुनरुत्थितः	२७ ।६०
प्रभावः	=पृथूदकसरसः प्रभावं लोमहर्षणं प्रति द्विजाः पप्रच्छुः	२३ (१) ।१
	=वामनस्य प्रभावकथनाय लोमहर्षणस्य प्रतिज्ञा	२३ (२) ।२
	=इमं वासुदेवस्य ब्रह्माद्या न जानन्ति	२३ (८) ।२३
	=स्थाणुतीर्थस्य प्रभावात् सर्वं दुष्कृतं नश्यति	२३ (२४) ।२४
	=स्थाणुतीर्थप्रभावस्य श्रवणेन सर्वपापैर्मुच्यते	२३ (२७) ।३५
प्रभावार्थसहः	=गणः, इमं काञ्चना नदी कार्त्तिकेयाय ददौ	३१ ।८१
प्रभासः	=तीर्थम्, इदं नन्दिनीं कार्त्तिकेयाय ददौ	३१ ।९१
प्रभुः	=सूर्यः, अयं करतले मूर्ध्नि निधायशास्त्यं प्रति स्वाभीष्टं प्राह	१९ ।२६
	=महिषासुर आत्मानमुद्दिश्य शब्दमिमं प्रयुक्तवान्	२० ।२९
	=महिषासुरः, कात्यायन्या महिषासुरमुद्दिश्य शब्दोऽयं प्रयुक्तः	२० ।३०
	=कश्यपः सुराणामसुराणां चापि	२३ (३) ।११
	=देवानां प्रभुर्ब्रह्मा	२३ (३) ।३८
	=विष्णुः, अयं प्रीतमना भूत्वा देवानां समक्षं वरदानार्थमुपस्थितोऽभूत्	२३ (६) ।२
	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।२८
	=वामनः, अमुं ब्रह्मा स्तुत्या तुष्टाव	२३ (९) ।१७
	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२६; २३ (९) ।३०
	=वामनः, अयं प्रजाः स्वयमत्ति	२३ (१०) ।१३
	=वामनः, इमं बलेर्यज्ञवाट उपस्थितं दृष्ट्वाऽसुराः क्षोभं जग्मुः	२३ (१०) ।३४
	=वामनः, अस्य सर्वदेवमयरूपस्य वर्णनम्	२३ (१०) ।४८-५९
प्रमथः	=घण्टाकर्णः	३१ ।६१
	=लोहिताक्षः	३१ ।६१

= नन्दिसेनः	३१ ।६१
= कुमुदमाली	३१ ।६१
= संक्रमः	३१ ।६३
= विक्रमः	३१ ।६३
= पराक्रमः	३१ ।६३
= उत्केशः	३१ ।६४
= पङ्कजः	३१ ।६४
= दण्डकः	३१ ।६४
= पिङ्गलः	३१ ।६४
= मणिः	३१ ।६४
= वसुमणिः	३१ ।६४
= चक्रः	३१ ।६६
= अनुचक्रः	३१ ।६६
= तिस्थिरः	३१ ।६६
= सुस्थिरः	३१ ।६६
= पाणित्यजः	३१ ।६६
= कालकः	३१ ।६६
= स्वर्णमालः	३१ ।६७
= घनाह्वः	३१ ।६७
= अतिशृङ्गः	३१ ।६७
= सुवर्चाः	३१ ।६८
= अतिवर्चाः	३१ ।६८
= संग्रहः	३१ ।६८
= विग्रहः	३१ ।६८
= जयः	३१ ।६८
= महाजयः	३१ ।६८
= उन्मादः	३१ ।६९
= अतिघसः	३१ ।६९
= शङ्कुकर्णः	३१ ।६९
= पुष्पदन्तः, इममम्बिका कार्त्तिकेयाय ददौ	३१ ।६९
= घसः	३१ ।६९
= परिघः	३१ ।७०

	= चटकः	३१ ।७०
	= भीमः	३१ ।७०
	= दहतिः	३१ ।७०
	= दहनः	३१ ।७०
	= प्रमाथः	३१ ।७१
	= उन्माथः	३१ ।७१
	= कालसेनः	३१ ।७१
	= महामुखः	३१ ।७१
	= तालपत्रः	३१ ।७१
	= नाडिजङ्घः	३१ ।७१
	= सुप्रभः	३१ ।७२
	= सुव्रतः	३१ ।७२
	= सत्यसन्धः	३१ ।७२
	= सुकर्मा	३१ ।७२
	= अनन्तः	३१ ।७३
	= शङ्कुपीठः	३१ ।७३
	= निकुम्भः	३१ ।७३
	= कुमुदः	३१ ।७३
	= अम्बुजः	३१ ।७३
	= एकाक्षः	३१ ।७३
	= कुनटी	३१ ।७३
	= चक्षुः	३१ ।७३
	= किरीटी	३१ ।७३
	= कलशोदरः	३१ ।७३
	= सूचीवक्त्रः	३१ ।७४
	= कोकनदः	३१ ।७४
	= प्रहासः	३१ ।७४
	= प्रियकः	३१ ।७४
	= अच्युतः	३१ ।७४
प्रमथगणः	= ज्वलज्जिह्वः	३१ ।६५
	= कुन्दः	३१ ।६५

	=मुकुन्दः	३१ ।६५
	=कुसुमः	३१ ।६५
प्रमथाः	=देव्या गणाः, एभिः संताड्यमाना दैत्याः पातालं विविशुः	२१ ।५०
	=एतांश्चतुरो हरः सैनापत्येऽभिषिक्तस्य कार्त्तिकेयस्य कृते प्रादात्	३१ ।६०
	=एतान् ब्रह्मपुरोगमाः सर्वे देवाः सैनापत्येऽभिषिक्ताय कार्त्तिकेयाय प्रददुः	३१ ।६२
	=एते महिषतारकाभ्यां दैत्याभ्यां सह युयुधुः	३२ ।६५
प्रमाणम्	=पृथिव्या आयतेः, पञ्चाशत्कोटियोजनानि	११ ।३१
	=जम्बूद्वीपात् समारभ्य क्षीराब्धिपर्यन्तं चत्वारिंशत्कोटिपञ्चनवतिलक्षमितयोजनानि	११ ।४०-४१
	=पुष्करद्वीपस्य ४ कोटि ५२ लक्षयोजनानि	११ ।४१-४२
	=लक्षयोजनात्मकमण्डकटाहेन पूरितम्	११ ।४२
	=पृथूदकसरसः प्रमाणं लोमहर्षणं प्रति द्विजाः पप्रच्छुः	२३ (१) ।२
	=पृथूदकसरसः प्रमाणं कलिद्वापरयोर्मध्ये व्यासेनोक्तम्	२३ (१) ।६
	=कल्पप्रमाणमायुर्वामनेन बलये प्रदत्तम्	२३ (१०) ।६८
	=मुनिर्मार्कण्डेयः सरःप्रमाणं सनत्कुमारं प्रति पप्रच्छ	२३ (२२) ।२५
	=धर्मस्य प्रमाणं श्रुतिर्भवति	२३ (२६) ।१३
प्रमाथः	=अयं प्रमथो यमेन कार्त्तिकेयाय प्रदत्तः	३१ ।७१
महामुखः	=प्रमथः, इमं यमः कार्त्तिकेयाय ददौ	३१।७१
महामुनिः	=मार्कण्डेयः, अयं प्लक्षवृक्षस्थां सरस्वतीं ददर्श	२३ (११)।५
	=मार्कण्डेयः	२३ (११)।२३
	=रहोदरः	२३ (१८)।९
	=विश्वामित्रः	२३ (१८)।१४
	=सनत्कुमारः	२३ (२२)।१४
महामूर्तिः	=शिवस्य नाम	२३ (२६)।६९
महामेधः	=शङ्करस्य नाम	२३ (२३)।३६ (१३)
	=शिवस्य नाम	२३ (२६)।१०४
महामैथुनम्	=अस्य परित्यागाय देवैः शिवः प्रार्थितः	२८।४६
महामोहः	=अस्मिन् यदा शिवः स्थितस्तदा देवा भीता बभूवुः	२८।३१
महायक्षः	=कपिलनामा कुरुक्षेत्रस्य द्वारपालः	२३ (१३)।४४
महायक्षी	=इयं कपिलनामकमहायक्षस्य पत्नी (उदूखलमेखलानाम्नी)	२३ (१३)।४५
महायाज्ञिकः	=शङ्करस्य नाम	२३ (२३)।३६ (१९)
महायोगी	=विष्णुः, अस्य पूजा कैश्चित् कृता	१६।२२
	=शङ्करस्य नाम	२३ (२३)।३६ (७)
महायोगेश्वरः	=शङ्करस्य नाम	२३ (२३)।३६ (७)

महाराजिकः	=शङ्करस्य नाम	२३ (२३) ।३६ (१४)
महारावः	=गणः, इमं धूतपापा नदी कार्त्तिकेयाय ददौ	३१ ।८२
महाराष्ट्राः	=अयं दाक्षिणात्यो जनपदः	१३ ।४७
महारौरवः	=नरकः, अयं चतुःसहस्रयोजनविस्तृतः	११ ।५२
	=नरकः, ब्रह्मघ्नादयो नरा अस्मिन् निपतन्ति	१२ ।४०
महार्णवः	=अयं वामनस्य धैर्यस्थित आसीत्	२३ (१०) ।५६
	=कार्त्तिकेयगणानां गर्जनमाकर्ण्य पातालकेतुर्दैत्यो महार्णवं पतितः	३२ ।४३
	=अस्मिन् महासुरान् प्रचिक्षेप दण्डको गणः	३२ ।५३
महार्णवाः	=इमे प्रपितामहेन भूतगणैः समं निर्मिताः	२३ ।४५
महालिङ्गम्	=इदं कुरुक्षेत्रे वायुना स्थापितम्	२३ (२५) ।३९
महावनम्	=दण्डकारण्यम्, अत्र रामेण च्छिन्नं राक्षसस्य शिरः पपात	२३ (१८) ।६
महाविप्राः	=एभिः सह लोमहर्षणस्य संवादः	२३ (१४) ।४५
महाविभूतिः	=शङ्करस्य नाम	२३ (२३) ।३६ (३)
महाविरिञ्चः	=शङ्करस्य नाम	२३ (२३) ।३६ (३)
महावृत्तिः	=प्रजानां कृते महावृत्तेर्विधानाय सृष्टिकर्ता पूर्वं पितामहमुपजगाम	२३ (२८) ।२९
महाशकाः	=अयं दाक्षिणात्यो जनपदः	१३ ।४७
महाशनिः	=अनेन सस्यविनाशो भवति (अशनिर्वज्रं विद्युच्च, एतेन, नैव वज्रपातेन, न चापि विद्युत्पातेन सस्यविनाशः श्रुतः। समाधानार्थमशनिशब्दस्य 'वर्षोपलः' इत्यर्थो मन्तव्यः, तस्मात् सस्यविनाशस्य दृष्टत्वात्)	२१ ।२२
महाशनी	=इमां मांतरं श्वेततीर्थं कार्त्तिकेयाय ददौ	३१ ।१०१
महाशैलः	=मेरुः	२५ ।३१
	=पर्वताः, इमेऽदित्या गर्भे कृष्णे स्थिते सति क्षोभं जग्मुः	२३ (७) ।१४

महाश्रमः	=अगस्त्यस्य, अत्राहं यावन्नाऽऽव्रजामि तावत् त्वया न वर्धितव्यामित्यगस्त्यो विन्ध्यमुवाच	१९ ।३१
	=महर्षेरगस्त्यस्य गगनस्थः, एनं दृष्ट्वा विन्ध्यपर्वतो वृद्धिं न याति	१९ ।३५
महासुरः	=हिरण्याक्षतनयोऽन्धकनामाऽसुरः। अस्यै परिचारणं गन्धर्वादयोऽकुर्वन्	१० ।५७
	=महिषः, अस्य दूतो दुन्दुभिर्देव्याः समीपं जगाम	२० ।२२
	=महिषाख्यः	२१ ।४५
	=बलिः, अस्य प्रह्लादेन सह संवादः	२३ (९) ।८
	=बलिः, अस्य शुक्राचार्येण सह संवादः	२३ (१०) ।१६
	=बलिः	२३ (१०) ।४०
महासुराः	=इमे देव्याऽसुविहीनाः कृताः	२१ ।३८
	=एते वामनरूपधारिणा विष्णुनैव धार्यन्ते	२३ (१०) ।७
	=एतान् हन्तुकामा गणा मातरश्च कार्त्तिकेयेन समं नभस्तलं समुत्पेतुः	३२ ।२८
महासुरेन्द्रः	=प्रह्लादः, अनेन राज्यं परित्यक्तम्	८ ।७१
	=महिषासुरः, अस्मै कात्यायनीरूपरत्नस्य परिचयश्चण्डमुण्डाभ्यां प्रदत्तः	२० ।१६
	=महिषासुरः, अयं कात्यायन्याः प्राप्तिविषये मतिं कृत्वा चण्डमुण्डादीन् असुरान् समादिदेश	२० ।१९
महासेनः	=कार्त्तिकेयस्य नाम	३० ।५४
	=महासेननामको बालोऽग्निसमीपमाजगाम	३१ ।४०
	=महासेननाम्ना ख्यातः पुत्रोऽग्नेरभूत्	३१ ।४५
महास्त्रम्	=आग्नेयम्	७ ।६२
महाहंसः	=शङ्करस्य नाम	२३ (२३) ।३६ (१५)
महाहनुः	=दैत्यः, अयं वासुदेवबलाधिको बलिना प्रह्लादं प्रति प्रोक्तः	२३ (८) ।३०
महाहासः	=इमं भिक्षुरूपधारी शिवः सोमप्रभाया वचनं निशम्य कृतवान्	२५ ।६२

महाह्रदः	=स्थाणुनामकः कुरुक्षेत्रस्थः	२३ (१२) ।१८
महिषः	=अस्य जन्म-नाम-वर्णादिकम्	९ ।१६
	=अयं धर्मराजस्य वाहनम्	९ ।१६
	=एतदाख्यो गुग्गुलुः, अयं चैत्रमासे नाट्येश्वरस्य प्रीणनार्थं देयः	१७ ।४९
	=असुरः, एष कस्य कुले जात इति प्रश्नो नारदस्य पुलस्त्यं प्रति	१८ ।४०
	=असुरः, एष श्यामायां महिष्यां रम्भासुरेण जनितः (महिष्या रम्भासुरस्य च सुतः)	१८ ।६०
	=अयमृतुमतीं महिषीं ददर्श	१८ ।६१
	=एनं हन्तुं रम्भासुरः समुद्यतो बभूव	१८ ।६२
	=एनेन शृङ्गाभ्यां रम्भासुरो निर्भिन्नः	१८ ।६३
	=रम्भनन्दनः, (रम्भासुरस्य पुत्रः), अयमग्निमध्यादुत्थितेन पुरुषेण न हतः	१८ ।६९
	=असुरः, अनेन देवा निर्जिताः	१९ ।१
	=असुरः, अस्य चेष्टितं देवा विष्णुशङ्कराभ्यां निवेदितवन्तः	१९ ।२
	=दानवः	१९ ।४
	=असुरः, अस्य दूतौ चण्डमुण्डौ कात्यायन्या विषयमेनमूचतुः	२० ।२
	=असुरेन्द्रः	२० ।३; २० ।४३; २२ ।१४
	=असुरेन्द्रः, इमं प्रति चण्डमुण्डाभ्यां कात्यायन्या अङ्गानां मनोहारिता वर्णिता	२० ।१२
	=महासुरः	२० ।२२, २१ ।४५
	=दैत्यः, अयं यदि मम शुल्कं दद्यात् तर्हि मम पतिः स्यादिति कात्यायनी दुन्दुभिं प्रति प्राह	२० ।३१
	=दैत्यः, अस्मै देव्या वचनं दुन्दुभिर्यथातथमुक्तवान्	२० ।३५
	=दानवसत्तमः	२० ।४२
	=असुरेन्द्रः; अयं देव्या कात्यायन्या पादघातैर्निषूदितः	२० ।४३

=अस्याऽऽस्यमिवाऽऽस्यवन्तो भूता देव्या हास्यात् समुद्भूताः २१।१९
=असुरः, अयं खुराग्रैर्भूतगणान् विद्रावयामास २१।३९
=असुरः, अयं देव्या सह युद्धे हस्ती पुनश्च महिषो बभूव २१।४२
=दानवो दानवेन्द्रश्च, अनेन देवाः पराजिताः २२।११
=दैत्येन्द्रः, अस्य वधकारकः शङ्कर-तेजोंऽशेनोत्पन्नः सुतो निर्दिष्टः २२।१९
=यमस्य पौण्ड्रकनामधेयः, अनेन राजर्षिः कुरुः समन्तपञ्चकं क्षेत्रं कर्षितुमुद्यतोऽभूत् २३।२३
=असुरः, अस्य हन्तारं पुत्रं कुटिला जनयिष्यतीति देवा ब्रह्माणमूचुः २५।७
=असुरः, एनं यूयं निहतमवगच्छध्वमिति 'ब्रह्मा' इन्द्रादिदेवान् प्रत्याह २५।२८
=यमस्य महिषं शुम्भनिशुम्भौ बलादाहृतवन्तौ २९।१३
=अस्य सचिवो रक्तबीज आसीत् २९।१६
=अस्य देवीकृतो वधो रक्तबीजेन शुम्भनिशुम्भौ प्रत्युक्तः २९।१८
=यमस्य महिषः पौण्ड्रः २९।७१
=असुरः, इमं देवी कौशिकी ननाश ३०।५७
=असुरः, अस्य वधकरणाय कुमारकार्त्तिकेयस्याभिषेकः सरस्वत्यां करणीय इति देवाः शिवमूचुः ३१।५२
=देवशत्रुः, एनं विजेतुं देवानुज्ञा प्रार्थिता कुमारकार्त्तिकेयेन ३२।३
=दैत्यः, एतस्य वधाय विष्णुः स्वस्त्ययनं चकार ३२।१४
=दैत्यः, एनेन कार्त्तिकेयगणानां निनादः श्रुतः ३२।३२
=एष कार्त्तिकेयगणैः सह युद्धाय स्वपरिग्रहसंयुक्तो निर्ययौ ३२।४७
=दैत्यः, एष कार्त्तिकेयगणेषु प्रदुद्राव ३२।६४
=असुरः, एष युद्धे हंसास्येन समाहतः ३२।६६

	=असुरः, एष गदया प्रमथान् पराजित्य कुमारं प्रति पराधावत्	३२ ।७१
	=असुरः, एनेन सुचक्राक्षगणोपरि गदा निपातिता	३२ ।१४
	=दैत्यः, एष तारकासुरं हतं समीक्ष्य संग्रामं विहाय हिमाचलं जगाम	३२ ।८४
	=दैत्यः, एष कार्त्तिकेयेन शक्त्या निहतः	३२ ।११०
	=यमस्य पौण्ड्रकनामधेयः, एतेन राजर्षिः कुरुः समन्तपञ्चकं क्षेत्रं कर्षितुमुद्यतोऽभूत्	२३ ।२३
महिषाः	=इमान् रम्भासुरो ददर्श माल्यवटाख्ययक्षस्य समीपे	१८ ।५४
	=सर्वे महिषा अग्निमध्यादुत्थितेन पुरुषेण निहताः	१८ ।६८-६९
महिषासुरः	=दानवः, अयं कात्यायन्या नाशितः	१८ ।३८
	=एनं कात्यायनी जघान	१८ ।३९
	=एनेन सर्वे देवाः स्वर्गाद् निराकृत्यावनिस्थाः कृताः	१९ ।३
	=दैत्येश्वरः	२० ।१३
	=दनुनाथः	२० ।१५
	=महासुरेन्द्रः	२० ।१६; १९
	=अयं चण्डमुण्डाभ्यां देव्याः प्रवृत्तिं श्रुत्वा तस्याः प्राप्तिं चिन्तितवान्	२० ।१७
	=अनेन मयासुरस्य पुत्रो दुन्दुभिनामा देव्याः समीपे प्रेषितः	२० ।२१
	=रम्भस्याऽऽत्मजः	२० ।२२
	=अयं रम्भस्य सुतः	२० ।२३
	=रम्भात्मजः	२० ।२४
	=सुरारिः, दैत्यः	२० ।२५
	=जगत्पतिः	२० ।२९
	=प्रभुः, दानवराट्	२० ।३०
	=हयारिः	२० ।३१
	=एतस्य वधविषयकः प्रश्नो नारदस्य पुलस्त्यं प्रति	२१ ।१

	=एतस्य पृष्ठं दुर्गा देवी समारूढा	२१।४६
	=एष वीर्यमदाद् देवीसमक्षं जगाम	२१।४७
	=एतस्य वधाय कार्त्तिकेयगणाः सगर्जनमूचुः	३२।४२
	=एतां निहन्तुं कुमारकार्त्तिकेयो हिमाद्रिं जगाम	३२।८६
	=एतस्य हननाय इन्द्रः कार्त्तिकेयं प्रत्याह	३२।९७
	=एतस्य मृत्युः कार्त्तिकेयशक्त्या समभवत्	३२।१२०
महिषी	=त्रिहायण्यामस्यां दानवपार्थिवो रम्भासुरः कामभावं चक्रे	१८।५५
मही	=अस्या आयतिप्रमाणम् = पञ्चाशत्कोटि-योजनमितम्	११।३१
	=एषा भूतेषु प्रधाना = श्रेष्ठा मन्यते	१२।४४
	=एतस्यां रोहन्ति ते महीरुहः, तेषु सर्वेषु वटाख्यो महीरुहः श्रेष्ठः	१२।५४
	=नदी, इयं पारियात्रपर्वताद् विनिःसृता	१३।२३
	=पृथ्वी, इमां निद्रास्वरूपेण वितत्य कात्यायनी देवी स्थिता	१९।१९
	=लोकः, इयं महिषासुरस्य वश्या बभूव	२०।२६
	=इमां कुरुर्यौवराज्येऽभिषिक्तः सन् पालयामास	२३।८
	=अत्र कीर्तिप्राप्त्यर्थं नृपतिश्रेष्ठः कुरुर्विचचार	२३।११
	=भूतगणान्तर्गता, अनया समं पूर्वं प्रजा प्रपितामहेन सृष्टा	२३।४४
	=अत्र महार्णवादीनां सलिलमैक्यमागात्	२३।४५
	=एषा ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३)।२८
	=पृथिवी, एनां वामनाकृतिविष्णुस्थितां प्रह्लादो ध्यानेन ददर्श	२३ (८)।१३
	=पृथिवी, इयं साब्धिभूमिधरा वामनस्य गत्या क्षोभमायाता	२३ (१०)।२
	=पृथिवी, इयं भगवतो वामनस्य पादविन्यास-विक्षोभात् प्रचलिता	२३ (१०)।५

	=पृथिवी, इमां स क्षत्रियो जयति यो बलिविष्ण्वादीनां कथां शृणोति	२३ (१०) ।९१
	=पृथिवी, इयं सोपानीयां मातरं कार्त्तिकेयाय ददौ	३१ ।९५
महीतलम्	=आगारशून्ये महीतले सुरतं वर्ज्यम्	१४ ।४०
	=लोकः, अत्रत्यः कोऽपि भूतो महिषासुरेण सह संग्रामं कर्तुं नापारयत्	२० ।२७
	=लोकः, अत्र वर्तमानानि सर्वाण्येव रत्नानि महिषासुरेणार्जितानि	२० ।२८
	=अत्र कार्त्तिकेयगणा अवतीर्य भयङ्करं नादं चक्रुः	३२ ।३०
महीधरः	=विन्ध्याख्यः पर्वतः, अत्र भेरीमाहत्य महिषासुरादयः समागताः	२० ।२०
महीध्रः	=पर्वतो विन्ध्याख्यः, अयं तव किरणैर्विजितो भविष्यतीति सूर्यं प्रति महर्षिरगस्त्यः प्राह	१९ ।२७
महीपृष्ठम्	=अत्र वसतां मनुजादीनां धर्माः	११ ।३०
	=अत्र शुम्भनिशुम्भयो रक्तबीजेन सह संवादः	२९ ।१५-१६
महीरुहाः	=वृक्षाः, एषु सर्वेषु वटाख्यो महीरुहः श्रेष्ठः	१२ ।५४
महेन्द्रः	=अयं वाजमखे पशून् निहन्ति	१० ।३७
	=कुलपर्वतेषु सप्तस्वन्यतमः	१३ ।४४
	=एनं प्राप्य दैत्यकन्येव संवरणं प्राप्य सूर्यपुत्री तपती भवनोत्तमेषु रेमे	२२ ।६१
	=पर्वतः, अयं हिमाद्रिभवनमाजगाम	२६ ।४८
महेशः	=शङ्करः, अस्य समीपं कार्त्तिकेय इन्द्रश्च जग्मतुः	३२ ।१०५
महेशानः	=शिवः, अयं ब्रह्मविष्णुभ्यां स्तुतः	६ ।७९
	=नारायणः, अयं प्रह्लादेन भक्त्या स्तुतः	८ ।४९
	=शिवस्य नाम	२६ ।३६; ६७
	=शिवः, अस्य समीपं षड् ऋतवः शिवविवाहयात्रायां पञ्चवर्णं कुसुममादाय जग्मुः	२७ ।१३
	=शिवः, इमम् ऋषिमुनिगणयक्षादयो विवाहयात्रायामनुजग्मुः	२७ ।१९
	=शङ्करः, इममुमा प्रणनाम	२८ ।२९

=ब्रह्मणो नाम २८।३२

महेश्वरः =गृहाभावविषयेऽयं देव्या हैमवत्या निवेदितः १।११
=अस्य पर्वतादिषु भ्रमणम्, तथापि शर्म न लब्धम् ६।३२-३३
=अयं दारुवने यत्र गच्छति, तत्रैव मुनियोषितः संक्षोभिता भवन्ति स्म ६।६३
=शिवः, अयं ब्रह्मविष्णुभ्यां स्तुतः ६।७९
=अस्याऽऽवासं ब्रह्मा गतवान् १६।५७
=शङ्करः, अस्य वचनानुसारेण संवत्सरं यावद् वृषभध्वजं सम्पूज्याक्षयान् कामान् लभते जनः १७।६३
=शङ्करः, अस्य रतिकृद् धत्तूरविटपो वर्तते १८।४
=अयं महिषासुरस्य वश्यो बभूव २०।२६
=शिवः, इमं सरकतीर्थे कृष्णपक्षस्य चतुर्दश्यां दृष्ट्वा सर्वे कामा लभ्यन्ते २३ (१५)।२०
=कोटीश्वरः कोटितीर्थस्थः २३ (१५)।७२
=शिवः, एनं कुरुक्षेत्रस्थे पवनह्रदाख्ये तीर्थे दृष्ट्वा शैवं पदमवाप्नुयात् २३ (१६)।१
=देवदेवः २३ (२०)।१३
=पञ्चवटतीर्थस्थितं महेश्वरमर्चयित्वा जनो गाणपत्यमवाप्नोति २३ (२०)।१३
=अयमनरकाख्यतीर्थस्य दक्षिणभागे स्थितः २३ (२०)।२४
=महामुनिना सनत्कुमारेणायं नमस्कृतः २३ (२२)।१५
=शङ्करः, महता श्रमेणान्विष्यन्तो देवा शङ्करं न ददृशुः २३ (२३)।२७
=शिवः, अस्य स्तुतिं देवाश्चक्रुः २३ (२३)।३१
=शङ्करः २३ (२३)।३१
=अस्य स्तवं सर्वे देवादयश्चक्रुः २३ (२३)।३५
=शङ्करस्य नाम २३ (२३)।३६ (१४)
=शङ्करः, अयमिन्द्रकृतं पांशुवर्षमवलोक्य स्थाणुलिङ्गं करेण धारयामास २३ (२४)।१२

	=इमं कुरुक्षेत्रे संपूज्य दूषणस्त्रिशिराश्चाभिलषितकामानवापतुः	२३ (२५) ।२३
	=अयं चित्राङ्गदरम्भाभ्यां प्रतिष्ठापितः	२३ (२५) ।३४
	=शिवस्य नाम	२३ (२६) ।१३४
	=शिवः, एतदर्थं सप्तर्षीभिर्मम हिमवतः सुता काली याचितेति हिमवान् पुलस्त्यं बभाषे	२६ ।५३
	=शिवः, एष सप्तर्षीननुक्रमात् पूजयामास	२६ ।६८
	=एनं प्रणम्य गिरिजा तपस्तप्तुं जगाम	२८ ।१०
	=शिवः, एनेन संत्यक्तं सुदुर्धरं तेजस्त्वं प्रतीच्छेत्यग्निना देवी कुटिला प्रोक्ता	३१ ।६
	=शिवः, एष आत्मानं निस्तेजोऽङ्गं निरीक्ष्य तपोऽर्थाय मतिं चक्रे	३४ ।३
महेश्वराः	=इमे स्वस्तिविधानार्थं प्रार्थिताः	३२ ।१९
महेश्वरी	=देवी, इयं सिंहनादं रणे मुमोच	३० ।२
महेषुधी	=नरनारायणयोः पार्श्वस्थाविमौ प्रह्लादेन दृष्टौ	७ ।४६
महोदधिः	=सुरोद-नामकः समुद्रः, अयं शाल्मलीद्वीपस्य बाह्यतः स्थितः, अस्य प्रमाणं द्वात्रिंशल्लक्षयोजनानि	११ ।३६
	=स्वादूदनामा समुद्रः, अस्य प्रमाणम् = ४ कोटि-५२ लक्षयोजनानि	११ ।४२
महोरगः	=अयं दुन्दुभेर्वाहनम्	९ ।२९
महोरगपतिः	=शिवस्य नाम	२३ (२६) ।१३६
महोरगाः	=इमे देवासुरसंग्रामात् पराङ्मुखा बभूवुः	१० ।५४
	=एषां मध्येऽनन्तनामको महोरगः प्रवरः	१२ ।४४
	=इमे वीतशोका भूत्वा कात्यायनीमभितस्तस्थुः	१९ ।३७
महौषध्यः	=इमाः पूर्वं पितामहः स्थावराणां कृते दत्तवान्	२३ (२८) ।२९
मांसम्	=अस्य वृथा भक्षणेन नरो नरकयातनामवाप्नोति	१२ ।२०
	=पृष्ठस्य मांसं ये भक्षयन्ति ते वृकभक्षनामके नरके क्षिप्यन्ते	१२ ।३७

	=जयासंज्ञकासु तिथिषु मांसभक्षणं परिवर्जनीयम्	१४।४८
	=शुक्रवासरे शनिवासरे च मासं न भक्षणीयम्	१४।४९
	=इदं मूल-मृगशिरोभाद्रपदानामकेषु नक्षत्रेषु वर्जनीयम्	१४।५०
	=इदमुत्कृत्य दाल्भ्यो बको नामर्षिर्जुहाव	२३ (१८)।२८-२९
मांसादाः	=प्राग्देशीयो जनपदः	१३।४४
मागधम्	=अरण्यम्, अत्र कदाचिद् विद्युत्केशिसुतो राक्षसेश्वरः सुकेशिरगच्छत्	११।७
मागधारण्यम्	=अत्र रुद्रः स्नानार्थं गतः	३।९
माघः	=मासः, अस्मिन् कुशोदकेन स्नानं कार्यम्	१७।४२
माङ्गल्यम्	=इदं मानवानां धर्मः	११।२४
माठराः	=उत्तरापथवासिनो जनाः, इमे स्वेच्छया क्षुद्रनदीजलानि पिबन्ति	१३।३९
माण्डव्याः	=उत्तरापथवासिनो जनाः, इमे स्वेच्छया क्षुद्रनदीजलानि पिबन्ति	१३।४३
मातरः	=आसां येऽवज्ञां कुर्वन्ति ते नरकगामिनो भवन्ति	१२।११
	=सरस्वतीप्रभृतयो नद्यः पुण्याः पापप्रशमना जगतो मातरश्चाभिमताः	१३।३३
	=देवानाम्, इमा विष्णौ प्रसुप्ते सति स्वपन्ति	१७।४
	=लोकमातरः, इमाः पितामहस्योद्गारात् समुद्भूतायाः सुरभेस्तनयाः सुरभयः सन्ति	२३ (१४)।३१
	=आसां तीर्थं कुरुक्षेत्रे स्थितम्	२३ (१४)।४३
	=आभिर्वध्यमाना महासुरा आकुला भूत्वा रक्तबीजं शरणं जग्मुः	३०।२४
	=एताः शस्त्रैर्दितिजं ववर्षुः	३०।२६
	=चण्डाद्या मातरो निशुम्भे हते किलकिलाध्वनिं चक्रुः	३०।४६
	=एता गणान् कार्त्तिकेयाय ददुः	३१।९१
	=चतस्रो मातृः सप्तसारस्वततीर्थं कार्त्तिकेयाय प्रादात्	३१।९२

	=एताः सर्वाः कार्त्तिकेयमनु नभस्तलं समुत्पेतुः	३२।२८
मातलिः	=शिवस्य नाम	२३ (२६)।१२७
माता	=अस्यामभुक्तवत्यामेव येऽश्नन्ति ते नरकेषु पतन्ति	१२।१२
	=अस्यास्त्यागेन नरकप्राप्तिर्भवति	१२।३४
	=अनया सहैकस्मिन्नासने गृहस्थः स्थितिं न कुर्यात्	१४।४६
	=गौः, अस्याः प्रस्रवणे दोहनकर्मणि वत्सः शुचिर्भवति	१५।१५
	=इन्द्रस्य माताऽदितिः, अस्या निलयं मेरुप्रस्थमिन्द्रो जगाम	२३ (३)।२
	=अदितिः, अस्याः समीप इन्द्रेणाऽऽदित्यपराजय उक्तः	२३ (३)।३
	=सरस्वती सर्वलोकानां माता	२३ (११)।६
	=देवानां माताऽदितिः	२३ (१३)।१३
	=अस्या भक्तेर्यत् पुण्यं तद् रेणुकाश्रममासाद्य नरो लभते	२३ (२०)।५
	=काली गिरिराजसुता शम्भुपत्नी सर्वेषां माताऽभिमता	२६।३९
मातामहः	=इमं कुरुक्षेत्रस्थं कुलोत्तारणाख्यं तीर्थमासाद्य द्विजोत्तमस्तारयति	२३ (१६)।५
	=वेनस्य मातामहः कालो मृत्युर्वाऽऽसीत्	२३ (२६)।९
मातृगणाः	=इमे शिवेन स्वतनयाय विनायकाय प्रदत्ताः	२८।७४
मातृतीर्थम्	=अत्र स्नानेनानन्तां श्रियमाप्नुयात्	२३ (१४)।४३
मातृभक्तिः	=अनया यत् पुण्यं लभ्यते तदेव रेणुकाश्रममासाद्य नरो लभते	२३ (२०)।५
मातृमण्डलः	=इमं रक्तबीजो वरास्त्रेण व्यद्रावयत्	३०।२५
	=अयमुग्रः कार्त्तिकेयगणानां पुरस्सरः परबलं न्यषूदयत्	३२।४९
मातृष्वसा	=शिवपत्नी सती 'जया' इति नाम्न्या गौतमनन्दिन्या मातृष्वसाऽऽसीत्	४।१५-१६

मातृहा	= अयं प्राच्यां सरस्वत्यां स्नात्वा शुद्धिमवाप्नोति	२३ (२१) ।१८-१९
मात्रात्रयम्	= इदं सर्वं सरस्वत्यामवस्थितम्	२३ (११) ।९
	= त्रित्वगुणयुक्ताः पदार्थाः सरस्वत्या रूपम्	२३ (११) ।१२
मात्सर्यम्	= इदं दैत्यधर्मेषु परिगणितम्	११ ।१६
मात्स्यम्	= पुराणम्, इदं सर्वेषु पुराणेषु मुख्यमस्ति	१२ ।४८
माधवः	= कामदेवस्य सहायको वसन्तः, उर्वशीं दृष्ट्वाऽस्य विचारणा	७ ।१४
	= अयं मुनिरिव ध्यानमास्थितः	७ ।१६
	= नारायणः, अस्य प्रह्लादकृता स्तुतिः	८ ।५४
	= 'अयं सर्वतः पातु' इति ब्रह्मादिदेवैः स्कन्दस्य स्वस्त्ययनं चक्रे	३२ ।२५
	= विष्णुः, अस्य समीपमिन्द्रः कार्त्तिकेयश्च जग्मतुः	३२ ।१०५
माधवी	= इमां मातरं नागतीर्थं कार्त्तिकेयाय ददौ	३१ ।९३
	= इमां मातरं बदरिकाश्रमः कार्त्तिकेयाय ददौ	३१ ।९६
मानः	= अस्याभावः पितृणां धर्मो भवति	११ ।२१
मानम् (:)	= मानः = चित्तसमुन्नतिः, मानम् = प्रमाणम्, अनयोः प्रभुर्भगवान् विष्णुः	२३ (८) ।१८
	= अस्य प्राप्तये वेनकृतः शिवस्तवः श्रोतव्यः	२३ (२७) ।९
मानवः	= एष परमो धर्मः सुकेशिं प्रति महर्षिभिरुक्तः	११ ।२४
	= यो मानवः स्वपोषणपरः संश्च दुर्भिक्षादावकिञ्चनं पुत्रादिवर्गं परित्यजति स श्वयोनौ निपात्यते	१२ ।२६
	= अयं कुरुक्षेत्रस्थे सोमतीर्थे स्नानेन सोमेश्वरस्य दर्शनेन च राजसूययज्ञस्य फलं लभते	२३ (१३) ।३४
	= अयं कुरुक्षेत्रस्थे कपिलाह्रदे स्नानादिना कपिलासहस्रदानस्य फलं विन्दति	२३ (१४) ।२५
	= अयं कपिलस्थ (ष्ठ) ला–तीर्थे चैत्रशुक्लचतुर्दश्यां श्राद्धं कृत्वा परमं पदं प्राप्नोति	२३ (१५) ।१७
	= अयमिडास्पदतीर्थस्य कुरुक्षेत्रस्थस्य दर्शनादेव मुक्तिमवाप्नोति	२३ (१५) ।२५

	=अयं दृषद्वत्यां स्नात्वा देवतास्तर्पयित्वा चाग्निष्टोमातिरात्रयज्ञयोः फलं विन्दति	२३ (१५) ।४६
	=अयं यायाततीर्थे भक्त्या स्नात्वाऽश्वमेधयज्ञस्य फलं प्राप्नोति	२३ (१८) ।३८
	=अयं कलियुगेऽरुणासंगमे स्नात्वा मुक्तिं लभते	२३ (१९) ।४२
	=अयं कुरुक्षेत्रस्थे कुमाराभिषेकतीर्थे श्राद्धं कृत्वा कुमारपुरमाप्नोति	२३ (२०) ।७
	=अयमादित्यस्य दिने काम्यकवने स्नात्वा मनसा चिन्तितं लभते	२३ (२०) ।३४
	=अयं सरस्वत्यां स्नात्वा सर्वतीर्थे स्नातो भवति	२३ (२१) ।९
	=अयं केषां तीर्थानां दर्शनमात्रेण मुक्तिं प्राप्नोति - इति मार्कण्डेयः सनत्कुमारं प्रति पप्रच्छ	२३ (२२) ।८
	=अयं स्थाणुतीर्थे स्नात्वा सर्वतीर्थैः स्नातो भवति	२३ (२४) ।१३
	=अयं कुरुक्षेत्रस्थमुमासन्निधिं लिङ्गं दृष्ट्वा सिद्धिं प्राप्नोति	२३ (२५) ।८
	=अयं कुरुक्षेत्रस्थं विश्वकर्मकृतं लिङ्गं दृष्ट्वा सिद्धिमाप्नोति	२३ (२५) ।१०
	=अयं रुद्रकरतीर्थे स्नात्वा सर्वतीर्थे स्नातो भवति	२३ (२५) ।१५
	=अयं कुरुक्षेत्रे हारीतस्थापितं लिङ्गं प्रणम्य सिद्धिमाप्नोति	२३ (२५) ।२६
	=अयं कुरुक्षेत्रस्थस्थाणुतीर्थस्य माहात्म्यश्रवणेन सर्वपापेभ्यो मुच्यते	२३ (२६) ।२; २३ (२८) ।४९
मानवाः	=ये मानवा गोब्राह्मणार्काग्नीनामभिमुखं मूत्रकर्म कुर्वन्ति तेषां गुदेभ्योऽन्त्राणि वायसा निःसारयन्ति नरकेषु	१२ ।२५
	=ये मानवाः श्राद्धातिथेयमन्योन्यं भुञ्जते ते नरकं प्राप्य तत्र परस्परं स्वमांसं भक्षयन्ति	१२ ।३३
	=इम आधि - व्याध्यादिभिर्ग्रस्ता न भवन्ति यदि बलेर्विष्णोश्च चरितं स्मरन्ति	२३ (१०) ।८८

	=श्रद्धया कुरुक्षेत्रे निवसतां मानवानां ब्रह्मसदनप्राप्तिर्भवति	२३ (२०)।१९
	=इमे प्राच्यां सरस्वत्यां श्राद्धं कृत्वा दुर्लभं वस्तु लभन्ते	२३ (२१)।२२
	=एते निराहाराः शिवं (स्थाणुलिङ्गं) संपूज्य परमं पदं यान्ति	२३ (२५)।५५
मानसः	=ब्रह्मचारी गुरोः समीपेऽध्ययनकर्मणि तत्परः सन्नन्यमानसो न स्यात्	१४।६
	=तीर्थम्, इदं गणान् कार्त्तिकेयाय ददौ	३१।९०
	=ह्रदः, अयं शालिकां मातरं कार्त्तिकेयाय ददौ	३१।९५
मानसह्रदा	=नदी (सरस्वती)	२३ (१६)।१८
मानसाः	=देवविशेषाः, इमे यथा ब्रह्माणं पृच्छन्ति तथैवेन्द्रादयो देवाः कश्यपं पृष्टवन्तः	२३ (३)।१३
मानुषत्वम्	=इदं मानुषसरोऽवगाह्य कृष्णमृगा उपागताः	२३ (१४)।५१
मानुषम्	=कुरुक्षेत्रस्थं लोकविश्रुतं तीर्थम्, अस्य दर्शनात् किल्बिषैर्मुक्तो भवति	२३ (१४)।५०
	=तीर्थं कुरुक्षेत्रस्थम्, अस्य माहात्म्यं श्रद्धया शृण्वन्नपि परां गतिं याति	२३ (१४)।५६
	=तीर्थं कुरुक्षेत्रस्थितम्, अस्य पूर्वेण (अस्मात् पूर्वतः) क्रोशमात्रे 'आपगा' नाम नदी विख्याताऽस्ति	२३ (१५)।१
मानुषाः	=इमे स्थाणुलिङ्गस्य दर्शनात् स्वर्गं प्राप्नुवन्ति	२३ (२४)।७
	=एतेभ्यो देवानां भयं बभूव	२३ (२४)।९
माया	=कात्यायन्या नाम, अनेन नाम्ना सा देवैः स्तुता	१९।२०
	=वेदानां माया विद्या, तया च प्रजापतयो ब्रह्माणमुपासते	२३ (३)।२६
	=अस्या जालेन विश्वं समुन्नद्धं वर्तते	२३ (६)।३१
	=अनया निजयैव परिच्छिन्नो वामनः = विष्णुः	२३ (९)।२६
	=मायारूपिणा पटेन संवीतोऽस्ति भगवान् वामनः	२३ (९)।२९

	=अनया (वामनरूपिणो विष्णोः) जगत् संपीडितं बभूव	२३ (१०) ।८
	=अनया विष्णुर्वामनरूपं धृतवान्	२३ (१०) ।३३
	=देवी, इयं कुरुक्षेत्रस्थिते कलसी(शी) तीर्थे स्थिता	२३ (१५) ।१८
मायाजालम्	=अनेन चराचरात्मकं विश्वं समुन्नद्धं वर्तते	२३ (६) ।३१
मायापटसंवीतः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२९
मायावामनः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२५
मारणम्	=इदं गृहस्थेन कस्यचित् पशोर्वृथा न कर्त्तव्यम्	१४ ।४१
मारी	=देवी चण्डमारी, अस्या भयाद् गरुडो मांसपिण्डोपमो बभूव	२९ ।७५
	=देवी, अनया सह चण्डिका कौशिक्याः सकाशं जगाम। छन्दोभङ्गभिया 'मार्या'	२९ ।८२
	=देवी चण्डमारी, अनया निपात्यमाना दनुपुङ्गवाः शुम्भमुपाश्रयन्त	२९ ।८८
	=देवी चण्डमारी, इयं त्रिशूलेन दैत्यान् जघान	३० ।२०
	=देव्या नाम	३० ।६२
मारीचः	=कश्यपो मरीचेः पुत्रः, देवा अस्य समीपं गत्वैनमपश्यन्	२३ (३) ।७
मारुतः	=अयं देवासुरसंग्रामेऽन्धकासुरस्य शरैस्ताडितस्ततः पराङ्मुखोऽभूत्	१० ।५४
	=अनेन रथ्याकर्दमादयः शुध्यन्ति	१५ ।१६
	=श्वासमारुतेन दूषितमन्नं रक्षसां भागो भवति	२३ (१९) ।३८
	=अस्य गदा शुम्भनिशुम्भाभ्यां बलादाहृता	२९ ।१४
मारुतम्	=मरुतां तेजः, अनेन कात्यायन्याः श्रवणौ संजातौ	१९ ।१२
मारुताः	=इमे रक्तबीजाख्येन दैत्येन विजिताः	१८ ।७०
मार्कण्डेयः	=महामुनिः, अयं प्लक्षवृक्षस्थां सरस्वतीं ददर्श	२३ (११) ।५
	=महात्मा, अस्य सरस्वत्या सह संवादः	२३ (११) ।२३; २४; २३ (१२) ।१
	=महामुनिः	२३ (११) ।२३
	=विप्रः	२३ (११) ।२३

=अयं कुरुक्षेत्रस्थसरोमध्ये सरस्वतीमानीतवान् २३ (१६) ।३९
=मुनिः, अयं सनत्कुमारं प्रति सरोमाहात्म्यं पप्रच्छ २३ (२२) ।५
=अस्य सनत्कुमारेण सह संवादः २३ (२२) ।६; १४; २३ (२६) ।१; २३ (२८) ।१

मार्गः =देवादीनां मार्गे पुरीषाद्युत्सर्गो नैव करणीयः १४ ।३०
=उत्तमं मार्गं दर्शयन् नीलोत्पलमये तल्पे ब्रह्मा प्रतिपदि स्वपिति १७ ।१३
=विन्ध्याख्यो गिरिवरो मे मार्गं रुणद्धीति सूर्योऽगस्त्यं प्रति प्राह १९ ।२६
=येन मार्गेणेहागतास्तेनैव मार्गेण निवर्तध्वमिति विष्णुर्देवान् प्राह २३ (६) ।१९
=बलेरध्वरस्य मार्गः, एनं वामनाय बृहस्पतिरदर्शयत् २३ (९) ।४२
=पौण्डरीकतीर्थे चैत्रशुक्लदशम्यां कृतं स्नानादिकं मुक्तिमार्गप्रदायकं भवति २३ (१५) ।४
=विप्राणां हिताय सरस्वती नदी पश्चिमं मार्गं प्रयाता २३ (२१) ।६
=लोकेषु धर्मस्य मार्गः प्रवर्तितः २३ (२२) ।८२

मार्गणः =दक्षयज्ञे द्वारपालस्य धर्मस्याऽऽयुधम् ४ ।२६
=कामदेवस्य बाणेन संवरणो नाम राजा पीडितो बभूव २२ ।३४
=कामस्य मार्गणैः (बाणैः) संवरणस्तपती च मोहं जग्मतुः २२ ।३५

मार्गणाः =कामदेवस्य मार्गणाः = बाणा आम्रादयो वृक्षाः संजाताः ६ ।१०४
=आयुधानि, देवासुरसंग्रामे विरोचनेनैते वरुणोपरि प्रक्षिप्ताः १० ।२६

मार्गनामानि =देवमार्गः, गोमार्गः, ब्राह्मणमार्गः, वह्निमार्गः, राजमार्गश्च १४ ।३०

मार्गशिरः	= मासः, अस्मिन् रुद्रस्यार्चा कार्या	१७ ।३८
मार्जनम्	= अनेन भूमिर्विशुध्यते	१५ ।११
मार्जारः	= अस्यान्नं भोज्यं न भवति	१५ ।२५
	= यो दम्भार्थं यजनादिकं करोति स मार्जारसंज्ञको भवति	१५ ।२९
	= गणः, अयं कौशिकीति नद्या कार्त्तिकेयाय प्रदत्तः	३१ ।७७
मालवटः	= यक्षः, इमं प्रति रम्भकरम्भौ दैत्यं। पुत्रार्थं तपस्तपन्तौ दत्तचित्तौ बभूवतुः	१८ ।४४
	= यक्षः, इमं द्रष्टुं रम्भासुरो जगाम	१८ ।५३
	= यक्षः, अत्र स्वबन्धुभिः परित्यक्तो रम्भासुरो जगाम	१८ ।५८
मालवीयाः	= उत्तरापथवासिनो जनाः, इमे क्षुद्रनदीजलानि पिबन्ति	१३ ।४३
माला	= अक्षमाला	१९ ।१५
	= इमां समुद्रः कात्यायन्यै ददौ	१९ ।१६
	= नक्षत्राणाम्, इयं यथा गगने विभाति तथैव कात्यायन्याः पादयोस्तदीयनखरत्नमाला विभाति	२० ।१
	= इमां पुष्करमयीं विष्णुर्बिभर्त्ति	२३ (६) ।१७
	= इमां विष्णुः कार्त्तिकेयाय ददौ	३१ ।१०३
मालाः	= प्राग्देशीयो जनपदः	१३ ।४६
मालिनी	= अनया विवाहावसरे शिवस्य चरणो गृहीतः	२७ ।५१
	= अस्याः कालीविवाहकाले शिवेन सह संवादः	२७ ।५२
	= शिवविवाहकालेऽस्याः शिवेन सह संवादः	२७ ।५३
	= एनामाहूय गौरी स्नातुं मतिं चक्रे	२८ ।५६
	= एषा सुरभि-उद्वर्तनमादांय गौर्या अङ्गमुद्वर्तयते	२८ ।५७
	= अस्यां गतायां शैलेयी (शिवपत्नी) मलाद् गजाननं चक्रे	२८ ।५८
	= अस्या उमया सह संवादः	२८ ।६०
माली	= शिवस्य नाम	२३ (२६) ।१२७

माल्यम् =इदमन्यैर्धृतं न धारयेत् १४।५२
=अरुणासङ्गमे स्नात्वा राक्षसा दिव्यमाल्यधरा बभूवुः २३ (१९)।४३
माषधानाः =इमे श्रावणमासे हरस्यार्चने नैवेद्यरूपेण देयाः १७।६१
मासः =शूद्रैर्मृतकक्रिया मासपर्यन्तं कार्याः १५।४७
=नभस्यः १७।३०
=आश्वयुजः १७।३४; १८।१
=मार्गशिरः १७।३८
=पौषः १७।४०
=माघः १७।४२
द्र. माघः
=उमापतेरर्चने षड्भिर्मासैः पारणं कर्त्तव्यम् १७।४४
=फाल्गुनः १७।४६
=चैत्रः १७।४९; २३ (१५)।१७; २३ (२०)।८; २३ (२४)।३०; २३ (२५)।५३
=ज्येष्ठः १७।५५
=आषाढः १७।५८; २३ (२५)।१६; २१; २४।८
=श्रावणः १७।६०
=दशमे मासे भगवान् गोविन्दो वामनाकृतिः सन्नदित्या उदरादजायत २३ (९)।१३
=ज्येष्ठमासः, अस्य शुक्लपक्षे द्वादश्यां वामनं दृष्ट्वा स्नानं दानं च विधाय परमं पदमवाप्नोति २३ (१०)।८४
=नभस्यः (भाद्रपदः) २३ (१५)।६
=चैत्रः, अस्य शुक्लपक्षे दशम्यां तिथौ पौण्डरीकतीर्थे स्नानादिकं मुक्तिमार्गप्रदायकमुक्तम् २३ (१५)।४०
=चैत्रः, अस्य शुक्लपक्षे चतुर्दश्यां कुरुक्षेत्रस्थेऽलेपकतीर्थे स्नानेन पापलेपो विनश्यति २३ (१५)।४४
=ज्येष्ठः, अस्य सिते पक्षे द्वादश्यां ज्येष्ठाश्रमाख्यतीर्थे स्नात्वा नरो ज्येष्ठत्वं लभते २३ (१५)।६८

	=चैत्रः, अस्य षष्ठ्यां तिथावोजस्तीर्थे स्नानेन स्नानकर्तुः पितॄणामुदकमक्षय्यमुपजायते	२३ (२०)।११
	=वैशाखः	२३ (२०)।२६
	=अयं शिवरूप उक्तः	२३ (२६)।१११
मासाः	=षड्भिरपरैर्मासै रुद्रार्चनस्य पारणं कर्त्तव्यम्	१७।६३
	=इमे ब्रह्मसभायां ब्रह्माणमुपासते	२३ (३)।३३
मासार्द्धम्	=वैश्यैर्मृतकक्रिया मासार्द्धपर्यन्तं कार्याः	१५।४७
	=इदं शिवरूपमुक्तम्	२३ (२६)।१११
माहात्म्यम्	=तीर्थानां माहात्म्यविषयकः प्रश्नो द्विजैर्लोमहर्षणं प्रति कृतः	२३ (१)।२
	=वामनस्य माहात्म्यादिविषयक ऋषिकृतः प्रश्नो लोमहर्षणं प्रति	२३ (२)।१
	=वामनस्य माहात्म्यम्	२३ (१०)।८७
	=वामनस्येदं शृण्वन् नरः पापैः प्रमुच्यते	२३ (१०)।९१
	=मानुषाख्यसरसो माहात्म्यात् कृष्णमृगा मानुषत्वमुपागताः	२३ (१४)।५४
	=कुरुक्षेत्रस्थमानुषाख्यसरसः	२३ (१४)।५६
	=औशनसतीर्थस्य कुरुक्षेत्रस्थस्य, अस्माद् रहोदराख्यो मुनिर्मुक्तो बभूव	२३ (१८)।३
	=औशनसाख्यतीर्थस्य कुरुक्षेत्रस्थस्य	२३ (१८)।४
	=औशनसतीर्थस्येदम्	२३ (१८)।१३
	=कुरुक्षेत्रस्थस्थाणुतीर्थादीनां माहात्म्यादिविषयकः प्रश्नो महर्षिभिर्लोमहर्षणं प्रति कृतः	२३ (२२)।१
	=मुनिर्मार्कण्डेयः सनत्कुमारं सरोमाहात्म्यं पप्रच्छ	२३ (२२)।५
	=सरसो माहात्म्यं मुनिर्मार्कण्डेयः सनत्कुमारं पप्रच्छ	२३ (२२)।६
	=स्थाणुतीर्थस्य माहात्म्यं मुनिर्मार्कण्डेयः सनत्कुमारं पप्रच्छ	२३ (२२)।११
	=सूर्यतीर्थस्य माहात्म्यं मुनिर्मार्कण्डेयः सनत्कुमारं पप्रच्छ	२३ (२२)।११

=सोमतीर्थस्य माहात्म्यं मुनिर्मार्कण्डेयः सनत्कुमारं पप्रच्छ २३ (२२)।१

=ब्रह्मणो माहात्म्यं मुनिर्मार्कण्डेयः सनत्कुमारं पप्रच्छ २३ (२२)।१३

=मोहमाहात्म्यस्य सूचको वर्णाश्रमविभाग उक्तः २३ (२२)।८३

=स्थाणुतीर्थस्य माहात्म्यात् कुष्ठादिरोगग्रस्तो वेनो दिव्यदेहमवाप २३ (२६)।६२

=शङ्करस्य माहात्म्यं वेदितुं ब्रह्मादयो न शक्ताः २३ (२६)।१४६

=कुरुक्षेत्र - स्थाणुसरसोर्माहात्म्यं श्रुत्वा सर्वपापैः प्रमुच्यते २३ (२७)।२३

=स्थाणुतीर्थस्य माहात्म्यं सनत्कुमारेण मार्कण्डेयं प्रति कीर्तितम् २३ (२८)।४९

माहिषकम् =गणः, इमं मानसतीर्थं कार्त्तिकेयाय ददौ ३१।९०

माहिषिकाः =अयं दाक्षिणात्यो जनपदः १३।४७

माहेन्द्री =देवी, इयं चण्डिकायाः स्तनमण्डलात् समुद्भूता ३०।८

माहेयाः =इमे कुमारद्वीपस्य पश्चिमदिशि स्थिता जानपदा जनाः १३।५१

माहेश्वरम् =अस्त्रम्, इदं नरेण प्रह्लादोपरि प्रक्षिप्तम् ७।६२

=महेश्वरस्य वदनाद् विनिःसृतं तेजः, अस्मात् कात्यायन्या वक्त्रं बभूव १९।९

माहेश्वरी =इयं चण्डिकाया मुखतोऽभवत् ३०।४

=देवी, इयं शूलेन दैत्यानामुदरदेशान् विदारितवती ३०।२१

मित्रः =अयं कुरुक्षेत्रे लिङ्गमेकं स्थापितवान् २३ (२५)।४४

=अयं कार्त्तिकेयाय द्वौ प्रमथौ प्रादात् ३१।७२

मित्रजाया =इमां ये पादेन स्पृशन्ति ते रौरवनरके पतन्ति १२।१८

मित्रम् =अस्य जायां ये नराः पादेन स्पृशन्ति, ते रौरवनरके पतन्ति १२।१८

=चन्द्रस्य मित्रं कमलम् १६।१०

मित्रावरुणौ =अनयोरात्मजो वसिष्ठस्तपतीसुतस्य जातकर्मादिसंस्कारान् सम्पादयामास २३ ।२
=अनयोरात्मजो वसिष्ठः २३ ।२
=अनयोः पुत्रो वसिष्ठः २३ (१९) ।१२

मिथुनम् =राशिः, अस्य स्वरूपम्, संचरस्थानानि। द्वैधात्मकः शिवोऽयम् ५ ।४९-५०
=राशिः, अत्र प्रविष्टे सति सूर्ये शुक्लपक्षे विष्णुरेकादश्यां शयनं परिकल्पयेत् १७ ।६

मिश्रकम् =तीर्थं कुरुक्षेत्रस्थितम्, अत्र व्यासेन दधीच्यर्थं तीर्थानि मिश्रितानि २३ (१५) ।५२
=तीर्थं कुरुक्षेत्रस्थम्, अत्र स्नानेन सर्वतीर्थस्नानफलं लभ्यते २३ (१५) ।५३

मीनः =राशिः। द्वितीयं जीवसदनम्। कालरूपिणः शिवस्य चरणस्थानम् ५ ।४२
=राशिः, अस्य स्वरूपं संचरस्थानानि च ५ ।५९

मुकुन्दः =प्रमथगणः, इमं धाता कार्त्तिकेयाय प्रददौ ३१ ।६५

मुकुलानि =सर्वेषु मुकुलेषु (अर्धविकसितकलिकासु) अशोकमुकुलं श्रेष्ठम् १२ ।५१

मुक्ताः =इमा आश्विनशुक्लैकादश्यां विष्णवे निवेदनीयाः १८ ।१३

मुक्ताफलम् =अस्य शुद्धिर्जलेन भवति १५ ।४

मुक्तिः =एतदर्थं देवादयः पृथूदकसरः सेवन्ते २३ (१) ।१०
=इमां प्रार्थयमानैर्योगिभिर्विष्णुर्निर्देष्टुं न शक्यः २३ (९) ।२२
=तीर्थेषु स्नानं मुक्तिकरं प्रोक्तम् २३ (१२) ।४
=एतस्याश्चत्वारि साधनानि २३ (१२) ।८
=एनां लोकोद्धारतीर्थस्थितौ विष्णुशिवौ देवौ प्रसाद्य नरः प्राप्नुयात् २३ (१४) ।२२
=कपिलाह्रदस्थितं कापिलं वपुरास्थितं शिवं दृष्ट्वा मुक्तिर्लभ्यते २३ (१४) ।२६

=एनां ज्ञानयुतः स नरो लभते यः कुरुक्षेत्रस्थे सूर्यतीर्थे सूर्यं पश्यति	२३ (१४)।२८
=एषा कुरुक्षेत्रस्थे सङ्गिनीतीर्थे गमनेन प्राप्यते	२३ (१४)।३४
=एनां स लभते यो भाद्रमासे कृष्णपक्षस्य चतुर्दश्यां मध्याह्ने आपगानद्यां पिण्डान् ददाति	२३ (१५)।६
=कुरुक्षेत्रस्थस्य तावदिडास्पदतीर्थस्य दर्शनादेव मानवो मुक्तिमवाप्नोति	२३ (१५)।२५
=पौण्डरीकतीर्थे चैत्रशुक्लदशम्यां कृतं स्नानादिकं मुक्तिमार्गप्रदायकं भवति	२३ (१५)।४०
=यः किंदत्तकूपस्थले प्रस्थपरिमितांस्तिलान् प्रयच्छति स ऋणैर्मुक्तिमवाप्नुयात्	२३ (१५)।६०
=एनां स नरः संप्रयाति यः कुरुक्षेत्रस्थं ज्येष्ठाश्रमाख्यतीर्थं पश्यति	२३ (१५)।६७
=एनां सोऽवाप्नोति यो दूरस्थोऽपि कुरुक्षेत्रं सवामनं स्मरति	२३ (१५)।७८
=एनामिच्छन् ब्रह्मयोनितीर्थे स्नात्वा पुनर्योनिं न पश्यति जनः	२३ (१८)।२५
=एषाऽरुणासंगमे स्नानेन लभ्यते	२३ (१९)।४२
=एषां मङ्गलवासरे षष्ठ्यां तिथौ विधानपूर्वकमनरकतीर्थे स्नानाचरणेन प्राप्यते	२३ (२०)।३१
=कुरुक्षेत्रस्थे काम्यकवने पूषाख्यसूर्यस्य दर्शनान्मुक्तिर्लभ्यते	२३ (२०)।३४
=कुरुक्षेत्रस्थसरस्वतीकूपस्य दर्शनादेव मुक्तिर्लभ्यते	२३ (२१)।१७
=वामनपुराणस्य श्रवणेन मुक्तिर्लभ्यते	२३ (२२)।३
=इयं केषां तीर्थानां दर्शनिन प्राप्यत इति मुनिर्मार्कण्डेयः सनत्कुमारं पप्रच्छ	२३ (२२)।८
=एतस्याः प्रदायकं तीर्थमस्ति कुरुक्षेत्रे स्थितं सांनिहितं सरः	२३ (२४)।२
=स्थाणुलिङ्गस्य दर्शनान्मुक्तिर्लभ्यते	२३ (२४)।२५
=प्रत्यक् सरस्वत्यां स्नानेन मुक्तिरवाप्यते	२३ (२६)।४७

मुक्तिफलम्	=इदं विधानपूर्वकं मङ्गलवासरे षष्ठ्यां तिथावनरकतीर्थे स्नानाचरणेन प्राप्यते	२३ (२०) ।३१
मुखम्	=रुद्रस्य पञ्चमं मुखम्	२ ।३२
	=उदीच्यां प्राच्यां वा दिशि मुखं कृत्वा विद्वान् समाचमेत्	१४ ।३३
	=आदौ विद्वान् मुखमद्भिर्द्विः परिमृज्याफेनिलाभिरद्भिः समाचमेत्	१४ ।३३
	=दक्षिणस्यां दिशि मुखं कृत्वा भोजनं न विधेयम्	१४ ।५१
	=योषितो मुखं सदैव शुचि भवति	१५ ।८
	=इदं बालस्य शुचि भवति	१५ ।९
	=व्याघ्रमुखाकारा भूता देव्या हास्यात् समुद्भूताः	२१ ।१९
	=गोऽजाविकानां मुखमिव मुखधारिणो भूता देव्या हास्यात् समुद्भूताः	२१ ।२०
	=वामनस्य मुखे वैश्वानरः स्थितोऽभवत्	२३ (१०) ।५५
	=ब्रह्मणो मुखाद् ब्राह्मणा जाताः	२३ (१८) ।२३
	=विवाहकाले काली शिवस्य मुखं दृष्ट्वा शैत्यमुपागता	२७ ।४८
	=विवाहकाले काल्या मुखं वीक्ष्य ब्रह्मा क्षोभमगमत्	२७ ।५६-५७
	=चण्डिकाया मुखतो ब्रह्माणी समुदभवत्	३० ।३
मुखवादित्रशाली	=शिवस्य नाम	२३ (२६) ।८२
मुग्धा	=कात्यायनी, महिषासुरसन्देशवचने शब्दोऽयं कात्यायनीमुद्दिश्य प्रयुक्तः	२० ।२८
मुञ्जकेशः	=शिवस्य नाम	२३ (१६) ।१९
मुञ्जकेशी	=शङ्करस्य नाम	२३ (२३) ।३६ (१७)
मुण्डः	=दानवः, अयं विन्ध्यशृङ्गे वसन्तीं कात्यायनीमपश्यत्	२० ।१

=महिषासुरस्य दूतः, अयं कात्यायन्या विषये महिषासुरं निवेदयामास २० ।२
=असुरः, इमं महिषासुरः कात्यायन्याः प्राप्तिप्रयासप्रसङ्गे समादिदेश २० ।१९
=दैत्यः, अनेन सहिताः सर्वे दैत्या देव्या भयेन पातालं विविशुः २१ ।५०
=शिवस्य नाम २३ (२६) ।७४; ८१
=दैत्यः, अयं महिषासुरस्यामात्य आसीत् २९ ।१७
=अयं जलवासाद् विनिष्क्रान्तः २९ ।२३
=अयं शुम्भेन समादिष्टः २९ ।४९
=अयं स्वबलमार्तं दृष्ट्वा दुर्गां समाद्रवत २९ ।५४
=अयं देव्या भयात् प्रदुद्राव २९ ।६९
=इमं भयार्तमन्वसरद् देवी चण्डमारी २९ ।७६
=असुरः, एनं विशिरस्कं चकार कुपिता दुर्गा २९ ।८१
=एष युद्धाय रक्तबीजमादिदेश ३० ।१
मुद्गरः =आयुधम्, अमुं भ्रामयित्वा प्रह्लादो नरोपरि चिक्षेप ८ ।२०
मुद्गरवाः =जनपदाः, अन्तर्गिरिस्थाः बहिर्गिरिस्थाश्च १३ ।४४
मुद्गराः =आयुधानि, एषां प्रयोगं देवासुरसंग्रामे वरुणेन सह युद्धे विरोचनः कृतवान् १० ।२६
मुद्गाः =एभिः सहिता दक्षिणा पौषे मासि त्र्यम्बकस्यार्चायां देया १७ ।४१
मुद्रा =कात्यायन्या गभीरा नाभिः कन्दर्पेण स्वयं प्रदत्ता लावण्यगृहस्य मुद्रेव विभाति २० ।९
मुनयः =इमे देवासुरसंग्राममाकाशस्था भूत्वा पश्यन्ति स्म ९ ।५२
=एतेषां सुकेशिनामकेन राक्षसराजेन सह संवादः १५ ।६७
=एतैराद्यो धर्मः सुकेशिं प्रत्युक्तः १६ ।४
=एतैः संस्तुता कात्यायनी दुर्गा विन्ध्यपर्वतस्योर्ध्वशृङ्गे स्थिताऽभूत् १९ ।३६

=एते वामनं ज्ञातुमीशाना न सन्ति २३ (९)।२८

=एते बलेर्यज्ञे समुपस्थितं वामनं वीक्ष्य जपपरायणा बभूवुः २३ (१०)।३५

=एनान् प्रति तीर्थस्नानफलश्रवणाय लोमहर्षणः प्राह २३ (१३)।१०

=एतेषां लोमहर्षणेन सह संवादः २३ (१३)।१०; २३ (१५)।५३; २३ (१६)।२६; २३ (२१)।२

=एतैः स्तुतं ब्रह्मावर्ताख्यं कुरुक्षेत्रस्थतीर्थम् २३ (१४)।३९

=एते सरस्वतीं दृष्ट्वा प्रीता बभूवुः २३ (१६)।२२

=शौनकाद्याः, एषां नैमिषतीर्थे लोमहर्षणेन सह संवादोऽभूत् २३ (१६)।२४

=एतेषां श्रेष्ठो मङ्कणः, अनेन सह शङ्करस्य संवादः २३ (१७)।१५

=सरस्वत्या वचनेन तावदिमे प्रीता अभूवन् २३ (१९)।३०

=एतैः समं राक्षसानां संवादः २३ (१९)।३१

=एतेषां राक्षसैः सह संवादः २३ (१९)।३६

=एते कुरुक्षेत्रस्थयज्ञोपवीतिकतीर्थे प्रवेशं न लेभिरे २३ (२१)।४

=बालखिल्याः २३ (२२)।५४; ६७

=एतेषां ब्रह्मणा सह संवादः २३ (२३)।२२

=एते पांशुना निर्धूतपापा भूत्वा ब्रह्मणः पदं गताः २३ (२४)।१६

=एतैः स्थाणुप्रभृतीनि तीर्थानि प्रयत्नतः सेवितानि २३ (२५)।५

=एतैः कुरुक्षेत्रस्थितानि लिङ्गानि प्रयत्नेन सेवितानि २३ (२५)।४५

=एते शिवविवाहयात्रायां शिवं स्तुवन्तो जग्मुः २७।१६

=एतैः सहेन्द्रादयो देवाः कुरुक्षेत्रे कुमारस्याभिषेकाय यत्नं चक्रुः ३१।५४

मुनिः =नारायणः ७।१

=उर्वशीं दृष्ट्वा वसन्तो मुनिरिव ध्यानमास्थितस्तस्थौ ७।१६

=नरो नारायणश्च मुनी प्रह्लादेन दृष्टौ ७।४५
=अगस्त्यः, अयमात्मानं नीचतरं विधातुं विन्ध्याचलं प्राह १९।२९
=अगस्त्यः, अनेनोक्तो विन्ध्याचल आत्मानं नीचशृङ्गं चकार १९।३०
=अगस्त्यः, अयं पर्वकालेऽम्बरस्थमाश्रममावसत्, तदतिरिक्ते च काले दण्डकस्थो भूत्वा तपश्चचार १९।३४
=अनेन शब्देन पुलस्त्यो नारदं संबोधितवान् २२।२
=लोमहर्षणः २३ (१)।१
=लोमहर्षणः, कुरुजाङ्गले समासीनमेनं द्विजाः पृथूदकसरसः प्रभावं पप्रच्छुः २३ (१)।१
=वसिष्ठः २३ (१०)।३५; २३ (१९)।९; १७
=गर्गः २३ (१०)।३५
=विश्वामित्रः (गाधिजः) २३ (१०)।३५
=कश्यपः २३ (१०)।५५
=व्यासः २३ (१५)।५२
=उद्दालकः २३ (१६)।३२; ३३
=उद्दालकः, अस्य कारणात् सरस्वती तावदुत्तरकोशलाभागमागता २३ (१६)।३३
=मङ्कणः २३ (१६)।३६; २३ (१७)।२; ४; २३ (१७)।१२
=मङ्कणः, अस्य नर्तनविषये सुरादिभिर्महादेवो विज्ञप्तः २३ (१७)।१०
=मङ्कणः, इमं हर्षाविष्टमवलोक्य शङ्करस्तेन सहाभाषत २३ (१७)।१२
=मङ्कणः, अस्य शङ्करेण सह संवादः २३ (१७)।१४
=रहोदरः, अयमौशनसतीर्थस्य माहात्म्याद् मुक्तो बभूव २३ (१८)।३
=मुनिशार्दूलो वसिष्ठः २३ (१९)।६
=शुक्रः २३ (२१)।२६

	=मार्कण्डेयः	२३ (२२) ।५
	=भिक्षुरूपधरः शङ्करः, अस्य बालखिल्यपत्नीभिः सह संवादः	२३ (२२) ।६४
	=शङ्करः	२३ (२२) ।६४
	=पराशरः	२३ (२५) ।३७
	=वेदव्यासः	२३ (२५) ।३८
	=नारदः	२३ (२६) ।३२
मुनिगणः	=एभिः पूज्यमाना सरस्वती तावदुत्तरकोशलाभागमागता	२३ (१६) ।३३
मुनिपुङ्गवाः	=बालखिल्याः	२३ (२२) ।५२
मुनिवराः	=इमे बलेर्यज्ञे वामनं वीक्ष्य प्रह्वा बभूवुः	२३ (१०) ।३७
मुनिशार्दूलः	=शुक्रः, अस्य बलिना सह संवादः	२३ (१०) ।२६
मुनिसत्तमः	=मङ्कणः, अस्य शङ्करेण सह संवादः	२३ (१७) ।१२
मुनीन्द्रः	=अगस्त्यः, अनेन शब्देन सूर्यः संबोधितवान्	१९ ।२४
	=अगस्त्यः, अनेनान्तरिक्ष आश्रमः कृतः	१९ ।३२
मुमुक्षवः	=एभिर्विष्णुरनिर्देश्यः	२३ (९) ।२२
मुरः	=अयं दनुपत्न्यां समुद्भूतः कश्यपस्यौरसः पुत्रः	३४ ।३०
	=असुरः, अयं ब्रह्मणो वरं लेभे	३४ ।३४
	=अस्येन्द्रेण सह संवादः	३४ ।३८
	=दैत्यः, अस्य वसिष्ठेन सह संवादः	३४ ।४६
	=दैत्यः, अयं यमवाक्याद् विष्णुसमीपं गतः	३५ ।७२
	=असुरः, अयं विष्णुवचनेन स्वहृदयकम्पनं वीक्षितुं हृदये हस्तमारोपयत् तदा स निधनं गतः	३५ ।७५
	=अस्य हृत्कमलं विष्णुश्चक्रेण चिच्छेद	३५ ।७६
मुरारिः	=अस्य विषये नारदस्य प्रश्नः पुलस्त्यं प्रति	३४ ।२६
	=अस्य स्वरूपम्	३४ ।२७
	=एतन्नामकरणे हेतुदर्शनम्	३५ ।७७
मुरारिसदनम्	=अत्रेन्द्रादयो देवा आजग्मुः	३४ ।२५
मुरुः	=अस्य यमेन सह संवादः	३४ ।५४

मुष्टिस्थानम्	=कामदेवस्य धनुषि निर्धारितं मुष्टिस्थानं पञ्चगुल्मा जाती समभवत्	६ ।१०१
मुसलः	=अयं वृत्रस्याऽऽयुधम्	९ ।३०
	=अनेन देवी कात्यायनी सुररिपून् अपातयत्	२१ ।८
मुहूर्तः	=मैत्रनामको मुहूर्त उत्तराफाल्गुनीयोगे प्रवर्तते	२६ ।६३
मुहूर्तम्	=ब्राह्मे मुहूर्ते पुरुषो विबुध्य मङ्गलं वाचयेत्	१४ ।२०
	=घटिकाद्वयात्मकः कालः, अस्मिन् देवाः कश्यपेन सह ब्रह्मलोकं प्राप्ताः	२३ (३) ।१८
	=कालः, मुहूर्तपर्यन्तमपि सर्वे देवशत्रवो ममाग्रे न स्थास्यन्तीति विष्णुर्देवान् प्राह	२३ (६) ।७
मूढाः	=पृष्ठमांसाशिनो मूढा भवन्ति, ते वृकभक्षनरके क्षिप्यन्ते	१२ ।३७
मूत्रम्	=अस्य जले समुत्सर्गेण नरकगमनं भवति	१२ ।३२
	=इदं गृहाद् बहिः प्रक्षेप्तव्यम्	१५ ।२१
मूर्तम्	=ईदृशं समस्तं वस्तु सरस्वत्याः स्वरैर्व्यञ्जनैश्च सम्बद्धम्	२३ (११) ।२२
मूर्तिः	=लक्ष्मीधरस्य मूर्तेर्दानं कर्तव्यं तुलास्थे सूर्ये द्वितीयायाम्	१७ ।२८
मूर्धा	=इमं करतले निधाय सूर्यः स्वाभीष्टमगस्त्यं प्रति प्राह	१९ ।२६
	=इममपि महिषासुरस्त्वदर्थे दद्याद् इति दूतो दुन्दुभिर्देवीमुक्तवान्	२० ।३२
	=अनेन संवरणो वसिष्ठमवलोक्य प्रणिपतितः	२२ ।५७
	=अनेन लोमहर्षणो ब्रह्मादीन् प्रणनाम	२३ (१) ।४
	=अयं मार्कण्डेयः सरस्वतीं तुष्टाव	२३ (११) ।५
मूलम्	=नक्षत्रम्। देवाचार्यगृहम्। अस्य धनूराशिः कालरूपिणः शिवस्योर्वोर्युगलम्	५ ।३९
	=सदाचारस्य मूलं धर्मः	१४ ।१९
	=नक्षत्रम्, अस्मिन् नक्षत्रे मांसं वर्जनीयम्	१४ ।५०
	=इदं जलेन शुध्यति	१५ ।४

	=विन्ध्यपर्वतस्य मूले महिषासुरादयो भेरीमाहत्य समागताः	२०।२०
	=हरपादमूले निषण्णा सती देवी कात्यायनी देवान् सान्त्वयामास	२१।५२
	=अन्यजन्माख्यतीर्थे स्थितस्याश्वत्थवृक्षस्य मूलम्, अत्र नारदः सदा वसति	२३ (१५)।३८
मूलानि	=एषु सर्वेषु कन्दः श्रेष्ठः	१२।५२
	=इमानि बहूनि समादाय बालखिल्यमुनीनां नार्यः शङ्करस्य समीपं गतवत्यः	२३ (२२)।५८
	=एतानि पार्वत्याः सख्यः समानिन्युः	२५।४२
मूषकाः	=उत्तरापथवासिनो जनाः, एते स्वेच्छया क्षुद्रनदीजलानि पिबन्ति	१३।३८
मूषिकाः	=एषां स्थलाद् शौचार्थं मृद् न ग्राह्या	१४।३२
मूषिकादाः	=अयं दाक्षिणात्यो जनपदः	१३।४७
मृकण्डः	=अनेन कुरुक्षेत्रे लिङ्गमेकं प्रतिष्ठितम्	२३ (२५)।३१
मृकण्डुजः	=मार्कण्डेयः, अयं स्वस्तिकरणार्थं प्रार्थितः	३२।१८
मृगः	='मृगशिरस्' इत्याख्यं नक्षत्रम्, अस्मिन् मांसं वर्जनीयम्	१४।५०
	=अस्य ग्रहणे श्वा शुचिर्मन्यते	१५।१५
मृगभोज्यम्	=अनेन श्रावणमासे स्नानं कर्तव्यम्	१७।६०
मृगमदः	=अनेन माघमास उमापतेरर्चनं कार्यम्	१७।४२
मृगया	=नैमिषारण्ये स्नानानन्तरं प्रह्लादो मृगयायां प्रवृत्तोऽभूत्	७।४२
	=अस्य व्याजेन संवरणो वैभ्राजनामके विजने वने जगाम	२२।३०
मृगराजः	=अस्य वधूमरण्ये मुदितः सन् क्रोष्टुकोऽनुधावति	२१।२९
मृगशिरः	=नक्षत्रम्, अनेन युता भाद्रपदकृष्णपक्षीयाऽष्टमी 'कालाष्टमी'-संज्ञां लभते	१७।३०
मृगशिरम्	=नक्षत्रम्, अस्मिन् प्रवेशकरणाय देवैर्बृहस्पतिः प्रार्थितः	२४।५

मृगशिराः =मृगशिरोनक्षत्रे यस्यां तिथौ चन्द्रः सूर्यो बृहस्पतिश्च वर्तन्ते साऽक्षया तिथिरुक्ता २४ ।२
=अस्मिन् नक्षत्र आषाढमासे चन्द्रक्षयतिथाविन्द्रः पितृषु पिण्डं प्रादात् २४ ।८

मृगाः =कृष्णमृगाः पुरा व्याधशरपीडिताः कुरुक्षेत्रस्थमानुषसरोऽवगाह्य मानुषत्वमुपागताः २३ (१४) ।५१
=एषां शरपीडितानां वने गमनविषये व्याधद्विजोत्तमसंवादः २३ (१४) ।५२
=पशवः, एषां मध्ये व्याघ्रः शिवरूपः २३ (२६) ।११२
=एते शिवरूपा उक्ताः २३ (२६) ।११७

मृगाक्षी =कात्यायनी, अस्या जघनस्य रमणीयत्वमुक्तम् २० ।१०

मृगाङ्कः =नारायणः, अयं प्रह्लादेन स्तुतः ९ ।५३

मृगाजिनम् =मृगचर्म, इदं चैत्रमासे नाट्येश्वरस्यार्चने देयम् १७ ।५०

मृगाधिपः =अयमयःशङ्कोर्वाहनम् ९ ।३०

मृगेन्द्रः =सिंहः, अयं सर्वेषु चतुष्पदेषु प्राणिषु श्रेष्ठः १२ ।५०
=सिंहः, एनं हिमालयः कात्यायन्यै ददौ १९ ।१६
=सिंहः, एनमारुह्य देवी कात्यायनी विन्ध्यपर्वतं जगाम १९ ।२१

मृडानी =देवी कात्यायनी, इयं महिषासुरोपरि शूलं व्यसृजत् २१ ।४३
=देवी कात्यायनी, अस्याः समक्षं महिषासुरो जगाम २१ ।४७
=देवी, एतस्या उद्भवं पुलस्त्यो नारदं प्राह २८ ।४७
=देव्याश्चण्डिकाया नाम ३० ।३२
=देवी चण्डिका, इमां युद्धार्थं निशुम्भः समुपाजगाम ३० ।३३
=देवी कौशिकी, अस्याः स्तुतिं देवाश्चक्रुः ३० ।५५
=देव्या नाम ३० ।६२

मृतः =इमं यो हरति = वहति तं स्पृष्ट्वा शुद्धये स्नानं विधेयम् १५ ।१९

	=कस्मिंश्चिन्मृते सति नित्यकर्मणो हानिः कर्त्तव्या	१५ ।४०
	=देशान्तरे मृते सति सद्य एव शौचं भवति	१५ ।४४
मृतहारी	=इमं स्पृष्ट्वा शौचार्थं स्नानमाचरणीयम्	१५ ।१९
मृत्युः	=अस्य भयमिलावृतादिवर्षेषु नास्ति	१३ ।७
	=ब्रह्मचारी ब्रह्मचर्याश्रमे वसन् मृत्युं जयति	१४ ।१०
	=परदारा मृत्यवे प्रभवन्ति	१४ ।४४
	=शिवस्य नाम	२३ (२६) ।१२६
	=देवी काली दानवान् बहून् मृत्यवे प्रेषयामास	२९ ।६१
मृत्युकर्ता	=शिवस्य नाम	२३ (२६) ।१२६
मृद्	=पुरीषाद्युत्सर्गानन्तरं मृदमुपाहरेत्	१४ ।३१
	=वल्मीकस्यैव मृच्छौचार्थं ग्राह्या	१४ ।३२
	=अस्याः प्रातःकाले समालम्भनं शुभावहं भवति	१४ ।३६
	=मृन्मयानि भाण्डानि पुनःपाकेन शुध्यन्ति	१५ ।७
	=अनया केशकीटावपन्नमन्नं शुध्यति	१५ ।१२
	=अनयाऽमेध्याक्तस्य वस्तुनः शुद्धिर्भवति	१५ ।१४
मेकलाः	=अयं विन्ध्यमूलस्थो जनपदः	१३ ।५३
मेखला	=अनयाऽलङ्कृतं कात्यायन्या जघनम्	२० ।१०
मेघः	=अयं वसुन्धरोपरि जलं वर्षति	२१ ।२४
मेघनादः	=गणः, इमं कुटिला कार्त्तिकेयाय ददौ	३१ ।८५
मेघसंघाः	=एते सर्वे शिवरूपाः कथ्यन्ते	२३ (२६) ।११०
मेघाः	=एषु सरस्वती पयः सृजति	२३ (१९) ।१४
मेघावर्तः	=शिवस्य नाम	२३ (२६) ।१०५
मेढ्रम्	=कालरूपिणः शिवस्य, वृश्चिकराशिः, भौमगृहम्	५ ।३८
मेदिनी	=पृथ्वी, इयं पर्वताब्धिद्वीपैराकीर्णा वामनस्य मृदुगत्या चचाल	२३ (९) ।४१
	=पृथिवी, एनां सर्वदेवमयवामनो महाकायं रूपं कृत्वा विचक्रमे	२३ (१०) ।६२
मेधा	=इयं वामनस्य कटिस्थानीयाऽऽसीत्	२३ (१०) ।५७

	=कुरुक्षेत्रस्थां लिङ्गरूपां सरस्वतीं प्रणम्य नरो मेधां विन्दति	२३ (२५) ।११
मेध्यता	=इयं मृन्मयानां भाण्डानां पुनः पाकेन भवति	१५ ।७
मेना	=अग्निष्वात्तानां पितॄणां मानसी कन्या	२२ ।१६
	=एषां पितॄणां कन्या देवैर्हिमवते दत्ता	२४ ।१०
	=इमां लब्ध्वा हिमवांस्तया सह यथेच्छं रेमे	२४ ।१०
	=अस्यास्तिस्त्रः कन्यका जाताः	२५ ।१
	=इयमुमां स्वसुतां तपसो वारयामास	२५ ।२२
	=हिमालयस्य पत्नी, इयं हिमाद्रेः पत्युराह्वानेन पुत्रेण सह सभामगच्छत्	२६ ।५०
	=हिमवतः पत्नी, इयमपि 'काली शिवाय दीयताम्' इति हिमवन्तमाह	२६ ।५७
मेनासुता	=तिसृषु रागिणी नाम कन्या ज्येष्ठाऽभवत्	२५ ।२
मेरुः	=पर्वतः, अस्य शिखरे स्थितं प्रतिष्ठानं नाम पुरं संवरणो नाम राजा जगाम	२२ ।३८
	=पर्वतः, अण्डस्योल्बमेव मेरुरभवत्	२३ (२२) ।३६
	=अस्याग्रभागेषु रौद्रव्रतमास्थाय शिवो विचचार	२५ ।३१
	=एनं हिमालयादेशेन पर्वतो गन्धमादन आजुहाव	२६ ।४४
	=अस्य हिमवता सह संवादः	२६ ।५५
मेरुप्रस्थः	=इन्द्रमातुर्निलयः, अत्र पुरन्दरो जगाम	२३ (३) ।२
मेरुशिखरम्	=अत्रान्धकासुरो जगाम	९ ।८
मेषः	=अत्र नक्षत्रकथनम्, कुजोऽस्य स्वामी, कालरूपिंणः शिवस्य शिरःप्रदेशः	५ ।३१
	=राशिः, अस्य सञ्चरस्थानानि, स्वरूपं च	५ ।४६-४७
	=अग्निवाहनम्, इममारुह्याग्निः शरवणमगात्	३१ ।२९
मैत्रः	=एतन्नामा मुहूर्त उत्तराफाल्गुनीयोगे प्रवर्तते	२६ ।६३
मैत्रम्	=अनुराधानक्षत्रम्, इदं वामनस्य स्वर्गद्वारस्थानीयमासीत्	२३ (१०) ।५४
मैथुनम्	=पर्वणि ये जना मैथुनं समाचरन्ति ते नरकगताः सन्तो वह्नितप्तां शाल्मलीमालिङ्गन्ति	१२ ।३०

	=ब्रह्मा स्वकन्यामेव मैथुनार्थमाजुहाव	२३ (२८) ।८५
मैनाकः	=कुमारद्वीपस्थपर्वतः	१३ ।१६
	=पर्वतः, अयं बहुधा ताड्यमानोऽपि न कम्पते	३२ ।६८
मोक्षः	=जम्बूद्वीपो मोक्षप्रदः	१३ ।२
	=अयं सदाचारस्य फलम्	१४ ।१९
	=अयं संवत्सरं यावत् कृतेन व्रतेनाक्षयो भवति द्र. व्रतम्	१८ ।२४
	=मोक्षदायिपदं सरस्वत्यां संयोगं लभते	२३ (११) ।६
	=अस्याऽऽकाङ्क्षिणः कुरुजाङ्गलस्य सेवनेन कलुषैर्विमुक्ता भवन्ति	२३ (१२) ।१३
	=कुरुक्षेत्रे हरिं बलदेवं चैकत्रावस्थितौ दृष्ट्वा मोक्षः संप्राप्यते	२३ (१३) ।१६
	=पुरुषार्थः, इमं ब्रह्मचर्यात् परं य इच्छन्ति तेऽपि कुलोत्तारणाख्यं तीर्थमासाद्य परमं पदं पश्यन्ति	२३ (१५) ।७५
	=इमं रहोदरः कथमवापेति लोमहर्षणं प्रति महर्षीणां प्रश्नः	२३ (१८) ।४
	=रक्षसां मोक्षार्थमृषयोऽरुणायाः सरस्वत्याश्च संगममकल्पयन्	२३ (१९) ।४०
	=अयं स्थाणुतीर्थस्थस्थाणोर्दर्शनादवाप्यते	२३ (२३) ।१६
	=स्थाणुदर्शनान्नरः परमं मोक्षं प्रयाति	२३ (२८) ।३४
मोदकाः	=एषां नैवेद्यं श्रावणमासे हरार्चने निवेदनीयम्	१७ ।६१
मोदकानि	=इमानि मधुयुतानि हिरण्याक्षाय निवेदनीयानि	१७ ।३४
	=एभिः सहितं घृतं चैत्रमासे नाट्येश्वरस्य प्रीणनार्थं देयम्	१७ ।५०
मोहः	=अपेतमोहो भूत्वा महिषासुरोक्तं वाक्यं वदेति देव्या दूतो निर्दिष्टः	२० ।२३
	=संवरणस्तपती च परस्परमन्योन्यं संवीक्ष्य मोहं जग्मतुः	२२ ।३५
	=अनेन बलेर्विज्ञानमपहतम्	२३ (९) ।३
	=अयं कोपेनोत्पद्यते	२३ (९) ।७

	=अनेनाऽऽकुलितं न भवति तेषां मनो ये बलेर्विष्णोश्च चरितं स्मरन्ति	२३ (१०) ।८९
	=वर्णाश्रमविभागो मोहमाहात्म्यसूचकः	२३ (२२) ।८३
	=अयं शिवरूप उक्तः	२३ (२६) ।११४
मौनम्	=अनेन देवा उग्रं तप आस्थिताः	२३ (४) ।२२
म्लेच्छाः	=एतदाख्या जनपदाः कुमारद्वीपस्थाः	१३ ।१९
	=एषां मध्ये वेनः समुत्पन्नोऽभूत्	२३ (२६) ।२९
	=एषां मध्ये स्वपितरं वेनं तत्पुत्रो ददर्श	२३ (२६) ।३५
	=एषां वेनपुत्रेण सह संवादः	२३ (२६) ।३६
	=एषां दयापरेण वेनपुत्रेंण सह संवादः	२३ (२६) ।३७

य

यक्षः	=धनदस्य पुत्रः पाञ्चालिकः, अनेन शिवस्याऽऽदेशः परिपालितः, शिवेनास्मै वरो वितीर्णः । द्र. पाञ्चालिकः	६ ।५०-५६
	=मालवटः	१८ ।४४; १८ ।५८
	=कोऽपि जिजीविषुर्यक्षो महिषासुरेण सह योद्धुं नापारयत्	२० ।२७
	=चन्द्रः	२३ ।३९
	=चन्द्रनामा, अमुं विष्णुः समन्तपञ्चकक्षेत्रस्य रक्षायै नियोजयामास	२३ ।३९
	=रन्तुकः	२३ (१३) ।११
	=कुरुक्षेत्रस्थमेनं पश्येत् प्रणमेच्चापि	२३ (१२) ।२०
	=रन्तुकः, अस्य प्रसादेन कामिकं फलं लभ्यते	२३ (१४) ।३८
	=शिवस्य नाम	२३ (२६) ।१२६
यक्षभयंकरः	=शिवस्य नाम	२३ (२६) ।१२६
यक्षमण्डलम्	=मालवटाख्ययक्षाधिपतिं परितः स्थितो यक्षसमूहः, अत्र महिषी रम्भासुरेण सार्धं गतवती	१८ ।५९
यक्षाः	=एषां वीरभद्रेण सह युद्धम्	४ ।३२-३७
	=इमे देवसेनाया मध्यभागेऽवस्थिता बभूवुः	९ ।१२

	=एषां वाहनानि नरा आसन्	९।२१
	=एते भास्करपतनं वेदयितुं ब्रह्मसदनं गतवन्तः	१६।५५
	=एते चतुर्दश्यां स्वपन्ति	१७।१०
	=एतैः परिवारितो मालवटाभिधानो यक्षो रम्भासुरेण दृष्टः	१८।५३
	=एतेषां पद्माख्यं निधिं रम्भासुरो ददर्श	१८।५४
	=एतेषां शरणं काचिन्महिषी गता	१८।६४
	=एतेऽग्निमध्यादुत्थितेन पुरुषेण विद्राविताः	१८।६८
	=एते वामनरूपधारिणा विष्णुना धार्यन्ते	२३ (१०)।७
	=एते वामनस्य सर्वदेवमये रूपे नखेषु स्थिता आसन्	२३ (१०)।५०
	=एते कुरुक्षेत्रं सेवन्ते	२३ (१२)।१७
	=एतैः कुरुक्षेत्रेऽसंख्यातानि लिङ्गानि प्रतिष्ठितानि	२३ (२५)।४९
	=एतैः सप्तर्षयः पूजिताः	२६।१७
	=असंख्याता एते शिवविवाहयात्रायां जग्मुः	२७।१९
	=एते विवाहकाले शिवं ववन्दिरे	२७।३३
	=एते पञ्चदश प्रमथगणान् गुहस्य = कार्त्तिकेयस्य दत्तवन्तः	३१।७४
	=एते स्वस्तिविधानार्थं प्रार्थिताः	३२।१९
यक्षाधिपः	=मणिभद्रः, अस्य कराग्रे वटवृक्षो जातः तस्मिंश्च तस्य सदा रतिर्वर्तते	१८।३
यक्षिणी	=कुरुक्षेत्रस्था काचिद् महाग्राही यक्षिणी, अस्याः प्रसादेन महापातकानि नश्यन्ति	२३ (१३)।३९-४०
	=अस्या भयवचनमाकर्ण्य पापदेशजा स्त्री प्रणिपतिता बभूव	२३ (१३)।४८
	=कृपयान्विताया अस्याः पापदेशजया कयाचित् स्त्रिया सह संवादः	२३ (१३)।४९
यक्षी	=अस्याः पापदेशजया कयाचित् स्त्रिया सह संवादः	२३ (१३)।४६
यक्षेन्द्रः	=कुरुक्षेत्रस्थः, अस्य स्तवनं कार्यं प्रसादश्च प्राप्तव्यः	२३ (१२)।२१

=द्वारपालो रन्तुकः कुरुक्षेत्रस्थितः, अस्य प्रार्थना करणीया २३ (१३) ।२६
=द्वारपालो रन्तुकः कुरुक्षेत्रस्थितः, एनं प्रसाद्य पञ्चनदं व्रजेत् २३ (१३) ।२६
=रन्तुको द्वारपालः कुरुक्षेत्रस्य, एतस्य तीर्थे सरस्वत्यां स्नानेन कामिकं फलं लभ्यते २३ (१४) ।३७
यक्षेश्वरप्रियः =शिवस्य नाम २३ (२६) ।६५
यजनम् =इदं मानवानां धर्मः ११ ।२३
=यो दम्भार्थं यजनकर्म करोति स मार्जारसंज्ञको भवति १५ ।२९
यजमानः =गयः २३ (१६) ।२९
यजुः =ब्रह्मा ऋक्सामाथर्वयजुर्भिर्वाङ्मयैर्बन्धनैः कुटिलां प्रबबन्ध २५ ।१५
यजुर्मयः =अनेन शिवो बोध्यते २३ (२६) ।१०९
यजूंषि =शतरुद्रियं शिवरूपमुक्तम् २३ (२६) ।१२१
यज्ञः =शङ्करभयाद् दक्षस्य यज्ञो दिव्यवपुर्मृगो बभूव, गगने चायं त्रिनेत्रेण विद्धः ५ ।२६-४३
=वाजिमखः १० ।३७
=यः सदाचारमुल्लङ्घ्य प्रवर्तते, तस्य यज्ञोऽपि भूतये न भवति १४ ।१६
=अस्य निन्दकैः सहाऽऽलापं स्पर्शं च कृत्वा सूर्यदर्शनेन गृहस्थः शुद्धो भवति १५ ।२४
=अयं समन्तपञ्चकक्षेत्रे कुरुणाकृष्टे भूभागेऽक्षयो भवति २३ ।३४
=विष्णुः, अयमदित्या नमस्कृतः २३ (६) ।२८
=बलेर्यज्ञः, अत्र भगवान् वामनोऽगच्छत् २३ (१०) ।५
=बलेर्यज्ञं वामनः (यज्ञपतिः) जगाम २३ (१०) ।१०
=अस्य भागं वेदप्रामाण्यतो देवा भुञ्जते २३ (१०) ।१२
=अनेनाऽऽराधितो हरिः प्रसादपरो भविष्यतीति बलिः शुक्रमाह २३ (१०) ।२७

=अनेनाऽऽराधितो हरिर्मत्प्रसादपरो भविष्यतीति बलिः शुक्रमाह	२३ (१०) ।३०
=बलेर्यज्ञः, अस्य वाटं मायावामनरूपधृग् विष्णुरूपस्थितो बभूव	२३ (१०) ।३४
=इमं वामनस्तुष्टाव	२३ (१०) ।३८
=अश्वमेधाख्यः, अस्य फलं कुरुक्षेत्रस्थदक्षेश्वर-शिवस्य दर्शनेन लभ्यते	२३ (१३) ।२१
=अग्निष्टोमाख्यः	२३ (१३) ।३०; २३ (१४) ।२७; २३ (१५) ।४६; २३ (१६) ।७; २३(२५) ।२९
=राजसूयः	२३ (१३) ।३४; २३ (२०) ।४
=राजसूयाख्यः, अस्य फलं कुरुक्षेत्रस्थे सोमतीर्थे स्नानेन लभ्यते	२३ (१३) ।३४
=पुण्डरीकः (पौण्डरीकः) अस्य फलमेक-हंसतीर्थे स्नानेन लभ्यते	२३ (१३) ।३८
=अश्वमेधः, अस्य फलं राजा विन्दति कुरु-क्षेत्रस्थे पुष्कराख्यतीर्थे पितृदेवताः समभ्यर्च्य	२३ (१३) ।४२
=अश्वमेधः	२३ (१४) ।४१; २३ (१५) ।६३
=सोमः, सप्तसोमयज्ञानां फलं ब्रह्मर्षिकुण्डेषु स्नानेन लभ्यते	२३ (१५) ।८
=अतिरात्रः	२३ (१५) ।४६
=अश्वमेधः, अस्य फलं लभते कृतजप्यतीर्थे महादेवस्यार्चनेन	२३ (१५) ।६३
=कन्यायज्ञः, अस्य फलं कुरुक्षेत्रस्थसीतातीर्थे स्नानेन लभ्यते	२३ (१६) ।१२
=अयं पुष्करेषु पितामहेन कृतः	२३ (१६) ।१९
=ऋषीणां यज्ञे सरस्वती प्लावनार्थं समागता	२३ (१६) ।२८
=गयस्य यज्ञः, अत्राहूता सरस्वती समागता, सा च 'विशाला' इति नाम्ना प्रार्थिताऽभूत्	२३ (१६) ।२९
=अश्वमेधः, अस्य फलं यायाततीर्थे स्नानेन लभ्यते	२३ (१८) ।३८
=कुरुक्षेत्रे शतक्रतोर्यज्ञस्य करणेन सुकृतलोका-वाप्तिर्भवति	२३ (२०) ।१६

	=अयं धर्मात् प्रतिष्ठितो भवति	२३ (२६) ।१३
	=अस्य व्युच्छित्तिकारको वेन आसीत्	२३ (२६) ।२५
	=शिवस्य नाम	२३ (२६) ।९५
	=निरर्गलं यज्ञं विधाय वेनपुत्रः पितृऋणैर्मुक्तो बभूव	२३ (२७) ।३२
	=देवपतिः, शिवो विश्वकर्मरचिते गृहे गार्हस्थ्यलक्षणं यज्ञं चक्रे	२८ ।४
	=बलेरिमं वामनो जगाम	२३ (१०) ।५
यज्ञकर्म	=अस्मिन्नधिकारस्थान् सदस्यान् वामनो बलियज्ञे तुष्टाव	२३ (१०) ।३८
	=अस्मिन् प्रवृत्ते सति धृतराष्ट्रस्य राष्ट्रमक्षीयत	२३ (१८) ।३१
	=वामनो बलियज्ञमभ्यागतः	२३ (१०) ।१०
यज्ञपुरुषः	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।२८
यज्ञफलम्	=सर्वेषां यज्ञानां फलं लभ्यते कुरुक्षेत्रस्थे किंरुपाख्यतीर्थे स्नात्वा	२३ (१५) ।२७
	=इदं चतुर्दश्यामष्टम्यां च स्थाणुप्रभृतितीर्थानां परिक्रमया प्राप्यते	२३ (२५) ।४
यज्ञबाहुः	=गणः, इमं विशाला नदी कार्त्तिकेयाय ददौ	३१ ।८३
यज्ञभागः	=अस्य भोजिनामसुराणां विनाशाय विष्णुः प्रतिज्ञातवान्	२३ (६) ।८
	='अयमसुरैर्हृतो मम पुत्र इन्द्रः प्राप्नोतु' इति वरं विष्णुमदितिर्ययाचे	२३ (७) ।८
	=इमं वेदप्रामाण्यतो देवा भुञ्जते	२३ (१०) ।१२
यज्ञवाटः	=बलेर्यज्ञवाटे स्थितं वामनं वीक्ष्य सदस्याः साधुशब्दमुदीरितवन्तः	२३ (१०) ।३९
यज्ञवाहः	=शिवस्य नाम	२३ (२६) ।९५
यज्ञविद्या	=अस्या वेत्तारो देवा ब्रह्मसभाया प्रोक्ता ऋचः श्रुतवन्तः	२३ (३) ।२२
यज्ञसंस्तवः	=अस्य वेतृभिरीरितं स्वरं देवा ब्रह्मसभायां श्रुतवन्तः	२३ (३) ।२३

यज्ञाः	=इमान् समन्तपञ्चकक्षेत्रे याजका यजिष्यन्तीति विष्णुना कुरुराजर्षये वरो वितीर्णः	२३ ।३८
	=एते वामनार्थं दमशौचगुणान्वितैः क्रियन्ते	२३ (१०) ।१९
	=अदक्षिणा (अपि) एते तुभ्यं फलं दास्यन्तीति वामनो बलिमाह	२३ (१०) ।७९
	=पञ्च, एते कोटितीर्थे स्नानेन कोटीश्वरस्य दर्शनेन च लभ्यन्ते	२३ (१३) ।२९
	=सर्वेषां यज्ञानां फलं लभ्यते कुरुक्षेत्रस्थे किंरूपाख्ये तीर्थे स्नात्वा	२३ (१५) ।२७
	=कुरुक्षेत्रस्थे कोटितीर्थे कोटीश्वरदर्शनेन कोटियज्ञानां फलमवाप्यते	२३ (१५) ।६४
	=कोटिसंख्याकाः, एषां फलं कोटितीर्थे स्नानेन लभ्यते	२३ (१५) ।७१
	=एषां फलप्राप्तिविषये शौनकादीनां लोमहर्षणं प्रति प्रश्नः	२३ (१६) ।२५
	=एषां फलं तत्र महद् भवति यत्र सरस्वती स्थिता	२३ (१६) ।२६
	=एतैर्विना देवा नो प्रीयन्ते	२३ (२६) ।१४
	=एतैः सचराचरं धार्यते	२३ (२६) ।१५
	=एतान् ब्राह्मणादिवर्णा यजन्त्विति सन्देशं शिवा शिवेन शुम्भनिशुम्भसमीपं संप्रेषितवती	३० ।१५
यज्ञेशः	=वामनः, अस्य याचनाविषये बलिशुक्रयोः संवादः	२३ (१०) ।१९
यज्ञोपवीतम्	=इदं बृहस्पतिर्वामनाय ददौ	२३ (९) ।३६
यज्ञोपवीतिकम्	=तीर्थं कुरुक्षेत्रस्थम्	२३ (२१) ।४
यज्वानः	=इमे रात्रावपि कर्माण्यकुर्वन्	१६ ।१८
यतिः	=अयं कुलोत्तारणाख्ये तीर्थे स्नात्वा तावदेकविंशतिकुलानि तारयति	२३ (१५) ।७६
यत्नः	=इलावृतादिवर्षवासिनां सिद्धिर्यत्नमन्तरैव भवति	१३ ।७
	=सदाचारे यत्नः कर्तव्यः	१४ ।१७
	=यत्नपूर्वकं माल्यान्नपानवसनान्यन्यैर्धृतानि बुधो न धारयेत्	१४ ।५२

=इमं स्वपुत्रस्य दारक्रियार्थं राजा संवरणोऽकरोत् २३ ।४
=ऋषयः सरस्वत्याः परित्राणार्थं परं यत्नं प्रचक्रिरे २३ (१९) ।२७
=एतेन विद्याकामैर्वेनकृतः शिवस्तवः श्रोतव्यः २३ (२७) ।१०
यदृच्छा =अनया वने विचरतो रहोदरस्य द्विजातेर्जङ्घायां छिन्नं रक्षश्शिरो लग्नम् २३ (१८) ।७
यन्त्रपीठम् =अस्मिंस्ते नरा नरकाऽऽगता यमकिङ्करैस्ताड्यमानाः पतन्ति, ये शरणागतं पुरुषं त्यजन्ति १२ ।२७
यन्त्रम् =अस्मान्मुक्त उपल इव सूर्यो गगनाद् निपतितः १६ ।४५
=अस्येव कामेन कात्यायन्या भुजाः कृताः २० ।६
यन्त्राणि =एषां धनुः शिवरूपमुक्तम् २३ (२६) ।११३
यमः =महिषाधिरूढस्यास्य प्रह्लादनाम्नाऽसुरेण सह युद्धम् ९ ।४६
=अनेन देवासुरसंग्रामे प्रह्लादोपरि दण्डो विनिपातितः, तेन सर्वे दैत्या भयविह्वलाः संजाताः १० ।१८
=भानुसुतः, देवासुरसंग्रामेऽन्धकासुरं दुःसहं दुर्धरं च मत्वाऽयमन्तर्धानमगात् १० ।२३
=अस्य किङ्करा अधमान् नरान् करपत्रेण द्विधा पाटयन्ति १२ ।६
=अस्य किङ्करा नरकपतितानां जनानां नेत्रगतं वह्निं धमन्ति १२ ।१७
=धर्मराजः १२ ।२२
=अस्य किङ्करैर्नरकेषु पतिताना पापिनां चर्म देहात् पृथक् क्रियते १२ ।२३-२४
=अस्य किङ्करैर्नरके पापिनो जना गिरिशृङ्गादधः पात्यन्ते १२ ।३४
=अस्य दक्षिणे पार्श्वे पलाशः संजातः १८ ।७
=अयं कात्यायन्यै दण्डं ददौ १९ ।१५

	=अस्य पौण्ड्रकनामधेयेन महिषेण राजर्षिकुरुः समन्तपञ्चकं क्षेत्रं कर्षितुमुद्यतोऽभूत्	२३ ।२३
	=अस्य दर्शनं स न करोति योऽन्यजन्माख्यतीर्थस्थितमश्वत्थवृक्षं वन्दते	२३ (१५) ।३८
	=शिव एव यम आख्यातः	२३ (२६) ।१२०
	=अस्य महिषं बलादाहृतवन्तौ शुम्भनिशुम्भौ	२९ ।१३
	=अयं षडनुचरान् कार्त्तिकेयाय ददौ	३१ ।७१
	=दण्डनायकः	३२ ।२३
	=अस्य मुरासुरवधविषये विष्णुना सह संवादः	३४ ।५०
	=अस्य मुरासुरेण सह संवादः	३४ ।५३
	=धर्मराट्	३४ ।५५
	=धर्मः	३४ ।६०
यमकिङ्कराः	=एतैरधमाः करपत्रेण द्विधा पाट्यन्ते	१२ ।६
	=एभिर्नरकस्थपुरुषाणां नेत्रगतो वह्निः प्रज्वाल्यते	१२ ।१७
यमनामानि	=वैवस्वतः	१० ।१४
	=भास्करिः	१० ।१६
	=धर्मराजः	१० ।१७
	=यमः	१० ।१८
यममहिषः	=पौण्ड्रः	२९ ।७२
यमुना	=इयं शुष्कजलाऽभवत्	३ ।७
	=नदी, इयं सरस्वत्याः पश्चिमे दिग्भागे संश्रिता	२३ (२१) ।८
	=इयं कच्छपे संस्थिता सती शिवविवाहयात्रायां बालव्यजनं हस्तेन प्रगृह्य ययौ	२७ ।११
	=कालिन्दी	३१ ।७५; ३४ ।४१
	=इयं सूर्यस्य पुत्री	३४ ।१७
यवनाः	=इमे कुमारद्वीपस्य पश्चिमभागे स्थिताः	१३ ।११
	=एत उत्तरापथवासिनो जनाः स्वेच्छया क्षुद्रनदीजलानि पिबन्ति	१३ ।३८
यवाः	=इमे घृतसहिता दक्षयज्ञस्य पूजने दक्षिणायां देयाः	१७ ।५९

	=आश्विनशुक्लैकादश्यामिमे विष्णवे निवेदनीयाः	१८।१३
यशः	=प्रह्लादस्य शापेनाहं यशसो भ्रंशं प्राप्स्यामीति बलेः स्वीकारोक्तिः	२३ (९)।१४
	=इदमश्विनोस्तीर्थे श्रद्धया कार्यविधानेन लभ्यते	२३ (१३)।३१
	=अनेन राजानं धृतराष्ट्रं पुनरुत्थापयामास दाल्भ्यो बकनामर्षिः	२३ (१८)।३५
	=इदं कुरुक्षेत्रस्थ ओजसतीर्थे स्नात्वा पुरुषो लभते	२३ (२०)।७
	=अस्य प्राप्तये वेनकृतः शिवस्तवः श्रोतव्यः	२३ (२७)।९
	=वेनकृतशिवस्तवश्रवणेन पुरुषो यशसा युक्तो भवति	२३ (२७)।१२
यशोदा	=अनया नन्दस्य गृहे संभूय भूयः सुरारिं वधिष्यामीति देवी देवानाह	३०।६८
याक्षम्	=यक्षाणां तेजः, अनेन कात्यायन्या नासा बभूव	१९।१२
याज्ञिकाः	=इमे नारायणं यजन्ति	८।५०
याज्यकर्म	=अस्मिन् निरतान् विप्रादीन् ये पापिनः क्लेशयन्ति, ते नरके शिलायां पेष्यन्ते	१२।२८
यात्रा	=कुरुक्षेत्रस्थानां तीर्थानाम्, इमां रन्तुकं[1] समभिवाद्यैव समाचरेत्	२३ (१३)।११
याथातथ्यम्	=इदमवेक्ष्य कीर्तिप्राप्त्यर्थं नृपतिश्रेष्ठः कुरुः सर्वस्मिन् महीतले विचचार	२३।११
यानम्	=दिव्यैर्यानैरिन्द्रादयो देवाः कश्यपेन सह ब्रह्मलोकं प्राप्ताः	२३ (३)।१८
याम्यम्	=यमस्य वदनाद् विनिःसृतं तेजः, अनेन कात्यायन्याः केशाः सजाताः	१९।९
याम्या	=दक्षिणा दिक्, अत्रागस्त्यो जगाम	१९।३२
यायातम्	=तीर्थं कुरुक्षेत्रस्थम्	२३ (१८)।३७
युक्तिः	=अनया विष्णुः 'सर्वेश्वरः' इति विज्ञायते	२३ (८)।२५
युगन्धरः	=देशः, अत्र दधि प्राश्य पापदेशजा काचित् स्त्री कुरुक्षेत्रे सपुत्रा वस्तुमियेष	२३ (१३)।४७

---

[1] 'रन्तुकं च नरो दृष्ट्वा' इत्यस्मिन् स्थाने 'रन्तुकं च सरो दृष्ट्वा' इति पाठः साधुः प्रतीयते।

युगम्	=देवयुगस्यादौ महिषासुरवधविषयिणी कथा संवृत्ता	२१ ।३
	=कलियुगम्	२३ (१९) ।४२
	=कृतयुगम्, अस्मिन् युगे कुरुक्षेत्रे सांनिहत्यं तीर्थं वर्तते	२३ (२४) ।२९
	=कृतयुगम्	२३ (२८) ।४१
	=त्रेतायुगम्	२३ (२८) ।४१
	=द्वापरयुगम्	२३ (२८) ।४१
	=कलियुगम्, अस्मिन् वसिष्ठाश्रममास्थितश्चतुर्मुखं महादेवं स्थापयित्वा ब्रह्मा सिद्धिं प्राप्तवान्	२३ (२८) ।४७
	=कृत-	२२ ।२६
	=कलि-	२३ (१) ।६
	=द्वापर-	२३ (१) ।६
	=कलियुगम्	२३ (२४) ।२९
	=कृतयुगम्	२३ (२४) ।२९
	=त्रेतायुगम्	२३ (२४) ।२९
	=द्वापरयुगम्	२३ (२४) ।२९
युगाः	=एषामवस्था तावदिलावृताद्यष्टसु वर्षेषु नास्ति	१३ ।७
	=एते शिवरूपा उक्ताः	२३ (२६) ।१११
युगावर्तः	=शिवस्य नाम	२३ (२६) ।१०५; १३५
युगावस्था	=इयं प्लक्षादिशाकान्तद्वीपेषु न प्रवर्तते	११ ।४४-४५
युग्मम्	=कात्यायन्या जानुयुग्मम् अर्धोन्नतं विभाति	२० ।१२
युञ्जानाः	=युञ्जानयोगयुक्ताः शङ्करं पश्यन्ति	२३ (२६) ।१४८
युद्धभेदाः	='लघु-चित्र-सुष्ठु' इति त्रितयाः	८ ।८
युद्धम्	=प्रह्लादेन समं नरस्य	७ ।५४-६३
	=इदं दिदृक्षवो देवा अम्बरे समुपस्थिताः, अस्य भेदाः	८ ।८
	=संकुलम्, देवसैन्यस्यासुरसैन्येन सह	९ ।३५
	=अस्मिन् घोररूपा रुधिरनदी प्रवृत्ता	९ ।३६-४०
	=द्वन्द्वम्, हयग्रीवप्रमुखाणां दैत्यानां हुताशप्रभृतिदेवैः सहाभूत्	९ ।४८

=देवासुरयोः, इदं वामनपुराणस्य नवमेऽध्याये वर्णितं तेन तदध्याय एवैतन्नाम्ना प्रथितः ९ ।५२
=अनेन क्षत्रिया व्यवहारं कृत्वा पावना भवन्ति १३ ।१२-१३
=एतस्मिन् महिषासुरोऽप्रतिम आसीत् २० ।२२
=एतस्मिन् महिषासुरेणामरा विजिताः २० ।३०
=एतस्मिन् दानवेनादित्याः पराजिताः २३ (३) ।३
=शारभरूपमास्थितस्य शिवस्य नरसिंहेन सह दिव्यवर्षसहस्रपर्यन्तं युद्धं बभूव २३ (१५) ।३१

यूथम् =दानवानाम्, तस्य पालको दुन्दुभिनामा मयासुरस्य पुत्र आसीत् २० ।२१

योगः =अस्य सिद्धिः सिद्धानां धर्मः ११ ।१७
=अस्य वेत्ता सूर्यः १६ ।३४
=अस्य कर्षणे राजा कुरुः समन्तपञ्चकक्षेत्रे प्रवृत्तोऽभूत् २३ ।२५
=योगयुक्तो नारायणः, अस्य प्रसादार्थं देवा उग्रं तपः समास्थिताः २३ (४) ।२१
=शास्त्रम्, अस्य सर्वा उक्तयो वामनस्य समीपमागताः २३ (९) ।३८
=ज्ञानयोगाद्युपक्रमैर्धीमान् मनः शोधयेत् २३ (२२) ।७९
=प्रियां कालीं स्वागतेनाभिसंपूज्य शिवो योगरतो बभूव २५ ।३६
=एनं विष्णुर्वक्ष्यतीति पार्वती कुमारं कार्त्तिकेयं प्राह ३२ ।९
=एनं द्वादशपत्रकं ब्रह्मा सनत्कुमारं प्रत्याह ३५ ।५३-७१

योगदृष्टिः =अनया दक्षकन्या सती दक्षकोपतः प्राणानुत्ससर्ज २६ ।१०

योगधरः =शङ्करस्य नाम २३ (२३) ।३६ (२२)

योगमूर्तिः =इमामाश्रित्य महादेवः कुरुक्षेत्रस्थे पञ्चवटतीर्थे तिष्ठति २३ (२०) ।१२

योगविज्ञानम् =अस्मिन् विषये ब्रह्मसनत्कुमारयोः संवादः ३४ ।७३

योगवित्	=सूर्यः	१६ ।३४
योगविशुद्धदेहा	=कात्यायनी देवी, इयं ब्रह्मविष्णुशङ्करादितेजसः संभूता	१९ ।८
	=कात्यायनी देवी, अनेन विशेषणेन सा स्तुता विष्णुप्रभृतिभिर्देववरैः	१९ ।१९
योगव्रतम्	=अस्य विसर्जने तस्य सर्वदेवाधिदेवस्य (विष्णोः) विश्वतेजो मोघं भवति	२३ (४) ।१२
योगशायी	=अयं प्रयागे नित्यं वसति, अस्य पादाभ्यां 'वरणा-असि' इति नद्योः प्रभावः	३ ।२६-२८
	=अस्य क्षेत्रम्	३ ।२९
योगशास्त्रम्	=अस्य विचारकाः सनत्कुमारादयोऽभूवन्	३४ ।६९
योगसिद्धिः	=इयं सिद्धानां धर्मः	११ ।१७
योगात्मा	=शङ्करस्य नाम	२३ (२६) ।१४८
योगाभ्यासः	=अस्मिन् या दृढा रतिः सा पितॄणां धर्मो भवति	११ ।२१
योगिचिन्त्यः	=विष्णुः, अनेन नाम्नाऽदितिर्विष्णुं नमश्चकार	२३ (६) ।२०
योगिनः	=इमे नारायणं चिन्तयन्ति	८ ।५०
	=एभिर्विष्णुरनिर्देश्यः	२३ (९) ।२२
	=एते वामनं ज्ञातुमीशाना न सन्ति	२३ (९) ।२८
	=एते सदैवाव्ययं परमात्मानं द्रष्टुमिच्छन्ति	२३ (१०) ।११
योगिनी	=देव्या नाम	३० ।६२
योगी	=अस्य रूपेण ब्रह्मा सृष्टिकामार्थं पृथूदकसरः सेवितवान्	२३ (१) ।११
	=विष्णुः, अनेन नाम्नाऽदितिर्विष्णुं नमश्चकार	२३ (६) ।२०
	=अर्थवत् सर्वं पदं सरस्वत्यां योगिवत् संस्थितमस्ति	२३ (११) ।७
योगीश्वरी	=देव्याः कौशिक्या नाम	३० ।४०
योगेश्वरः	=शिवस्य नाम	२३ (२८) ।१६
योजनम्	=समन्तपञ्चकनामकं तीर्थमासमन्तात् पञ्च पञ्च योजनानि विस्तृतमासीत्	२३ ।१६

योजनानि =पञ्चाशत्कोटियोजनानि प्रमाणं पृथिव्या आयतेः ११ ।३१

=लक्षयोजनानि प्रमाणं जम्बूद्वीपस्य ११ ।३४

=द्विसहस्रयोजनानि प्रमाणं रौरवनरकस्य ११ ।५१

=द्विसप्ततिसहस्रयोजनानि परिमाणमसिपत्रवनाभिधनरकस्य ११ ।५५

योधाः =इमान् रणे देवी काली स्वमुखे प्रक्षिप्य चर्वयते स्म २९ ।६०

योनयः =द्वादश । देव-दैत्य-सिद्ध-गन्धर्व-विद्याधर-किम्पुरुष-पितृ-ऋषि-मानव-गुह्यक-रक्षः-पिशाचा इति तासां नामानि ११ ।१५-२८

=सर्वासु योनिंषु सुरतं वर्ज्यम् १४ ।४०

योनिः =शुनाम् १२ ।२६

=तिर्यग्योनिः, अस्यां स्थितो विष्णुर्नरसिंहावतारे सिंहेषु रतिमवाप २३ (१५) ।२९

=मुक्तिकामः पुरुषो ब्रह्मयोनिसंज्ञके तीर्थे स्नात्वा पुनर्योनिं न पश्यति २३ (१८) ।२५

=राक्षसीनां योनिदोषेण राक्षससंततिर्वर्धते २३ (१९) ।३५

योषभैण्डी =इमां मातरं चरणपावनतीर्थं कार्त्तिकेयाय ददौ २१ ।९४

योषित् =सरस्वतीप्रभृतयः काश्चिन्नद्यः सागरस्य योषितः सन्ति १३ ।३३

=अनया सह पूर्णसंज्ञकासु तिथिषु समागमो वर्जनीयः १४ ।४८

=अनया सह समागमो बुधवासरे न कार्यः द्र. पूर्णा १४ ।४९

=अनया सह समागम उत्तरा-मघा-कृत्तिकाऽऽख्येषु नक्षत्रेषु न करणीयः १४ ।५०

=स्त्री, अस्या मुखं सदैव शुचि भवति १५ ।८

योषितः =आसां (राक्षसीनाम्) योनिदोषेण राक्षससंततिर्वर्धते २३ (१९) ।३५

=बालखिल्यमुनीनां पत्न्यः, एताः शङ्करस्य रूपेण मोहिता अभूवन् २३ (२२) ।५७

	=आसां क्षोभं बालखिल्यमुनयो ददृशुः	२३ (२२) ।६७
	=देवाः स्वासु योषित्सु पुत्रकान् नैव जनिष्यन्तीति शिवपत्नी गिरिजा देवाञ् शशाप	२८ ।५५
यौवनम्	=हिमालयपुरस्था कृशोदरी तावदीशानमन्यातिक्रान्तं श्रुत्वा स्तनभरालसा सती यौवनमनिन्दत	२७ ।२८
यौवराज्यम्	=एतदर्थं राजा संवरणः स्वपुत्रं विधानेनाभ्यषेचयत्	२३ ।७

र

रंहः	=वेगः, अनेन कश्यपादिदेवाः कश्यपाश्रमं प्रयाताः	२३ (६) ।११
रक्तबीजः	=दानवः, अयं कात्यायन्या नाशितः	१८ ।३८
	=असुरः, अयं कस्याऽऽत्मज इति प्रश्नो नारदस्य पुलस्त्यं प्रति	१८ ।४०
	=दैत्यः, अयं सर्वान् देवान् विजितवान्	१८ ।७०
	=दैत्यः, अयं राज्येऽभिषिक्तः	१८ ।७१
	=असुरः, अयं कात्यायन्याः प्राप्तिप्रयासप्रसङ्गे महिषासुरेण समादिष्टः	२० ।१९
	=महासुरः, अस्य शुम्भनिशुम्भाभ्यां सह संवादः	२९ ।१६
	=अनेन सह चण्डमुण्डयोः संवादः	२९ ।२४
	=महासुरः, अमुं युद्धाय चण्डमुण्डावादिदिशतुः	३० ।१
	=एनं शरणं जग्मुर्दानवा देव्या भीताः सन्तः	३० ।२४
	=दानवः, अयं वरास्त्रेण मातृमण्डलादिकं व्यद्रावयत्	३० ।२५
रक्तवसनम्	=इदं श्रावणमासे हरार्चने दक्षिणायां देयम्	१७ ।६२
रक्तशालिः	=इयं मार्गशिरे मासि दक्षिणारूपेण निवेद्या	१७ ।३९
रक्षांसि	=एषां क्षयकर्ता सूर्यः	१६ ।३६
	=एषां मोक्षार्थमृषयोऽरुणायाः सरस्वत्याश्च संगममकल्पयन्	२३ (१९) ।४०
	=असंख्यातान्येतानि शिवविवाहयात्रायां जग्मुः	२७ ।१९
	=कीटादिभिः संसृष्टमन्नं रक्षसां भागो भवति	२३ (१९) ।३८
रक्षा	=चन्द्रमा आत्मनो रक्षां कृतवान्	१६ ।२७

= दुर्गा-रक्षार्थं शिवो विष्णुपञ्जरमुक्तवान् २० ।४१

रक्षोग्रामणी = एभिः संयुक्ता भूत्वा त्वं वह शोणितमिति शापो विश्वामित्रेण सरस्वत्यै विसृष्टः २३ (१९) ।२०-२१

रघुवंशः = अस्मिन्नृतध्वजनामा राजा बभूव ३३ ।३

रजः = गुणः, अनेन ब्रह्मा मोहितो बभूव २३ (२२) ।१९
= गुणः, इदं सृष्टिगुण उच्यते २३ (२२) ।२०
= गुणः, अनेन मोहितस्य ब्रह्मणः सकाशाद् बालखिल्याः समुत्पन्ना बभूवुः २३ (२२) ।४१
= गुणः, इदं शिवरूपात्मकम् २३ (२६) ।१२२

रजतम् = इदं सनैवेद्यं स्थाणोरर्चने विप्राय देयम् १७ ।३७
= अनेनानुलिप्तं पानभाजनं गन्धर्वराजः कात्यायन्यै ददौ १९ ।१७

रजनी = इयं चन्द्रमसा स्वोदयेन कौमुदीयुता कृता कामिभिः प्रशंसिता १६ ।२०
= यदा दिवाकरः कर्कटराशिं प्रयाति तदाऽमराणां रजनी भवति १७ ।१२
= कुरुक्षेत्रस्थरन्तुकस्थाने रजन्यामेकस्यां वासः करणीयः २३ (१३) ।२४

रजनीचरः = अनेन शब्देन राक्षसराजस्य सुकेशेः सम्बोधनं कृतं महर्षिभिः १४ ।१

रजनीचराः = एभिस्त्रैलोक्यं ग्रस्तम् १६ ।३३

रजनीचरेशः = अनेन शब्देन सुकेशिः संबोधितो महर्षिभिः १४ ।५१
= अनेन शब्देन राक्षसाधिपतिः सुकेशिः संबोधितः १४ ।५४

रजस्वलत्वम् = इदं कुरुक्षेत्रस्थानामष्टनदीनां वैतरणीप्रभृतीनां कदाचिदपि न विद्यते २३ (१३) ।९

रजस्वलाः = आसु स्त्रीषु सुरतं वर्ज्यम् १४ ।४०

रणः = अयं बलिवृत्रासुरयोरन्येषां चाप्यसुराणां देवसैन्येन सह संवृत्तः ९ ।३१
= अस्य विशेषणानि - तुमुलः, संकुलः, अतिभयंकरश्चेति ९ ।३१-४०

	=रौद्रः	९।४१
	=श्मशानप्रतिमः	९।४३
	(युद्धं श्मशानप्रतिमम्)	
	=अस्मिन् कर्कशा महिषासुरादयो भेरीमाहत्य विन्ध्यपर्वतमूलमागताः	२०।२०
	=अस्मिन् कुलजाया विजेता भर्ता भविष्यतीति देव्याः कात्यायन्याः कुलस्य शुल्कम्	२०।३४
	=एनं केचिद् दैत्याः परित्यक्तवन्तः	२१।११
	=अस्मिन् नमरो नाम दानवः सिंहोपरि त्रिशूलं प्राहिणोत्	२१।१४
रणोत्कटः	=गणः, इमं नर्मदा नदी कार्त्तिकेयाय ददौ	३१।७५
रतः	=यो गुरुभक्तौ रतो न भवति सोऽपविद्धसंज्ञकः कीर्त्यते	१५।३४
रतिः	=नारायणोरूद्भवां सर्वाङ्गसुन्दरीं बालामेव कामदेवो रतिममन्यत	७।५
	=प्रह्लादस्य नारायणपादपङ्कजयोः	८।६३
	=इयं योगाभ्यासे पितृणां धर्मः कथिता	११।२१
	=एषा सत्क्रियासु परलोकप्रदायिका	१६।३
	=एषा वटवृक्षे यक्षाधिपस्य मणिभद्रस्य सदा वर्तते	१८।३
	=एषा धत्तूरविटपे महेश्वरस्य वर्तते	१८।४
	=एषा देवानां स्वस्मिन् स्वस्मिन् वृक्षे भवति	१८।१०
	=एनामवाप विष्णुर्नरसिंहावतारे तिर्यग्योनौ स्थितः सन् सिंहेषु	२३ (१५)।२९
रत्नम्	=अस्य शुद्धिर्जलेन भवति	१५।४
	=अनेन (एभिर्वा) जगद्गुरुः केशवः पूजनीयः	१८।१९
	=कात्यायन्या नखरूपरत्नानां माला गगने नक्षत्रमालेव विभाति	२०।१४
	=कात्यायनीरूपम्, इदं स्वर्गं परित्यज्य भूतले स्थितम्	२०।१६

रत्नानि =इमानि महीतलादौ वर्तमानानि सर्वाण्येव महिषासुरेणाधिगतानि २० ।२८
=एषां वामनाय दानार्थं बलिः प्रतिज्ञातवान् २३ (१०) ।४१
=एषामर्थिभ्यो दानाय वामनेन बलिर्विज्ञापितः २३ (१०) ।४४
=इमान्यादाय राजा धृतराष्ट्रो बकस्य समीप जगाम २३ (१८) ।३२
रथः =अयं चन्द्रमसो हंसवाहनयुतः ९ ।२०
=अयं वाहनमन्धकस्य, अस्याऽऽकृतिवर्ण-परिमाणानि ९ ।२६
=प्रह्लादस्य वाहनम् ९ ।२७
=अयं जम्भस्य वाहनम् ९ ।२८
=अयं मयस्य वाहनम् ९ ।२९
=भास्करस्य रथे यावन्तो भूतप्रेतादयः स्थितास्तावन्तो ब्रह्मसदनं गता भास्करपतनं वेदयितुम् १६ ।५६
=अस्मिन् सूर्यं शङ्कर आरोपयत् १६ ।५९
=अस्मिन् भास्करेण वरुणात्मज आवेशितः २२ ।४२
=भानो रथं नमुचिर्विष्णुभयात् प्रविवेश २९ ।४
=नमुचिरिन्द्राद् वरमवाप्य सूर्यरथं परित्यज्य पातालं जगाम २९ ।६
रथशाला =रथशालावासिनः प्राणिनो वेनेन नमस्कृताः २३ (२६) ।१५८
रथाः =इम आदित्यानां वाहनानि ९ ।२०
=एभिः सहितो नमरो नाम दानवो देव्या उपरि समापतत् २१ ।४
=इमान् युद्धे गिरिभेदी गणो नाशयामास ३२ ।६०
रथिनः =एषां वरश्चिक्षुरो नाम दैत्यः २१ ।२४
रथ्या =प्रतोलिका, अस्यां स्थितं यदविज्ञातं तच्छुचि भवति १५ ।८
=इयं मारुतेन शुध्यति १५ ।१६
=रथ्यावासिनः प्राणिनो वेनेन नमस्कृताः २३ (२६) ।१५८
रन्तुकः =अस्मादारभ्यौजसं यावद् ब्रह्मसरः संनिहितम् २३ (१) ।५

	=तीर्थविशेषः कुरुक्षेत्रस्थः, अत्र सरस्वती नदी प्रविष्टा	२३ (१२)।२
	=अनेन नाम्ना प्रसिद्धं कुरुक्षेत्रस्थं तीर्थम्, अत्र गत्वा क्षमाप्रार्थना कार्या	२३ (१२)।१९
	=कुरुक्षेत्रस्थो यक्षः	२३ (१३)।११
	=द्वारपालः, कुरुक्षेत्रस्थो यक्षः, इमं समभिवाद्यैव तीर्थयात्रां समाचरेत्	२३ (१३)।११; २३ (१४)।३७
	=द्वारपालः कुरुक्षेत्रस्थितः, अत्रैकस्मिन् दिवसे वासः करणीयः	२३ (१३)।२४
	=द्वारपालः कुरुक्षेत्रस्थः	२३ (१३)।२५
	=यक्षेन्द्रो द्वारपालश्च कुरुक्षेत्रस्थितः	२३ (१३)।२६
	=द्वारपालः कुरुक्षेत्रस्य, अस्य तीर्थे सरस्वतीस्थे स्नात्वा नरः कामिकं फलं लभते	२३ (१४)।३७
	=यक्षेन्द्रः	२३ (१४)।३७
	=अस्याऽऽश्रमः कुरुक्षेत्रे वर्तते	२३ (२१)।५
रन्तुका	=एतन्नाम्ना प्रसिद्धं स्थानम्, तरन्तुकारन्तुकयोरन्तरे समन्तपञ्चकं स्थितम्	२३ (१)।१४
रमिणः	=इमे पश्चिमदेशीयजनपदवासिनो जनाः	१३।५१
रम्भः	=असुरवरः, अनेन पुरुषार्थं तपस्तप्तम्	१८।४२-४३
	=दैत्यः, अयं करम्भाख्ये भ्रातरि निहते वह्नौ स्वशीर्षं होतुमिच्छन् वह्निना प्रतिषेधितः	१८।४६-४७
	=दैत्यः, अनेन त्रैलोक्यविजयी पुत्रो वह्निसकाशात् प्रार्थितः	१८।५०
	=दैत्यः, मृतः सन्नयं चितायामारोपितः	१८।६७
	=दैत्येश्वरः, अस्य पुत्रः (नन्दनः) महिष आसीत्	१८।६९
	=अस्याऽऽत्मजो महिषासुरः	२०।२२; २०।२३
	=अस्याऽऽत्मजो महिषासुरः, अनेनोक्तं वाक्यं दुन्दुभिर्देव्यै कथयामास	२०।२४
रम्भनन्दनः	=महिषासुरः	१८।६९

रम्भा =अप्सरसां श्रेष्ठा, नरनारायणयोः क्षोभणायेयमिन्द्रेण बदरिकाश्रमे प्रेषिता ६।६
=कन्दर्पवसन्ताभ्यां सहास्या बदरिकाश्रमे क्रीडा ६।७-२१
=इयं सर्वासु नारीषु श्रेष्ठा १२।५०
=अप्सराः, एतदाद्या अप्सरसो मङ्कणेन सहं स्नान्ति स्म २३ (१७)।३
=अप्सरसां वरा, इयं स्थाणुलिङ्गं पूजितवती २३ (२५)।३३
रम्भेश्वरम् =लिङ्गं कुरुक्षेत्रे प्रतिष्ठितम् २३ (२५)।३५
रम्यकः =वर्षः, अयं जम्बूद्वीपस्य पश्चिमोत्तरभागे स्थितः १३।५
=पर्वतः, अयं हिमाद्रिभवनमाजगाम २६।४६
रम्याः =जम्बूद्वीपस्था नव वर्षाः १३।६
रविः =अस्माज्जातः शनिः, तस्य वासरे मांसभक्षणं न कार्यम् १४।४९
=अयं शशिनिर्जेता, तेन नास्तमेति १६।१७
=दिनम्, अस्मिन् महाभागवता विष्णवादेः पूजां चक्रुः १६।१९
=सूर्यः, भवनेत्राग्नितापितस्यास्य तनौ प्रदह्यमानायां सत्यामयं वरुणायां न्यमज्जत् १६।५३
=अस्याम्बरे पुनरारोपणकारणाद् ब्रह्मा महेश्वरावासं जगाम १६।५७
=सूर्यः, अयं कर्कटराशिगतः सप्तम्यां स्वपिति १७।१५
=सूर्यः, अस्मादश्वत्थः संजातः १८।८
=सूर्यः, अस्य प्रभया सदृशेन खड्गेन करम्भासुरः स्वशीर्षं छेत्तुमियेष १८।४७
=सूर्यः, अयं विन्ध्यपर्वतेन निरुद्धां स्वां गतिं वीक्ष्य ततः समुद्धरणार्थमगस्त्यमुनिं बभाषे १९।२३
=सूर्यः, अस्य वचनमाकर्ण्य महर्षिरगस्त्यो विन्ध्यं नीचशृङ्गं विधातुं प्रतिज्ञातवान् १९।२७
=अस्य मण्डलं वरुणात्मजो विवेश २२।४१
=सूर्यः, अयं सरस्वत्याः प्राचीं दिशं निषेवते २३ (२१)।२१

	=सूर्यः, अस्य मृगशिरोनक्षत्रे प्रवेशसूचना देवैः प्रदत्ता बृहस्पतिं प्रति	२४ ।६
	=सूर्यः, अयं दण्डकपिङ्गलौ प्रमथौ कार्त्तिकेयाय प्रादात्	३१ ।६४
रविजः	=शनिः, तस्य वासरे मांसभक्षणं न कार्यम्	१४ ।४९
रश्मयः	=तीव्ररश्मिभिः सूर्यो जगत् संतापयति	१६ ।१५
	=चन्द्रार्कयोरश्मिषु वासिनः प्राणिनो वेनेन नमस्कृताः	२३ (२६) ।१५९
रसः	=गुणः, अस्याप्सु स्थितिः	१४ ।२६
	=अनेनान्वितैः फलैराश्विनशुक्लैकादश्यां विष्णुः पूजनीयः	१८ ।१२
	=अयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।२८
	=अस्य ग्राहिका रसना	२३ (८) ।२४
	=शाकस्य रसो मङ्कणस्य करेऽस्रवत्	२३ (१७) ।८
	=कराच्छाकरसं स्रुतमवलोक्य महता हर्षेण मुनिर्मङ्कणो ननर्त	२३ (१७) ।१३
रसना	=इयं रसं गृह्णति	२३ (८) ।२४
रसभेदाः	=स्वादु-कट्वम्ल-कषाय-तिक्त-लवणाख्याः	१८ ।१४
रसा	=नदी, इयं भारतवर्षस्थकुमारद्वीपे हिमवत्पादाद् विनिःसृता	१३ ।२१
	=आश्विनशुक्लैकादश्यामिमे विष्णवे समर्पणीयाः	१८ ।१४
रसाः	=सर्वेषु रसेषु लवणं मुख्यम्	१२ ।५३
रसातलम्	=अत्र शिवलिङ्गं विवेश	६ ।६७
	=लोकः, अत्र च्यवनो नागेन नीतः	७ ।२९
	=लोकः, अतश्चक्रतीर्थं निर्गतम्	७ ।३७
	=भुवनम्, अत्र वयं महिषासुरस्य त्रासेन न व्रजाम इत्येवं देवैर्विष्णुशङ्करौ प्रार्थितौ	१९ ।४
	=भुवनम्, अत्रत्यः कोऽप्यसुरो महिषासुरेण सह संग्रामं कर्तुं न शशाक	२० ।२७

=भुवनम्, अस्मान्निःसृत्य महानागः शेषो बलेरध्वरं प्रति गच्छतो वामनस्य साहाय्यं कल्पयामास २३ (९) ।४३

=रसातलगताः प्राणिनो वेनेन नमस्कृताः २३ (२६) ।१६०

='अत्र शुम्भनिशुम्भौ गच्छताम्' इति सन्देशं शिवा शिवेन संप्रेषितवती ३० ।१४

=भुवनम्, अत्र सूकराननो दैत्येन्द्रः पातालकेतुः संप्राप्तः ३२ ।३५

रसातलाः =सप्त, इमे सुप्रभातकरणार्थं प्राभातिकमङ्गले प्रार्थ्यन्ते १४ ।२५

रसावर्तः =तीर्थं कुरुक्षेत्रस्थम्, अत्र स्नानेनानुत्तमा गतिरवाप्यते २३ (१५) ।४३

रहस्यम् =इदं शङ्करव्रतस्य प्रकाशनीयं नास्ति २३ (२२) ।६२

रहोदरः =मुनिः, अयं कुरुक्षेत्रस्थस्य तावदौशनसतीर्थस्य माहात्म्याद् मुक्तो बभूव २३ (१८) ।३

=मुनिः, अस्य मुक्तिविषयकः प्रश्नो महर्षीणां लोमहर्षणं प्रति २३ (१८) ।४

=द्विजातिः, अस्य जङ्घायां छिन्नं रक्षःशिरो लग्नम् २३ (१८) ।७-८

=द्विजातिः २३ (१८) ।८

=महामुनिः २३ (१८) ।९

=महामुनिः, अयं कुरुक्षेत्रस्थमौशनसतीर्थं प्रति जगाम २३ (१८) ।११

राक्षसः =अयं परमो धर्मः सुकेशिं प्रति महर्षिभिरुक्तः ११ ।२६

=सुकेशिः, अस्य महर्षिभिः सह संवादः १५ ।५०

=सुकेशी १५ ।६७

=सुकेशिः, अस्य पुरं भानुना दृष्टम्, अम्बरतलात् तद् विनिपातितं च १६ ।३८-३९

=अस्य शिरो रामेण दण्डकारण्ये छिन्नम् २३ (१८) ।६

राक्षसनाम =क्षणदाचरः १२ ।५२

राक्षसपुरम्	=इदं सूर्येणाम्बरतलात् पातितमिति विज्ञाय शङ्करः क्रुद्धो बभूव	१६ ।४३
राक्षसराजः	=सुकेशिः	१३ ।५५
राक्षसाः	=प्रमुखेषु सर्वेषु राक्षसेषु सुकेशिः श्रेष्ठः	१२ ।४९
	=एतान् प्रति सुकेशेर्धर्मकथनम्	१६ ।१
	=एषां तेजसो ज्योतिरतिक्रमितुं सूर्यनक्षत्रचन्द्रमसो नाशक्नुवन्	१६ ।७
	=एते भास्करपतनं वेदयितुं ब्रह्मसदनं गतवन्तः	१६ ।५५
	=एतान् वामनाकृतिविष्णुस्थान् प्रह्लादो ध्यानेन ददर्श	२३ (८) ।११
	=एते वामनरूपधारिणा विष्णुना धार्यन्ते	२३ (१०) ।७
	=एते बहवो राघवेण पुरा दण्डकारण्ये हिंसिताः	२३ (१८) ।५
	=एते सरस्वत्याख्ये तीर्थे समागताः	२३ (१९) ।२४
	=एते सरस्वतीं महानदीमपिबन्	२३ (१९) ।२७
	=एते सरस्वत्यास्तोयमरुणातोयमिश्रितं दृष्ट्वा दुःखिता अभूवन्	२३ (१९) ।३१
	=एते धर्महीना भवन्ति	२३ (१९) ।३२
	=ते वैश्यादयो राक्षसा भवन्ति ये ब्राह्मणान् प्रद्विषन्ति	२३ (१९) ।३४
	=यः कीटादिभिः संसृष्टमन्नं भुङ्क्ते स राक्षसानामेव भागं भुङ्क्ते	२३ (१९) ।३९
	=एतेऽरुणासंगमे स्नात्वा स्वर्गमाप्नुवन्	२३ (१९) ।४३
	=एते वेनकृतशिवस्तवपाठप्रभावेण गृहे विघ्नं न कुर्वन्ति	२३ (२७) ।१२
राक्षसेश्वरः	=सुकेशिः, अयं विष्णुना समन्तपञ्चकक्षेत्रे रक्षार्थं नियोजितः	२३ ।४०
रागः	=अनेन मोहितेन मङ्कणेन सह शङ्करस्य संवादः	२३ (१७) ।१४
	=अयं शिवरूप उक्तः	२३ (२६) ।११४
रागवती	=ज्येष्ठा गिरिकन्या, इयं सुरैर्ब्रह्मलोकं नीता	२५ ।१७
रागान्धः	=अयं न पश्यति	३३ ।३७
रागिणी	=इयं मेनाया ज्येष्ठा कन्या	२५ ।२

राघवः =महात्मा २३ (१८)।५
=श्रीरामः, अनेन दण्डकारण्ये बहवो राक्षसा हिंसिताः २३ (१८)।५
राजकम् =राजसमूहः, सुराजकेष्वेव देशेषु वासः कर्त्तव्यः १४।५५
राजकार्यम् =अनेन विमुक्तो वेनकृतशिवस्तवश्रवणेन महतो भयाद् विमुच्यते २३ (२७)।११
राजधानी =वसन्त उर्वशीं कामनरेन्द्रस्य राजधानीं कल्पितवान् ७।१४
राजपुत्रः =ऋक्षस्य राज्ञः पुत्रः संवरणः, अस्यावयवानां संघटनवर्णादिप्रशंसा २२।४८-५३
राजभयम् =अनेनान्वितो वेनकृतशिवस्तवश्रवणेन महतो भयाद् विमुच्यते २३ (२७)।१०
राजर्षिः =कुरुः, अयं समन्तपञ्चकं तीर्थं महाफलप्रदममन्यत २३।२१
=शालिहोत्रः २३ (१६)।५
=विश्वामित्रः २३ (१९)।२
=कुरुः २३ (२०)।१५
राजसूयः =यज्ञविशेषः, अस्य फलं कुरुक्षेत्रस्थे सोमतीर्थे स्नानेन लभ्यते २३ (१३)।३४
=यज्ञः, अस्य फलं सोमतीर्थे स्नानेन लभ्यते २३ (२०)।४
राजा =अस्य मार्गे पुरीषाद्युत्सर्गो नैव करणीयः १४।३०
=अनेन कन्दर्पाख्येन स्वयं दत्ता लावण्यगृहस्य मुद्रेव कात्यायन्या गभीरा नाभिर्विभाति २०।९
=कुरुः, अस्येन्द्रेण सह संवादः २३।२५
=कुरुः २३ (१)।१३
=एषु प्रजापालनयुक्तेषु सत्सु दैत्यराज्ये बलिरभिषिक्तो बभूव २३ (२)।११
=बलिर्दैत्यानां दानवानां च २३ (८)।३४
=अयं कुरुक्षेत्रस्थे पुष्कराख्यतीर्थे पितृदेवता अभ्यर्च्याश्वमेधयज्ञस्य फलं विन्दति २३ (१३)।४२

	=जनकः, अस्य गृहे जाता वेदवती सीतानाम्ना प्रसिद्धा बभूव	२३ (१६)।१९
	=जनकः	२३ (१६)।१९
	=कुरुः, अनेन कुरुक्षेत्रे सरस्वती पूजिता	२३ (१६)।३८
	=धृतराष्ट्रः	२३ (१८)।२७; ३०
	=धृतराष्ट्रः, अनेन बकनामा ऋषिः प्रसादितः	२३ (१८)।३३
	=एषा संज्ञा पृथिव्या रञ्जनाद् वेनदक्षिणहस्तोत्पन्नस्य पुरुषस्य बभूव (तुल 'राजा प्रकृतिरञ्जनाद्' इति रघुवंशम्)	२३ (२६)।२४
	=वेनपुत्रः, अयं स्थाणुतीर्थे पितुः स्नानार्थमुद्यतो वायुना निषिद्धः	२३ (२६)।४१
राज्यम्	=प्रह्लादः स्वं राज्यमन्धकाय समर्पितवान्	८।४४
	=इदं प्रह्लादेन परित्यक्तम्	८।७१
	=इदं प्रह्लादेन दत्तमन्धकेन पालितम्	९।६
	=ऋक्षेण बाल्य एव स्वसुतः संवरणो राज्येऽभिषेचितः	२२।२७
	=वामनेन शतक्रतो राज्यं तस्मै दत्तम्	२३ (२)।१
	=हिरण्यकशिपौ हते बलिस्त्रैलोक्ये राज्यं चकार	२३ (२)।६
	=दैत्यानां राज्ये सर्वैरसुरैर्बलिरभिषिक्तः	२३ (२)।१२
	=देवानाम्, इदं बलिना विक्रम्य पराजितम्	२३ (२)।१५
	=इदमसुरैर्हृतं मम पुत्र इन्द्रः प्राप्नोतु - इति वरं विष्णुमदितिर्याचितवती	२३ (७)।८
	=अस्माद् भ्रष्टो भवेति बलये प्रह्लादः शापमुत्ससर्ज	२३ (८)।४८
	=अस्मान्मम भ्रंशो भविष्यतीति बलेः स्वीकारोक्तिः	२३ (९)।४
	=त्रैलोक्यस्य राज्यं तथा नातिदुर्लभं यथा भवद्विधा गुरवो दुर्लभाः सन्तीति बलिः प्रह्लादमाह	२३ (९)।५
	=बले राज्ये कश्चिदपि शमादिविवर्जितो नासीत्	२३ (१०)।२४
	=बलेर्विष्णोश्च चरितं स्मरंश्च्युतराज्यो निजं राज्यं प्राप्नोति	२३ (१०)।९०

=बलिनाऽपहृतं राज्यं विष्णुर्वामनकतीर्थे इन्द्रायार्पितवान् २३ (१५) ।६५
=अनेन राजानं धृतराष्ट्रं पुनरुत्थापयामास बकनामक ऋषिः २३ (१८) ।३५
=इदं प्राप्य वेनदक्षिणहस्तसमुत्पन्नः पुरुषः स्वपितृविषयं चिन्तयामास २३ (२६) ।२५
=सचिवे राज्यमाधाय वेनपुत्रो राजा तावदुत्तरां भूमिं जगाम २३ (२६) ।३४
=अस्य प्राप्तये वेनकृतः शिवस्तवः श्रोतव्यः २३ (२७) ।९
=अस्मिन् सुतमभिषिच्य राजा वेनपुत्रः कुरुक्षेत्रं ययौ २३ (२७) ।३३

रात्रिः =अस्यां कमलानि विकसितान्यभूवन् १६ ।१०
=अस्याः समयं बुद्ध्वा तावदुलूका बहिर्निरगमन् १६ ।११
=अस्यां वासरं विज्ञाय स्नातकाः स्नानजप्यपरायणा बभूवुः १६ ।१२
=अस्यामपि यज्वानः कर्माणि कृतवन्तः १६ ।१८
=इयं ब्रह्मसभायां ब्रह्माणमुपास्ते २३ (३) ।३३
=अस्या जातं तमः सूर्यरूपी विष्णुर्निहन्ति २३ (६) ।३३
=अस्यां भक्षणाय कुरुक्षेत्रे कयाचिद् यक्षिण्या पापदेशजा काचित् स्त्री संबोधिता २३ (१३) ।४८
=अस्यामुमया सार्धं कौतुकागारे शिवो रेमे २७ ।६०

रात्रिनाम =क्षणदा १२ ।५२

रामः =परशुरामः, अस्य नाम्ना प्रसिद्धो ह्रदः पृथूदकसरसोऽनन्तरं वर्तते २३ (१) ।१३
=जमदग्निपुत्रः (परशुरामनाम्ना प्रख्यातः) २३ (१३) ।४२
=परशुरामः, अनेन क्षत्रमुत्साद्य रुधिरेण पञ्चह्रदाः कुरुक्षेत्रे पूरिताः २३ (१४) ।१-२
=परशुरामः, अस्य पितृभिः सह संवादः २३ (१४) ।३;४;५;९
=परशुरामः, अस्य शुभं वाक्यं श्रुत्वा पितरः परमप्रीता बभूवुः २३ (१४) ।९
=परशुरामः, अस्मै पितृभिरनेके वराः प्रदत्ताः २३ (१४) ।१३

	=परशुरामः, अस्य ह्रदाः पुण्याः सन्ति	२३ (१४)।१४
	=परशुरामः, अमुमभ्यर्च्य बहु सुवर्णं लभ्यते	२३ (१४)।१५
	=अस्य पत्नी सीता	२३ (१६)।१०
	=अयं रावणं हत्वा सीतामानीतवान् गृहे	२३ (१६)।११
रामह्रदः	=अयं पृथूदकसरसोऽनन्तरं वर्तते	२३ (१)।१३
	=अस्य चतुर्मुखस्य चान्तरे समन्तपञ्चकं स्थितम्	२३ (१)।१४
	=तीर्थम्, (कुरुक्षेत्रस्थम्)	२३ (११)।२४
	=तीर्थं कुरुक्षेत्रस्थम्, अस्य यात्रा कपिलद्वारपालयात्रायाः समनन्तरं कार्या	२३ (१४)।१
रामह्रदाः	=इमे कुरुक्षेत्रस्थाः पुण्याः सन्ति	२३ (१४)।१४
रावणः	=अनेन केशेषु गृहीता सती वेदवती कुरुक्षेत्रस्थे नैमिषकुञ्जाख्ये तीर्थे प्राणान् मुमुचे	२३ (१६)।९
	=अस्य वधाय वेदवती सीता नैमिषे तीर्थे प्राणान् मुमोच	२३ (१६)।९
	=अनेन सीता हृता	२३ (१६)।११
	=अयं रामेण हतः	२३ (१६)।११
	=अनेन कुरुक्षेत्रे स्थाणोरुत्तरभागे गोकर्णनामकं लिङ्गं स्थापितम्	२३ (२५)।१५-१६
राशयः	=द्वादश। एषां नामानि स्वामिनश्च	५।३१-४४
	=एषां लक्षणविषयकः प्रश्नश्च	५।४४
	=एतेषां विस्तरेण लक्षणानि स्वरूपं च	५।४५-६०
राशिः	=मेषः	५।३१
	=वृषः	५।३२
	=मिथुनम्	५।३३; १७।६
	=कर्कटकः	५।३४
	=केसरी	५।३५
	=कन्यका	५।३६
	=तुला	५।३७; १७।२७
	=वृश्चिकः	५।३८; १७।२६

=धनुः ५ ।३९

=मकरः ५ ।४०

=कुम्भः ५ ।४१

=मीनः ५ ।४२

=वृषनामा, शुक्रोऽस्य स्वामी ५ ।३२

राष्ट्रम् =इदं धृतराष्ट्रस्य राज्ञ ऋषिर्बकोऽवकीर्णतीर्थे जुहाव २३ (१८) ।३०

=एतद् धृतराष्ट्रस्य यज्ञकर्मणि हूयमानं सद् अक्षीयत २३ (१८) ।३१

रासभः =गरुडोपमं रासभमधिरुह्य देवी चण्डमारी प्राधावत् २९ ।७०

=अनेन महेश्वरी देवी चण्डमारी चण्डमुण्डावनुससार २९ ।७३

=सुवेगयुक्तममुमारुह्य देवी चामुण्डाऽसुरांश्चखाद २९ ।८७

राहुः =ग्रहः, अयं ब्रह्माणमुपास्ते ब्रह्मसभायाम् २३ (३) ।३२

=अनेन ग्रस्ते दिवाकरे संनिहत्यां कृतस्य श्राद्धस्य फलं कुमाराभिषेकतीर्थे कृतेन श्राद्धेन प्राप्यते २३ (२०) ।१९

रिक्ता =संज्ञा ४,९,१४ तिथीनाम्, एतत्संज्ञकासु तिथिषु क्षौरकर्म परिवर्जनीयम् १४ ।४८

रिपुः =एषां सैन्यानां मर्दक आसीद् दुन्दुभिनामा दैत्यो मायासुरस्य पुत्रः २० ।२१

=सुराणां रिपून् देवी कात्यायनी बाणादिभिरपातयत् २१ ।८

रुक्मम् =अनेन सहितं नैवेद्यमुमापतेरर्चने माघमासे देयम् १७ ।४३

रुचिः =यस्य देशस्य राज्ञो रुचिः सदा दण्डविधावेव स्यात् तस्मिन् देशे बुद्धिमान् न वसेत् १४ ।५६

रुद्रः =अस्य पितामहं प्रति प्रश्नः २ ।२७

=अस्य नारायणेन सह संवादः २ ।४५

=अस्यान्तिके ब्रह्महत्या समागता ३ ।१-२

=मृतां सतीमवलोक्यास्य क्रोधावेगः, गात्रेभ्यः पावकार्चिर्निर्गमनं च	४।१६
=स्मरं दग्ध्वाऽयं शिशिराद्रिं जगाम	६।१०६
=अस्यौजसः पौण्ड्रकनामा महिषः समुत्पन्नः	९।१६
=अस्य कर्णमलाज्जलधिनामा शिशुमारः समुद्भूतः	९।१७
=अस्याऽऽराधनकामनया रोहिणी घोरं तपः कृतवती	१६।२४
=शङ्करः, अस्यार्चा मार्गशिरे मासि कर्तव्या	१७।३८
=अस्य फाल्गुनमासे पूजा कर्तव्या	१७।४८
=शङ्करः, अनेन वृषध्वजार्चनं सर्वाक्षयकरमुक्तम्	१७।६४
=शङ्करः, अस्माद् वृषः संजातः	१८।७
=देववरः, अयं कात्यायनीं तुष्टाव	१९।१८
=देवः, अयं महिषासुरो बभूव	२०।२६
=देवः, अयं सत्यां प्रणष्टायां तपश्चकार	२२।९
=अस्य वृषेण समन्तपञ्चकक्षेत्रं कर्षितुं राजर्षिकुरुरुद्यतोऽभूत्	२३।२३
=एनं लोमहर्षणो मूर्ध्ना प्रणनाम	२३ (१)।४
=शिवः, अयं पृथूदकसरसो मध्यं संसेव्य स्थाणुत्वमवाप	२३ (१)।१२
=एष वासुदेवस्य स्वरूपं न जानातीति बलिं प्रति प्रह्लादोक्तिः	२३ (८)।२०
=एष वामनस्य वक्षःस्थले स्थित आसीत्	२३ (१०)।५६
=एतस्य लोकं नरो विमले सरसि कुरुक्षेत्रस्थे स्नात्वा विमलेश्वरं दृष्ट्वा च प्राप्नोति	२३ (१३)।१५
=एनेन पञ्चनदा दानवभीषणाः कृताः	२३ (१३)।२७
=एनेन पञ्चनदे कोटितीर्थानि समाहृतानि	२३ (१३)।२८
=एष ब्रह्मोदुम्बरतीर्थे स्थितः, अस्यार्चनेन शिवलोकः प्राप्यते	२३ (१५)।१५
=अस्य गणो दिण्डिः	२३ (१५)।१५
=अस्य पत्नी तावदनरकाख्यतीर्थस्य पश्चिमभागे स्थिता	२३ (२०)।२५

=शङ्करः, अयं कैलासपर्वतमाश्रितो बभूव बालखिल्यमुनिभिर्लिङ्गे विनिपातिते सति २३ (२२)।६८
=शिवः, अयं देवैः सह संवादं कृत्वाऽन्तर्धानमगात् २३ (२४)।६
=अनेन कङ्कालरूपिणा कुरुक्षेत्रे सर्वपापप्रणाशनं महालिङ्गमेकं प्रतिष्ठितम् २३ (२५)।२८
=शिवः, एनमुमा मनसा चेतसि संधाय सुदुष्करं तपस्तेपे २५।२३
=अस्य हस्ततलान्महागज ऐरावतः समुत्पन्नः ९।१५
=शिवः, अयं महर्षीन् अरुन्धतीं च सस्मार २६।१
=शिवः, अयं मन्दरगिरौ वसून् विश्वकर्माणमाहूय स्वगृहनिर्माणाय प्रोवाच २८।१
=अस्मिन् महामोहस्थिते सति देवा भयमापुः २८।३१
=शिवस्य नाम २८।६७
=अयं त्रिशूलेन दैत्यान् ननाश ३०।२२
=शिवः, अस्य कुटिलाग्निभ्यां गिरिजया च सह संवादः ३१।३५
=शिवः, अयं कुमारनामानं पुत्रं प्राप्य परां मुदमवाप ३१।४१
=शिवः, अयं कुरुक्षेत्रे कुमारस्याभिषेकाय यत्नं चकार ३१।५४
=गणः, इममौशनसतीर्थं कार्त्तिकेयाय ददौ ३१।९१
=अयं क्रुद्धः सन् पशून् निषूदयति ३२।५०

रुद्रकरम् =तीर्थं कुरुक्षेत्रस्थम् २३ (२५)।१४
रुद्रदूती =देवी, इयमट्टहासैर्दैत्यान् बिभेद ३०।२२
रुद्रपत्नी =इयमनरकाख्यतीर्थस्य पश्चिमभागे स्थिता २३ (२०)।२५
रुद्रमहालयः =तीर्थम्, अयं मातॄः कार्त्तिकेयाय प्रददौ ३१।९८
रुद्रलोकः =अयं कुरुक्षेत्रस्थे विमले सरसि स्नानेन विमलेश्वरदर्शनेन च नरेण प्राप्यते २३ (१३)।१५
रुद्रह्रदः =तीर्थं कुरुक्षेत्रस्थम्, अस्मिंश्चैत्रमासे कृष्णपक्षस्य चतुर्दश्यां स्नात्वा नरः परं पदमवाप्नोति २३ (२४)।३०

रुद्राः	=एकादश, एषां वीरभद्रेण सह युद्धम्	४।३१-३७
	=हरं दृष्ट्वा दक्षयज्ञादेते कान्दिशीका लयं जग्मुः	५।३
	=एकादश, एषां वाहनानि गन्धर्वादयः	९।१९
	=एते रक्तबीजाख्येन दैत्येन विजिताः	१८।७०
	=एतान् वामनाकृतिविष्णौ वसतः प्रह्लादो ध्यानेन ददर्श	२३ (८)।१०
	=कोटिसंख्याका रुद्राः सरकतीर्थमध्ये कूपे व्यवस्थिताः सन्ति	२३ (१५)।२२
	=एषां प्रसादेन नरः सर्वदोषविवर्जितो भवति	२३ (१५)।२३
	=सरकतीर्थान्तर्गतकूपस्थितानां कोटिसंख्याकरुद्राणां स्मरणेन परं पदमवाप्यते	२३ (१५)।२३-२४
	=स्थाणुमाश्रिता एतेऽसंख्याताः सन्ति	२३ (२५)।५०
	=एते वेनेन नमस्कृताः	२३ (२६)।१६१
	=एकादशकोटिमिता एते शिवविवाहयात्रायां जग्मुः	२७।१७
	=एते निशुम्भेन बहुशो निर्जिताः	२९।२१
रुद्रात्मा	=शङ्करस्य नाम	२३ (२६)।१५१
रुधिरम्	=अनेन परशुरामः कुरुक्षेत्रे पञ्च ह्रदान् पूरयामास	२३ (१४)।२
रुरुः	=दानवः, अयं शुम्भेन समादिष्टः	२९।५०
	=दैत्यः, अयं रणात् प्रदुद्राव	२९।६२
रुषङ्गुः	=अयं पृथूदके तीर्थे सिद्धो बभूव	२३ (१८)।१६
	=अयं गङ्गाद्वारे सदा स्थित आसीत्	२३ (१८)।१७
	=इमं पृथूदकतीर्थे तस्य पुत्रा उपानिन्युः	२३ (१८)।१८
	=ऋषिः	२३ (१८)।१९
रूपम्	=इदं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३)।२८
	=इदं वासुदेवस्य ब्रह्माद्यैर्न ज्ञायते	२३ (८)।२३
	=अस्य ग्रहणे चक्षुः समर्थम्	२३ (८)।२४
	=वामनेन रूपेण भगवान् विष्णुः कश्यपस्य गृहेऽवतीर्णोऽभूत्	२३ (१०)।४

	=बलेः पाणौ तोये पतिते सति वामनोऽवामनोऽभूत्	२३ (१०) ।४८
	=वामनस्य देवमयं रूपम्	२३ (१०) ।६०
	=सर्वदेवमयवामनस्य महाकायं रूपम्	२३ (१०) ।६२
	=अनेन सम्पन्नः संस्त्वं सुतले वसेति वामनो बलिमाह	२३ (१०) ।७३
	=सरस्वत्याः, मात्रात्रयं सर्वं सरस्वत्या रूपम्	२३ (११) ।१२
	=सरस्वत्या रूपस्य निरूपणम्	२३ (११) ।१४
	=इदमश्विनोस्तीर्थे श्रद्धया कार्यविधानेन लभ्यते	२३ (१३) ।३१
	=उत्तममिदं प्राप्यते कुरुक्षेत्रस्थे देव्यास्तीर्थे स्नानेन	२३ (१४) ।३४
	=शिवः शारभं रूपमास्थाय नरसिंहेन सह युद्धं चकार	२३ (१५) ।३१
	=वामनरूपेण विष्णुना वामनकतीर्थे तावदिन्द्रायापहृतं राज्यं प्रदत्तवान्	२३ (१५) ।६५
	=शङ्करस्य रूपेण बालखिल्यमुनीनां योषितो मोहिता अभूवन्	२३ (२२) ।५७
	=अस्य कामना कुमारेश्वरमाहात्म्यात् सिद्ध्यति	२३ (२५) ।१९
	=वटो रूपं समाधाय शिवः काल्याश्रममागतः	२५ ।४५-४६
	=इदं तपसा वाञ्छ्यते	२५ ।५८
रूपिणी	=कुटिलानाम्नी महानदी, इयं ब्रह्मवचनाच्छ्रवणे गर्भं तत्याज	३१ ।१७
रेखाः	=एतासु वामनस्याप्सरसः स्थिता आसन्	२३ (१०) ।५०
रेणुका	=अस्या नाम्नैक आश्रमः कुरुक्षेत्रे स्थितः	२३ (२०) ।५
रेणुकाश्रमः	=अत्र गमनेन मातृभक्तिजन्यपुण्यं नरो लभते	२३ (२०) ।५
	=अयं कुरुक्षेत्रे स्थितः	२३ (२०) ।५
रेतः	=शुक्रं वीर्यं वा, इदमम्भसि क्षोभात् स्कन्नं मुनिर्मङ्कणः कलशे जग्राह	२३ (१७) ।४
	=अग्निवचनेन शिवो रेतो मुमोच	२८ ।५०
रेवती	=नक्षत्रम्, अस्य मीनराशिः	५ ।४२
रेवा	=महानदी, इयं सह्यपर्वतस्य पाददेशाद् विनिर्गता	१३ ।३१

	=नदी, इयं सागरवेगिनं गणं कार्त्तिकेयाय प्रादात्	३१ ।८१
रैभ्यः	=ऋषिः, अयं सुप्रभातकरणाय प्रार्थ्यते प्राभातिकेन मङ्गलेन	१४ ।२४
रैवतः	=कुमारद्वीपस्थपर्वतः	१३ ।१७
रोगः	=कुष्ठम्	२३ (२६) ।३५
	=क्षयः	२३ (२६) ।३५
रोगाः	=एषां वृद्धिर्भवति यदा भानुः कुपितो जायते	१५ ।६५
रोदसी	=मनुपुत्रः क्षुवतो धर्मेण रोदसी आवृत्य ब्रह्मसदनं प्राप्तवान्	२३ (२६) ।८
रोमकूपाः	=वामनस्य रोमकूपास्तारका आसन्	२३ (१०) ।५१
रोमराजिः	=अनया युक्तः कात्यायन्या मध्यभाग आसीत्	२० ।७
रोमराजी	=इयं कात्यायन्याः पीनकुचावलग्ना विराजते स्म	२० ।८
रोमाः	=वामनस्य रोमेषु[1] महर्षयः स्थिता आसन्	२३ (१०) ।५१
रोमाणि	=एभिर्विरहितौ कात्यायन्या ऊरू	२० ।११
रोमावली	=इयं नारायणोरुसमुद्भूताया बालाया उदरे राजमाना	७ ।९
रोषः	=अनेनाभिभूतेन परशुरामेण क्षत्रमुत्सादितम्	२३ (१४) ।७
	=अनेनाभिभूतः परशुरामः क्षत्रमुत्सादितवान्	२३ (१४) ।१०
रोहिणी	=अनया सह चन्द्रमा दक्षयज्ञे धनाधिपतिरासीत्	२ ।१५
	=अनया घोरं तपः कृतम्	१६ ।१२४
रौद्रम्	=व्रतम्, एतदाश्रित्य शिवो महाशैलान् विचचार	२५ ।३१
रौद्रसूक्तम्	=एभिर्ब्रह्मा स्थाणुतीर्थे शिवमाराधयामास	२३ (२८) ।८
रौद्रा	=इमां मातरं श्वेततीर्थं कार्त्तिकेयाय ददौ	३१ ।१०१
रौद्राः	=सर्वेषु रौद्रपदार्थेषु वैतरणी नदी प्रधाना	१२ ।५६
रौरवः	=नरकः, अस्य प्रमाणं लक्षणं च	११ ।५१

---

[1] 'तनूरुहं रोम लोम' (अमरकोषे २ ।६ ।९९) इत्यमरदृशा 'नामन्, सीमन्, व्योमन्, रोमन्, लोमन्'- (उणादि ४ ।१५१) इति नियमानुसारेण च रोमन्-शब्दस्य नकारान्तत्वमेव प्रसिद्ध्यति न त्वकारान्तत्वमितीह शब्दस्यास्य ज्ञेयमार्षत्वम्।

=नरकः, अत्र पापिनो जना निगडैर्निबध्य क्षिप्यन्ते १२।१९

रौरवाः =एतदाद्या दारुणा नरकाः पुष्करद्वीपे सन्ति ११।४८

ल

लक्षणम् =कालरूपिणः शिवस्य लक्षणविषयको नारदस्य प्रश्नः ५।२९

=सदाचारस्य, एतद्विषयकः प्रश्नः सुकेशेर्महर्षीन् प्रति १४।१३

=अस्याभावमाचारो दूरीकरोति १४।१७

=सूतिकादीनां लक्षणविषयकः प्रश्नः सुकेशेर्महर्षीन् प्रति १५।२६

=पार्थिवानां लक्षणैरुपेतः सुतस्तपत्यां संवरणेनोत्पन्नः २३।१

लक्ष्मीः =अनया सह महायोगिनो विष्णोः पूजां केचित् कृतवन्तः १६।२२

=कमलालया १७।१५

=देवी, अस्याः करे बिल्वोऽभवत् १८।८

=अनया समन्वितं विष्णुं मूर्ध्ना प्रणनाम लोमहर्षणः २३ (१)।४

=इयं बलिसकाशमुपागता २३ (२)।१३

=देवी, इयं दैत्यनृपं बलिं प्रविष्टा २३ (२)।१८

=ब्राह्मणी = ब्रह्मसम्बन्धिनी, अनया संभृतं कश्यपं देवाः प्रणेमुः २३ (३)।११

=इयं देवानां समृद्धा बभूव मधुसूदने गर्भस्थे सति २३ (८)।६

=इयं वामनस्य कटिस्थानीयाऽऽसीत् २३ (१०)।५७

=देवी, इयं कुरुक्षेत्रस्थे श्रीतीर्थे स्नातस्य सान्निध्यं प्रयच्छति २३ (१४)।२३

=इमां पञ्चम्यां प्राचीं सरस्वतीं सेवमानो लभते २३ (२१)।२३

=अनया सह वैनतेयमारूढो जनार्दनः शिवविवाहयात्रायां शिवपार्श्वस्थः प्रयाति स्म २७।९

लक्ष्यम्	=द्वैते व्यस्तभूतं सर्वमपि लक्ष्यं सरस्वत्याः स्वरैर्व्यञ्जनैश्च संबद्धम्	२३ (११)।२२
लघु	=युद्धभेदः	८।८
लङ्घनम्	=पुरीषादेर्लङ्घनं न कुर्यात्	१५।२१
लज्जा	=अनया बालखिल्यमुनयो ब्रह्मसदनेऽधोमुखा अतिष्ठन्	२३ (२२)।७३
लताः	=आसां शिवरूपत्वमुक्तम्	२३ (२६)।११७
लम्पकाः	=उत्तरापथवासिनो जनाः, एते क्षुद्रनदीजलानि पिबन्ति	१३।४१
लम्भनम्	=वधः, अस्यार्थं विष्णोर्नारसिंहदेहस्य लम्भनार्थं देवा वरदं शिवमाराधयामासुः	२३ (१५)।३०
लयः	=अन्तकाले त्वं मामेव लयमेष्यसीति विष्णुः कुरवे वरमदात्	२३।३७
	=प्रलयकाले सर्वाणि भूतानि विष्णौ लयं यान्ति	२३ (८)।२२
ललना	=सूर्यपुत्री तपती, अस्या विषये राजा संवरणो वसिष्ठं प्रति पप्रच्छ	२२।५८
	=इयमदुष्टा सती कृतापराधापि वध्या न भवति	३२।९२
ललिता	=इयं हराराधनकाम्यया तपस्तेपे	२५।४१
ललित्थाः	=उत्तरापथवासिनः जनाः, एते क्षुद्रनदीजलानि पिबन्ति	१३।३८
लवणः	=रसः, अयमाश्विनशुक्लैकादश्यां विष्णवे समर्पणीयः	१८।१४
	=असुरः, इममहं नन्दस्य गृहे सम्भूय वधिष्यामीति देवी देवानाह	३०।६८
लवणम्	=इदं सर्वेषु रसेषु मुख्यम्	१२।५३
लाङ्गलम्	=आयुधम्, अनेन देवी दैत्यानां ग्रीवां दारितवती	२१।१०
लाजाः	=एषां स्पर्शः शुभसूचकत्वात् प्रातःकाले करणीयः	१४।३६
	=एते कालीविवाहकाले ब्रह्मणाग्नौ प्रक्षिप्ताः	२७।५०

लावण्यगृहम् =कात्यायन्या गभीरा नाभिः कन्दर्पेण स्वयं प्रदत्ता लावण्यगृहस्य मुद्रेव विभाति २० ।९
लिङ्गपूजा =शिवलिङ्गपूजया सर्वाणि पापानि शुध्यन्ति २३ (२३) ।१२
लिङ्गम् =शङ्करस्य लिङ्गं महर्षिशापात् पृथ्वीं विदारयत् पपात ६ ।६५-६६
=अस्य शिवलिङ्गस्य रसातले प्रवेशः प्रभावश्च ६ ।६७
=अस्यानन्तता, ब्रह्मविष्णुभ्यामस्यान्तो न लब्धः ६ ।६८-७७
=शिवलिङ्गं ब्रह्मा जग्राह ६ ।८५
=शिवः; ‘स्वं लिङ्गमुपसंहृत्य चित्रवने प्रतिष्ठापितवान् ६ ।९३
=पुरीषोत्सर्गानन्तरमस्मिन्नेकवारं मृदमाहरेत् शौचार्थम् १४ ।३१
=भूतेश्वराख्यम् (कुरुक्षेत्रस्थम्) २३ (१३) ।३६
=ज्वालामालेश्वराख्यम् (कुरुक्षेत्रस्थम्) २३ (१३) ।३६
=भूतेश्वराख्यं कुरुक्षेत्रस्थम्, अस्य पूजनेन भूयो जन्म न भवति २३ (१३) ।३६
=ज्वालामालेश्वराख्यम् (कुरुक्षेत्रस्थम्) अस्य पूजनेन भूयो जन्म न भवति २३ (१३) ।३६
=अस्याकारमास्थितं शिवं वीक्ष्य नारदो भक्तिभावतस्तुष्टाव २३ (१५) ।३३
=लिङ्गाकारा सरस्वती स्थाणुतीर्थे स्थाणुना स्थापिता २३ (१९) ।४
=शिवस्य लिङ्गं बालखिल्यमुनिभिः पातितम् २३ (२२) ।६८
=शिवस्य लिङ्गे नष्टे सति चराचरे क्षोभो बभूव २३ (२२) ।६९
=अस्य पुनर्भवाय शङ्करो ब्रह्मादीन् प्रत्याह २३ (२३) ।९
=अस्य प्रतिष्ठायां शिवस्य प्रीतिः २३ (२३) ।१०
=शिवलिङ्गस्य पूजनेन दुर्लभमपि प्राप्यते २३ (२३) ।११
=शिवस्य लिङ्गम्, अस्याऽऽनयने बालखिल्या यत्नं चक्रुः २३ (२३) ।१७
=इदं शिवेन स्वेच्छया पातितम् २३ (२३) ।१९
=अस्याऽऽनयनाय देवैः शङ्करः प्रार्थितः २३ (२३) ।३१
=अस्मिन् सन्निधानं चकार शङ्करः २३ (२३) ।३६

	=शिवलिङ्गम्, अस्य दर्शनाद् ब्राह्मणादयः पुरुषाः परमं पदं पश्यन्ति	२३ (२४) ।३
	=स्थाणुलिङ्गम्, इदं शङ्करः करेण धारयामास	२३ (२४) ।१२
	=स्थाणुलिङ्गम्, अस्य स्थाणुवटस्य चान्तरे श्राद्धेन प्रीताः पितरो दुर्लभं ददति	२३ (२४) ।१४
	=स्थाणुलिङ्गं कुरुक्षेत्रस्थम्, इदं सिद्धाः पूजयन्ति	२३ (२४) ।१७
	=आद्यलिङ्गं ब्रह्मणा स्थापितं कुरुक्षेत्रस्थितम्, अस्य दर्शनान्नराः सिद्धिं यान्ति	२३ (२४) ।२०
	=स्थाणुलिङ्गम्, अस्य दर्शनाद् मुक्तिर्लभ्यते	२३ (२४) ।२५
	=स्थाणुलिङ्गम् (कुरुक्षेत्रस्थम्)	२३ (२४) ।२५; २७
	=गोकर्णनामकं कुरुक्षेत्रे रावणेन स्थापितम्	२३ (२५) ।१६
	=कुरुक्षेत्रे कुमारेश्वरस्योत्तरदिग्भागे स्थितम्	२३ (२५) ।२०
	=हारीतेन स्थापितं कुरुक्षेत्रे	२३ (२५) ।२५; २७
	=इदं कुरुक्षेत्रे मृकण्डेनैकं स्थापितम्	२३ (२५) ।३१
	=इदमेकं कुरुक्षेत्र आदित्येन स्थापितम्	२३ (२५) ।३२
	=चित्राङ्गदेन स्थापितं कुरुक्षेत्रे	२३ (२५) ।३५
	=रम्भया स्थापितं कुरुक्षेत्रे	२३ (२५) ।३५
	=कुरुक्षेत्र इन्द्रेण स्थापितम्	२३ (२५) ।३६
	=हिमवतेश्वराख्यम् (कुरुक्षेत्रस्थम्)	२३ (२५) ।४०
	=इदं कुरुक्षेत्रे कार्तवीर्येण स्थापितम्	२३ (२५) ।४१
	=एतद्द्वयं कुरुक्षेत्रे मित्रेण वरुणेन च स्थापितम्	२३ (२५) ।४४
	=स्थाणुलिङ्गम्, अस्य दर्शनाद् वेनः पातकैर्मुक्तो बभूव	२३ (२७) ।१७
	=स्थाणुलिङ्गम्, अस्योत्पत्तिं श्रुत्वा पापैः प्रमुच्यते	२३ (२७) ।२३
	=शिवः पूर्वं क्रोधेन लिङ्गमुत्पाट्याक्षिपत्, तच्च सरस ऊर्ध्वमेव स्थितमभूत्	२३ (२८) ।३३
लिङ्गानि	=सर्वेषु लिङ्गेषु कालाष्टम्यां तिथौ शङ्करः स्वपिति	१७ ।३१
	=स्थाणुतीर्थस्य समीपतोऽतिपुण्यानि कानि लिङ्गानीति मुनिर्मार्कण्डेयः सनत्कुमारं प्रति पप्रच्छ	२३ (२२) ।६

	=ब्रह्मा देवानां हितकामनया स्थाणुलिङ्गमुपर्युपरि सप्त लिङ्गानि चकार	२३ (२४)।२१
	=एतानि सान्निहिते तीर्थे प्रतिष्ठाप्य त्वं विमुक्तो भविष्यसीति शिवो ब्रह्माणं प्रत्याह	२३ (२८)।२१
	=एतानि ब्रह्मा सरोमध्ये कृतवान्	२३ (२८)।३७
लीला	=(क्रीडा) अनया दुर्गा देवी वीणां जग्राह	२१।३४
	=अनया शङ्करः स्वलिङ्गं करेण जग्राह	२३ (२३)।३३
लुब्धः	=शिवस्य नाम	२३ (२६)।९१
लूपी	=नदी, इयं पारियात्रपर्वताद् विनिर्गता	१३।२४
लेपः	=अनेन भूमिर्विशुध्यते	१५।११
	=पापानां लेपाद् विमुक्तो भवति चैत्रशुक्लचतुर्दश्यामलेपकतीर्थे स्नानेन शिवपूजनेन च	२३ (१५)।४४
लोकः	=अस्य नाशः	२।२१
	=सुरलोकः	७।१८
	=द्यौः	७।१९
	=पातालम्, मर्त्यः	७।२१
	=रसातलम्	७।२९
	=पातालम्	७।३४
	=पृथिवी, अन्तरिक्षम्, रसातलम्	७।३६-३७
	=अस्मिन् वृथा दारपरिग्रहाद् भयं भवति	१४।४३
	=अस्मिन् निर्दिष्टाचारस्य विधानेन धर्मार्थकामसप्राप्तिर्भवति	१५।५४
	=अनेनोक्तं शुभाशुभं ज्ञातुं सूर्यो ध्यानं दध्यौ	१६।३२-३३
	=नाकः	१९।३
	=अत्र प्रसिद्धं वर्तते यत् स्वदेहादप्यधिकः प्रियतरो विष्णुरस्ति प्रह्लादस्य	२३ (८)।४२
	=अत्र कीर्तिर्गरीयसी मन्यते, इयं यावद् वर्तते तावत् सुरैः सह वासो जायते	२३।१०
	=पृथ्वीलोकः, अस्येश्वरो राजा कुरुरासीत्	२३।१२
	=अस्मिन् प्रकृतिस्थे सति दैत्यराज्ये बलिरभिषिक्तो बभूव	२३ (२)।१०

=स्वर्गलोकः	२३ (१३) ।१५; १८; ५०; २३ (१४) ।१३; २३ (१६) ।१६; २३ (१९) ।२५; ४३; २३ (२४) ।७; २८ ।२८; २९ ।३३; ३० ।१४; ३२ ।९१
=रुद्रलोकः	२३ (१३) ।१५
=सोमलोकः	२३ (१३) ।३५
=भूलोकः	२३ (१४) ।८; २३ (१५) ।१०; १२; २३ (१५) ।६१
=सूर्यलोकः, अत्र स गच्छति यः सूर्यतीर्थे देवार्चनादिकं करोति	२३ (१४) ।२७
=पातालम्	२३ (१४) ।३०; ३१; २९ ।३३; ३२ ।३१;
=द्यौः = स्वर्गः	२३ (१४) ।५५; २८ ।१०
=ब्रह्मलोकः, इमं ब्रह्मोदुम्बरतीर्थे स्नातो लभते	२३ (१५) ।११
=शिवलोकः, अत्र स मोदते यो ब्रह्मोदुम्बरतीर्थे स्नात्वा रुद्रमर्चयति	२३ (१५) ।१५
=शिवलोकः, अत्र स गच्छति यः कुरुक्षेत्रस्थे सरकतीर्थे कृष्णपक्षे चतुर्दश्यां महेश्वरस्य दर्शनं करोति	२३ (१५) ।२१
=भूलोकः, अत्र दुर्लभं तीर्थमस्ति किंरूपाख्यं कुरुक्षेत्रस्थितम्	२३ (१५) ।२७
=सूर्यलोकः	२३ (१५) ।६१
=सूर्यलोकः, इमं सोऽवाप्नुयाद् यः 'अह्न-सुदिन'-तीर्थयोः स्नाति	२३ (१५) ।६१
=सूर्यलोकः, अस्मिन् स महीयते यो भक्तियुक्तः सन् सूर्यतीर्थे स्नाति	२३ (१५) ।७३
=भूलोको मर्त्यलोको वा, अत्र दुर्लभमपि वस्तु नरः सप्तसारस्वते स्नात्वा शिवार्चनेन लभते	२३ (१७) ।२२
=परलोकः, अत्र दुर्लभमपि वस्तु नरः सप्तसारस्वते स्नात्वा शिवार्चनेन लभते	२३ (१७) ।२२
=वासिष्ठो लोकः, इमं स प्राप्नुयाद् यो वसिष्ठोद्वाहाख्ये तीर्थे भक्त्या स्नाति	२३ (१८) ।४०

	=त्रिदिवः (स्वर्गः)	२३ (२०) ।१७
	=इह लोके दुर्लभं (वस्तु) मानवः पञ्चम्यां प्राचीं सरस्वतीं सेवमानो लभते	२३ (२१) ।२३
	=इमं ब्रह्मा सुप्तोत्थितः सन् शून्यमपश्यत्	२३ (२२) ।१९
	=अस्मिन् क्रोधनः पुरुषः स्वदानादेः कर्मणः फलं न प्राप्नोति	२३ (२२) ।८६
	=ब्रह्मलोकः	२५ ।६
	=ब्रह्मलोकः, एनमापोमयी भूत्वा कुटिला प्लावयामास	२५ ।१४
	=द्युलोकः	२५ ।१७
	=त्रिविष्टपम्	२८ ।५१; ३० ।७१
	=ब्रह्मलोकः	३१ ।४
लोकगुरुः	=विष्णुः, अस्य प्रशंसां केचिज्जनाः कृतवन्तः	१६ ।२१
	=ब्रह्मा, अयं भूतग्रामेविवृद्धे सत्यन्नेन तुष्टोऽभूत्	२३ (२८) ।३१
लोकत्रयम्	=एतद् वामनेन सर्वदेवमयरूपेण जितम्	२३ (१०) ।६५
लोकनाथः	=नारायणः, अनेन धर्माचरणाय प्रह्लादोऽनुशिष्टः	८ ।६७
	=ब्रह्मा	२३ ।१८
	=शिवः	२३ ।१८
लोकपतिः	=अयं ब्रह्मसभायां ब्रह्माणमुपास्ते	२३ (३) ।२९
लोकपालः	=नारायणः, अयं युद्धे प्रह्लादेन समाक्रान्तः	७ ।६५
लोकपालाः	=इमे अन्धकेन सह युद्धार्थं बहिर्ययुः	९ ।१०
	=एभी रक्तबीजभयात् स्वकीयानि स्थानानि परित्यक्तानि	१८ ।७२
लोकपितामहः	=ब्रह्मा, अयं वामनस्य जातकर्मादिकां क्रियां चकार	२३ (९) ।१७
	=ब्रह्मा, अयमुत्पन्न एव सर्वभूतानि ससर्ज	२३ (२८) ।३
लोकमातरः	=पितामहस्योद्गारात् समुद्भूतायाः सुरभेस्तनयाः सुरभयो लोकमातर उच्यन्ते	२३ (१४) ।३१.
लोकसाक्षी	=शङ्करस्य नाम	२३ (२३) ।३६ (१)

लोकाः	=एषु निन्दितो द्वीपः पुष्कराख्यः, एकविंशतिसंख्याकनरकाणां सत्त्वात् कर्मार्थविनाशकरत्वाच्च	१२।४३
	=सर्वेषु लोकेषु विरिञ्चिसदनं श्रेष्ठम्	१२।४६
	=एषां प्रपितामहस्य ब्रह्मणः सकाशात् कात्यायन्याः पादौ संजातौ	१९।११
	=एतान् आक्रम्येव कात्यायनी निर्मिता	२०।१३
	=महिषासुरः सर्वेषु लोकेष्वधिपो बभूव	२०।२६
	=एषां हितकाम्यया देव्याः सम्भवं वक्तुं पुलस्त्यः प्रतिज्ञातवान्	२२।२
	=एषां पितामहो ब्रह्मा ब्रह्मसभायामास्ते	२३ (३)।२५
	=सर्वलोकानां यः प्रभुः स एव बलेर्जेता	२३ (४)।४
	=सर्वेषां लोकानां शुभमशुभं च कर्म चन्द्रसूर्यौ पश्यतः	२३ (६)।३४
	=समस्तलोकानां स्रष्टारं ब्रह्माणं वामनाकृतिविष्णुस्थितं प्रह्लादो ध्यानेन ददर्श	२३ (८)।१४
	=सप्त, एषां गुरोर्गुरुर्भगवान् विष्णुः	२३ (८)।१८
	=सप्त	२३ (८)।१८
	=त्रयः	२३ (८)।१९
	=इमे विष्णोरेकांशांशकलातः समुद्भवन्ति	२३ (८)।३७
	=त्रयः, एषामिन्द्राय प्रदानार्थं भगवान् विष्णुरदितिं प्रतिज्ञातवान्	२३ (९)।३४
	=सर्वेषां लोकानां माता सरस्वती	२३ (११)।६
	=एते त्रयः सरस्वत्या रूपम्	२३ (११)।१०
	=अभिमतांल्लोकान् स नरो लभते यः कुरुक्षेत्रस्थं हरेण संयुक्तं हरिं पूजयति	२३ (१३)।२२
	=सर्वेषु लोकेषु पञ्चनदाख्यं तीर्थं प्रसिद्धम्	२३ (१३)।२७
	=एते विष्णुना लोकोद्धारतीर्थे समुद्धृताः	२३ (१४)।२०
	=शाश्वतानेतान् स पश्यन्ति यः तीर्थस्मरणतत्परो भूत्वा लोकोद्धारतीर्थे स्नाति	२३ (१४)।२१
	=एषां मातरः पितामहस्योद्गारात् समुद्भूतायाः सुरभेस्तनयाः सुरभयः सन्ति	२३ (१४)।३१

	=सर्वेषु लोकेषु कुरुक्षेत्रस्थितं ब्रह्मोदुम्बराख्यं तीर्थं विश्रुतमस्ति	२३ (१५) ।७
	=सप्त, एषामाधिपत्यं प्राप्यते ब्रह्मोदुम्बरतीर्थे पृथक् स्नानेन	२३ (१५) ।१३
	=त्रयो लोकाः, एतेषु विश्रुतं कृतजप्याख्यं तीर्थं कुरुक्षेत्रे स्थितम्	२३ (१५) ।६२
	=त्रिषु लोकेषु विश्रुतमस्ति वामनकं तीर्थम्	२३ (१५) ।६४
	=त्रिषु लोकेषु विश्रुतं कोटितीर्थाख्यं तीर्थं कुरुक्षेत्रे स्थितम्	२३ (१५) ।७१
	=सर्वेषां लोकानां तारणे मुनयः शक्ता भवन्ति	२३ (१९) ।३६
	=एषु विश्रुतोऽस्त्यरुणासरस्वतीनद्योः संगमः	२३ (१९) ।४१
	=कुरुक्षेत्रे शतक्रतोर्यज्ञस्य करणेन सुकृता लोकाः प्राप्यन्ते	२३ (२०) ।१६
	=एषु धर्मप्रवर्तनमार्गः प्रवर्तितः	२३ (२२) ।८२
	=एषु शिवलिङ्गं स्थाणुनाम्ना प्रसिद्धं बभूव	२३ (२३) ।१४
	=त्रयो लोका भवन्तं धनवाहनं द्रक्ष्यन्तीति सप्तर्षयः शिवं प्रत्यूचुः	२६ ।६७
	=एते महामोहनके स्थितेन शङ्करेण समाक्रान्ताः	२८ ।३३
	=एते तव पुत्रं विनायकं पूजयिष्यन्तीति प्रीत्या शिव उमामाह	२८ ।७२
लोकाचारः	=अयं दुर्लङ्घ्यो भवति	२६ ।१४
लोकाधिपत्यम्	=सप्तलोकाधिपत्यं लभ्यते ब्रह्मोदुम्बरतीर्थे सप्तर्षीन् समुद्दिश्य पृथक् स्नानेन	२३ (१५) ।१३
लोकाध्यक्षः	=अनेन केनचिद् वर्णाश्रमविभागो निर्मितः	२३ (२२) ।८३
लोकायतिकाः	=एभिर्मुख्यैरीरितं स्वरं ब्रह्मसभायां देवाः श्रुतवन्तः	२३ (३) ।२४
लोकेश्वरः	=राजा कुरुः	२३ ।१२
लोकोद्धारः	=तीर्थं कुरुक्षेत्रस्थम्, अस्मिन् स्नानेन शाश्वतान् लोकान् पश्यति	२३ (१४) ।२१
लोभः	=आहारस्य लोभेन श्वा कश्चित् कुटीरकं प्रविवेश	२३ (२६) ।५९
	=अयं शिवरूप उक्तः	२३ (२६) ।११४

लोभाक्रान्तः =अयं न पश्यति ३३ ।३७

लोमहर्षणः =मुनिः कुरुजाङ्गले वर्तमानः, इमं द्विजाः पृथूदकसरसः प्रभावमपृच्छन् २३ (१) ।१
=पुराणर्षिः २३ (१) ।३
=अस्य द्विजैः सह संवादः २३ (१) ।४
=एतस्यर्षिभिः सह संवादः २३ (२) ।२; २३ (३) ।२; २३ (१३) ।३; २३ (१७) ।२
=अस्य महर्षिभिः सह संवादः २३ (६) ।१; १०; २३ (७) ।१; २३ (८) ।१; ३; ८; ३३; २३ (९) ।१; १२; ३२; २३ (१०) ।१; ३३; २३ (१०) ।८५; २३ (११) ।३; २३ (१२) ।१; २३ (१४) ।१; २३ (१६) ।१; २३ (१८) ।१; ५; २७; २३ (१९) ।२; २३ (२०) ।१; २३ (२१) ।२; २३ (२२) ।३; १४
=एतस्य द्विजश्रेष्ठैः सह संवादः २३ (१०) ।८९; २३ (१५) ।१
=पौराणिकोत्तमः २३ (१३) ।२
=एषां विप्रेन्द्रैः सह संवादः २३ (१४) ।२०; ३७; २३ (१४) ।३९
=पुराणविद् महात्मा, अनेन सह शौनकादिमुनीनां संवादोऽभूत् २३ (१६) ।२४

लोमानि =कुरुक्षेत्रस्थे स्वानुलोमायने तीर्थे विद्वांसः प्राणायामैः स्वानि लोमानि निर्हरन्ति २३ (१४) ।४८

लोलः =वाराणसीस्थे गरुडध्वजाश्रम एतदाख्यो रविर्वसति ३ ।४०
=पापमोक्षाय शङ्करेणायं दृष्टः ३ ।४३
=सूर्यस्य नाम, शङ्करेण कृतम् १६ ।५९

लोलुपत्वम् =इदमपि पारक्यार्थे रक्षसां धर्म एवाङ्गीकृतम् ११ ।२६

लोहजङ्घः =इममृषयः स्कन्दाय ददुः ३१ ।८७

लोहपिण्डः =नरकः, अयं पुष्करद्वीपस्थनरकेषु चतुर्दशः ११ ।५७

लोहमेखला =इमां मातरं श्वेततीर्थं कार्त्तिकेयाय ददौ ३१ ।१०१

लोहिताक्षः =प्रमथः, इमं शिवः कार्त्तिकेयाय प्रादात् ३१ ।६१

लोहित्या	=नदी, इयं भारतवर्षस्थकुमारद्वीपे हिमवत्पादाद् विनिःसृता	१३ ।२२

व

वंशः	=आत्मवंशं न हापयेत्	१५ ।६६
	=सोमः	२२ ।२६
	=दैत्यानाम्, अत्र पुरा बलिर्बभूव	२३ (२) ।३
	=स्ववंशस्य सिद्धये कुरुक्षेत्रस्थवंशमूलतीर्थे स्नानं कर्तव्यम्	२३ (१४) ।१६
(सूर्यस्य)	=रघुः	३४ ।४४
वंशमूलम्	=तीर्थं कुरुक्षेत्रस्थम्, अस्मिन् स्ववंशसिद्धये स्नानं कार्यम्	२३ (१४) ।१६
वकुलम्	=कामदेवस्य धनुषि यन्नाभिस्थानमासीत् तद् वकुलनामकं केसरारण्यं जातम्	६ ।९९
वक्त्रम्	=कात्यायन्याः, इदं महेश्वरस्य तेजसः संभूतम्	१९ ।९
	=आखु-कुक्कुटानां वक्त्रमिव वक्त्रवन्तो भूता देव्या हास्यात् समुद्भूताः	२१ ।२०
	=नानावक्त्रवन्तो भूता देव्या हास्यात् समुद्भूताः	२१ ।२०
वक्त्रसंधानकेशः	=शिवस्य नाम	२३ (२६) ।१०२
वक्त्राणि	=त्रिनेत्रस्य पञ्च	२ ।३५
वक्षःस्थलम्	=वामनस्य वक्षःस्थले रुद्रः स्थित आसीत्	२३ (१०) ।५६
वक्षःस्थलानि	=इमानि सुरारातीनां विष्णुना विदारितानि	२३ (९) ।२५
वक्षांसि	=इमानि दैत्यानां कुलिशादिभिर्देवी निर्बिभेद	२१ ।१०
वङ्गाः	=जनपदाः, अन्तर्गिरिस्थाः बहिर्गिरिस्थाश्च	१३ ।४४
वचः	=सूर्यस्य वचसः संपूर्तये महर्षिरगस्त्यः सूर्यं प्रतिज्ञातवान्	१९ ।२५
	=विश्वामित्रस्य वचः सरस्वती वसिष्ठं प्रत्यकथयत्	२३ (१९) ।९
	=इदमिन्द्रो राजानं कुरुं प्रत्युवाच	२३ (२०) ।१५
वचनम्	=मधुरैर्वचनाम्बुभिरप्सरसः कामबाणपीडितां कन्यामाश्वासयामासुः	२२ ।३७

	=इदं प्रीतमना भूत्वा भगवान् नारायणो देवान् प्रति प्राह	२३ (६) ।२
	=बलिमुद्दिश्य प्रह्लादेन प्रयुक्तं रौद्रमप्रियं च वचनम्	२३ (९) ।१
	=कुरुक्षेत्रवासिन्या यक्षिण्या भयवचनम्, इदं निशम्य पापदेशजा स्त्री प्रणिपतिता बभूव	२३ (१३) ।४८
	=इदं पुत्रान् प्रति ब्रह्मर्षी रुषङ्गुरन्तकालेऽब्रवीत् पृथूदकतीर्थे नयनाय	२३ (१८) ।१७
	=वसिष्ठानयनविषयकं वचनं विश्वामित्रः सरस्वतीमब्रवीत्	२३ (१९) ।५
	=विश्वामित्रस्य वचनेन सरस्वती व्यथिताऽभवत्	२३ (१९) ।७
	=वसिष्ठस्य वचनं श्रुत्वा सरस्वती जलप्रवाहेण तं स्थानाच्चालयामास	२३ (१९) ।११
वज्रम्	=इन्द्रस्याऽऽयुधम्, इदमिन्द्रेणान्धकासुरोपरि प्रक्षिप्तं देवासुरसंग्रामे	१० ।६
	=अनेनान्धकासुरस्य साश्वध्वजसकूबरो रथो भस्मसात्कृतः	१० ।७
	=इदमन्धकासुरेण भूतले निपातितम्	१० ।८
	=वज्रवत् तुण्डवन्तो वायसा नरकपतितजनानां जिह्वामाकर्षन्ति	१२ ।१०
	=इदमिन्द्रः कात्यायन्यै ददौ	१९ ।१५
	=आयुधम्, इदं देव्या कात्यायन्या महिषासुरोपरि प्रक्षिप्तम्	२१ ।४६
	=इदं प्रहरणानां मध्ये शिवरूपमुक्तम्	२३ (२६) ।११३
	=आयुधम्, शक्रः समुद्रफेने वज्रमसृजत्	२९ ।९
	=आयुधम्, अनेनेन्द्रो नगोत्तमान् निहन्ति	३२ ।५८
	=आयुधम्, इदमादाय गणेश्वरो नन्दी दानवान् पराजितवान्	३३ ।४२
वज्री	=इन्द्रः, अनेन कुरुक्षेत्रे लिङ्गमेकं स्थापितम्	२३ (२५) ।३६
वञ्जुला	=नदी, इयं शुक्तिमत्पर्वतात् समुद्भूता	१३ ।३२
	=नदी, इयं सितोदरं गणं कार्त्तिकेयाय ददौ	३१ ।७६

वञ्जुलावती	=नदी, इयमृक्षपादात् प्रसूता	१३।२६
वटः	=वृक्षभेदः, अयं सर्वेषु महीरुहेषु = वृक्षेषु वरिष्ठः	१२।५४
	=वृक्षः, अयं मणिभद्रस्य कराग्रे जातः, अस्मिन्	९।५
	यक्षाधिपस्य मणिभद्रस्य सदा रतिर्वर्तते	१८।३
	=अस्योत्पत्त्यादिविषयकः प्रश्नो मार्कण्डेयेन सनत्कुमारं प्रति कृतः	२३ (२२)।८
	=वृक्षः, अयं स्थाणुरूपी सरोमध्ये विराजते	२३ (२२)।३८
	=स्थाणुवटः, अस्य स्थाणुलिङ्गस्य चान्तरे श्राद्धेन प्रीताः पितरो दुर्लभं ददति	२३ (२४)।१४
	=स्थाणुवटः	२३ (२४)।२५
	=स्थाणुवटस्य स्पर्शनान्मुक्तिर्लभ्यते	२३ (२४)।२५
	=वृक्षः कुरुक्षेत्रस्थः। अत्र परमेश्वरं ध्यात्वा चिन्तितं फलं लभ्यते	२३ (२४)।३१
	=स्थाणुवटनामकं तीर्थं कुरुक्षेत्रे स्थितम्, अस्योत्तरतः शुक्रतीर्थं विराजते	२३ (२५)।१
	=अस्य पूर्वभागे कुरुक्षेत्रे हस्तिपादेश्वरः शिवः स्थितः'	२३ (२५)।२५
वटुः	=अस्य रूपं समाधाय शिवः काल्याश्रममागतः	२५।४५-४६
वटेश्वरः	=कुरुक्षेत्रस्थं ब्रह्मणा स्थापितं लिङ्गम्, इमं दृष्ट्वा नरः परमं पदं प्रयाति	२३ (२५)।१२
वडवानलः	=शङ्करस्य नाम	२३ (२३)।३६ (१२)
वणिज्या	=वाणिज्यम्, अनया वैश्या व्यवहारं कृत्वा पावना भवन्ति	१३।१२-१३
वत्सः	=महादेवं प्रति केशवकृतं संबोधनम्	३।४६
	=गोवत्सः, अनेन सहिताया गोः प्रातःकाले स्पर्शः शुभसूचकः	१४।३६
	=गोवत्सः, अयं दोहनकाले शुचिर्मन्यते	१५।१५
वत्सनन्दिनौ	=प्रमथौ, इमावश्विनीकुमारौ कार्त्तिकेयाय दत्तवन्तौ	३१।६४
वत्सरः	=अस्मिन् सपिण्डीकरणमेकोद्दिष्टं च कर्म प्रेतमुद्दिश्य विधानतः कर्तव्यम्	१५।४८
	=अस्योत्कर्षसाधनाय केशवपूजा कार्या	१८।१८

वत्सरम्	=अस्याखण्डतायै सिद्धार्थकादिभिः स्नानमाचरणीयम्	१८ ।१६
वदनम्	=कालरूपिणः शिवस्य वदनस्थानं वृषराशिः	५ ।३२
	=नरकेषु पापिनां वदने तप्ता अयोगुडाः क्षिप्यन्ते	१२ ।२०
	=विष्णुशंकरादेर्वदनात् तेजो निःसृतम्	१९ ।६
	=अनेन कात्यायनी शशाङ्कं जिगाय	२० ।४
	=वराहस्य वदनमिव वदनवन्तो भूता देव्या हास्यात् समुद्भूताः	२१ ।१९
	=विवाहकाले ब्रह्मा शिवस्य शशधरप्रभं वदनं द्रष्टुं गिरिजामुवाच	२७ ।४७
	=अस्मान्निर्गतैर्वाक्सायकैराहतो जनो रात्र्यहानि शोचति	२८ ।८
	=कश्चिद् व्याघ्रस्तपसि स्थितायाः पार्वत्या वदनमवलोकयन्नेकदृष्टिर्बभूव	२८ ।१६
वधः	=गवादेर्वधकृत् पुरुषोऽपविद्धसंज्ञको भवति	१५ ।३४
	=शुम्भासुरस्य वधार्थाय देव्याः सम्भवं वक्तुं पुलस्त्यः प्रतिज्ञातवान्	२२ ।२
	=वामनेन कृतं स्वस्य वधं बलिः श्लाघ्यतरं मनुते	२३ (१०) ।३१
	=रावणस्य वधाय वेदवती शोककर्शिता सती सीतातीर्थे प्राणान् मुमुचे	२३ (१६) ।९
वधूः	=मृगराजस्य, इमामरण्ये मुदितः सन् क्रोष्टुकोऽनुधावति	२१ ।२९
वधूसरा	=नदी, इयं भारतवर्षस्थकुमारद्वीपे हिमवत्पादाद् निःसृता	१३ ।२२
वनम्	=दारुवनम्, अत्र हरस्य प्रवेशः, महर्षिभिस्तस्मै शापो दत्तः	६ ।५८-६६
	=दारुवनम्	६ ।८१; २३ (२३) ।१७
	=चित्रवनम्	६ ।९३
	=नन्दनम्	१२ ।४६
	=दण्डकम्	१९ ।२८

=उन्मादनम्, अत्र मृगयाव्याजेन संवरणो नाम राजा जगाम २२ ।३०
=वैभ्राजम् २२ ।३०
=वैभ्राजम्, अत्र संवरणो नाम राजा मृगयाव्याजेन जगाम २२ ।३०
=सर्वर्तुकुसुमम्, अत्र संवरणो जगाम २२ ।३१
=द्वैतवनम् २३ ।१२
=कुरुजाङ्गलम् २३ ।४१
=कुरुक्षेत्रवनम् २३ (६) ।१२
=कुरुक्षेत्रस्य, अस्मिन् अयुतवर्षपर्यन्तं घोरं तपोऽदितिश्चचार २३ (६) ।१२
=कुरुक्षेत्रवनम्, इदमदितेर्घोरेण तपसा सर्वकामप्रदमभूत् २३ (६) ।१४
=कुरुक्षेत्रस्थमदितिवनम् २३ (७) ।३४
=इदं कुरुक्षेत्रस्थितमदितिनाम्ना प्रसिद्धम्, अस्य महत्त्वं भगवता विष्णुनाऽदितिं प्रत्युक्तम् २३ (७) ।४
=अदितिवनम्, अस्य स्मरणमात्रेणापि नरः परं स्थानं याति २३ (७) ।५
=अदितिवनम् २३ (७) ।५
=द्वैतम्, अस्मिन् सरस्वती महानदी प्रविष्टा २३ (११) ।४
=इदं काम्यकं कुरुक्षेत्रस्थम् २३ (१३) ।४; २३ (२०) ।३२; ३३; २३ (२१) ।१
=इदं दितिवनं कुरुक्षेत्रस्थम् २३ (१३) ।४
=इदं व्यासवनं कुरुक्षेत्रस्थम् २३ (१३) ।४; २३ (१५) ।५४
=इदं फलकीनामाख्यं कुरुक्षेत्रस्थम् २३ (१३) ।४; २३ (१५) ।४५; ४८
=इदं मधुनामाख्यम् २३ (१३) ।५
=इदं शीताख्यं कुरुक्षेत्रस्थम् २३ (१३) ।५; २३ (१४) ।४४
=इदं सूर्यनामाख्यं कुरुक्षेत्रस्थम् २३ (१३) ।५
=इदमम्बुनामाख्यं कुरुक्षेत्रस्थम् २३ (१४) ।४२
=दण्डकारण्यम् २३ (१८) ।५
=इदं महावननामाख्यम् (दण्डकारण्यम्) २३ (१८) ।६

	=दण्डकारण्यम्, अत्र विचरतो रहोदरस्य जङ्घायां छिन्नं रक्षश्शिरो लग्नम्	२३ (१८)।७
	=इदं देवदारुनामाख्यम्	२३ (२२)।४६; २३ (२३)।३२
	=बालखिल्यमुनीनां तपोवनम्	२३ (२२)।६०
	=मनुपुत्रः क्षुवतः पुत्रस्य वेनस्य वदनं दृष्ट्वा वनं ययौ	२३ (२६)।७
	=सौगन्धिकम्	२३ (२६)।५५
	=द्वैतवनम्	२३ (२६)।५७
	=इदमिषुणा विद्धं परशुना हतं च पुनः संरोहति	२८।७
	=शरवणम्	३१।१५; २२; ४५
	=इदं शरवणाख्यमुदयगिरिसमीपस्थम्	३१।३८
वनस्पतिः	=सर्ज्जकदम्बमध्यस्थवनस्पतिवद् देवगणैर्वृतः शिवो रराज	२६।७१
वनानि	=सर्वेषु पुण्यवनेषु नन्दनाख्यं वनं प्रवरम्	१२।४६
	=इमानि विष्णोरेकांशांशकलातः प्रादुर्भवन्ति	२३ (८)।३७
	=एभिः सहिता पृथ्वी वामनस्य गत्या संक्षुभिता	२३ (१०)।१
	=कुरुक्षेत्रस्थेषु वनेषु भ्रमणाय तत्रत्यस्य यक्षेन्द्रस्य स्तवनेन प्रसादः प्राप्तव्यः	२३ (१२)।२१
	=इमानि सप्त सन्ति कुरुक्षेत्रान्तर्गतानि	२३ (१३)।१
	=कुरुक्षेत्रवर्तिनां सप्तवनानां नामानि	२३ (१३)।३
वनान्तः	=अयं फुल्लकोकनदादिभिरावृतः संवरणेन राज्ञाऽवलोकितः	२२।३२
वनौकसाः	=वानराः, एष्वृक्षराजो मुख्यः	१२।५४
वन्दनम्	=इदं नीतिशास्त्राणां दैत्यधर्मः प्रोक्तः	११।१६
	=अन्यजन्माख्यतीर्थे स्थितस्याश्वत्थवृक्षस्य वन्दनेन यमदर्शनं न भवति	२३ (१५)।३८
वन्यः	=अयं वनोद्भवफलादिस्नेहः, अस्य सेवनं वानप्रस्थाश्रमिभिः कार्यम्	१५।५८
वपुः	=कपिलाह्रदस्थितं कापिलं वपुरास्थितं शिवं दृष्ट्वा मुक्तिर्लभ्यते	२३ (१४)।२५
	=नारसिंहं वपुः कृत्वा विष्णुर्हिरण्यकशिपुं जघान	२३ (१५)।२९

वपुष्मती	=इमां मातरं श्वेतीर्थं कार्त्तिकेयाय ददौ	३१ ।१०१
वपूंषि	=इमान्यसुराणां विष्णुना हतानि	२३ (८) ।२८
वयांसि	=पक्षिणः, इमानि वामनाकृतिविष्णुस्थितानि प्रह्लादो ध्यानेन ददर्श	२३ (८) ।१३
वरः	=नारायणः प्रह्लादाय चतुरो वरान् ददौ	८ ।५८-६४
	=इमं शम्भुस्तुष्टः सन् रोहिण्यै प्रायच्छत्	१६ ।२५
	=इमं राजर्षिकुरुर्विष्णोः सकाशाद् अयाचत	२३ ।३२
	=अस्य प्रदानार्थं ब्रह्मणा देवाः पृष्टाः	२३ (४) ।१३
	=एष सर्वकामसमृद्धिदोऽदित्या समासादितः	२३ (९) ।१२
	=इमं वामनो बलये ददौ	२३ (१०) ।८५
	=अस्य याचनायै पितरः परशुराममादिष्टवन्तः	२३ (१४) ।५
	=पापान्मुक्तो भवेयमिति वरं परशुरामः पितॄन् याचते स्म	२३ (१४) ।८
	=मम ह्रदास्तीर्थभूता भवेयुरिति वरं परशुरामः पितॄन् ययाचे	२३ (१४) ।८
	=तपस्ते वर्धतामिति वरं पितरः परशुरामाय ददुः	२३ (१४) ।११
	=त्वं पापान्मुक्तोऽसीति वरं परशुरामाय पितरो ददुः	२३ (१४) ।११
	=यथाभिलषितं वरं पितरः कुरुक्षेत्रस्थेषु परशुरामस्य ह्रदेषु तर्पणेन प्रयच्छन्ति	२३ (१४) ।१२
	=श्रेष्ठः, शंकरश्चराचरजगतो वरः स्वीकृतः	२३ (१७) ।१७
	=शिवस्य नाम	२३ (२६) ।८८
	=अस्य वरणार्थं शिवो वेनमादिदेश	२३ (२७) ।१६
	=अस्य प्रार्थनायै ब्रह्मा देवीं कालीमाह	२८ ।१८
	=इमं व्याघ्रस्य ब्रह्मा प्रादात्	२८ ।२०
	=अस्य प्रार्थनायै ब्रह्मा शिवपत्नीं कालीं प्रत्याह	२८ ।२१
	=इन्द्रो नमुचयेऽवध्यत्वरूपं वरं प्रादात्	२९ ।५
	=अयं शिवेन सुचक्रनेत्राय प्रदत्तः	३२ ।११९
वरकच्छपः	=नारायणः, अस्य प्रह्लादकृता स्तुतिः	८ ।५१
वरणा	=योगशायिनो दक्षिणचरणाद् विनिर्गता	३ ।२७
	=नदी, अस्या असि - नद्याश्चान्तरे सूर्यो निपपात	१६ ।५२

	=अस्यां नद्यां रविर्यशेच्छया न्यमज्जत्	१६ ।५३
वरदः	=शङ्करः, अयं कात्यायन्यै त्रिशूलं ददौ	१९ ।१४
	=विष्णुः, अस्य वामनावतारेणासुरास्तेजोहीना बभूवुरिति प्रह्लादो बलिं प्रत्याह	२३ (८) ।१७
	=शंकरः, अनेन नाम्ना ब्रह्मा शंकरमस्तौत्	२३ (२३) ।५
	=शिवस्य नाम	२३ (२६) ।७२
वरदा	=देवी कात्यायनी, अनया महिषासुरादेर्वधः कृतः	१८ ।४१
वरदायी	=शिवस्य नाम	२३ (२६) ।८८
वराः	=अन्धकेन शिवाल्लब्धाः, तेषां नामानि	९ ।५
	=इमे पितृभिः परशुरामाय प्रदत्ताः	२३ (१४) ।१३
वराङ्गम्	=मूर्धा, देवासुरसंग्रामेऽन्धकासुरः पावकं वराङ्गमध्ये वरायुधेन समाजघान	१० ।५२
वरायुधः	=आयुधम्, अनेन देवासुरसंग्रामेऽन्धकासुरः हुताशनं वराङ्गमध्ये समाजघान	१० ।५२
वरार्थी	=एषां कृते भगवान् विष्णुर्वरदो भवति	२३ (५) ।१-३१
वराहः	=अस्य वदनमिव वदनवन्तो भूता देव्या हास्यात् समुद्भूताः	२१ ।१९
	=पर्वतः, अयं हिमाद्रिभवनमाजगाम	२६ ।४६
वराहकल्पः	=अस्मिन् ब्रह्मणः शिरः शिवेनापहतम्	२३ (२८) ।२०
वरुणः	=अस्य वाहनं जलधिसंज्ञकः शिशुमारः -द्र. - जलधिः, शिशुमारः	९ ।१७
	=जलेश्वरः	९ ।४७
	=अयं देवासुरसंग्रामे शिशुमारस्थो भूत्वा महासुराणां विनाशमकरोत्, अस्य विरोचनेन महायुद्धम्	१० ।२५
	=अयं देवासुरसंग्रामे विरोचनस्य कुञ्जरेण संमर्दितः	१० ।२८-३२
	=अयं विरोचनं तदीयं कुञ्जरं च प्रक्षिप्तवान्	१० ।३४-३४
	=अस्यान्धकासुरेण सह युद्धम्	१० ।४२

=दाक्षायणिनन्दनः, अयं देवासुरसंग्रामेऽन्धकपराक्रमं वीक्ष्य वेगात् समुद्रं प्रविवेश १० ।४३
सक्थिदेशः =नभो विक्रममाणस्य वामनस्य सक्थिदेशे चन्द्रादित्यौ स्थितावास्ताम् २३ (१०)।६३
सखी =आभिः सह भामिनी काली शिवस्य चरणौ ववन्दे २५।३७
=आभिः सह काली यथान्यायं शिवं पूजितवती २५।४७
=देव्या उमायाः सखी सोमप्रभाऽऽसीत् २५।६०
संकर्षणः =शंकरस्य नाम २३ (२३)।३६।(१२)
संकल्पः =अयं ब्रह्मसभायां ब्रह्माणमुपास्ते २३ (३)।३०
संक्रन्दनः =शिवस्य नाम २३ (२६)।७८
संक्रमः =प्रमथगणः, इमं विष्णुः कार्त्तिकेयाय प्रादात् ३१।६३
संक्लेशाः =शरीरस्य संक्लेशैः पुरुषः शुद्धिं नाप्नोति २३ (२२)।८०-८१
संक्षोभः =बलेर्यज्ञे वामनं वीक्ष्य सर्वे संक्षोभमापन्नाः परस्परं किञ्चिदपि नोक्तवन्तः २३ (१०)।३६

संख्या	=एकविंशतिः, रौरवादिनरकाणाम्	११ ।५०
	=नव, जम्बूद्वीपे नववर्षाणाम्	१३ ।२
	=अष्टौ, इलावृतादिवर्षाणाम्	१३ ।६
	=नव, भारताख्यवर्षीयद्वीपानाम्	१३ ।८
	=सप्त, कुमारद्वीपस्थकुलपर्वतानाम्	१३ ।१४
	=शतम्, सहस्रम्, कुमारद्वीपस्य मध्यवर्तिनां भूधराणाम्	१३ ।१५
	=सहस्रम्, क्षुद्रनदीनाम्	१३ ।३४
	=चत्वारः, ब्राह्मणस्याऽऽश्रमाः	१४ ।२
	=दश, सार्ववर्णिकधर्मस्याङ्गानाम्	१४ ।२
	=सप्त, स्वराणां रसातलानां च	१४ ।२५
	=सप्त, अर्णवानाम्, कुलाचलानाम्, ऋषीणाम्, द्वीपवराणाम्, भुवनानां च	१४ ।२७
	=त्रयः, लोकाः	१६ ।३३
	=अष्टादश, कात्यायन्या भुजानाम्	१९ ।९
	=कोटिः	२३ ।१४
	=पञ्च (योजनानि) समन्तपञ्चकतीर्थस्य विस्तारः	२३ ।१६
	=पञ्च, ब्रह्मवेदीनाम्	२३ ।१८
	=अष्टौ (अङ्गानि)	२३ ।२६
	=सप्त, (समन्तपञ्चकक्षेत्रे कुरुणा राजर्षिणा कृष्टक्रोशानाम्)	२३ ।२७
	=चत्वारः (वेदाः)	२३ (३) ।२९
	=षड्, ऋतूनाम्	२३ (३) ।३३
	=चतुर्भिः, पुरुषादीनाम् यैर्होत्रात्मानं विष्णुमुद्दिश्य हूयते	२३ (५) ।१-३२
	=द्वाभ्याम्, पुरुषादीनाम् यैर्होत्रात्मानं विष्णुमुद्दिश्य हूयते	२३ (५) ।१-३२
	=पञ्चभिः, पुरुषादीनां यैर्होत्रात्मानं विष्णुमुद्दिश्य हूयते	२३ (५) ।१-३२
	=अयुतम् = एतावद्वर्षावधिः कालोऽदितेस्तपसः	२३ (६) ।१३

=सप्त, लोकानाम्	२३ (८) ।१८
=त्रयः, लोकाः	२३ (८) ।१९; २३ (९) ।३४; २३ (१०) ।६५; २३ (११) ।१०; २३ (१५) ।६४
=त्रीणि (भुवनानि)	२३ (९) ।३३
=त्रयः (अग्नयः)	२३ (१०) ।१६
=तिस्रः (विद्याः)	२३ (११) ।१०
=त्रयः (धर्मादयः)	२३ (११) ।१०
=त्रयः (पावकाः)	२३ (११) ।१०
=त्रयः (वर्गाः)	२३ (११) ।१०
=त्रीणि (ज्योतींषि)	२३ (११) ।१०
=तिस्रः (अवस्थाः)	२३ (११) ।११
=त्रयः (गुणाः)	२३ (११) ।११
=त्रयः (देवाः)	२३ (११) ।११
=त्रयः (धातवः)	२३ (११) ।११
=त्रयः (वर्णाः)	२३ (११) ।११
=सप्त (कुरुक्षेत्रस्थवनानाम्)	२३ (१३) ।१
=पञ्च (रुद्रकृतनदानाम्)	२३ (१३) ।२७
=पञ्च, कुरुक्षेत्रस्थानां परशुरामेण पूरितानां हृदानाम्	२३ (१४) ।२
=शतम् (कल्पानाम्)	२३ (१५) ।५
=सप्त (सोमयज्ञानाम्)	२३ (१५) ।८
=सप्त (लोकानाम्)	२३ (१५) ।१३
=कोटिः, सरकतीर्थान्तर्गतकूपस्थरुद्राणाम्	२३ (१५) ।२२
=कोटिः, यज्ञानाम्	२३ (१५) ।६४
=सप्त सप्त सप्त च = एकविंशतिः	२३ (१५) ।७६
=सप्त, सरस्वतीनद्यः	२३ (१६) ।१७
=सप्त, कलशस्थमङ्कणरेतसः समुद्भूतानाम्	२३ (१७) ।५
=सप्त, कलशस्थस्य मङ्कणरेतसः	२३ (१७) ।५
=चत्वारः समुद्राः कुरुक्षेत्रे समाहताः	२३ (२०) ।१
=पञ्च (पातकानाम्)	२३ (२०) ।२०
=सप्त महर्षीणाम्	३२ ।१८

सङ्गः	=असत्सु नरेषु सङ्गं न कुर्यात्	१४ ।३९
	=चतुर्थे संन्यासाश्रमे सर्वसङ्गपरित्यागः कर्तव्यः	१५ ।५९
संगमः	=कुरुक्षेत्रस्थे सरस्वतीकौशिक्योर्नद्योः संगमे स्नानेन परमं पदमवाप्यते	२३ (१३) ।१८
	=कौशिकीनद्या दृषद्वत्याः । अस्मिन् स्नानेन सर्वपापैः प्रमुच्यते नरः	२३ (१५) ।५७
	=अरुणायाः सरस्वत्याश्च संगममृषयोऽकल्पयन्	२३ (१९) ।४०-४१
	=कुरुक्षेत्रस्थितेऽरुणासरस्वत्योः संगमे त्रिरात्रोपोषणपूर्वकं स्नानेन सर्वपापानि नश्यन्ति	२३ (१९) ।४१
	=कुरुक्षेत्रस्थितोऽरुणासरस्वत्योः संगमो लोकविश्रुतोऽस्ति	२३ (१९) ।४१
	=अरुणासंगमः (कुरुक्षेत्रस्थितः)	२३ (१९) ।४२
सङ्गिनी	=अस्या नाम्ना कुरुक्षेत्रे तीर्थमेकं प्रसिद्धम्	२३ (१४) ।३४
सङ्गिनीतीर्थम्	=कुरुक्षेत्रस्थितम्, अत्र गत्वा नरो मुक्तिं प्राप्नोति	२३ (१४) ।३४
संग्रहः	=प्रमथः, इममब्धिः कार्त्तिकेयाय प्रददौ	३१ ।६८
संग्रामः	=अयं देवासुरयोः परस्परं प्रवृत्तः	१० ।१
	=अस्मिन् महिषासुरस्य सम्मुखं गन्तुं कोऽपि न शशाक	२० ।२७
संघाः	=मुनिसिद्धानाम्, इम आकाशस्थाः सन्तो देवासुरसंग्रामं पश्यन्ति स्म	९ ।५२
	=गन्धर्वाणाम्, विद्याधराणाम्, सिद्धानाम्	१० ।५७
	=सुरसंघाः	२१ ।५२
	=सिद्धसंघाः	२१ ।५२
	=असुरसंघाः	२३ (२) ।१२
सचक्रकम्	=तीर्थं कुरुक्षेत्रस्थम्	२३ (२१) ।५
सचिवः	=अस्मिन् राज्यमाधाय वेनपुत्रो राजा पितुस्त्राणायोत्तरां भूमिं जगाम	२३ (२६) ।३४
	=महिषासुरस्य सचिव आसीद् रक्तबीजः	२९ ।१६
सच्छास्त्रम्	=अस्य निन्दकैः सहाऽऽलापं कृत्वा सूर्यदर्शनेन शुद्धो भवति	१५ ।२४

संचयः =प्रेतस्यास्थिसंचयः प्रथमे चतुर्थे सप्तमे वाऽह्नि कर्तव्यः १५।४२

संचरः =असुरः, अस्य वायुना सह युद्धम् ९।४७

संचरस्थानम् =मेषादिद्वादशराशीनाम् ५।४६

संज्ञा =इमां कामबाणपीडितः सन् मूर्च्छितः संवरणो नाम राजा गन्धर्वैः सेचितेन वारिणा लब्धवान् २२।३६
=इमां नारायणस्य बाणेन भिन्नहृदयः प्रह्लादोऽचिरेणैवावाप ८।२७
=सरः कुरुक्षेत्रे स्थितम्, अत्र ब्रह्मा सृष्टिकामनया दीर्घकालं तपस्तेपे २३ (२८)।३३

सत् =सत्पदं सरस्वत्यां संयोगं लभते २३ (११)।६
=एतत् सर्वं सरस्वत्या रूपम् २३ (११)।१७

सती =इयं दक्षस्य दुहिता, शंकरस्य प्रिया भार्या च १।५
=एतस्या हिमवतो गेहे जन्म १।६
=शंकरेण सहास्याः संवादः १।१६
=एनामादाय शिवस्य मन्दरगिरावागमनम् २।५
=दक्षयज्ञ इयं न निमन्त्रितेति मन्युनाऽभिप्लुता सा पञ्चत्वमगमत् ४।९
=शङ्करेण पृष्टा विलपन्ती जया तावदेतस्या मरणकारणमुक्तवती ४।१०-१५

सत्क्रिया =अस्यां रतिः परलोकप्रदायिका १६।३

सत्त्वम् =बलेः परमं सत्त्वं दृष्ट्वा लक्ष्मीस्तत्समीपं स्वयमागता २३ (२)।१५
=गुणः, अस्मिन् वामनः स्थितः २३ (१०)।१३
=गुणः, सत्त्वं स्थितिगुणमुच्यते २३ (२२)।२०
=गुणः, इदं शिवरूपमुक्तम् २३ (२६)।१२२

सत्पथः =अस्मिँल्लोके स्थिते सति दैत्यराजे बलिरभिषिक्तो बभूव २३ (२)।१०
=अत्र वर्तमानानां यज्ञफलप्राप्तिविषये शौनकादीनां लोमहर्षणेन सह संवादः २३ (१६)।२५

=अस्य मार्गो लोकेषु प्रवर्तितः २३ (२२)।८२

सत्यः =आसां सर्वासां मध्ये हिमवत्सुता = पार्वती वरिष्ठा १२।५५

=देवी, अस्यां प्रनष्टायां रुद्रो ब्रह्मचारी भूत्वा तपश्चकारं २२।९

=दक्षस्य कन्या, इयं दक्षकोपतो योगदृष्ट्या प्राणानुत्ससर्ज २६।१०

सत्यता =इयं ब्राह्मणस्य परमवित्तेषु परिगणिता २३ (२२)।२६

सत्यम् =एतद् ऋषीणां धर्मः ११।२२

=कूटसत्या जना महारौरवादिनरकेषु तिष्ठन्ति १२।४०

=इदं सर्वासु धर्मविधिक्रियासु श्रेष्ठम् १२।४६

=धर्मस्याङ्गम् १४।२

=अनेन हीनं न वक्तव्यम् १४।३८

=अनेन परलोकप्राप्तिर्भवति १६।३

=महिषासुरोक्तं वाक्यं सत्यं वदेति देव्या दूतो निर्दिष्टः २०।२३

=अस्य कर्षणे राजा कुरुः प्रवृत्तोऽभूत् २३।२५

=कश्यपः सत्यवादी बभूव २३ (३)।११

=अदित्या विष्णुस्तवने सर्वेश्वरं विष्णुमधिकृत्य सर्वं सत्यमेवोक्तम् २३ (६)।३५

=सत्येन कथनेन मे मनोरथाः पूर्यन्तामित्यदित्या विष्णुर्नमस्कृतः स्तुतश्च २३ (६)।३६

=एतद् वामनस्य वाणीस्थानीयमभूत् २३ (१०)।५६

=आत्मरूपाया नद्या उदकं सत्यं भवति २३ (२२)।२४

=इदं व्रतानां मध्ये शिवरूपमुक्तम् २३ (२६)।११३

=शिवस्य नाम २३ (२६)।१३३

सत्यसन्धः =प्रमथः, इमं मित्रः कार्त्तिकेयाय प्रादात् ३१।७२

सत्या =ईदृशी वाक् परलोकप्रदायिका १६।३

सत्रम् =यज्ञः, सत्रयाजिभिर्ऋषिभिः सरस्वती ध्याता २३ (१६)।२७

सत्सन्तजा =नदी, इयमृक्षपादात् प्रसूता १३।२७

सदनम् =विरिञ्चिसदनम् १२।४६
=ब्रह्मणः सदनम्, अत्र यक्षराक्षसादयः सर्वे भास्करस्य पतनं वेदयितुं गतवन्तः १६।५६
=ब्रह्मणः, सदनं प्रति गमनाय कश्यप इन्द्रादीनादिदेश २३ (३)।१६
=ब्रह्मणः सदनं प्राप्नुवन्ति श्रद्धया कुरुक्षेत्रे निवसन्तो जनाः २३ (२०)।१९
=बालखिल्याख्या मुनयो ब्रह्मणः सदनं जग्मुः २३ (२२)।७३

सदस्याः =शक्रादयो दक्षयज्ञस्य सदस्याः २।८-११
=इमान् यज्ञकर्माधिकारस्थान् बलियज्ञे वामनस्तुष्टाव २३ (१०)।३८
=इमे बलियज्ञस्थिता बलियज्ञे समुपस्थितं वामनं वीक्ष्य साधुशब्दानुदीरितवन्तः २३ (१०)।३९

सदाचारः =गृहस्थाश्रमे वसन् सदाचाररतो द्विजः पितृदेवातिथीन् संप्रीणयेत् १४।१२
=अस्य लक्षणविषयकं प्रश्नं सुकेशिर्महर्षीन् प्रति कृतवान् १४।१३
=यः पुरुषः सदाचारमुल्लङ्घ्य प्रवर्तते तस्य यज्ञदानतपांस्यपि भूतये न भवन्ति १४।१६
=अस्मिन् यत्नः कर्तव्यः १४।१७
=अस्य स्वरूपकथनविषयकमाश्वासनम् १४।१८
=अस्य वेत्ता शौचार्थं वल्मीकस्यैव मृदमाहरेत् १४।३२
=अस्य सेवनं परलोकप्रदायकम् १६।३
=अनेन समन्विता निशाचरा आसन् १६।३
=अस्मिन् निशाचरा निरता आसन् १६।३५

सदाशिवः =शंकरस्य नाम २३ (२३)।३६ (५)

सद्भावः =बालखिल्यमुनिषु कश्चिदेको मुनिवरस्तापसशंकरस्य सद्भावं वेत्तुं न प्राभवत् २३ (२२)।७१

सद्म =शनैश्चरस्य सद्म। कुम्भराशिः। कालरूपिणः शिवस्य जङ्घास्थानम् ५।४१

सद्यः =विषोद्बन्धनादिभिर्मृते सति सद्यः शौचं विधीयते १५।४५

सनकः	=अयं सुप्रभातकरणाय प्राभातिकमङ्गलपद्येन प्रार्थ्यते	१४ ।२५
	=एतदाद्या वामनं ज्ञातुमीशाना न सन्ति	२३ (९) ।२८
	=अयं धर्मस्याहिंसायाश्च पुत्र आसीत्	३४ ।७०
सनकाद्याः	=एते महर्षयो ब्रह्मणो मनसा संजाताः	२३ (२२) ।३९
सनत्कुमारः	=अयं सुप्रभातकरणाय प्राभातिकमङ्गले प्रार्थ्यते	१४ ।२५
	=एनं मार्कण्डेयो मुनिः सरोमाहात्म्यं पप्रच्छ	२३ (२२) ।४-५
	=एष ब्रह्मणः पुत्रः	२३ (२२) ।६
	=देवः	२३ (२२) ।१३
	=एतस्य मार्कण्डेयेन सह संवादः	२३ (२२) ।१५; २३ (२३) ।१; २३ (२४) ।१; २३ (२५) ।१; २३ (२६) ।२; २३ (२७) ।१; २३ (२७) ।२४; २३ (२८) ।२
	=एष धर्मस्याहिंसायाश्च पुत्रः	३४ ।७०
	=एतस्य ब्रह्मणा सह संवादः	३४ ।७३-७८
	=एष योगं वक्तुं ब्रह्माणं प्रार्थितवान्	३५ ।३०
	=एतस्य मातापितृभ्यां धर्माहिंसाभ्यां सह संवादः	३५ ।५०
	=एनं प्रति योगाचार्यो ब्रह्मा योगं द्वादशपत्रकं प्रोवाच	३५ ।५३-७१
सनन्दनः	=अयं सुप्रभातकरणाय प्राभातिकमङ्गलपद्ये प्रार्थितः	१४ ।२५
	=एष धर्मस्याहिंसायाश्च पुत्रः	३४ ।७०
सनातनः	=धर्मस्य नाम	४ ।२७
	=अयं सुप्रभातकरणाय प्राभातिकमङ्गलपद्येन प्रार्थ्यते	१४ ।२५
	=वामनः, अयं कश्यपस्य गृहेऽवतीर्णः	२३ (१०) ।४
	=तीर्थवंशः, सरस्वत्याः पार्श्वभागे स्थितस्यास्य विस्तरेणाभिधानाय महर्षयो लोमहर्षणमूचुः	२३ (११) ।२

=एनं हृदयस्थं देवं ते पश्यन्ति ये कुरुजाङ्गलं नित्यं सेवन्ते २३ (१२) ।१४
=एतत्पदवाच्यः शिव उक्तः २३ (२६) ।११५
=शिवस्य नाम २३ (२६) ।१४१
=अयं धर्मस्याहिंसायाश्च पुत्रः ३४ ।७०
=नराः, प्लक्षादि-शाकान्तेषु द्वीपेषु ये वसन्ति ते देववद् मोदन्ते ११ ।४४-४५

सनातनी =सरस्वती, अस्या रूपम् २३ (११) ।१२
=सरस्वती २३ (११) ।१३
=देवी, इयं कुरुक्षेत्रस्थिते कलसी(शी)तीर्थे स्थिता २३ (१५) ।१८
=राक्षसीनां योनिदोषेण राक्षससंततिर्वर्धत इत्येषा सनातनी गतिरस्ति २३ (१९) ।३५

सन्तः =इमे तं पुरुषं नग्नमाहुर्यस्य कुले वेदादेरभावो वर्तते १५ ।३५
=एतेषां मतानुसारेणान्यकामा कन्याऽन्यस्मै न देया भवति २२ ।५४
=एतेषां गतिर्भगवान् विष्णुः २३ (८) ।१८
=एत आत्मसंबोधसुखे प्रविष्टमेव ज्ञेयं प्रवदन्ति २३ (२२) ।२५

सन्ततिः =वृथा दारपरिग्रहाद् अस्या हानिर्भवति १४ ।४३
=पुत्रस्य सन्ततिं दृष्ट्वाऽऽत्मनः शुद्धये वानप्रस्थाश्रमं गच्छेत् १५ ।५६
=राक्षससंततिः, इयं राक्षसीनां योनिदोषेण वर्धते २३ (१९) ।३५

सन्तप्ताः =ईदृशोऽम्बुबिन्दवः पवित्रा भवन्ति १५ ।१०

संतानिका =इमां मातरं श्वेततीर्थं कार्त्तिकेयाय ददौ ३१ ।१००

संदंशः =नरकः, अयं पुष्करद्वीपस्थनरकेषु त्रयोदशः ११ ।५७

संदर्शनम् (नः) =सर्वभूतानामदृश्योऽपि विष्णुरदित्याः संदर्शने स्थितोऽभूत् २३ (७) ।१

सन्देहः =यज्ञेनाऽऽराधितो हरिः = वामनो मदीय-यज्ञस्थलमायातीत्यत्र नास्ति संदेह इति बलिः शुक्रमाह २३ (१०) ।३०

	=ब्रह्मावर्ते स्नात्वा नरो ब्रह्मज्ञानसमन्वितः सन् स्वेच्छया प्राणान् परित्यक्तुं प्रभवतीत्यत्र सन्देहो नास्ति	२३ (१४)।३६
सन्धयः	=वामनस्य सर्वसन्धिषु मरुतो देवाः स्थिता आसन्	२३ (१०)।५६
संधाता	=शिवस्य नाम	२३ (२६)।१३२
सन्ध्या	=आचमनानन्तरं विद्वान् करेण शिरः स्पृशेत् ततश्च संध्यामुपासीत	१४।३४
	=ब्रह्मणः शापाद् रागवती = ज्येष्ठा गिरिकन्या सन्ध्या बभूव	२५।१९-२०
सन्निधानम्	=इदं स्वलिङ्गे शंकरश्चकार	२३ (२३)।३६
संनिपातः	=नारायणप्रह्लादयुद्धदर्शनेच्छयाऽम्बरे देवानां संनिपातोऽभवत्	८।८
संनिहती	=तीर्थम्, अत्र कृतस्य श्राद्धस्य फलं कुमाराभिषेकतीर्थे श्राद्धेन प्राप्यते	२३ (२०)।९
संनिहितम्	=सरः कुरुक्षेत्रस्थम्	२३ (२६)।३३
सपिण्डजाः	=एभिः प्रेतस्य क्रिया कार्या	१५।४३
सपिण्डीकरणम्	=इदं प्रेतमुद्दिश्य विधानतः कर्तव्यम्	१५।४८
सप्त	=द्वीपानि	११।३०
	=द्वीपाः	११।४३
	=कुमारद्वीपस्थाः कुलपर्वताः	१३।१४ १४।२५
	=रसातलाः	१४।२५
	=अर्णवाः, एषां सुप्रभातकरणार्थं प्राभातिकमङ्गलेन प्रार्थना क्रियते	१४।२७
	=अर्णवाः, कुलाचलाः, ऋषयः, द्वीपवराः, भुवनानि। एतत् सर्वं सुप्रभातकरणाय प्रार्थ्यते	१४।२७
	=पुरीषादेरुत्सर्गानन्तरं पाणितले सप्तवारं मृदं शौचार्थमाहरेत्	१४।३१
	=क्रोशाः, एतान् समन्तपञ्चकक्षेत्रे राजर्षिः कुरुः प्रत्यहमकृक्षत	२३।२७

	=संख्या लोकानाम्	२३ (८) ।१८; २३ (१५) ।१३
	=कुरुक्षेत्रमध्यवर्तीनि वनानि	२३ (१३) ।१
	=कुरुक्षेत्रवर्तिनां सप्तवनानां नामानि	२३ (१३) ।३-५
	=एतावतां सोमयज्ञानां फलं लभ्यते सप्तर्षीणां प्रसादेन ब्रह्मकुण्डेषु स्नानेन	२३ (१५) ।८
	=संख्या, सप्त सप्त सप्त च =एकविंशतिः	२३ (१५) ।७६
	=सप्त सप्त सप्त च कुलानि कुलोत्तारणाख्ये तीर्थे स्नात्वा ब्रह्मचारी गृहस्थो वानप्रस्थो यतिश्च तारयति	२३ (१५) ।७६
	=संख्या सरस्वतीनद्याः	२३ (१६) ।१७
	=संख्या ऋषीणां कलशस्थमङ्कणरेतसः समुद्भूतानाम्	२३ (१७) ।५
	=संख्या कलशस्थमङ्कणरेतसः	२३ (१७) ।५
	=ऋषयः, एते प्रजापतयोऽभवन्	२३ (२२) ।४०
सप्तदशोऽध्यायः	=पुलस्त्येन नारदं प्रति केशवशयनस्य-देवादिशयनस्य च विधेः कथनम्, अशून्यशयनाख्यायां द्वितीयायां हरेरर्चनादिविधिकथनम्, सुरादीनां क्रमशो विबोधनम्, भाद्रमासे कालाष्टम्यां शंकरार्चादिकस्य, आश्विनमास उपवासादिकस्य, कार्त्तिकमासे स्नानादिकस्य, मार्गशीर्षमासे रुद्रार्चादिकस्य, पौष-माघ-फाल्गुन-चैत्र-वैशाख-ज्येष्ठ-आषाढ-श्रावणमासेषु स्नानपूजादिकस्य च विधिकथनम्	१७ ।१-६४
	=मङ्कणस्य सिद्धिप्राप्तिविषयकः प्रश्नो महर्षीणाम्, मङ्कणस्य कश्यपपुत्रस्याप्सरोभिः समं सरोवरे स्नानम्, तत्र क्षोभात् ततो रेतःपतनम्, तस्य कलशे स्थापनम्, तस्य सप्तभागेषु विभक्तिः, ततो वायुवेगप्रभृतीनां सप्तर्षीणामुत्पत्तिः, मङ्कणस्य करे शाकरसस्रुतिः, तस्य नृत्यप्रवृत्त्या जगतो नर्तनम्, देवादीनां महादेवं प्रति प्रार्थना	

	तदीयनृत्यावरोधाय, शंकरस्य मङ्कणेन सह संवादः; मङ्कणेन शिवस्य स्तुतिः, शिवेन मङ्कणाय वरप्रदानम्, शिवार्चनमाहात्म्यं च	२३ (१७) ।१-२३
सप्तमं नरकम्	=राजभागहरादिरूपम्	३५ ।७
सप्तमः	=अस्मिन्नहनि प्रेतस्यास्थिसंचयः कार्यः	१५ ।४२
सप्तमी	=तिथिः, अस्यां भगवान् रविः स्वपिति	१७ ।१५
सप्तमोऽध्यायः	=वामनपुराणेऽस्य प्रह्लादयुद्धमिति नामधेयम्। बदरिकाश्रमे नारायणेन कन्दर्पादीन् प्रति स्वागतवचनम्, नारायणो मञ्जरीमादाय सर्वाङ्गसुन्दरीं बालां विनिर्ममे, कन्दर्पेणोर्वश्यां रतिसौन्दर्यस्योद्भावनम्, उर्वशीमादाय कन्दर्पादिर्देवराजसमीपगमनम्, नारायणचरितेनेन्द्रादेर्विस्मयः, प्रह्लादस्य शासनव्यवस्था, च्यवनमहर्षेर्नर्मदायां स्नानार्थं गमनम्, भुजगश्च्यवनं पाताले नीतवान्, च्यवनप्रह्लादसंवादः प्रह्लादस्य दानवेन्द्रैः सह नैमिषारण्ये गमनं स्नानादिकं च, प्रह्लादेन सालवृक्षे मुनिबाणधनुषामवलोकनम्, तस्य नारायणेन सह संवादो युद्धारम्भश्च, गदामादाय वेगेन समायान्तं प्रह्लादं वीक्ष्य नरस्य युद्धार्थमागमनम्	७ ।१-६५
	=लोमहर्षणेन सह द्विजानां संवादः, भगवतो विष्णोरदित्यै वरदानायाऽऽविर्भावः, विष्णोरदित्या सह संवादः, अदित्या वरयाचना, विष्णुनाऽदित्यै वरदानम्, अदित्या सह विष्णोः संवादः, अदित्या गर्भे विष्णुः स्थितोऽभूत्, तेन दैत्यानां तेजसो हानिर्बभूव	२३ (७) ।१-१६
सप्तर्षयः	=एषां प्रसादेन कुरुक्षेत्रस्थेषु ब्रह्मर्षिकुण्डेषु स्नानेन सप्तसोमफलं लभ्यते	२३ (१५) ।८
	= 'भरद्वाज-गौतम-जमदग्नि-कश्यप-विश्वामित्र-वसिष्ठ-अत्रि' इत्येते	२३ (१५) ।८-९

=एतान् समुद्दिश्य ब्रह्मोदुम्बरतीर्थे पृथक् स्नानेन सप्तलोकाधिपत्यं प्राप्यते २३ (१५) ।१३
=एतेषां शिवेन सह संवादः २६ ।८
=एत उमाया याचनार्थं हिमालयं जग्मुः २६ ।१२
=एत उमाया याचितारोऽभूवन् शिवस्य कृते २६ ।४१
='एत मम सुतां याचितारः' इति हिमवान् पर्वतान् प्रत्याह २६ ।५३
=एषां हिमवता सह संवादः २६ ।६२
=एतैः सार्धं त्रिपुरान्तकः शिवो गिरिराजवेश्मनि जगाम २७ ।३४
=एतान् हिमवान् गिरिजाविवाहकाले समुपविष्टः सन्नवालोकयत् २७ ।४०

सप्तलोकपरायणः =विष्णुः, अयं शिवलिङ्गस्यान्तं ज्ञातुं पातालादिषु गतवान् ६ ।७६

सप्तविंशोऽध्यायः =सनत्कुमारमार्कण्डेययोः संवादः, शिवेन वेनाय वरप्रदानम्, वेनप्रोक्तशिवस्तवस्य फलकथनम्, स्थाणुलिङ्गस्य माहात्म्यकथनम्, वेनेन शिवाद् वरप्रार्थना, वेनस्य शुनश्च दिव्यदेहप्राप्तिस्ततस्तयोः शिवमन्दिरगमनं च, वेनपुत्रस्य यज्ञादिकर्मकथनम्, तस्य कुरुक्षेत्रमुपगम्याऽऽत्मेच्छया तत्र तनुत्यागः, परमपदावाप्तिश्च, स्थाणुतीर्थप्रभावकथनम् २३ (२७) ।१-३५

=नन्दी विवाहोत्सवे समागतानां देवानामुप-स्थितिमसूचयद् विभवे शिवाय, शिवेन ब्रह्मादीनां स्वागतकार्यम्, अदित्या शिवस्यालङ्करणम्, विष्णुप्रभृतिदेवानां विवाहयात्रा, शिवस्य शैलराजपुरे प्रवेशः, नगरस्त्रीभिः शिवस्य दर्शनम्, काल्याः समलङ्करणे कन्याविवाहोत्सुकानां जनानां व्याकुलीभावः, देवैः शंकरकालीचेष्टितावलोकनम्, उमा-शंकरयोः क्रीडा, हिमवता कन्यादानं शिवाय, शिवेनोमाया अङ्गीकरणम्, पाणिपीडनम्, ब्रह्मा शिवमुखाव-

	लोकनार्थं गिरिजां प्रेरयामास, ब्रह्मणा सह गिरिजायाः संवादः, शिवमालिनीसंवादः, कालीवदनावलोकनेन ब्रह्मणः शुक्रच्युतिः, शिवब्रह्मसंवादः, शिवस्य मन्दरगिरावागमनम्, ब्रह्मादीनां विसर्जनम्, शिवस्य तत्र वासः	२७ ।१-६२
सप्तसारस्वतम्	=एतदाख्यं तीर्थं कुरुक्षेत्रे स्थितम्	२३ (१६) ।१७-४०
	=तीर्थम्, अस्मिन् स्नात्वा शिवार्चनेन दुर्लभमवाप्यते	२३ (१७) ।२२
	=तीर्थम्, इदं चतुर्मातृः कार्त्तिकेयाय ददौ	३१ ।९२
सभा	=मठानां विध्वंसका नरके निपतन्ति नरक-यातनां च प्राप्नुवन्ति	१२ ।२३-२४
	=एतद्गतानां यः सभ्यः पक्षपातं समाश्रयेत्, स कुक्कुटसंज्ञकः स्यात्	१५ ।३२
	=ब्रह्मणः, अस्यामिन्द्रादयो देवाः कश्यपेन सहोपस्थिता बभूवुः	२३ (३) ।१९
	=ब्रह्मणः, अस्यां लोकपितामहो ब्रह्माऽऽस्ते	२३ (३) ।२५
	=ब्रह्मणः, अस्यां त्रिदशैः सार्धं कश्यपः प्रविश्य ब्रह्माणं प्रणनाम	२३ (३) ।३४
	=सभावासिनः प्राणिनो वेनेन नमस्कृताः	२३ (२६) ।१५८
	=हिमालयस्य सभा, एतस्यामुदयमेर्वादयः प्रधाना गिरयोऽन्ये क्षुद्रपर्वताश्चोपविष्टाः	२६ ।४९
सभातलम्	=हिमाद्रिरर्घ्यादिना संपूज्य सप्तर्षीन् सभातलमानीतवान्	२६ ।२५
सभ्यः	=अयं सभागतानां जनानां यदि पक्षपातमाश्रयेत् तर्हि कुक्कुटसंज्ञकः स्यात्	१५ ।३२
समता	=इयं ब्राह्मणस्य परमवित्तेषु परिगणिता	२३ (२२) ।२६
समन्तपञ्चकम्	=तीर्थं द्वैतवनस्थम्, अत्र राजा कुरुर्जगाम	२३ ।१६
	=महाफलप्रदं क्षेत्रम्	२३ ।२१

=अस्य प्रमाणम्, इदं पितामहस्योत्तरवेदिः २३ (१) ।१४

समन्तपञ्चका =ब्रह्मण उत्तरा वेदिः २३ ।२०

समयः =अस्मिन् नष्टे इन्द्रं नमुचिवधप्रवृत्ता ब्रह्महत्याऽस्पृशत् २९ ।१०

समागमः =वीराणां समागमो दानेन श्लाघ्यो भवति २३ (१०) ।२३

समाधिः =अयमात्मरूपाया नद्या उदकरूपोऽभिमतः २३ (२२) ।२४

समानः =अयं शिवरूप उक्तः २३ (२६) ।१२३

समाप्तिः =व्रतस्य समाप्तौ विष्णोस्तेजो वरप्रदानार्थमागमिष्यतीति ब्रह्मा देवान् प्राह २३ (४) ।१२

समासः =अनेन सनत्कुमारो मार्कण्डेयं प्रति ब्रह्म प्रोक्तवान् २३ (२२) ।२७

समितिः =अस्या वामनाय दानार्थं बलिः प्रतिज्ञातवान् २३ (१०) ।४१

समिधः =एताः पार्वत्याः सख्यः समानिन्युः २५ ।४२

समीरः =नारायणः, अयं प्रह्लादेन स्तुतः ८ ।५३

=भूतः, अनेन समं पूर्वं प्रजा प्रपितामहेन सृष्टा २३ ।४४

समुद्भवः =देव्याः समुद्भवविषयकः प्रश्नो नारदेन पुलस्त्यं प्रति कृतः २२ ।१

समुद्रः =क्षीरोदः ७ ।१०

=घृतोदः ११ ।३७

=दध्योदः ११ ।३७

=स्वादूदः ११ ।३९

=स्वादूदः, अस्य प्रमाणम् ११ ।४२

=अयं कात्यायन्यै मालां ददौ १९ ।१६

=तोयनिधिः २३ (८) ।२२

=अब्धिः २३ (९) ।४१; २३ (१०) ।२; ३१ ।६८

=अत्र कार्तिकेयस्य भयाद् बलिपुत्रो बाणः प्रविवेश ३२ ।८५

=क्षीरसमुद्रः ३४ ।५९

	=अम्बुनिधिः	३२।२५
समुद्राः	=महाब्धयः	२३ (७)।१४
	=एते क्षुभिता बभूवुर्मधुसूदने गर्भस्थे सति	२३ (८)।५
	=इमान् वामनाकृतिविष्णुस्थितान् प्रह्लादो ध्यानेन ददर्श	२३ (८)।१३
	=एते विष्णोरेकांशांशकलातः समुद्भवन्ति	२३ (८)।३७
	=मकरालयाः	२३ (१०)।६
	=कुरुक्षेत्रस्थेऽरुणासंगमे समुद्राश्चत्वारो दर्विणा (ऋषिणा) आहृताः	२३ (२०)।१
	=अण्डस्य गर्भोदकमेव समुद्राः सन्ति	२३ (२२)।३६
	=एते स्थाणुतीर्थमायान्ति	२३ (२४)।४
	=एते शिवरूपा उक्ताः	२३ (२६)।११६
	=शंकरस्य कुक्षिश्चतुःसमुद्ररूपा	२३ (२६)।१५२
	=समुद्रगताः प्राणिनो वेनेन नमस्कृताः	२३ (२६)।१५७
	=एते स्वस्तिविधानार्थं प्रार्थिताः	३२।२०
समुद्रेशयः	=शंकरस्य नाम	२३ (२३)।३६ (२१)
समृद्धिः	=स वैश्यो धनस्य समृद्धिं प्राप्नोति यो बलिविष्ण्वादीनां कथां शृणोति	२३ (१०)।९१
संबन्धः	=धार्यधारकभावः	२३ (१०)।८
सम्भवः	=देव्याः, अस्य कथनाय पुलस्त्येन नारदं प्रति प्रतिज्ञातम्	२२।२
	=पार्वत्याः सम्भवं वक्तुं पुलस्त्यः प्रतिज्ञातवान्	२२।८
संभाषणम्	=रजोमत्या स्त्रिया तस्करैश्च सह संभाषणं न कुर्यात्	१४।४५
संभूतिः	=इयं कुब्जाख्यतीर्थस्य महर्षिभिर्लोमहर्षणं पृष्टा	२३ (२१)।१
संभोगाः	=इमां त्वं भुङ्क्ष्वेति वामनो बलिमाह	२३ (१०)।७६
	=स्वर्गनारकान् संभोगानात्मा कर्मवशाद् भुङ्क्ते	२३ (२२)।७९
सम्भ्रमः	=अस्मिन्नकिञ्चनं पुत्रादिबन्धुवर्गं यो मानवः परित्यजति स श्वयोनिं प्राप्नोति	१२।२६

संमानम् = ऋषेर्मङ्कणस्य संमाननार्थाय सरस्वती कुरुक्षेत्रतीर्थं प्रविष्टा २३ (१६)।३४

संमार्जनम् = वेश्मनः संमार्जनाद् भूमिर्विशुध्यते १५।११

सरः = उत्तरमानसम् १२।४६

= अस्मिन् स्नानं करणीयम् १५।२२

= पृथूदकः २३ (१)।१

= पृथूदकः, अस्य प्रभावं द्विजा लोमहर्षणं प्रति पृष्टवन्तः २३ (१)।१

= पृथूदकः, इदं रन्तुकादौजसं पावनाच्च चतुर्मुखपर्यन्तं संनिहितं वर्तते २३ (१)।५

= पृथूदकं नाम, अस्य प्रमाणं कलिद्वापरयोर्मध्ये व्यासेनोक्तम् २३ (१)।६

= ब्रह्मसरः, कुरुक्षेत्रस्थम् २३ (११)।२४

= कुरुक्षेत्रस्थम्, अत्र स्नानेन ब्रह्मज्ञानमुत्पद्यते २३ (१२)।११

= कुरुक्षेत्रस्थम् (ब्रह्माख्यम्), एतत्सेवमाना नराः परं पदं प्राप्नुवन्ति २३ (१२)।१५

= कुरुक्षेत्रस्थस्य सरसः प्रदक्षिणा कर्तव्या २३ (१२)।१९

= विमलम् २३ (१३)।१५

= मानुषाख्यम्, अस्मिन्नवगाह्य व्याधशरपीडिताः कृष्णमृगा मानुषत्वमुपागताः २३ (१४)।५१

= मानुषाख्यं सरः, अस्मिन् कृष्णमृगा निमग्नाः २३ (१४)।५३

= सरकतीर्थं कुरुक्षेत्रस्थम्, अस्य मध्ये कूपे कोटिसंख्याका रुद्रा व्यवस्थिताः सन्ति २३ (१५)।२२

= कुरुक्षेत्रस्थम्, अन्यजन्मतीर्थम्, अस्य मध्ये शरभरूपधारी शिवो नरसिंहरूपधारी विष्णुश्च पतितौ २३ (१५)।३१

= कुरुक्षेत्रस्थं सरः, अस्य मध्ये मार्कण्डेयेन सरस्वती समानीता २३ (१६)।३९

= ब्रह्मसरः २३ (१९)।१३

= इदं कुरुक्षेत्रस्थं ब्रह्मतीर्थाभिधमुक्तम् २३ (२१)।२८

= अस्य माहात्म्यं सनत्कुमारं मार्कण्डेयः पप्रच्छ २३ (२२)।५

	=अस्य माहात्म्यं मार्कण्डेयो मुनिः सनत्कुमारं पप्रच्छ	२३ (२२)।६
	=कुरुक्षेत्रस्थितम्, अस्य मध्ये स्थाणुर्व्यवस्थितः	२३ (२२)।१०
	=यस्मिन् स्थानेऽण्डं संनिहितं तस्मिन् स्थाने सरः स्थितम्	२३ (२२)।३४
	=अण्डादुत्पन्नस्य ब्रह्मणो नाभिस्थाने यदुदकमासीत् तेन महदेकं सरः पूर्णमभूत्	२३ (२२)।३७
	=सांनिहत्यं कुरुक्षेत्रे स्थितम्	२३ (२३)।१३; २३ (२६)।५७; २३ (२८)।६
	=कुरुक्षेत्रस्थम्, अत्र देवादयः शिवदर्शनेच्छया गताः	२३ (२३)।२४
	=अस्य मध्ये स्थितं हस्तिरूपधरं शंकरं भवानी ददर्श	२३ (२३)।२९
	=अस्य पश्चिमे पार्श्वे शिवः स्वलिङ्गं निवेशयामास	२३ (२३)।३४
	=सांनिहितं तीर्थं कुरुक्षेत्रस्थितम्	२३ (२४)।२
	=अस्य पांशुना पूरणाय ब्रह्मा देवानादिदेश	२३ (२४)।१०
	=सांनिहिताख्यं कुरुक्षेत्रस्थम्, इदमिन्द्रः पांशुना पूरयामास	२३ (२४)।११
	=सांनिहिताख्यम् (कुरुक्षेत्रस्थितम्)	२३ (२६)।३३
	=स्थाणुसरः, अस्य माहात्म्यं श्रुत्वा सर्वपापैः प्रमुच्यते	२३ (२७)।२३
सरकम्	=तीर्थं कुरुक्षेत्रस्थम्, अत्र महेश्वरं दृष्ट्वा सर्वकामाँल्लभते	२३ (१५)।२०
	=तीर्थं कुरुक्षेत्रस्थम्, अत्र कोटित्रयपरिमितानि तीर्थानि सन्ति	२३ (१५)।२१
	=तीर्थं कुरुक्षेत्रस्थम्, अस्य पूर्वेण त्रैलोक्यविश्रुतम् - 'अन्य जन्म' इति नामधेयं तीर्थमस्ति	२३ (१५)।२८
सरयूः	=नदी, इयं भारतवर्षस्थकुमारद्वीपे हिमवत्पादाद् विनिःसृता	१३।२२
	=नदी, इयं वेगारिं गणं कार्त्तिकेयाय ददौ	३१।७८

=नदी, अस्यास्तटे यज्ञकर्मणि दीक्षितेन रघुणा सह मुरासुरस्य संवादः समभूत् ३४ ।४४

सरसः =कुमारद्वीपस्थपर्वतः १३ ।१६

सरस्वती =बदरिकाश्रमे स्यन्दते सरिदियम् २ ।४३
=स्रोतस्विनी, 'नित्यप्रवाहशीला' इत्यर्थे प्रयुक्तः शब्दः 'सीता' - नद्या विशेषणम् ५ ।२
=नदी, नैमिषतीर्थे स्नानं विधाय मृगयार्थमितस्ततश्चरन् प्रह्लाद इमां ददर्श ७ ।४२
=देवी, अस्यां स्थिरा भक्तिर्गन्धर्वाणां धर्मः ११ ।१८
=नदी, इयं कुमाराख्यद्वीपे हिमवत्पादनिःसृता १३ ।२०
=महानदी, सह्यनामकपर्वतस्य पादाद् विनिर्गता १३ ।३०
=सरस्वतीप्रभृतयोऽनेका नद्यः पुण्याः सागरयोषितश्च १३ ।३३
=देवी कात्यायनी, अनया सह योद्धुकामो महिषासुरो विन्ध्यशिखरमाजगाम २० ।३६
=देवी कात्यायनी, एनां समभ्येत्यासुरा युयुधुः २१ ।३६
=देवी, इयं ब्रह्मणः पुत्री २३ ।१३
=नदी, अस्या दृषद्वत्याश्चान्तरे कुरुजाङ्गलं वर्तते २३ (१) ।१
=इयं वामनस्य जिह्वास्थानीयाऽभूत् २३ (१०) ।५३
=नदी, अस्याः समुत्पत्तिविषयकः प्रश्नो महर्षीणां लोमहर्षणं प्रति २३ (११) ।१
=नदी, इयं नदीनामुत्तमा नदी कुरुक्षेत्रे प्रवहति २३ (११) ।१
=नदी, इयं दृश्यादृश्यगतिः पश्चिमामाशां प्रयाता २३ (११) ।२
=महानदी २३ (११) ।४
=इमां महामुनिर्मार्कण्डेयो मूर्ध्ना तुष्टाव २३ (११) ।५
=अस्या रूपं मात्रात्रयं सर्वमस्ति २३ (११) ।१२
=आद्या २३ (११) ।१२
=विभिन्नदर्शना २३ (११) ।१२
=सनातनी २३ (११) ।१२
=अस्या रूपस्य निरूपणम् २३ (११) ।१४
=देवी २३ (११) ।२१
=देवी, इयं विष्णोर्जिह्वा २३ (११) ।२३

=नदी, ब्रह्मसरः - कुरुक्षेत्रयोर्मध्ये प्रवहन्ती	२३ (११)।२४
=नदी, इयं मार्कण्डेयवचनात् कुरुक्षेत्रं विवेश	२३ (१२)।१
=नदी, इयं मार्कण्डेयवचनात् कुरुक्षेत्रं समाप्लाव्य पश्चिमां दिशं प्रयाता	२३ (१२)।२
=देवनदी, अस्या दृषद्वत्याश्चन्तरे देवनिर्मितो देशः 'ब्रह्मावर्त' इति नाम्ना प्रसिद्धः	२३ (१२)।९
=नदी (कुरुक्षेत्रस्था), अस्यास्तटे सरसि स्नानेन ब्रह्मज्ञानमुत्पद्यते	२३ (१२)।११
=नदी, अस्यां स्नानं कार्यम्	२३ (१२)।२०
=पुण्या नदी सर्वकालवहा कुरुक्षेत्रस्थासु नवनदीष्वन्यतमा	२३ (१३)।६
=इयं सर्वकालेषु वहति कुरुक्षेत्रस्था नदी	२३ (१३)।८
=नदी कुरुक्षेत्रस्था	२३ (१३)।२९; २३ (१६)।३९; २३ (१९)।१; २३ (१९)।१०; २३ (१९)।११; २३ (१९)।१९; २३ (१९)।२६
=अस्यां सूर्यग्रहणकाले स्नात्वा पापदेशजाऽपि स्त्री पूता स्वर्गभाक् च भवति	२३ (१३)।५०
=नदी, कुरुक्षेत्रप्रवाहिनी, अत्र स्नानेन कामिकं फलं लभ्यते	२३ (१४)।३७
=नदी, कुरुक्षेत्रस्था, अत्र श्रीकुब्जाख्यं तीर्थं वर्तते	२३ (१६)।६
=नदी, इयं सर्वासु नदीषु श्रेष्ठा वर्तते	२३ (१६)।१९
=इमां भगवान् ब्रह्मा पुष्करेषु स्वयज्ञे सस्मार	२३ (१६)।२०
=नदी, इयं पुष्करेषु ब्रह्मण आह्वाने समागता, सुप्रभानाम्ना च ख्याता बभूव	२३ (१६)।२१
=इमां वेगयुक्तां दृष्ट्वा मुनयः प्रीता अभूवन्	२३ (१६)।२२
=इयं यत्र स्थिता तत्र यज्ञफलं महद् भवति	२३ (१६)।२६
=नदी	२३ (१६)।२६; ३८
=एनामृषयः सर्वे ध्यातवन्तः	२३ (१६)।२७
=काञ्चनाक्षी (नैमिषस्था)	२३ (१६)।२८
=महानदी	२३ (१६)।३१

=इयमुत्तरकोशलाभाग उद्दालकेन मुनिना ध्याताऽऽजगाम	२३ (१६) ।३२
=नदी (उत्तरकोशलभागस्था)	२३ (१६) ।३२
=मनोहरा	२३ (१६) ।३४
=इयं गङ्गाद्वारे दक्षेण प्रकटीकृता, तत्रास्या 'विमलोदा' इति नामधेयम्	२३ (१६) ।३७
=नदी, इयं कुरुक्षेत्रे कुरुणा याजिता	२३ (१६) ।३८
=इयं पुण्यतोया नदी, एनामभिष्टूय मार्कण्डेयः कुरुक्षेत्रस्थसरोमध्ये समानीतवान्	२३ (१६) ।३९
=अस्यास्तीर्थं कुरुक्षेत्रे पृथूदकं वर्तते	२३ (१८) ।१८
=नदी कुरुक्षेत्रस्था, अस्यां रुषङ्गुर्महामुनिः स्नानमकरोत्	२३ (१८) ।१९
=नदी कुरुक्षेत्रस्था, अस्या उत्तरे तीरे पृथूदकतीर्थं स्थितम्	२३ (१८) ।२०
=अस्यास्तटे स्थितः सन् ब्रह्मा ब्रह्मयोनिं निर्मितवान्	२३ (१८) ।२१
=अस्यास्तटे ब्रह्मयोनिसंज्ञकं तीर्थं स्थितम्	२३ (१८) ।२४
=इयं भगवता स्थाणुना पूजिता, स्थाणुतीर्थे स्थापिता च	२३ (१९) ।४
=इयं विश्वामित्रेण वसिष्ठानयनायोक्ता	२३ (१९) ।५
=महानदी कुरुक्षेत्रस्था	२३ (१९) ।७; ८
=सरित् (कुरुक्षेत्रस्था)	२३ (१९) ।९
=देवी	२३ (१९) ।१२
=अनया सर्वं जगद् व्याप्तम्	२३ (१९) ।१३
=नदीरूपा देवी, इयं ब्रह्मसरसः प्रवृत्ताऽस्ति	२३ (१९) ।१३
=देवी	२३ (१९) ।१४
=इयं वाणीरूपेण सर्वभूतेषु संस्थिता	२३ (१९) ।१६
=अनया वसिष्ठो विश्वामित्राश्रममानीतः	२३ (१९) ।१८
=इयं विश्वामित्रेण शप्ता	२३ (१९) ।२०; २३ (१९) ।२२
=इयं सरितां श्रेष्ठा	२३ (१९) ।२०; २८
=एनां शोणितोन्मिश्रं तोयं वहन्तीं दृष्ट्वा देवादयो दुःखिता बभूवुः	२३ (१९) ।२३
=नदी, अत्र कदाचिद् ऋषयः समाजग्मुः	२३ (१९) ।२६

=अस्याः परित्राणार्थमृषयः परं यत्नं प्रचक्रिरे	२३ (१९) ।२७
=नदी, अस्यां मुनयोऽरुणां नदीं समानयन्	२३ (१९) ।३०
=नदी, इयं सर्वं विश्वामित्रविचेष्टितं मुनीन् प्रत्याह	२३ (१९) ।३०
=नदी, अस्यास्तोयमरुणातोयमिश्रितं दृष्ट्वा राक्षसा दुःखिता अभूवन्	२३ (१९) ।३१
=सरस्वतीतीर्थस्य शोधनमृषयश्चक्रुः	२३ (१९) ।४०
=नदी, अस्या अरुणानद्याश्च संगमं रक्षसां मोक्षार्थमृषयोऽकल्पयन्	२३ (१९) ।४१
=नदी कुरुक्षेत्रस्था, अस्यास्तटे सोमतीर्थं स्थितम्	२३ (२०) ।४
=नदी कुरुक्षेत्रस्था, अस्यां स्नानार्थं नैमिषेया ऋषयः प्रवेशं न लेभिरे	२३ (२१) ।३
=देवी, इयं ब्राह्मणान् दृष्ट्वा पश्चिमं मार्गं प्रयाता	२३ (२१) ।५
=नदी (कुरुक्षेत्रस्था)	२३ (२१) ।६
=नदी, इयं विप्राणां हिताय कुञ्जानि कृत्वा पश्चिमं मार्गं प्रयाता	२३ (२१) ।६
=नदी, अस्या दक्षिणप्रवाहे नर्मदा संश्रिता	२३ (२१) ।७
=नदी, अस्याः पूर्वप्रवाहे स्नानेन गङ्गास्नानस्य फलं लभ्यते	२३ (२१) ।७
=नदी, अस्याः पश्चिमे दिग्भागे यमुना नदी संश्रिता	२३ (२१) ।८
=नदी, इयमुत्तरतो वहन्ती सिन्धुनाम्नाऽऽख्यायते	२३ (२१) ।८
=इयं कुरुक्षेत्रे पूर्वादिदिक्प्रवाहेण याति	२३ (२१) ।९
=अस्या नाम्ना कूपः कुरुक्षेत्रे स्थितः	२३ (२१) ।१६
=प्राची सरस्वती, अस्यां स्नात्वा मातृह-प्रभृतयोऽपि शुद्धिमवाप्नुवन्ति	२३ (२१) ।१९
=प्राची सरस्वती, इयं देवमार्गे प्रविष्टा देव-मार्गेण निःसृता च वर्तते	२३ (२१) ।१९

=प्राची सरस्वती, इयं दुष्कृतकर्मणामपि कृते पुण्या भवति २३ (२१) ।२०

=अस्या गुह्यानि स्थानानि मुनिर्मार्कण्डेयः सनत्कुमारं पप्रच्छ २३ (२२) ।१२

=देवी, इयं कुरुक्षेत्रे लिङ्गरूपेण स्थिता २३ (२५) ।१०

=प्रत्यक् सरस्वत्यां स्नानेन मुक्तिरवाप्यते २३ (२६) ।४७

=अस्यां स्नात्वा श्वा कश्चित् सर्वकिल्विषैर्विमुक्तोऽभवत् २३ (२६) ।५८

=शिवस्याऽऽराधनेन सरस्वती लभ्यते २३ (२६) ।१४५

=नदी कुरुक्षेत्रस्था, अस्या उत्तरे तीरे ब्रह्मा शिवलिङ्गमेकं प्रतिष्ठापयामास २३ (२८) ।७

=अस्यास्तटे ब्रह्मणा चतुर्थं लिङ्गं कृतम् २३ (२८) ।३९

=अस्यास्तटे कलियुगे पूजादिकं प्रशस्तमुक्तम् २३ (२८) ।४१

=अस्या उत्तरे तीरे चतुर्मखनाम्ना ख्यातो महेश्वरो भगवता सृष्टिकाले पूजितः २३ (२८) ।४३

=अस्यां शिवेन स्नानं कृतम् २५ ।५२

=नदी, इयं गजारूढा सती शिवविवाहयात्रायां हंसकुन्देन्दुसंकाशं बालव्यजनं समादधे २७ ।१२

=नदी कुरुक्षेत्रस्था, अत्र गत्वा कुमाराभिषेककरणाय देवाः शिवं निवेदितवन्तः ३१ ।५१

=नदी, इयं गणान् कार्त्तिकेयाय ददौ ३१ ।८३

=नदी, अस्यां स्नातुं शिवो जगाम ३४ ।१८

=ओघनामा (ओघवती) २३ (१६) ।१८

=काञ्चनाक्षी २३ (१६) ।१८

=मानसह्रदा २३ (१६) ।१८

=विमलोदका कुरुक्षेत्रस्था २३ (१६) ।१८

=विशाला २३ (१६) ।१८; २३ (१६) ।३०

=सुप्रभा २३ (१६) ।१८

=सुवेणुः (कुरुक्षेत्रस्था) २३ (१६) ।१८

=इयं केदारस्थिता सुवेणुनाम्ना ख्याता बभूव २३ (१६) ।३५

=सुवेणुः (केदारस्था) २३ (१६) ।३५

=विमलोदका (गङ्गाद्वारस्था) २३ (१६) ।३७

	=प्लक्षजा	३४।१८
सरस्वतीकूपः	=अयं कुरुक्षेत्रे वर्तते	२३ (२१)।१६
सरस्वत्यः	=एताः सप्त तावदेकीभूताः सप्तसारस्वताख्ये तीर्थे वहन्ति	२३ (१६)।१७
सरांसि	=सर्वेषु सरःसु तावदुत्तरमानसाख्यं सरः श्रेष्ठम्	१२।४६
	=एतानि प्रपितामहेन पूर्वं भूतगणैः समं सृष्टानि	२३।४५
	=एतानि वामनाकृतिविष्णुस्थितानि प्रह्लादो ध्यानेन ददर्श	२३ (८)।१३
	=एतानि प्रोत्फुल्लपद्मैर्युतानि सुतले शोभन्त इति वामनो बलिमाह	२३ (१०)।७३
	=एतानि स्थाणुतीर्थं समायान्ति	२३ (२४)।४
	=एतानि शिवरूपाण्युक्तानि	२३ (२६)।११६
	=एतानि स्वस्तिकरणार्थं प्रार्थितानि	३२।२०
सरित्	=कालिन्दी	६।३०
	=अस्यां स्नानं करणीयम्	१५।२२
	=कान्ताविहीनेन केनचिच्चक्रवाकेण सरितस्तटे जीवितमुत्सृष्टमित्यादिसुकेशिपुरविषये कल्पनाः सन्ति	१६।१४
	=नदी (सरस्वती), इयं प्लक्षवृक्षात् समुद्भूता	२३ (११)।३
	=आसां श्रेष्ठा सरस्वती वर्तते	२३ (१६)।२३
	=नदी सरस्वती, इयं मङ्कणेन समाहूता कुरुक्षेत्रं समागता	२३ (१६)।३१
	=आसां श्रेष्ठा सरस्वती	२३ (१६)।३३
	=सरस्वती (कुरुक्षेत्रस्था)	२३ (१९)।१
	=नदी सरस्वती	२३ (१९)।९
	=नदी सरस्वती (कुरुक्षेत्रस्था)	२३ (१९)।१०
	=नदी सरस्वती, इयमम्भसः प्रवाहेण वसिष्ठं स्थानाच्चालयामास	२३ (१९)।११
	=सरस्वती, अनया सह महर्षीणां संवादः	२३ (१९)।२९
सरितः	=सरस्वतीप्रभृतयः, आसां जलानि कुमारद्वीपस्थजनपदवासिभिः पीयन्ते	१३।१९

द्र. - सरिन्नामानि

=आसां पतिः समुद्रः क्षीरोदाख्यः २३ (४) ।१७

=नद्यः, एता वामनाकृतिविष्णुस्थिताः प्रह्लादो ध्यानेनापश्यत् २३ (८) ।१३

=नद्यः, इमाः सुतलस्थाः शुद्धाः सन्तीति वामनो बलिमाह २३ (१०) ।७३

=नद्यः, कुरुक्षेत्रीयासु सरित्सु भ्रमणाय तत्रत्य-यक्षेन्द्रस्य स्तवनेन प्रसादः प्राप्तव्यः २३ (१२) ।२१

=कुरुक्षेत्रस्था वैतरणीप्रभृतयोऽष्टावेताः कुरुक्षेत्रस्य प्रभावेण पुण्याः सन्ति २३ (१३) ।९

=नद्यः, आसु श्रेष्ठा सरस्वती नदी २३ (१६) ।२०

=आसां श्रेष्ठा सरस्वती २३ (१९) ।२०; २३ (१९) ।२८

=एताः शिवरूपा उक्ताः २३ (२६) ।११६

=एताः स्वस्तिविधानार्थं प्रार्थिताः ३२ ।२०

सरिन्नामानि =सरस्वती, पञ्चरूपा, कालिन्दी, हिरण्यवती, शतद्रुः, चन्द्रिका, नीला, वितस्ता, इरावती, कुहूः, मधुरा, हाररावी, धातुकी, रसा, गोमती, धूतपापा, बाहुदा, दृषद्वती, निश्चिरा, गण्डकी, चित्रा, कौशिकी, वधूसरा, सरयूः, लोहित्या चैता नद्यो हिमवत्पादनिःसृताः १३ ।२०-२२

सरीसृपाः =सर्पाः, इमान् वामनाकृतिविष्णुस्थितान् प्रह्लादो ध्यानेन ददर्श २३ (८) ।१३

सरोमाहात्म्यम् =वामनपुराणस्य त्रयोविंशाध्यायात् परमष्टा-विंशतिरध्यायाः सरोमाहात्म्यसंज्ञका वर्तन्ते २३ ।(१-२८)

=वामनपुराणस्य त्रयोविंशाध्यायान्तर्गत-दशमेऽध्याये २३ (१०) ।१-९१

=त्रयोविंशाध्याये २३ (१२) ।१-२१

सर्जः =शालवृक्षः, अस्य निर्यासेन हिरण्याक्षाय धूपमाघ्रापयेत् १७ ।३४

=सालवृक्षः, अस्य धूपो वैशाखमासे शंकरस्य पूजने देयः १७ ।५३

सर्पाः	=सरीसृपाः	२३ (८) ।१३
	=पन्नगाः	२३ (१०) ।७
सर्पिः	=शुभं वस्तु, अस्य प्रातःकाले स्पर्शः कार्यः	१४ ।३६
	=इदं कालाष्टम्यां शङ्करस्य पूजने देयम्	१७ ।३३
	=इदं समोदकं चैत्रमासे नांट्येश्वरस्य प्रीणनार्थं देयम्	१७ ।५०
	=इदमादाय कुरुक्षेत्रस्थे नागतीर्थे स्नानं कृत्वा नरो नागभयाद् विमुच्यते	२३ (१३) ।२३
सर्वः	=शिवस्य नाम	२३ (२६) ।७९
सर्वगः	=शिवः, अयं ब्रह्मविष्णुभ्यां स्तुतः	६ ।८०
	=शङ्करः, अयं चारणवचः श्रुतवान्	१६ ।४२
	=विष्णुः, इमं जानन् कश्चिदन्यं विवेकनाशावस्थायामेव शप्तुमर्हति	२३ (९) ।८
सर्वगतः	=नारायणः, अस्य प्रह्लादकृता स्तुतिः	८ ।५५
	=शङ्करस्य नाम	२३ (२३) ।३६ (१०)
सर्वज्ञः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।१९
	=शंकरस्य नाम	२३ (२३) ।३६ (२)
सर्वज्ञता	=इमां संवरणपुत्रः कुरुर्व्रतबन्धनानन्तरं चतुःषड्भिरेव वर्षैरधिगतवान्	२३ ।३
सर्वज्ञत्वम्	=इदं वेदव्यासमुनिः परमेश्वरमाराध्य लब्धवान्	२३ (२५) ।३८
सर्वज्ञानमयः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२१
सर्वदयापघ्नः	=शिवस्य नाम	२३ (२६) ।१०३
सर्वदर्शी	=शंकरस्य नाम	२३ (२३) ।३६ (१०)
सर्वदा	=देवी कात्यायनी, अनया महिषासुरादेर्वधः कृतः	१८ ।४१
सर्वदेवः	=शंकरस्य नाम	२३ (२३) ।३६ (१०)
सर्वदेवमयः	=वामनः, अयं बलियज्ञं प्राप्तः	२३ (१०) ।३३
सर्वपापविमोचनः	=तीर्थविशेषः, अयं खटकटां[1] कार्त्तिकेयाय ददौ	३१ ।१००

---

[1] खटखटाम्, खेटकटाम्, घटघटाः-चेति पाठभेदः

सर्वपालकः	=राजा कुरुः	२३ ।९
सर्वभक्षः	=शिवस्य नाम	२३ (२६) ।७९
सर्वभूतशरीरी	=शिवस्य नाम	२३ (२६) ।७९
सर्वभूतावासः	=शंकरस्य नाम	२३ (२३) ।३६ (४)
सर्वम्	=एतद् विष्णौ प्रतिष्ठितम्	२३ (७) ।१२
सर्वयज्ञमयः	=शंकरस्य नाम	२३ (२३) ।३६ (१९)
सर्वयज्ञसंस्तुतः	=शंकरस्य नाम	२३ (२३) ।३६ (२०)
सर्वयज्ञहृदयः	=शंकरस्य नाम	२३ (२३) ।३६ (२०)
सर्वर्तुकुसुमम्	=वनम्, अत्र संवरणो नाम राजा जगाम	२२ ।३१
सर्वलोकपितामहः	=शिवस्य नाम	२३ (२६) ।१४३
सर्वलोकवरप्रदः	=शंकरस्य नाम	२३ (२३) ।३६ (१७)
सर्ववरिष्ठः	=शिवस्य नाम	२३ (२६) ।८८
सर्वविद्याः	=इमा वामनस्य कटिस्थानीया आसन्	२३ (१०) ।५७
सर्वशक्तिः	=शंकरस्य नाम	२३ (२३) ।३६ (१०)
सर्वशत्रुनिषूदनः	=शिवस्य नाम	२३ (२६) ।६४
सर्वशिल्पप्रवर्तकः	=शिवस्य नाम	२३ (२६) ।१३०
सर्वाणि	=कर्माणि, एतानि भद्रासंज्ञकासु तिथिषु समाचरणीयानि	१४ ।४८
	=चन्द्रवासरे गुरुवासरे च सर्वाणि कर्माणि करणीयानि	१४ ।४९
सर्वानुग्रहकरः	=शंकरस्य नाम	२३ (२३) ।३६ (१७)
सर्वावस्था	=इमां गतोऽपि कुरुक्षेत्रस्मरणेन शुचिर्भवति	२३ (१२) ।६
सर्वेशः	=वामनः, अनेन नाम्ना ब्रह्मा वामनमस्तौत्	२३ (९) ।२९
सर्वेश्वरः	=विष्णुः, अयमदित्या नमस्कृतः	२३ (६) ।३५
	=विष्णुः, युक्त्या विष्णुः 'सर्वेश्वरः' इति विज्ञायते	२३ (८) ।२५
	=शंकरस्य नाम	२३ (२३) ।३६ (३)
सर्वौजसः	=गणः, इमं मानसतीर्थं कार्त्तिकेयाय ददौ	३१ ।९०

सलिलम्	=इदं प्रेताय गोत्रजैर्देयम्	१५।४२
	=महार्णवादीनां सलिलं महीष्वैक्यमागात्	२३।४५
	=इदं बलिना दत्तं सद् वामनेन (विष्णुना) गृहीतम्	२३ (१०)।६७
सवनम्	=कुरुक्षेत्रस्थं विष्णुस्थानम्	२३ (१३)।१४
सविता	=सूर्यः, अस्य पुत्र्या वसिष्ठेन सह संवादः	२२।५५
	=पूषाख्यः सूर्यः, अयं कुरुक्षेत्रस्थे काम्यकवने प्रकटः स्थितोऽस्ति	२३ (२०)।३३
ससिनीलाः[1]	=एते पश्चिमदेशीया जानपदा जनाः	१३।५०
सस्यम्	=इदं महाशनिर्विनाशयति	२१।२२
	=द्र. - महाशनिः	
	=अस्य वृद्धयेऽप्रीता देवा वृष्टिं न प्रयच्छन्ति	२३ (२६)।१४
सहस्रकिरणः	=सूर्यः, अनेन सुकेशिपुरमम्बरतलान्निपातितम्	१६।४३
सहस्रचरणः	=शिवस्य नाम	२३ (२६)।९७
सहस्रदृक्	=शिवस्य नाम	२८।३७
सहस्रनयनः	=गणः, अयं शूलेनासुरान् निजघान	३२।५७
सहस्रबाहुः	=गणः, इमं सीतानदी कार्त्तिकेयाय ददौ	३१।७६
सहस्रम्	=एतत्संख्याका भूधराः कुमारद्वीपस्य मध्यभागे सन्ति	१३।१५
	=क्षुद्रनद्यः सहस्रश उक्ताः	१३।३४
	=कपिलानां गवां सहस्रस्य दानेन यत् फलं भवति तत् कुरुक्षेत्रस्थे कपिलाह्रदे स्नानादिना जायते	२३ (१४)।२५
	=दिव्यसहस्रवर्षपर्यन्तं शारभरूपमास्थितस्य शिवस्य नरसिंहेन सह युद्धं बभूव	२३ (१५)।३१
	=गोसहस्रम्, अस्य दानफलं फलकीवनस्थे तीर्थे स्नात्वा लभ्यते	२३ (१५)।५०
	=गोसहस्रम्, अस्य दानफलं कुरुक्षेत्रस्थानां चतुर्णां समुद्राणामन्यतमस्मिन् स्नात्वा नरो लभते	२३ (२०)।११

---

[1] शशिनीलाः — पाठभेदः

	=सहस्रयुगपर्यन्तमण्डे सुप्त्वा ब्रह्मा प्रत्यबुध्यत	२३ (२२) ।१८
सहस्रशीर्षः	=शिवस्य नाम	२३ (२६) ।९७
सहस्राक्षः	=कामदेवादिभिरस्मै उर्वशी समर्पिता सुरलोके	७ ।१९
	=इन्द्रः; अयं देवासुरसंग्रामे महाचापमादाय शरवृष्टिमकरोत्	१० ।१
	=इन्द्रः; अन्धकासुरेण सह संग्रामे प्रवृत्तोऽयं पराङ्मुखो जातः	१० ।१३
	=इन्द्रः; अनेन शब्देनेन्द्रं तन्माताऽदितिः संबोधितवती	२३ (३) ।५
	=इन्द्रः; अयं जगतः पतिर्यथा स्यात् तथाऽहं करिष्यामीति गमनेन प्रतिज्ञातं ब्रह्माणं प्रति	२३ (९) ।३५
	=शिवस्य नाम	२३ (२६) ।६५
	=इन्द्रस्य नाम	२८ ।२४; २९ ।१; २९ ।१२
	=इन्द्रः; अयं कौशिकीमादाय विन्ध्यगिरिं जगाम	२८ ।२६
सहस्राणि	=धनुर्धराणामष्टौ सहस्राणि कुरुजाङ्गले दुष्कृतान् वारयन्ति	२३ ।४२
सहस्राभरणः	=शिवस्य नाम	२३ (२६) ।९७
सहस्रारः	=अन्धकासुरस्य रथः	९ ।२६
सहस्रार्चिः	=शंकरस्य नाम	२३ (२३) ।३६ (११)
सहस्रोद्यतशूलः	=शिवस्य नाम	२३ (२६) ।९७
सहूहुकाः	=अयं कुमारद्वीपे पर्वताश्रयी देशः	१३ ।५७
सहोढकः	=सगर्भोढः पुत्रः	३५ ।४३
सह्यः	=कुमारद्वीपस्थेषु सप्तसु कुलपर्वतेष्वन्यतमः	१३ ।१४
	=पर्वतः; अस्य पाददेशाद् गोदावरीप्रभृतयोऽनेका महानद्यो विनिर्गताः	१३ ।३१
साक्षी	=कूटसाक्षिणो नरा महारौरवादिनरकेषु निपतन्ति	१२ ।४०
सागरः	=क्षीरोदः	६ ।६९
	=सरस्वतीप्रभृतयो नद्यः सागरस्य योषितः सन्ति	१३ ।३३

सागरवेगी	= गणः, इमं रेवा नदी कार्त्तिकेयाय ददौ	३१।८१
सागराः	= एतैरन्तरिता भारताख्यवर्षीया नव द्वीपाः सन्ति	१३।८
	= श्वेतद्वीपगमनमार्गे देवाः सर्वान् सागरान् क्रान्तवन्तः	२३ (४)।१८
	= एते सप्त महामोहस्थिते शंकरे क्षुभिता बभूवुः	२८।३१
साङ्ख्यः	= शिवस्य नाम	२३ (२६)।१०१
साङ्ख्यम्	= शास्त्रम्, अस्य सर्वा उक्तयो वामनस्य समीपमागताः	२३ (९)।३८
	= शास्त्रम्, अस्य सिद्धान्ताः सरस्वत्या रूपम्	२३ (११)।१७
	= शास्त्रम्, अस्य वेत्तारः कपिलादयः	३४।७१
साङ्ख्यमुख्यः	= शिवस्य नाम	२३ (२६)।१०१
साङ्ख्ययोगमुखः	= शिवस्य नाम	२३ (२६)।१०१
साधवः	= एषां मर्माणि वाग्भिर्ये निकृन्तन्ति ते नरकान् यान्ति	१२।९
	= एतेषां पैशुन्यकारका नरकेषु पतन्ति	१२।१०
	= एतैः परित्यक्तस्य 'कुण्डाशी' इति संज्ञा भवति	१५।३७
साधुजनः	= पुरुषस्तद् वाक्यं वदेत् येन स साधुजनेन निन्द्यो न भवेत्	१४।३९
साधुवादः	= देवासुरसंग्रामे यदाऽन्धकासुरेण यमदण्डात् प्रह्लादः परिरक्षितस्तदा दैत्यदानवयूथपैरयमन्धकासुराय कृतः	१०।२२
साध्यः	= नरः, अस्य मूर्ध्नि प्रह्लादेन गदा ताडिता	८।१
	= नरः, अस्योपरि देवैः पुष्पवृष्टिः कृता	८।९
साध्यम्	= साध्यदेवानां तेजः, अनेन कात्यायन्या भ्रूयुगलं संजातम्	१९।१२
साध्याः	= दक्षयज्ञे देवानामेषां वीरभद्रेण सह युद्धम्	४।३२-३७
	= दक्षयज्ञे शङ्करभयादेते देवा वेगपूर्वकं पलायिताः	५।४
	= देवाः, इमे देवसेनाया मध्यभागेऽवस्थिता बभूवुः	९।१२

	=एते देवा देवासुरसंग्रामात् पराङ्मुखा बभूवुः	१० ।५४
	=देवाः, एते कर्कटराशिगते दिवाकरे कृष्णपक्षीयैकादश्यां तिथौ स्वपन्ति	१७ ।१६
	=देवाः, एतेषां हृदये हरितचन्दनाख्यो वृक्षो जातः	१८ ।१०
	=देवाः, एतान् वामनाकृतिविष्णुस्थितान् प्रह्लादो ध्यानेन ददर्श	२३ (८) ।११
	=एते वामनस्य सर्वदेवमये रूपे जङ्घास्थानीया आसन्	२३ (१०) ।५०
	=सुरोत्तमाः	२३ (१०) ।५०
	=एते कुरुक्षेत्रस्थे फलकीवने तपश्चरन्ति	२३ (१५) ।४५
	=एतैः स्थाणुप्रभृतितीर्थानि प्रत्यत्नतः सेवितानि	२३ (२५) ।५
	=एतैः कुरुक्षेत्रस्थानि लिङ्गानि प्रयत्नेन सेवितानि	२३ (२५) ।४५
	=देवविशेषाः, एते स्वस्तिकरणार्थं प्रार्थिताः	३२ ।१९
साध्वसः	=अयं दक्षयज्ञं त्रिपुरान्तकारिणि प्रविशति सति मुनीनां हृदये जातः	४ ।५७
सानवः	=कुमारद्वीपस्य मध्यभागवर्तिनां भूधराणामेते शुभाः सन्ति	१३ ।१५
सानुः	=विन्ध्यपर्वतस्य सानुमारूढा देवी कात्यायनी	२१ ।३७
सान्निध्यम्	=कुरुक्षेत्रस्थे श्रीतीर्थे स्नातस्य देवी सान्निध्यं प्रयच्छति	२३ (१४) ।२३
सांनिहत्यम्	=कुरुक्षेत्रस्थितमिदं महत् सरः, अत्र शिवलिङ्गं प्रतिष्ठितं बभूव	२३ (२३) ।१३
	=कुरुक्षेत्रस्थं तीर्थम्, इदं कृतयुगे वर्तते	२३ (२४) ।२९
	=सरः, अत्र श्वा कश्चिद् ययौ	२३ (२६) ।५७
	=कुरुक्षेत्रस्थं सरः पुण्यं च तीर्थम्, स्वशिरसि पतिते सति ब्रह्माऽत्र जगाम	२३ (२८) ।६
सान्निहत्यसरः	=इदं कुरुक्षेत्रे वर्तते	२३ (२२) ।१
सांनिहितम्	=तीर्थं कुरुक्षेत्रस्थम्	२३ (२४) ।२; २३ (२८) ।२१
	=कुरुक्षेत्रस्थं सरः, इदमिन्द्रः पांशुना पूरयामास	२३ (२४) ।११

साम	=इदमेव वक्तव्यं वामनेन सहेति शुक्राचार्यो बलिं निर्दिदेश	२३ (१०) ।१५
	=ब्रह्मा सामादिवाङ्मयैर्बन्धनैः कुटिलां प्रबबन्ध	२५ ।१५
सामगाः	=एभिर्ब्रह्मणः सभा समुदीरिताऽऽसीत्	२३ (३) ।२०
साममयः	=अनेन शिवो बोध्यते	२३ (२६) ।१०९
सामवेदः	='अस्य ध्वनिः पातु' इति देवैः स्कन्दः प्रार्थितम्	३२ ।२५
सारङ्गाः	=एते मरुतां वाहनानि	९ ।२२
सारथिः	=अयं नारायणबाणेन भिन्नहृदयं प्रह्लादं संग्रामभूमेरन्यत्र निनाय	८ ।२६
	=चिक्षुरस्य सारथिं दुर्गादेवी शरेणैकेन हतवती	२१ ।२६
सारमेयः	=कश्चित् सारमेयः स्थाणुतीर्थे जगाम	२३ (२६) ।५१
सारस्वतम्	=तीर्थम्	२६ ।२८
सारस्वतलोकः	=अत्र शिवस्य प्रसादेन नरो गच्छति	२३ (१७) ।२३
सारस्वताः	=एते कुमारद्वीपस्य पश्चिमदिशि स्थिता जानपदो जनाः	१३ ।५१
सार्धम्	=मुनिना मङ्कणेन सार्धं रम्भाद्या अप्सरसो रुचिरं स्नान्ति स्म	२३ (१७) ।३
	=मङ्कणकेन मुनिना सार्धं सरस्वतीतटस्थित आश्रमे वसतीश्वरः (शिवः)	२३ (१७) ।२१
सालः	=वृक्षः, मृगयां चरता प्रह्लादेन महाशाखावानयं दृष्टः	७ ।४३
सावित्रिः	=सवितुरपत्यं स्त्री = सूर्यपुत्री तपती, इमां संवरणार्थे वसिष्ठः सूर्यसंमत्या स्वाश्रममानिनाय	२२ ।४७
साहाय्यम्	=इदं बलेरध्वराय गच्छतो वामनस्य रसातलान्निर्गत्य महानागः शेषः कल्पयामास	२३ (९) ।४३
सिंहः	=राशिः, अस्य संचरस्थानम्	५ ।५२
	=मृगेन्द्रः	१९ ।१६
	=देव्याः कात्यायन्या वाहनम्, अस्योपरि नमरस्त्रिशूलं प्राहिणोत्	२१ ।१४

	=हरिः	२१ ।१५
	=गजेन्द्रः	२१ ।१५
	=देव्या वाहनम्, अस्माद् देवी कात्यायनी समुत्पत्य नगस्य सानुमारूढा	२१ ।३७
	=एनं हन्तुकामो महिषासुरो युधि वेगेन धावितवान्	२१ ।४०
	=देव्या वाहनम्, अमुं संत्यज्य दुर्गा महिषासुरस्य पृष्ठमधिरूढा	२१ ।४६
	=एतत्कटितुल्या राज्ञः संवरणस्य कटिरासीत्	२२ ।४९
	=इमं वाहनं कौशिक्या इन्द्रो दत्तवान्	२८ ।२८
	=एष चण्डमुण्डरुरुदैत्यानां सैन्येष्वद्रवत्	२९ ।५२
	=देवीवाहनम्, एनेन वध्यमानाश्चण्डमुण्डसैन्यवीरा गिरिकन्दरवासिनो बभूवुः	२९ ।५३
	=एनेन निपात्यमाना दनुपुङ्गवाः शुम्भमुपाश्रयन्त	२९ ।८८
सिंहनादः	=देवी माहेश्वरी रणे सिंहनादं मुमोच	३० ।२
सिंहमुखाः	=इमे त्रिनेत्रस्य गात्ररोमोद्भवा वीरभद्रमुखा गणा दक्षयज्ञं नाशितवन्तः	४ ।१७-५७
सिंहलः	=भारतवर्षीयेषु नवसु द्वीपेष्वन्यतमः	१३ ।९
सिंहाः	=एषु विष्णू रतिमवाप नरसिंहावतारे	२३ (१५) ।२९
सितकेशः	=गणः, इमं स्वतनयाय कार्त्तिकेयाय कुटिला ददौ	३१ ।८४
सितोदरः	=गणः, अयं सितोदरं गणं कार्त्तिकेयाय ददौ	३१ ।७६
सिद्धः	=मङ्कणकः	२३ (१७) ।१; ७
सिद्धयात्रः	=गणः, इमं गोदावरी नदी कार्त्तिकेयाय ददौ	३१ ।७५
सिद्धसंघाः	=इमे पातालस्थितस्यान्धकासुरस्य परिचर्यां चक्रुः	१० ।५७
	=एतैः संस्तूयमाना देवी कात्यायनी तान् सान्त्वयामास	२१ ।५२
सिद्धाः	=दक्षयज्ञ एषां वीरभद्रेण सह युद्धम्	४ ।३२-३७
	=एते संघीभूय गगनस्थाः सन्तो देवासुरसंग्रामावलोकने प्रवृत्ता आसन्	९ ।५२

	=एतेषां परमो धर्मः	११ ।१७
	=एते वीतशोका भूत्वा कात्यायनीमभितस्तस्थुः	१९ ।३७
	=एते कुरुजाङ्गलं सेवन्ते	२३ (१२) ।१२
	=एते कुरुक्षेत्रं सेवन्ते	२३ (१२) ।१७
	=कायशोधनतीर्थे स्नानेन नराः सिद्धा भवन्ति	२३ (१४) ।१८
	=एभिः केदारस्थिता सुवेणुनाम्नी नदी निषेवितास्ति	२३ (१६) ।३५
	=एते स्थाणुलिङ्गं पूजयन्ति	२३ (२४) ।१७
	=एते स्थाणुतीर्थे पांशुं प्रयत्नेनोपसेव्य परमं पदं प्रयाताः	२३ (२४) ।२२
	=एतैः कुरुक्षेत्रे प्रतिष्ठितं लिङ्गं सिद्धेश्वराख्यम्	२३ (२५) ।३०
	=एते विवाहकाले शिवं ववन्दिरे	२७ ।३३
	=एतेषां देव्या सह संवादः	३० ।६४
	=एभिरनुगम्यमाना देवी गगनं जगाम	३० ।७२
सिद्धान्ताः	=साङ्ख्यशास्त्रस्य सिद्धान्ताः सरस्वत्या रूपम्	२३ (११) ।१७
सिद्धार्थकाः	=धवलसर्षपाः, एभिः संवत्सरारम्भस्य द्वितीयेऽहनि स्नानं कर्तव्यम्	१८ ।१७
सिद्धिः	=योगस्य, इयं सिद्धानां धर्मः	११ ।१७
	=इलावृतादिवर्षवासिनां सिद्धिः स्वाभाविकी भवति	१३ ।७
	=देशानुशिष्टधर्मेण स्वगोत्रधर्मेण चार्थसिद्धिः करणीया	१४ ।३८
	=अस्याः साधकौ सुरोत्तमौ विष्णुशंकरौ	१९ ।२
	=अस्याः प्राप्तये कुरुक्षेत्रस्थरन्तुकद्वारपालस्य प्रार्थना कार्या	२३ (१३) ।२६
	=स्ववंशस्य सिद्धये कुरुक्षेत्रस्थवंशमूलतीर्थे स्नानं कर्तव्यम्	२३ (१४) ।१६
	=एनामनुत्तमां स प्राप्नोति यो भक्तियुक्तः सन् कुरुक्षेत्रस्थे रसावर्ततीर्थे स्नाति	२३ (१५) ।४३
	=एनां स लभते यो मधुवटीतीर्थे स्नात्वा देवादीनर्चयति	२३ (१५) ।५६

	=किंदत्तकूपस्थले प्रस्थपरिमिततिलदानेन नरः परमां सिद्धिं गच्छति, ऋणतो मुक्तश्च भवति	२३ (१५) ।६०
	=एषाऽस्ति सरस्वत्यायत्ता	२३ (१९) ।१५
	=स्थाणुलिङ्गं पूजयित्वा सिद्धाः परमां सिद्धिं व्रजन्ति	२३ (२४) ।१७
	=आद्यलिङ्गस्यापि दर्शनान्नराः सिद्धिम्प्राप्नुवन्ति	२३ (२४) ।२०
	=एनां नरः कुरुक्षेत्रस्थमुमाया लिङ्गं दृष्ट्वा प्राप्नोति	२३ (२५) ।८
	=कुरुक्षेत्रस्थं विश्वकर्मकृतं लिङ्गं दृष्ट्वा मानवः सिद्धिं प्राप्नोति	२३ (२५) ।१०
	=एनां कुरुक्षेत्रे हारीतस्थापितं लिङ्गं प्रणम्य मानवः प्राप्नोति	२३ (२५) ।२६
	=सर्वसिद्धिप्रदायकं लिङ्गं कुरुक्षेत्रे सिद्धैः स्थापितं वर्तते	२३ (२५) ।३०
	=एनां कुरुक्षेत्रे मृकण्डेन स्थापितं लिङ्गं दर्शनादेव वितरति	२३ (२५) ।३१
	=एनां हिमवतेश्वरलिङ्गं दर्शनाद् ददाति	२३ (२५) ।४०
	=एनां हनूमानवाप कुरुक्षेत्रे लिङ्गमेकं स्थापयित्वा तदाराध्य च	२३ (२५) ।४०
	=स्थाणुतीर्थप्रभावेण सिद्धिः केन प्राप्तेति मार्कण्डेयस्य सनत्कुमारं प्रति प्रश्नः	२३ (२६) ।१
	=स्थाणुतीर्थप्रभावतो वेनः श्वा च परमां सिद्धिं ययतुः	२३ (२७) ।३०
	=एनां ब्रह्मा प्राप कलिकाले कुरुक्षेत्रे चतुर्मुखं (लिङ्गं) स्थापयित्वा	२३ (२८) ।४७
सिद्धेश्वरम्	=सिद्धैः कुरुक्षेत्रे प्रतिष्ठितं लिङ्गम्	२३ (२५) ।३०
सिनी	=नदी, इयं शुक्तिमत्पर्वतात् समुद्भूता	१३ ।३२
सिनीबाहुः	=नदी, इयं विन्ध्यपादात् प्रसूता	१३ ।२८
सिन्दूरः	=अनेन विवाहकाले शिवो गिरिजा च भूमिं सुरक्तां चक्रतुः	२७ ।३७

सिन्धुः	=नदी, इयं भारतवर्षस्थकुमारद्वीपे पारियात्रपर्वताद् निःसृता	१३ ।२३
	=नदी, एतत्तीरवासिनो जनाः क्षुद्रनदीः पिबन्ति	१३ ।३८
	=नदी, इयमुत्तरतो वहन्त्याः सरस्वत्याः प्रवाहमाश्रिता	२३ (२१) ।८
सिन्धुवारकः	=अयं गणाधिपस्य कुम्भे राजते	१८ ।६
सिप्रा	=नदी, इयं कुमारद्वीपे पारियात्रपर्वताद् विनिर्गता	१३ ।२४
सिह्लकम्	=अस्य धूपो दक्षयज्ञघ्नाय शिवाय तावदाषाढमासे देयः	१७ ।५८
सीता	=अनेन नाम्ना जनकस्य गृहे जाता वेदवती प्रसिद्धा बभूव	२३ (१६) ।१०
	=एषा रामस्य पत्नी	२३ (१६) ।१०
	=एषा रावणेन हृता	२३ (१६) ।११
	=एषा रामेण रावणं हत्वा गृहे समानीता	२३ (१६) ।१२
	=नदी, इयं सहस्रबाहुं गणं कार्त्तिकेयाय ददौ	३१ ।७६
	=दक्षयज्ञे हररूपावलोकनेन भीता वसवः 'सीता'-नदीरूपं गृहीतवन्तः	५ ।२
सीतातीर्थम्	=इदं कुरुक्षेत्रे स्थितम्, अस्मिन् स्नात्वा नरः कन्यायज्ञफलं लभते	२३ (१६) ।१२
सीरः	=सुवर्णमयेनानेन राजर्षिकुरुः समन्तपञ्चकक्षेत्रं कर्षितुमुद्यतोऽभूत्	२३ ।२३
सीसम्	=अस्य शुद्धिः क्षारपदार्थेन भवति	१५ ।१३
सुकर्मा	=प्रमथः, इमं धाता कार्त्तिकेयाय ददौ	३१ ।७२
सुकेशिः	=अस्य पुरं स्वर्गात् पातितं भास्करेण	१० ।३४
	=अस्य पुरमम्बराद् भास्करेण पातितम्	११ ।१
	=निशाचरपतेर्विद्युत्केशिनः पुत्रः, अनेन शङ्कराद् वरः प्राप्तः, अयं गगनस्थे पुरेऽवसत्	११ ।४-६
	=एकदाऽयं दानवेश्वरो मागधान्यरण्यानि समागत्य तावदृषीन् प्रति श्रेयोविषयकं किञ्चित् पृष्टवान्	११ ।९-१०

=अमुं प्रति महर्षिभिः पुष्करद्वीपस्था एकविंशतिर्नरकाः प्रोक्ताः ११।५८
=एष दानवेश्वरो नरकगमनहेतुविषयकं प्रश्नं महर्षीन् पप्रच्छ १२।१
=एतस्य प्रश्नो महर्षीन् प्रति १३।१
=राक्षसराजः, एनं प्रति महर्षिभिरनेके जनपदा नाम्ना निर्दिष्टाः १३।५५
=शालकटङ्कटः १४।१०; १६।४०
=एनमभिलक्ष्य निशाचरशब्दस्य प्रयोगो महर्षिभिः कृतः १४।११
=एतस्य सदाचारलक्षणविषयकः प्रश्नो महर्षीन् प्रति १४।१३
=एतस्य प्रश्नो मङ्गलविषयको महर्षीन् प्रति १४।२१
=रजनीचरेशः १४।५१
=एतस्य महर्षिभिः सह संवादः १५।२६
=राक्षसः १५।५०
=एष महर्षिसकाशात् स्वपुरं गत्वा राक्षसान् धार्मिकं वचोऽब्रवीत् १६।१
=राक्षसराजः, अस्य पुरं यथा भास्करेण भुवि सन्निपातितं तत् सर्वं पुलस्त्यो नारदं प्रति वर्णयामास १६।६२
=निशाचरेन्द्रः १६।६३
=राक्षसेश्वरः, अयं समन्तपञ्चकक्षेत्रस्य रक्षायै विष्णुना नियोजितः २३।४०
=राक्षसः, इमं प्रति मुनिभिरपेक्षितं सर्वमुक्तम् १५।६७
=एनं सबान्धवं सनगरं च ब्रह्मा पुनरारोपयद् दिवि १६।६०

सुकेशिपुरम् =अस्य पतनाख्यानं नारदः पुलस्त्यं पप्रच्छ ११।१

सुखम् =एतत्प्राया सिद्धिर्भवति तावदिलावृतादिवर्षवासिनाम् १३।७
=बलिराज्ये सर्वो जनः सर्वसुखान्वित आसीत् २३(१०)।२५

	=दानमुपभोगेन सुखकरं भवतीति बलिः शुक्रमाह	२३ (१०) ।२९
	=देवानां सुखेन संयुते सुतले वासं कुर्विति वामनो बलिमाह	२३ (१०) ।७२
	=एतत् स शूद्रः प्राप्नोति यो बलिविष्ण्वादीनां कथां शृणोति	२३ (१०) ।९१
	=एतत् सरस्वत्या व्याप्तम्	२३ (११) ।१९
	=अनेन सरस्वती वसिष्ठं विश्वामित्राश्रमं प्रत्युवाह	२३ (१९) ।१७
	=राक्षसादयः सरस्वत्यां शोणितं पिबन्तः सुखमासते	२३ (१९) ।२५
	=एतस्य प्राप्तये वेनकृतः शिवस्तवः श्रोतव्यः	२३ (२७) ।९
सुगन्धः	=अनेनातृप्तः सन् संवरणो नाम राजा सर्वर्तुकुसुमे वने समन्ताद् व्यचरत्	२२ ।३१
सुग्रीवः	=शुम्भस्य दूतः, अस्य शुम्भनिशुम्भाभ्यां सह संवादः	२९ ।३०
	=एतस्य विन्ध्यवासिन्या सह संवादः	२९ ।३५
सुचक्रनेत्रः	=गणेश्वरः कार्त्तिकेयस्य, अयं शिवाद् वररूपेण चक्रं लेभे	३२ ।११६
	=एष शिवमाराध्य तत्सकाशाच्चक्रमवाप	३२ ।११६-११८
सुचक्राक्षः	=गणः, इमं चक्रतीर्थं कार्त्तिकेयाय ददौ	३१ ।८९
	=कार्त्तिकेयगणः, अयं चक्रमादाय महिषासुरं रुरोध	३२ ।७२
	=गणः, अनेन महिषासुरस्योपरि चक्रं पातितम्	३२ ।७४
	=गणः, इमं बाणासुरः पञ्चबाहुशतेन बबन्ध	३२ ।७७
सुतः	=गुरुशिष्यस्य सुतः, गुरोरभावे गुरुपुत्रो गुरुशिष्यो वा ब्रह्मचारिणा सेवनीयः। परं गुरुशिष्यस्य सुतो न सेवनीयः	१४ ।९
	=महिषासुरः, अयं श्यामायां महिष्यां रम्भासुरात् संजातः	१८ ।६०

	=शुम्भो निशुम्भश्च कस्य सुतावास्तामिति नारदस्य पुलस्त्यं प्रति प्रश्नः	२२ ।७
	=शङ्करस्य तेजोऽंशेनोत्पन्नः सुतो महिषासुरविनाशकः	२२ ।१९
	=अदित्याः सुतो भवेति कश्यपेन विष्णुसकाशाद् वरो याचितः	२३ (६) ।४
	=इन्द्रः, मम सुत इन्द्रो राज्यादिकं प्राप्नोतु- इति वरं विष्णुमदितिर्ययाचे	२३ (७) ।८
	=एतं राज्येऽभिषिच्य राजा वेनपुत्रः कुरुक्षेत्रं ययौ	२३ (२७) ।३३
	=अस्य धर्मः	३५ ।२८
	=अस्य शिष्यापेक्षया श्रेष्ठतरत्वे हेतुः	३५ ।२९
सुतलम्	=पातालम्, इदं विष्णुना बलेर्दत्तम्	२३ (१०) ।६६
	=भुवनम्, अत्र वासं कर्तुं वामनो बलिं प्राह	२३ (१०) ।७१
सुता	=हिमवतः सुता पार्वती	१२ ।५५
	=गिरेः, इयं कर्कटराशिगते दिवाकरे तृतीयायां स्वपिति	१७ ।१४
	=कात्यायनी, इयं चण्डमुण्डाभ्यां न विज्ञाता	२० ।९५
	=सूर्यस्य, अस्याः संवरणार्थे वरुणात्मजेन सूर्यं प्रति याचना कृता	२२ ।४५
	=इमामहं प्रतीच्छामीति शिवो हिमवन्तं प्रत्युवाच	२७ ।४४
सुतीर्थकम्	=तीर्थं कुरुक्षेत्रस्थम्, अत्र पितृदेवार्चने रतोऽश्वमेधं प्राप्नोति	२३ (१४) ।४०
सुतीर्थम्	=महातीर्थवरः कश्चित्, अस्मादहं निजमाश्रमं यावन्नाऽऽव्रजामि तावत् त्वया न वर्धितव्यमित्यगस्त्यो विन्ध्यमुवाच	१९ ।३१
सुदर्शनः	=अस्य जननी देवी सरस्वती	२३ ।१४
सुदामा	=नदी, इयं शुक्तिमत्पर्वतात् समुद्भूता	१३ ।३२
	=अस्य पुत्री सौदामनी	२३ ।५
	=इमां मातरं श्वेततीर्थं कार्त्तिकेयाय ददौ	३१ ।१०१

सुदिनम्	=तीर्थं कुरुक्षेत्रस्थम्, अस्मिन् स्नानेन सूर्यलोकः प्राप्यते	२३ (१५) ।६१
सुधामा	=शंकरस्य नाम	२३ (२३) ।३६ (११)
सुनक्षत्रा	=इमां मातरं रुद्रमहालयतीर्थं कार्त्तिकेयाय ददौ	३१ ।९७
सुनाभः	=अयं मेनायाः पुत्रः	२५ ।१
	=एनेन सप्तर्षयः पूजिताः	२६ ।१६
	=एष गिरिजाया भ्राता विवाहकाले गिरिजां शंकराभ्याशमानीतवान्	२७ ।३५
	=पर्वतः, अयं स्वतनये क्रौञ्चे कार्त्तिकेयेन निहते तत्रोपस्थितो बभूव	३२ ।११०
सुन्दरी	=अनया परजायया सहैकस्मिन्नासने नैव स्थेयम्	१४ ।४६
	=काचित् स्त्री हिमवन्नगरस्था, इयं शिवं विवाहार्थमागतं श्रुत्वा तद्दर्शनलालसोन्मत्तेव सरसनं वासः पाणिनाऽऽदाय तत्र नग्नाऽगमत्	२७ ।२७
सुपर्णाः	=इमे स्वस्तिविधानार्थं प्रार्थिताः	३२ ।२०
सुपार्श्वाः	=उत्तरापथवासिनो जनाः, इमे क्षुद्रनदीजलानि पिबन्ति	१३ ।४२
सुप्रभः	=गणेश्वरः, इमं धाता कार्त्तिकेयाय ददौ	३१ ।७२
सुप्रभा	=नदी (सरस्वती), इयं सप्तसारस्वताख्ये तीर्थे वहति	२३ (१६) ।१८
	=नदी कुरुक्षेत्रस्था, पुष्करेषु ब्रह्मण आह्वानेन समागता सरस्वत्येवानेन नाम्ना तत्र ख्याता बभूव	२३ (१६) ।२१
सुप्रभातम्	=शुभसूचकः प्रातःकालः, अस्य विधानाय ब्रह्मादयो देवाः प्रार्थिताः प्राभातिके मङ्गले	१४ ।२३
	=शुभसूचकः प्रातःकालः, एतस्य विधानाय भृगुवसिष्ठादय ऋषयः संप्रार्थिताः	१४ ।२४
	=शुभसूचकः प्रातःकालः, एतस्य विधानार्थं सनत्कुमारादयः प्राभातिकमङ्गलेन प्रार्थ्यन्ते	१४ ।२५

	=शुभसूचकः प्रातःकालः, एतस्य विधानाय पृथिव्यादयः प्रार्थ्यन्ते	१४ ।२६
	=शुभसूचकः प्रातःकालः, एतस्य विधानाय सप्तार्णवादयः प्रार्थ्यन्ते	१४ ।२७
	=इदं शिवोक्तस्य प्राभातिकमङ्गलस्य पठनेन श्रवणेन स्मरणेन वा भव्यं भवति	१४ ।२८
सुप्रभाता	=इमां मातरं रुद्रमहालयतीर्थं कार्त्तिकेयाय प्रादात्	३१ ।९७
सुप्रयोगा	=महानदी, सह्यपादविनिर्गता	१३ ।३०
सुप्रसादः	=गणः, इमं सुवेणुनदी कार्त्तिकेयाय प्रादात्	३१ ।८३
सुबाहुः	=गणः, इमं गण्डकी नदी कार्त्तिकेयाय ददौ	३१ ।७९
सुमङ्गला	=इमां मातरं रुद्रमहालयतीर्थं कार्त्तिकेयाय प्रददौ	३१ ।९७
सुमुखः	=शिवस्य नाम	२३ (२६) ।१·२६
सुरतम्	=इदं सन्ध्याकाले दिवा च वर्जनीयम्	१४ ।४०
सुरपतिः	=ब्रह्मा, अस्य देवैः सह संवादः	२५ ।८
	=इन्द्रः, अयं शिवस्योपरि च्छत्रं दधार	२७ ।३३
सुरपुरी	=अस्याः सदृशी शैलराजपुरी बभूव	२६ ।१५
सुरपूजिता	=कात्यायनी देवी, अनेन विशेषणेन सा स्तुता विष्णुप्रभृतिभिर्देववरैः	१९ ।१९
सुरभयः	=इमा अमृतं पिबतः पितामहस्योद्गारात् समुद्भूतायाः सुरभेः समुद्भूतास्तनयाः सन्ति, एता लोकमातरः सन्ति	२३ (१४) ।३१
सुरभिः	=इयममृतं पिबतः पितामहस्योद्गारात् समुद्भूता	२३ (१४) ।३०
	=एषा शिवस्य मण्डनं चकार	२७ ।५
सुरमन्दिराणि	=वाराणसीस्थितानि	३ ।३३
सुररिपुः	=इमान् देवी कात्यायनी बाणादिभिरपातयत्	२१ ।८
सुरलोकः	=अत्रोर्वश्या नयनाय नारायणेन कामदेवादय आदिष्टाः	७ ।१८
सुरश्रेष्ठः	=विष्णुः, अनेन नाम्ना कश्यपो विष्णुं संबोधितवान्	२३ (६) ।३

सुरसंघाः	=एभिः संस्तूयमाना देवी कात्यायनी तान् सान्त्वयामास	२१ ।५२
सुरसा	=नदी, इयं कुमारद्वीपस्थाद् ऋक्षपर्वतात् प्रसूता	१३ ।२५
	=इयं शिवस्य मण्डनं चकार	२७ ।५
सुरसिद्धार्चितः	=शंकरस्य नाम	२३ (२३) ।३६ (१५)
सुरसुन्दरी	=आसां मध्ये सुरूपा कात्यायनी नाम कन्या, एनां दर्शयितुं चण्डमुण्डौ महिषासुरमूचतुः	२० ।३
सुराः	=हुताश - अर्क - वसु - उरगेश्वराः	९ ।४८
	=एषामसुरैः सह महद् युद्धमभूत्	९ ।५१-५२
	=एतेषां मध्ये प्रवरः = श्रेष्ठो जनार्दन उच्यते	१२ ।४४
	=एतैः सार्द्धं ब्रह्मा महेश्वरावासमगच्छत्	१६ ।५७
	=देवाः, एषां शयनविधिर्नारदेन पुलस्त्यं प्रति पृष्टा	१७ ।५
	=एते वृश्चिकराशिस्थसूर्यकालानन्तरं क्रमशो विबुध्यन्ति	१७ ।२७
	=एतेषां हितकरस्य वचसः कथनाय देवैर्विष्णुशंकरौ प्रार्थितौ	१९ ।४
	=एतैः पूजिता कात्यायनी देवी	१९ ।१९
	=एतेषामरिर्महिषासुरः	२० ।२५
	=एतेषां कर्मबन्धनविषयकं निवेदनं देव्या नाङ्गीकृतम्	२० ।४०
